अनुयायिन् (anu-yāyin) *adj.* [*f.* -ī] [P. iii. 2.78] (also used as noun) **1Ai** which goes after or follows **ii** who goes after or follows (attendant, servant, devotee etc.) **Bi** which accompanies **ii** who accompanies (companion, friend etc.) **C** which repeats or persists, continuous throughout or common **2A** coming or occurring subsequently **B** which comes along **3** which resembles or equals, i.e. is similar **4** who follows, i.e. practises **5** subordinate or secondary **1Ai** which goes after or follows राजानं संनाहयेत्। तस्य द्वयवराध्यौं रथावनुयायिनौ स्याताम् LāṭyaŚS. iii. 10.2; DrāhyŚS. x. 2.2; व्यवतिष्ठत सा सेना भरतस्यानुयायिनी Rāmā. ii. 77.18; ii. 105.20; (काके) वाहनलाभोऽश्वगते विरुवत्यनुयायिनि क्षतजपातः BṛSaṁ. 95.48; न जाने कियताध्वना विच्छिन्नमितो बलमनुयायि मे Kād. 120.17; अमन्दायन्त किरणा नित्यमस्यानुयायिनः PadmP.(Ra.) 2.202; दृष्टिश्च सहिता कार्या हस्त(स्या)स्यानुयायिनी SamarāSū. 83.130; **1Aii** who goes after or follows (attendant, servant, devotee etc.) कथं ह्यस्मद्विधो ब्रह्मन्वर्तमानो गृहाश्रमे। भरणं पालनं चापि न कुर्यादनुयायिनाम् MahāBhā. iii. 2.50; रामः ···। उदक्रोशन्महानादं सह तैरनुयायिभिः MahāBhā. v. 183.10; रथा विंशतिसाहस्रास्तथैषामनुयायिनः MahāBhā. vi. 18.12; ix. 2.25; तं दृष्ट्वा ··· चाण्डालरूपिणम्। प्राद्रवन् ··· पौरा येऽस्यानुगामिनः (v.l. °नुयायिनः) Rāmā. i. 57.10; iii. 1056*(6); ताम् ··· निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपजीविनः (v.l. °वानुयायिनः Gorr.) Rāmā. v. 27.1; vi. 44.38 (v.l.); वसिष्ठधेनोरनुयायिनं तम् ··· वनिता ···। पपौ ··· लोचनाभ्याम् RaghuVa. 2.19; SaraKaṇṭhā. 650.13; तेन भक्तानुकम्पिना। चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम् RaghuVa. 15.100; यस्यैवं देवताचक्रं वाहनस्थानुयायिभिः। संयुक्तं तिष्ठते देहे सकलस्य महात्मनः PauṣkS. 3.91; दृष्ट्वा प्रचुक्रुशुः पौरा राज्ञश्चैवानुयायिनः MārkP. 7.46; नरपतेरनुयायिनस्ते। नानाविधोचितसुखानुभवप्रतीताः BrahmāṇḍP. ii. 27.44; ii. 49.8; एवं कृतोदकान् सम्यक् सर्वान् शाड्वलसंस्थितान्। आप्लुत्य पुनराचान्तान्वदेयुस्तेऽनुयायिनः GobhiSm. 3.38; तस्य ···(द्वौ) शृगालौ मन्त्रिपुत्रा(v.l. सदानुयायिना)वास्ताम् PañcT. 1.5 (12) (14.8); अनुमार्गप्रधावितानेकार्थिजनसहस्राणामनुयायिनः पुरुषान् ··· पृच्छद्भिः ··· आसेव्यमानम् ··· राजद्वारमगात् HarṣaC. 97.2; महापीठेऽथवा पूज्या गरुडस्यानुयायिनः PāraS. 8.59; 16.487; ये चान्ये ···। तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ŚiśuVa. 2.98; प्लवंगराट् ···। ननाम ··· स रामभद्राय सहानुयायिभिः RāmC. 5.4; 33.96; नृणाम् ···। तत्कृच्छ्रद्वये शुद्धिरश्नतोऽनुयायिनाम् ManuBh. i. 462.17 (*on* 5.88); भूपावरोधलोकानां यथास्वमनुयायिनाम्। अनत्राणि ··· ददुर्जनाः BṛKathāK. 19.55; पञ्च कोटयः पिशाचानां निकुम्भस्यानुयायिनाम् NīlaP. 206; 392; 504; दृष्ट्वा लक्ष्मीमिवायान्तीं ब्रह्माणमनुयायिनीम्। वाल्मीकिः पृष्ठतः सीतां साधुवादो महानभूत् AdhyāRā. vii. 7.26; छायाग्रहो नूनं इवानुयायी स्थितश्चिरम् ··· सेवकदुर्विदग्धः SevyaSev. 44; तत्रैका योगिनी प्राह निजां दृष्ट्वानुयायिनीम् BṛKathāMañ. 15.299; अपरेण परित्यक्तं भटेनैवानुयायिना। पुरुषेण पृथूत्तुङ्गं प्राप्यैकं शिलातलम् KathāSaSāg. iv. 2.179; vi. 1.170; vii. 1.78; x. 5.65; दुर्गानाथादत्राम्यहम्। यस्याः सिंहा रथे युक्ता व्याघ्राश्चैवानुयायिनः ĪśānŚiPa. i. 24.26; ii. 43.64; भूया मद्भातृजे देवप्रसादे चानुयायिनि।··· सर्वदा च प्रसादवान् DvyāśraKā. 11.110; (सारंगा) मुक्ताश्चामीरवः शस्ता(:) पोतकस्यानुयायिनः Mānaso. iv. 15.1562; आमयार्तिरिपुत्रासक्षुदाद्यो दृष्टवेङ्कतान्।··· क्षमापान्नन्त्यनुयायिनः RājTa.(Ka.) 5.315; निवर्त्य दिक्पतीन् स सुरेन्द्रानुयायिनः प्रभुः। पृथिवीमृतिमुक्तिवर्ति(र्त)नीमगिसोपान इवारुरोह सः NemiNir. 14.1; तस्य ··· शृगालः सदानुयायी परिचारकोऽस्ति Pañca. 236.17; स्वस्ते निपतिते तस्मिन् भृङ्ग्यः कलकलाकुलाः। जज्ञिरेऽस्यानुयायिन्यो विहितव्याहरा इव SamarāSaṅ. 2.335; गच्छन्तमनुयायिनी। भुञ्जानमनुभुञ्जाना शयानमनुयायिनी। सा कान्तेति विज्ञेया BhāvPra.(Śa.) 291.8(10); रुद्रराजाया भूपतेरनुयायिनः। योद्धुं बद्धोद्यमाः RājTa.(Jo.) 673; तद्गोत्यैरनीरस्ता न प्राकाशन्त कुत्रचित्। आशा गजपतेर्वीर-

रत्नानामनुयायिनाम् RājTa.(Prā.) 223; 796; स्या तमनुयायिनी न भवति स्म भर्तु क्षमा …। कामिनी HariVi. 1.23; विसृज्य पौराननुयायिनोऽपि च।… जगाम मातुः सदनं तटातका ŚivLī. 11.4; मानिभिः सहितो मानी शम्भुराजोऽनुयायिभिः। … युध्यमानो विरुद्धानां व्यदधात्कदनं महत् ParamāKā. 99.47; 106.38; एकस्यै- कस्य नागस्य शतमश्वाः प्रयायिनः। पदातयस्सहस्रं तु प्रत्यङ्गेष्वनुयायिनः NītiPra. 7.7 (comm. अनुयायिनस्सेवकाः); 1BI which accompanies (आसुरी- कल्पः) घृतादिद्रव्यसर्वेषु आसुरी शतजापिता। पत्राद्यवयवश्वासा जिह्वा चानुयायिनी AVPari. 35(1). 5; 1BII who accompanies (companion, friend etc.) मृगपक्षिणः। प्रयाणे वासुदेवस्य बभूवुरनुयायिनः MahāBhā. v. 81.24; ये चान्ये पार्थिवा राजन्पाण्डवस्यानुयायिनः MahāBhā. vii. 7.6; मनसा च विविक्तामभीप्सुः सुहृदस्ताननुयायिनो निवार्य … उपेयिवान् स जम्बा BuddhaC. 5.8; कुमार एवमादिष्टा अनुयायिनो राजानः MudrāRā. 5.13(9); पुनः पुनर्वत्स कथं स पृच्छयतां सुहृत्तमस्तस्य च तेऽनुयायिनः RāmC. 4.32; 5.41; दृष्ट्वानु- यायिनीं तां तु समाहूय जनार्दनः। संप्रार्थयत् SkandP. iv. 31.103; वार्ये- नागानुयायिन्या तस्य सा कण्ठसूत्रकम्। व्यदारयत् BṛKathāMañ. 14.207; आत्मभृत्याननुयायिनो नृपाकिरीक्षणैरेव विभुर्न्यवर्तयत् Raghunā. 11.20; कीरातमावल्य। येऽवलम्ब्य वतोत्संसा भूभुजां तेऽनुयायिनः ParamāKā. 106.38; 1C which repeats or persists, continuous throughout or common व्यक्तयो नान्व (v.l. नानु)यन्त्यन्यदनुयायि न भासते। ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत् PramāVār. 1.73; न क्रियाकरणाकारे द्वे ज्ञाने अनुयायिनी BhāvanāVi. 44.4; 12.1; न चानुयायि तेष्विष्ट- न्यत्सत्त्वं यदीष्यते। न षड्थातिरेकेण जायन्ते भावबुद्धयः TattvSaṁ. 788; अतो सामान्यात्मा सर्वावस्थास्वविरुद्धोऽनुयायी दृश्यते TattvSaṁPañ. 106.14 (on 267); आविर्भावतिरोभावधर्मकेष्वनुयायि यत्। तद्धर्मि यत्र वा ज्ञानं प्रागधर्म- ग्रहणाद्भवेत् ŚlokaVār. 4.152 (181.7); YuktiSneha. 43.20 (on i. 1.4); अनुपश्यमानानामेवानुयायिनां बीजावयवानामङ्कुरादिकारणभावाभ्युपगमात् Brahm- SūBh.(Śaṅ.) 393.7 (on ii. 2.26); संध्यादिमयस्य प्रबन्धशरीरस्य यथा कार्य- मेकमनुयायि व्यापकं कल्प्यते न च तत्कार्यान्तरैर्न संकीर्यते Dhvanyā. 380.1 (on 3.23); यावच्छरीरमेकमनुयायि प्रमातृतत्त्वमस्ति NyāyMañ. ii. 39.27; साधारणः समानो यो साध्योपमानोपमेययोरुभयोरनुयायिनो धर्मः VakroJī. 198.8; सामान्यं पूर्वोत्तरयोरनुयायि Kāśi. ii. 150.22 (on 5(5).13); 'गावः' इति प्रतिभासे पृथक्कृता बहिर् व्यक्तयो भान्ति, येन अनुयायि च आसां भाति वपुः PratyabhiVi. ii. 52.5 (on ii. 2.5); तद्वाद्यदेऽप्यनुयायिनी या रतिरास्वादनात्मिका तस्याश्वा- स्वाद्यमानं रूपं शृङ्गारः AbhinBhā. i. 303.9 (on 6.44); Kāvyānu.(He.) 83.7; गवादिव्यक्त्यनुभवकाले वर्णसंस्थानात्मकं व्यक्तिरूपमपहाय नान्यत्किंचिदेकमनु- यायि प्रत्यक्षे प्रतिभासते TarkBhā.(Mo) 30.8; काकुरूपत्वमेव सर्वत्रानुयायि Kāvyānu.(He.) 282.13; आलोके सति उल्कादीनामन्धकारसंभवादनुयायिनमा- कारमाह ŚrutaPra. iB. 11.25 (on i. 1.1); iB. 39.28 (on i. 1.1); अस्माकं तु पूर्वपक्षे सिद्धान्ते च अरुणेयेति पदस्य द्रव्यपर्यन्तत्वमनुयायि ŚrutaPra. iB. 212.15 (on i. 1. 3); दोषाननुपश्ये परमार्थापरमार्थयोरुभयत्राप्यनुयायी हेतुः ... ŚrutaPra. ii. 440.24 (on iii. 2.20); न हि … वर्णसंस्थानात्मकव्यक्तिरूप- मपहायान्यत्किंचिदेकमनुयायि प्रतिभासते SyādvāMañ. 14(57); यद्वितीये तृतीयेऽङ्के जात्याद्यच्छेदकारणम्। अनुयायी भवेद् विन्दुश्चतुर्थाद्यवधि कचित् Bhāv- Pra.(Śā.) 205.10(7); क्षणिकसंतानिव्यतिरिक्तस्य तावदनुयायिनः स्थिरस्य संता- नस्य सर्वक्षणिकत्ववादिभिरनभ्युपगतत्वात् ŚivārkaMaDī. ii. 82.18 (on ii. 2.18); ii. 90.22 (on ii. 2.24); 2A coming or occurring subsequently पतन्त्यशनयः … तदनुयायिना … शब्देन …। विद्युतो निपतन्ति AVPari. 58(2).1; 2B which comes along ब्रह्मनिष्ठेष्वनुयायि वैराग्यं नाम लोकान्तरजन्मान्तर- भोगनैरपेक्ष्यम् ŚrutaPra. ii. 557.29 (on iii. 4.38); 3 which resembles or equals, i.e. is similar अस्पष्टस्य नीलाद्याकारस्य स्पष्टनीलाद्याभासायां तत्रा- नुपलक्षणात्, स्पष्टस्यापि च द्वितीयस्यानुयायिनः HetuBiṬ. 30.17; व्यङ्ग्यत्व- संभाव्यत्वविपरीतकारित्वादि तस्यैवानुयायिनश्चापि शब्दाभ्यामुभयतो योजिताभ्याम् … स्पष्टमेव गुणीभूतम् Loc. 216.1 (on 3.41); 4 who follows, i.e. practises न्याय्यं पन्थानमुत्सृज्य ये गतस्यानुयायिनः। सभ्यास्ते Mānaso. ii. 20.1250; देयध(र्)मोऽयं प्रवरमहाजनानुयायि[नः] (Read महायानानुयायिनः) EI. xviii. 74.1; 5 subordinate or secondary, cf. अनुयायित्व 2; [ViśvaLoK. 183.43 gives *anuyāyin* as one of the meanings of *anubandha*]; m. name of a son of Dhṛtarāṣṭra (नामधेयानि …। धृतराष्ट्रस्य पुत्राणाम्) आदित्यकेतुर्बह्वाशी नागदन्तोग्रयायिनौ (v.l. °नानुयायिनौ) MahāBhā. i. App. I. 41(22)

अनुयायिप्रत्यभिज्ञा (anuyāyi-pratyabhijñā) *f.* recognition of what continues आगमापायिषु रूपादिषु यदनुयायिप्रत्यभिज्ञा जायते तद् द्रव्यम् ŚāstrDī. 42.21 (on i. 1.4)

अनुयायिरूप (anuyāyi-rūpa) *n.* form which persists or continues अनुयायिनि प्रकाशे अनुयायिरूपं भाति PratyabhiVi. i. 89.5 (on i. 2.2)

अनुयायिवर्ग (anuyāyi-varga) *m.* group of followers or attendants (दिलीपेन) तेन … न्यषेधि शेषोऽप्यनुयायिवर्गः RaghuVa. 2.4; त्वमित्थं समेत्य सकलैरनुयायिवर्गैः … अभ्यर्च्य नौ ŚivLī. 3.86.

अनुयायिहेतु (anuyāyi-hetu) *m.* cause which persists or continues अनुयायिहेतुः कार्योपयोगितयैव सिद्धेरित्युक्तम् ŚrutaPra. iB. 92.11 (on i. 1.1)

अनुयाय्यर्थविषय (anuyāyyartha-viṣaya) *adj.* referring to the object that continues (to exist) अनुयाय्यर्थविषये प्रमाणे जाग्रति तदनङ्गीकारा- योगात् ŚivārkaMaDī. ii. 90.25 (on ii. 2.24)

अनुयाय्यवस्था (anuyāyy-avasthā) *f.* stage or condition of what continues, i.e. continuation अवस्थानामागमापायित्वेनानुयाय्य- वस्थावदनङ्गीकारे प्रत्यभिज्ञाया निर्विषयत्वापत्तेः ŚivārkaMaDī. ii. 90.20 (on ii. 2.24)

अनुयावर (anu-yāvara) *adj.* [P. iii. 2.175] which is going to follow प्रजापतिमेवान्वनुवन्त्यृतवो वावासन्ननुयावरा मासाः KāṭhS. 34.2 (iii. 43.19)

अनुयास्यत् (anu-yāsyat) *adj.* who is going to follow अहं हि — अनुयास्यन्मुनितनयाम् …। स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृत्तः Śāk. 1.23.

अनुयियास (anu-yiyāsa-) *desid.* (irr.) to desire to follow or go along मुक्तावनुयियासि त्वं मदैकात्म्यपरीप्सया BṛĀraUBhVā. ii. 4.68 (comm. क्रियापदे छान्दसः सकारलोपः)

अनुयियासु (anu-yiyāsu) *adj.* desirous of following गृहिणमनु- यियासुर्जानकी सा कनिष्ठा।… वारिता लक्ष्मणेन BālRā. 6.25; अवाप … पञ्चत्वम् …। धात्री दैववशेनानुयियासुरिव धारिणीम् PariPar. 1.121.

अनुयुक्त (anu-yukta) *adj.* [*f.* -ā] enumerated in the *iṣṭādigaṇa*, JaineVyā. i. 1.22; CāndraVyā. iv. 2.94; GaṇRa. 7.411(436); [Debrū. 339] 1A asked, inquired, examined, (used as noun) one who is asked or questioned B requested, entreated, solicited, (used as noun) one who is requested C ordered 2AI employed or hired (with allowance or pay) II appointed, assigned (with some duty or task) B devoted or addicted to, practising C absorbed in (one's love affairs) 3 attacked, i.e. haunted or possessed 1A asked, inquired, examined कथं शून्यमण्डले निरालम्बने वैकुण्ठ इति सानुयुक्ता RādhU. 208.7(1); 208.15 (1); 209.12(2); वद चाप्यनुयुक्तोऽस्मि तन्मानुज्ञातुमर्हसि MahāBhā. i. 76.15 (but BhārBhāDī. पलायिते मृगे श्रान्तः); MatsyaP. 30.16; (आजगरः) अनु- युक्तः स मेधावी … उवाच MahāBhā. xii. 172.9; अनुयुक्तौ ततस्तौ … रक्षिभिः … निष्क्रान्तौ कार्मुकालयात् ViṣṇuP. v. 20.17; BrahmP. 193.6; वैतण्डिकः। स प्रयोजनमनुयुक्तो यदि प्रतिपद्यते … वैतण्डिकत्वं जहाति NyāyBh. 4.4 (on i. 1.1); (निग्रहस्थानम्) एतच्च कस्य पराजय इत्यनुयुक्तया परिषदा वचनीयम् NyāyBh. 339.6 (on v. 2.21); PramāMī. 71.26 (on ii. 1.34); न स राम इह क यात इत्यनुयुक्तो वनिताभिरग्रतः … अभेकः JānaHa. 4.8; सः (बाणः) … तेन …। अनुयुक्त इव स्ववार्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् Kirāta. 13.34; एवमनुयुक्ताः सन्तः प्रतिब्रुवते NyāyVār. 300.2 (on ii. 2.18); राज्ञानु- युक्ते च नैष न्यायो वेशकुलस्य यदातुरपदेशः।… अर्थपतिरग्राह्यत DaśKuC. 56.11; 109.20; 117.18; MālaMā. 8.66; कावेतौ रामलक्ष्मणाविति कर्णधाराधिपतिना गुहेनाहमनुयुक्ता AnarghaRā. 5.0(12); आचारोऽयमिति व्यक्तमनुयुक्तास्त्वया वयम् BṛKathāŚloSaṁ. 2.12; सुरसमञ्जरी। क्रन्दन्ती परिमृज्याश्रुमनुयुक्तेति भूभृता BṛKathāŚloSaṁ. 3.44; 3.90; 3.112; अपि कासि …। इति तेनानु- युक्ताहं यथावृत्तमवर्णयम् BṛKathāŚloSaṁ. 4.128; 5.90; 9.4; 16.25; सखी- भिरनुयुक्तासौ बहुशः क्लेशकारणम्।… नाकथयत् BṛKathāŚloSaṁ. 20.114; 20.167; 20.189; 26.39; अर्वाक् त्वयदाढ्रेरेत्स्वामी …। ममेदमिति यो ब्रूयादनु- युक्तो यथाविधि ViṣṇuDhaP. ii. 61.43; त एवमनुयुक्ताः समरकेतुना … जगुः TilaMañ. 189.14; अंशग्रहणे निमित्तमनुयुक्तो भवान् Kāśi. ii. 147.11 (on 5(3).119); रामेणानुयुक्तो वालिवैरकारणं भानुसूनुरित्यमकथयत् RāmāCam. 4.10(1); (सैन्याधिपैः) मारुतिस्तैरनुयुक्तः स्ववृत्तान्तमखिलमाख्यातवान् Rāmā- Cam. 5.67(1); 5.29(1); 5.73; किमेतदिति तेनानुयुक्तो वेत्रधरामणीः। इति विज्ञ(? ज्ञा)पयामास TriṣaŚaPuC. i. 3.266; i. 4.747; i. 5.253; i. 6.45; वक्ता को दोष इत्यनुयुक्तो दोष एव इत्यभिधायैव च निर्वृत्तो भवेत् KhaṇḍanKhā. 376.8; 886.18; अनुयुक्तेति भूयेन … समभ्यधात् (भानुमती) PāṇḍaC. 9.11; 10.45; कार्योत्पत्त्या कारणस्य तदनुरूपत्वम् … तर्हि त्वयैव तदनुयुक्तेन वक्तव्यम् ŚrutaPra. iA. 124.10 (on i. 1.1); लोकैश्चानुयुक्ता (शिष्याः) अवदन् मृषा PrabhāC. 26.15; 163.12; काष्ठपात्रीयुतकुद्दालस्योर्ध्वीकरणकारणमनुयुक्तासे

PrabaCin. 109.19; यादवप्रकाशैः ··· सप्रमाणमनुयुक्ताः ··· शिष्टाश्च प्रायश्चित्तमेवोत्तरं ददुः ŚatDū. 225.25; वयस्ययाभावविदानुयुक्ता न किंचिदित्येव जगाद नाथा Yādavā. 2.17; कासि वेत्यनुयुक्ता मृगजीविनामुना ··· (दमयन्ती) निजवृत्तमादितः कथयामास Nalābhyu. 7.62; गोपाल्योपिता। अनुयुक्तस्तिमिर्भीत्या व्यधात् ··· निह्नवम् RājTa. (Jo.) 214; तेनानुयुक्तेषु मयूरस्तेषु मन्त्रिषु ··· अगमद्गिरम् ParamāKā. 80.6; राज्ञा देवी ··· हेतुमत्रानुयुक्ता प्राह स्मेदं प्राणनाथम् ŚivLī. 13.16; असकृदनुबध्यानुयुक्तो मनस्येव किं मामुपहसितुम् ··· पृच्छति Mukundā. 218(22); मुष्टौ युग्मम-युग्मं वा मौक्तिकमिति केनचिदनुयुक्तः प्रतिद्वन्द्वी ··· किंचित्प्रतिजानीते ŚṛṅgāSar. 98(4); (used as noun) one who is asked or questioned कथं पुनरग्निहोत्र-क्रिया ध्वस्ता सती स्वर्गसाधिका भवतीत्यनुयुक्तः प्राह NyāySā. 28.6; अभावं प्रत्यनुयुक्तेन तदैव तदभावोऽवसीयते Kāśi. iii. 190.1 (*on* 5(8).1); सामान्यनिर्देशेऽपि हि कथमिति विशेषमनुयुक्तेन स एव हि वक्तव्य इति NyāyPari. 283.5; 324.1; **1B** requested, entreated, solicited मया ··· अनुयुक्तश्चतुराननः ··· अन्ववर्णयत् JayāS. 1.78(+21); आदरेणानुयुक्तश्च कौतुकिन्या पुनः पुनः। विप्रोऽवोचत PadmP. (Ra.) 35.96; 98.31; सः ··· अनुयुक्तोऽपि पुनःपुनरित्थमभिधाय स्थितः BālRā. 4.1(4); राज्यारम्भेऽनुयुक्तेन भीमादेवेन ···। उक्ते ··· शिक्षे द्वे स मन्त्रवदस्मरत् RājTa.(Ka.) 8.45; एवं वसुमतिनाथेनानुयुक्तः स सादरम्।··· सप्रश्रयमदोऽवदत् TriṣaŚaPuC. ii. 6.246; पृथ्वीपरिवृढेनानुयुक्तः ··· गुरुरूचिवान् PrabaCin. 84.11; KumāPraPra. 61.25; PrabaCin. 64.8; 98.21; (used as noun) one who is requested सूर्याचन्द्रौ किं युवाम् ··· इत्थं तेन प्रश्नितेनानुयुक्तावब्रूताम् Rāgh. 10.47; **1C** ordered विनोदप्रियेण राज्ञा कुचवर्णनायानुयुक्ता विजया प्राह PrabaCin. 43.8; **2Ai** employed or hired (with allowance or pay) अनुयोक्ता च यो विप्रो अनुयुक्तश्च भारत। नार्हतस्तावपि श्राद्धं ब्रह्मविक्रयिणौ हि तौ MahāBhā. xiii. 24.18; **2Aii** appointed, assigned (with some duty or task) अनुयुक्ता हि साचिव्ये यद् वदन्ति हितैषिणः। अनुरागद्रवस्यैताः प्रणयस्यातिभूमयः Pañcā. 58.1; (राजपुत्रः) अनुयुक्तो दस्युवधे रणे कुर्यात् पराक्रमम्। नास्य कृत्यमतः किंचिदन्यद् दस्युनिबर्हणात् SūktiRa. 156.72; **2B** devoted or addicted to, practising अक्षवङ्कद्यूतक्रीडानुयोगमनुयुक्ताश्च भवन्ति MaVastu-Ava. i. 96.5; iii. 201.1; iii. 383.9; किं पुनरेतर्हि औदारिकमाहारमाहरन् सुखल्लिकानुयोगमनुयुक्तो विहरन् LaliVi. 18.22(29) [DBHS.]; **2C** absorbed in (one's love affairs) वैशिकः।··· अनुयुक्तः शुचिर्दक्षः (स्यात्) NāṭyaŚā. 23.8; **3** attacked, i.e. haunted or possessed (याज्ञवल्क्यः) अनुयुक्तोऽथ भूतेन जनकं नृपतिं ययौ SkandP. v(3). 42.46.

अनुयुक्तता (anuyukta-tā) *f.* the state of being devoted or addicted to चतुर्भिर्मैत्रेय धर्मैः समन्वागतः ··· परिमोक्ष्यते। कतमैः ··· आत्मदमशमथयोगमनुयुक्ततया ŚikṣāSa. 104.15.

अनुयुक्तवत् (anuyukta-va(n)t) *adj.* [*f.* -ī] who has asked, who has questioned कस्येयं कुन्दमालेति स भार्यामनुयुक्तवान् BṛKathāŚloSaṁ. 22.17; 23.22; तमहम् ··· लब्धावसरमनुयुक्तवती TilaMañ. 319.8; दिवंगतश्च श्रीकर्णः इति सद्यो निवेदिते ··· नृपः ··· कथमित्यनुयुक्तवान् KumāDeC.(So.) 24.21; किमिहागमनस्य कारणं युवयोरित्यनुयुक्तवान् हरिः Nalābhyu. 7.2.

अनुयुक्तविबोधन (anuyukta-vibodhana) *n.* enlightenment about what is asked अभ्यर्थये भव भवन्तमपाकुरुष्व दीर्घं विवादमनुयुक्तविबोधनेन BhikṣāKā. 15.8.

अनुयुक्तामयोदन्त (anuyuktāmayodanta) *adj.* who has been asked or inquired the news about the disease अनुयुक्तामयोदन्तः स कालेऽथ तयोर्निजैः। गात्रे न्यखानयत् RājTa.(Jo.) 314.

अनुयुक्ति (anu-yukti) *f.* **1** medicinal treatment given after (recovery from the disease) आस्यवर्चोजननीमनुयुक्तिं प्रदापयेत् BhelaS. 157.7 (6.10); **2** asking, inquiry अनुजाभिरनामयानुयुक्तेरभिनन्द्य ···। सदनाय ससर्ज तम् ··· महीपः BhārCam. 4.27.

अनुयुक्तिन् (anuyukt-in) *adj.* [GaṇPā. 22.29; JaineVyā. iv. 1.22; CāndraVyā. iv. 2.94] who has examined, i.e. scholar अनुयुक्ती शास्त्रे GaṇRa. 7.411(426)

अनुयुग (anu-yuga) *m.* [w. r. for अनु युगे] BhāgP. xii. 7.14.

अनुयुगम् (anuyugam) *adv.* **Ai** age after age, in successive ages आयुर्वीर्यमथो बुद्धिर्बलं तेजश्च पाण्डव। मनुष्याणामनुयुगं ह्रसतीति निबोध मे MahāBhā. iii. 188.13; वेदवादाश्चानुयुगं ह्रसन्तीति च नः श्रुतम् MahāBhā. xii. 224.25; xii. 252.7; अनुयुगमन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वम् BhāgP. x. 87.40; **Aii** in each and every age (हरिः) सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना ViṣṇuP. i. 2.62; PadmP. i. 2.33; v. 2.110; मुमुक्षूनपि ज्ञानाज्ञानसमाश्रयाननुयुगं तेषां च निःश्रेयसम् ··· स्वीचक्रुरल्पश्रुताः SaṁkṣeŚā. 2.133 (ii. 84.6); आविर्हितस्त्वनुयुगं स हि ··· वेदद्रुमं विटपशो विभजिष्यति स्म BhāgP. ii. 7.36; iii. 29.44; विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुग विगृहीतदेहाः। ते ब्रह्मविष्णुगिरिशाः BhāgP. iv. 1.27; viii. 14.8; x. 8.13; **B** according to the age (आयुः आशिषः च) फलन्त्यनुयुगं लोके प्रभावाश्च शरीरिणाम् ManuSm. 1.84; कर्मणां तु फलं तात फलत्यनुयुगं सदा BhaviP. 8B.9 (i. 2.117)

अनुयुज् (anu-yuj-) VII Ā. (rarely P.) [P. i. 3.64; MahāBh. i. 290.8 (*on* i. 3.64)] **1Ai** to join to, to connect with or add, (pass.) **i** to be joined to, to be connected with **ii** to be connected, i. e. to be construed, (*caus.*) to join or connect, i.e. to apply or use **ii** to connect, i. e. to utter (a proposition) for censure, (pass.) to be connected, i.e. to be uttered for censure **Bi** to attach (oneself) to, to select **ii** to attach (mind), i.e. to concentrate upon **C** to join (oneself) in practising **D** to join, i.e. to follow **E** to employ, i.e. to pronounce (blessings) **2Ai** to ask, to question, to object, (pass.) to be asked, to be questioned, (*caus.* pass.) to make to be asked **ii** to ask, i.e. to solicit or request **B** to ask for, to demand **Ci** to investigate, to interrogate (a culprit) **ii** to cross-examine (witnesses in a law-suit) **3A** to enjoin, to prescribe **B** to order, (pass.) to be ordered **1Ai** to join to, to connect with or add दीक्षा वै देवेभ्योऽपाक्रामत्तां वासन्तिकाभ्यां मासाभ्यामन्वयुञ्जत ··· तां हैमन्तिकाभ्यां मासाभ्यामन्वयुञ्जत ··· तां शैशिराभ्यां मासाभ्यामन्वयुञ्जत AitBr. 19.4(515); श्येन वै तदनुयुङ्क्ते ŚatBr. V. iv. 3.3; ŚatBr.(K.) VII. iii. 3.3; तमनुयुञ्जते हस्तिभिस्त्वद् गोरथैः VādhūŚS. iii. 75.12; जुहोति ··· 'अग्निः ··· मावतु' इत्यन्यातानान्। 'अस्मिन् ··· क्षत्र' इत्यन्यातानेष्वनुयुञ्जति AgniveGS. i. 1.2 (5.19); (pass.) **i** to be joined to, to be connected with यदक्षरं पञ्चविधं समेति। ··· सत्यस्य सत्यमनु यत्र युज्यते AitĀ. II. iii. 8.1; उपक्रमवशात् पूर्वमितरेषां हि वर्णनम्। कृतं न्यायेन येनैव स खल्वत्रानुप(v.l. °यु)ज्यते Bhām. 172.20 (*on* i. 2.15); **ii** to be connected, i.e. to be construed (असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः) असम्यक्कारिण इति सर्वत्रानुयुज्यते ManuBh. ii. 313.8 (*on* 9.259); (उक्तार्थदानेन ···। पात्रान्तरविशेषेण फलं स्यात्) पात्रादिष्वर्थं दत्तेत्यनुयुज्यते VīraMi.(Pūjā.) 314.21; (*caus.*) to join or connect, i.e. apply or use शान्त्युदकं करोति। तत्रैतत् सूक्तमनुयोजयति KauśiSū. 44.4; 53.7; अत्र शुनासीराण्यनुयोजयेत् KauśiSū. 106.8; 136.9; आज्यभागान्ते सावित्रीमनुयोजयेत् AVPari. 37(8).1; 70B(4).2; **1Aii** to connect, i. e. to utter (a proposition) for censure केनचित् प्रतिज्ञातं तमुपालिप्सुरुपपत्तिभिर्निगृह्य साम्यासूयमनुयुङ्क्ते KāśiVṛ. *on* viii. 2.94; (pass.) to be connected, i.e. to be uttered for censure अद्य अमावास्येत्येवंवादी युक्त्या प्रच्याव्य स्वमतादेवमनुयुज्यते KāśiVṛ. *on* viii. 2.94; PadMañ. *on* KāśiVṛ. *on* P. viii. 2.94 (463.5); **1Bi** to attach (oneself) to, to select न वै प्राज्ञा गतश्रीकं भर्तारमुपयुञ्जते। युञ्जानमनुयुञ्जीत न श्रियः संक्षये वसेत MahāBhā. iii. 251.16; अहमेनां रन्तुमनुयुञ्जे JayaMa. 84.23 (*on* 2.1); **1Bii** to attach (mind), i.e. to concentrate upon अप्रमत्तोऽनुयुञ्जीत मनो मयि BhāgP. xi. 13.13; **1C** to join (oneself) in practising अनुयुञ्जीत कृत्यानि ··· महीपतिः। आगमैरुपदिष्टानि MahāBhā. xii. 120.20; वसुंधरायाः साक्षार्थमंशं स्वं नानुयुञ्जसे HariVaṁ. 44.17; **1D** to join, i.e. to follow त्वां नैते ह्यनुयुञ्जेयुः Rāmā. iv. 53.10; **1E** to employ, i.e. to pronounce (blessings) नन्दगोपः ··· गावः ···। आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुञ्जत। विप्राः ··· आशिषः BhāgP. x. 7.16; **2Ai** to ask, to question, to object कात्यायनो ब्रह्माणमन्वयुङ्क्त ··· किं पवित्राणां पवित्रम् KātyU. 64.18; आहाराचारधर्माणां यत् कुर्याद् गुरुरीश्वरः। तथैव चानुकुर्वीत नानुयुञ्जीत कारणम् ŚivU. 7.39; गच्छानुयुङ्क्ष्व सर्पान् यदि मोक्षोऽस्ति केनचित् Suparṇādhyāya 10.3; आसं युधिष्ठिरस्याहं पुरा प्राणसमः सखा। इति वक्ष्यामि राजानं यदि मामनुयोक्ष्यते MahāBhā. iv. 1.22; v. 65.9; एष वृद्धः पुरा लोकान् संप्राप्नोति तनुत्यजान्। तं शीघ्रमनुयुञ्जध्वं संशयान् मनसि स्थितान् MahāBhā. xii. 54.10; xii. 56.50; SūktiRa. 70.2; शकुने वयं स्म देवाः ··· अनुयुज्महे (v.l. °युञ्महे)। पृच्छामस्त्वां मोक्षधर्मम् MahāBhā. xii. 288.4; xiv. 6.26; पृच्छतु मा भवान् अनुयुङ्क्तां मा भवान् MahāBh. ii. 33.9 (*on* iii. 1.26); शिष्यं महर्षेर्नृपतिः ···। किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद् वेति तमन्वयुङ्क्त RaghuVa. 5.18; 11.62; ब्रह्मागमय ते सर्वे समागत्यान्वयुञ्जत। किमिदं वर्तते मोहः JayāS. 1.78(+52); कथमिक्ष्वाकुवंशमुदाहरति, तदनुयोक्ष्ये। वत्से किं च दशरथस्य वधूः KundaMā. 1.27(?28) (14); 6.14(2); सः ··· दुष्करप्रतिसमाधानं तद्बलमवगत्य ··· पार्श्ववर्तिनोऽन्वयुङ्क्त AvantiKa. 169.4; देवः ··· तांश्च तदुक्तावन्वयुङ्क्त DaśKuC. 40.7; हरिः ··· स्वजनस्य वार्तमयमन्वयुङ्क्त ŚiśuVa. 13.68; केचिद् वैधर्म्यदृष्टान्तो नास्तीत्यनुयुञ्जते ŚlokaVār. 5(2).121 (247.4); (शिष्यः ··· गुरुम्) गच्छन्तं पृष्ठतो यायाद् ···।

तद्वचो नानुयुञ्जीत शयानं न प्रबोधयेत् MrgendraT. iv. 1.71; इदमेव युगस्यादौ पप्रच्छ भरतः पुरुम् । ततोऽनुयुयुजे सम्राट् सागरोऽजितम् MahāP. 2.42; अथैव योधाः शतशो हतास्ते ···। किं विस्मृतं कुत्र इवानुयुङ्क्ते यन्मान् ··· विषादहेतुम् RāmC. 23.64; 21.93; भवन्तमेवानुयुञ्ज्महे ··· 'योगिप्रत्यक्षसिद्धौ किं प्रमाणमिति NyāyMañ. i. 95.27; i. 76.26; ii. 205.28; सर्वं कृत्स्नं नविष्यामो मन्यन्ते ब्रह्मविषया। यन्मनुष्या वयं तत्र विरोधमनुयुञ्ज्महे BṛĀraUBhVā. i. 4.1078; iv. 3.1887; दशरथः ··· कथं प्रयातं रामेण ··· किंवृत्तः सौमित्रिरिति ··· सुमन्त्रमन्वयुङ्क्त RāmāCam. 2.52(8); 2.23(4); अल्पमिदमन्वयुङ्क्थाः PramāMī. 1.6 (on i. 1.0); मुनीन्द्रं तेऽन्वयुञ्जत ।··· विरंस्यति जनस्यास्य राक्षसोपद्रवः कदा PāṇḍaC. 7.497; 5.311; 8.273; Yādavā. 7.3; जननी ··· मुनिमन्वयुङ्क्त मम भाव्यखिलम् ŚaṅkaDigVi.(Mā.) 9.47; अन्वयुङ्क्त तदर्थं स जैनान् KumāDeC. (So.) 13.28; 14.15; तौ ··· वासवः। अन्वयुङ्क्त ···। काः पुनर्गति पुण्यभूमयः Nalābhyu. 3.19; 7.76; UnmaRā.(Vi.) 49(2); पथिकान् वणिजोऽन्वयुञ्जत क नु सा सिन्धुरिति Gaṅgāva. 7.2; वज्राः कथमङ्गाः कथमित्यनुयुङ्क्ते वृथा देशान् । कीदृक् कृतान्तपुरमिति कोऽपि न जिज्ञासते VairāŚ.(A.) 76; ParamāKā. 81.18; Ragh. 4.8; 'इतो भविष्यति इति प्रतिभाति, यदनुयुङ्क्ते' इति RasSa. 145(23); (pass.) to be asked, to be questioned प्राप्तकालं च आचक्ष्व भीष्मोऽयमनुयुज्यताम् MahāBhā. xii. 54.8; विज्ञातार्थं पदं यच्च तदर्थे प्रतिपादिते। निकादिवदविज्ञातं तत् किमित्यनुयुज्यते VākyaPa. 2.74; तां समाश्वासयम्। लब्धसंज्ञा च मृत्युकाङ्(क्षे ? क्षा)निमित्तमन्वयुङ्क्षि। सा AvantiKa. 198.15; नास्माभिर्वाक्यवृत्ते(वाक्यवृत्ते)स्त्वं निमित्तमनुयुज्यसे ŚlokaVār. 5(3).119 (301.6); नित्यं कार्यानुमेया च शक्तिः किमनुयुज्यते ŚlokaVār. 6.44 (741.5) (NyāyRa. कारणगतं शक्त्याख्यमतीन्द्रियमेव रूपमिति। तथापि किं नानुयुज्यते); विपदां प्रतिकर्तारो यस्य ···। त्वादृशाः सन्ति किं तस्य कल्याणमनुयुज्यते AnargharRā. 3.37; सोऽयम् ··· अनुयुज्यताम्। तेन चाहूय पृष्टेन···निवेदितम् BṛKathāSloSam. 2.73; 5.276; उपेत्य जोषं त्रिजटानुयुज्यतां किमाह सा संप्रति मुग्धमानुषी RāmC. 18.46; वयं तु न कर्तार एव संबन्धस्य यत् एवमनुयुज्येमहि NyāyMañ. i. 225.19; पारमार्थिकशब्दार्थसमर्थनपिपासिताः। नेहागताः स्मो येनैवमनुयुज्येमहि त्वया NyāyMañ. i. 280.4; ii. 137.25; TilaMañ. 271.10; यो हि परतन्त्रः सोऽन्येन बन्धनागारे प्रवेश्यते, न तु स्वतन्त्रः ··· न हि तद् भागस्य जीवस्य संप्रतितनी बन्धनागारप्रवेशिता येनानुयुज्येत Bhām. 166.10 (on i. 2.6); 373.13 (on ii. 1.33); कश्चित् केनचिदनुयुज्यते किमत्र ते प्रमाणम् NyāyRa. 95.16 (on 2.166); KhaṇḍanKhā. 1038.24; अत्रेदमनुयुज्यते केन पुनः प्राप्ता सती दैवेऽवदाने परीक्षा निषिध्यते CaturCin. iii(1). 511.21; स्मार्ता अप्यनुयुज्यन्तां वेदविद्याविशारदाः PrabhāC. 188.22; RasSa. 26(3); (caus. pass.) to make to be asked पुंसस्तु संनिहिते विषये करणे च संभवन्ति ज्ञानानीति सोऽपि किमनुयोज्यताम् NyāyMañ. i. 20.22; मद्विधानामेव दुःखद्रुमफलकालविलसितमिदं किमनुयोज्यन्ते प्रभुचरणाः CaitaCa. 109.1(4); **2AI** to ask, i.e. to solicit or request अन्वयुङ्क्त ऊर्ध्वं त्वं मुक्तये ब्रूहि यत्परम् BṛĀraUBhVā. iv. 3.1887; अन्वयुङ्क्त ततो राजा यदस्मिन् समये द्विज। यद् भावि तत् कथय TrisaŚaPuC. ii. 6.280; **2B** to investigate, to ask for, to demand त्वां हि माधव संश्लिष्य ···। धार्तराष्ट्रान् ··· न्वमंशमनुयुञ्ज्महे MahāBhā. v. 70.3; v. 149.9; **2CI** to interrogate (a culprit) तत्रोपयुक्तनिधायकनिबन्धकप्रतिग्राहकदायकदापकमन्त्रिमन्त्रिवैयावृत्यकरानेकैकशोऽनुयुञ्जीत ArthŚā. i. 157.2 (2.5); i. 356.1 (2.36); धर्मस्थश्च स्वामिनमनुयुञ्जीत – कुतस्ते लब्धम् ArthŚā. ii. 95.4 (3.16); ii. 14.6 (3.2); ii. 97.7 (3.16); **2CII** to cross-examine (witnesses in a law-suit) सभान्तः साक्षिणः प्राप्तान् ···। प्राड्विवाकोऽनुयुञ्जीत विधिना ManuSm. 8.79 (ManvaVi.; ManvaMu. पृच्छेत्); SmṛtiCan. iii. 198.3; सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्। इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् ManuSm. 8.259; व्याधादीनां द्वितीयान्ततया निर्देशः पूर्वश्लोकस्थेनानुयुञ्जीतेति पदेनान्वयार्थः SmṛtiCan. iv. 540.17; **3A** to enjoin, to prescribe चत्वारि शतानि गोघ्नृणामनुयुङ्क्ते BaudhŚS. ii. 212.10; **3B** to order यच्च भर्तानुयुञ्जीत तदेवाभ्यनुवर्तयेत् MahāBhā. iv. 4.17; (pass.) to be ordered अवरुद्धव्यवहाराय तेनान्वयुज्ये AvantiKa. 187.19.

अनुयुज्य (anuyuj-ya) *ger.* **1** having enjoined or prescribed एतद्विद्वं ब्रह्मचारिणमनिराकृतिनं संवत्सरावमं चारयित्वा व्रतमनुयुज्यानुक्रोशिने प्रब्रूयाच AśvaŚS. II. ii. 14.1; **2A** having asked or questioned पूर्वं च राजास्तमिहानुयुज्य श्रुत्वा च वाक्यं भरतस्य तस्य। चिकीर्षमाणो रघुनन्दनस्तदा पितुः प्रतिज्ञां स बभूव तूष्णीम् Rāmā. ii. 2164*(7); संवादकेषु जनेषु कर्तॄन् कियन्तमित्यागणुनानुयुज्य TantrSa. 11.30 (Vimarśinī पृष्ट्वा); **2B** having construed अनुयुज्यानुयोगैश्च निर्देशादिभिर्गतैः Laghīya. 1.75; **3** having appointed or employed सः ··· प्रधानपुरुषं भुवनकाभिधानमनुयुज्य ··· अस्मानावर्जयामास HammīMaMa. 2.32(4)

अनुयुज्यमान (anu-yujyamāna) *adj.* [*f.* -ā] **1** being asked or questioned इमाः ··· पुरुषम् ··· सेर्ष्यमनुयुज्यमाना भुजङ्ग्य इव दशन्ति YaśaCam. ii. 61.8; इति ··· ससंभ्रममनुयुज्यमाना तया वारंवारमीषदुपजातहासा मदीरमवदम् TilaMañ. 294.3; 65.1; भगवत्या ··· अनुयुज्यमानो विधिः ··· आबभाषे NīlaVi. 56.2; **2** being connected, i.e. construed with, cf. अनुयुज्यमानत्व.

अनुयुज्यमानत्व (anuyujyamāna-tva) *n.* the state of being what is being connected, i.e. construed with तत्रापि प्रकारान्तरेणानुयुज्यमानत्वात् TantrVā. 778.13 (on iii. 2.13)

अनुयुञ्जक (anu-yuñjaka) *m.* one who questions, i.e. revil यदैषां वक्तुमिच्छन्ति नैर्गुण्यमनुयुञ्जकाः MahāBhā. xii. 288.23 (BhārBhāDī. स्पर्धावन्तः)

अनुयुञ्जत् (anu-yuñjat) *adj.* asking or questioning तच्चिन्तयामि सदनं मम सा समायान्त्येकाकिनी क चलसीत्यनुयुञ्जता यत्। लीलांशुकेन मृदु लापयति स्म तारा TārāŚa. 104.

अनुयुञ्जान (anu-yuñjāna) *adj.* [*f.* -ā] **A** examining तथाभूतानामनर्थाख्यानमिति किं चातः यदि तावन्नियोग एवं भवतैवं मा भवतेति एवं पदार्थाननुयुञ्जानो भवानुपेक्षणीयः NyāyVār. 21.12 (on i. 1.1); **B** asking, questioning अथ त्वयि वार्तामनुयुञ्जाने AnargharRā. 5.25(14); इति ··· पुनः पुनरनुयुञ्जानाय ताताय सौदेणेयः ··· गिरमेवं विज्ञापयामास BhārCam. 7.66(1); ब्रह्मर्षिहरिकेतु ··· अनुयुञ्जानेषु पुनः पुनरातवदिनानि शपथपूर्वकम् NīlaVi. 6.4; 33.1; इत्यनुयुञ्जाने वल्गौ सोल्लासमाददे गिरमाङ्गिरसः NīlaVi. 65.6; 70.7; तदियं मामवलोकयति चेदिदानीं विश्रममूल्यमनुयुञ्जाना निरुन्धीत Jīvān. 69.1 (comm. आपृच्छन्ती); **C** requesting आदरादनुयुञ्जानं शिष्यं यो देशिकः स्वयम्। उपदेशेन संतुष्टं न करोति स किंगुरुः SkandP. i(3B). 4.7.

अनुयुत (anu-yuta) *adj.* joined after (another) स्त्रीणां स्वानन्त्रं नृप। आयतम् ··· एकश्चानुयुतो यत्र पादौ विरचितः समा।··· स्थानं ज्ञेयं तदायतम् ViṣṇuDhaP. iii. 23.18.

अनुयुध् (anu-yudh-) IV.Ā. to join in fighting, to fight against प्रायत्तेन रणे राजन्येन द्रोणोऽन्वयुध्यत। शिखण्डिनम् MahāBhā. vii. 144.14.

अनुयुयुक्ष (anu-yuyukṣa-) *desid.* to desire to question यत इदमपरिचितविवन्यथाकाम्यमप्युचितमिव (?) हृदयमिति भवन्तमनुयुयुक्षते, क्षमश्चेद्विवरीतुं व्याहरिष्यसि AvantiKa. 193.19.

अनुयुयुक्षत् (anu-yuyukṣat) *adj.* desiring to ask or question राजानो हतशिष्टास्त्वां राजन्नभित आसते। धर्मान् अनुयुयुक्षन्तस्तेभ्यः प्रब्रूहि भारत MahāBhā. xii. 54.33.

अनुयुयुक्षु (anu-yuyukṣu) *adj.* desirous of asking नृपश्च बालसरस्वतीं निजपरिचरवर्तिनीं विधाय विसारहास्यप्रश्नमनुयुयुक्षू रणति स्म ŚaṅkSa. 21.12.

अनुयू (anu-yū) *adj.* [from anu-yu-, II.P., cf. Vār. 2 on P. iii. 2.178; AitGr. I. 1.113 (nt.)] dependent अनुयुवं न्वाऽ अयमध्वर्युर्यजमानमकं द्विषतो भ्रातृव्यस्यान्ववसायिनम् ŚatBr. XI. iv. 2.13; ततो ह देवा अनुयुवमिवासुस्ते हासुरा मेनिरेऽस्माकं वा इदं भुवनमिति ŚatBr.(K.) II. ii. 3.1; अथो हैतद् ब्रह्मणे चैव क्षत्राय च विशमनुयुवं करोति JaimiBr. 2.171; 2.172.

अनुयूथ (anu-yūtha) (Gr.) [cf. P. iv. 3.59] enumerated in the *parimukhādigaṇa*, JaineVyā. 198.10 (on iii. 3.34)

अनुयूप (anu-yūpa) (Gr.) enumerated in the *parimukhādigaṇa*, KāśiVṛ. on iv. 3.59; GaṇRa. 5.342(379) (v.l.); Prasā. i. 773.13.

अनुयोक्तव्य (anu-yoktavya) *adj.* [*f.* -ā] **A** who is to be asked or questioned दिव्या स्त्री ···। सा त्वया नानुयोक्तव्या कासि कस्यासि वाङ्गने MahāBhā. i. 92.21; न वयं जानीमः। कण्वोऽनुयोक्तव्यः KundaMā. 6.14(14); भवादृशं सुहृदमपास्य केन वान्येनैतदनुयोक्तव्यम् MahāviC. 5.72(1) (285.15); अनुयोक्तव्यमनुयुक्तोऽस्मि MālaMā. 8.66; कथं पुनरधिगन्तव्यः प्रियोदन्तः। नन्वयं मन्दानिलोऽनुयोक्तव्यः UnmaRā.(Vi.) 44(1); **B** who is to be objected to अणुसंचयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्यः NyāyBh. 101.6 (on ii. 1.36); NyāyVār. 243.4 (on ii. 1.33); **C** who is to be cross-examined (in a law-suit) (साक्षिणः) व्यवहारदेशगता उभयोरर्थिप्रत्यर्थिनोः संनिधानेऽनुयोक्तव्याः ManuBh. ii. 110.9 (on 8.79); **D** who is to be solicited or requested for सीता नाम जनकस्य धर्मतस्तनया। तां किल भवता मदर्थमनुयोक्तव्यो जनकराजः JānaPa. 1.12(18)

अनुयोक्तुम् (anu-yoktum) *inf.* **1AI** to ask, to inquire about रात्रिवृत्तमनुयोक्तुमुद्यतं सा (पार्वती) प्रभातसमये सखीजनम्। नाकरोदपकुतूहलम् KumāSam. 8.10; न युक्तं च मम श्रीगतमनुयोक्तुम् KundaMā. 5.14(69); अनुयोक्तुमसाविवेष वार्तामथ सस्मार समाहितः क्षणेन RāmC. 8.5; विधीयतां किमभिप्रे विरोधिनां परासुता किमु परिभाव एव वा। इतीव तं विभुमनुयोक्तुमुद्यता शरावलिः श्रवणसमीपमाश्रयत् RāghPāṇ.(Ka.) 4.23; कियदितश्चलितव्यमिति श्रमव्यतिकराद्

योक्तुमिवोद्यता। असकृदस्पृशदूर्मिकराग्रतः प्रचलितं पथि तं पुरतो नदी Gaṅgāva. 8.5; **1Aii** to question (ऋषिपरिषद्) हलबलात्कृतापि गुरुयन्त्रणया गरीयस्यानुयो-(त्त?क्तु)मपारयन्त्यतिष्ठत् AvantiKa. 145.23; **1Aiii** to seek आदेशमेकमनुयोक्तुमयं व्यवस्यन् ... कुतुकी ददर्श ŚaṅkaDigVi. (Mā.) 5.92; **1B** to object व्याप्ति-विकल्पस्य फलत्वात् न प्रमाणत्वमनुयोक्तुं युक्तम् PramāMī. 37.17 (*on* i. 2. 5); **1C** to examine, to interrogate कीर्तिः कौतुकिनी दिगन्तमगमत् ... ब्रह्मादीननुयो-क्तुमुत्तमगुणस्यास्य EI. ii. 412. 7; **2** to enjoin, to prompt (लिङादयः) न हि ते पुरुषमभिदधति ...। न च शब्दशक्तयोऽनुयोक्तुमर्हन्ति Kāśi. ii. 14. 5 (*on* 5 (1). 15)

अनुयोक्तृ (anu-yoktṛ) *adj.* [*but* MW., Apte *m.*] **A** who is a paid teacher or preceptor (*bhṛtakādhyāpaka*) अनुयोक्ता च यो विप्रो अनुयुक्तश्च भारत MahāBhā. xiii. 24. 18; **B** (used as noun) one who asks questions अनुयोक्तॄन् जगादापि दुःसंचिन्त्या महात्मनः RājTa. (Ka.) 6.61; अनुयुङ्क्तेऽनुयोक्ता यद्युक्तायुक्तोपपत्तिषु। तत्र व्यक्तं वदेद्वक्ता न त्वव्यक्तं कदाचन ParamāKā. 81. 18 [examiner, interrogator, Apte]

अनुयोग (anu-yoga) *m.* **1Ai** (act of) enjoining, injunction **ii** prescription, command **B** exposition, analysis **2Ai** interrogation, investigation **ii** cross-examination (in a law-suit) **iii** asking, inquiry **iv** request, appeal **v** asking (by a teacher) **B** censure, reproof, objection **Ci** regular pratice of questioning or investigation (an activity of a Bodhisattva) **ii** (act of) questioning **3** accompaniment, i.e. retinue **4** preoccupation **5A** devotion, addiction, application **B** religious vow **Ci** union **Cii** spiritual union, religious meditation **6Ai** continuous or persistent practice **ii** exertion, effort **B** continuous revolving, i.e. continuation **7** construing (of the *sūtra*) with (its) meaning subsequently **8A** name of one of the four types of analyses or expositions **B** name of one of the fourteen *aṅgas* of the *nirvahaṇasandhi* **9** basis, substratum **1Ai** (act of) enjoining, injunction नियोगश्चानुयोगश्च ...। एवंप्रकृतयो मन्त्राः सर्ववेदेषु सर्वशः BṛDe. 1. 36; 1. 52; **1Aii** prescription, command बलिं वैरोचनं वन्दे शतमावं च शम्बरम्। ... देवलं नारदं वन्दे वन्दे सावर्णिगालवम्। एतेषामनुयोगेन कृतं ते स्वापनं महत् ArthŚā. iii. 231. 4 (14. 3); अनुयोगो धनदानार्थमनुवाकमधीष्वेत्यध्ययनादेशः Aparā. 224. 18 (*on* 1. 154); शब्दनित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा TattvCin. ii(1). 721. 5; **1B** exposition, analysis निगृह्यानुयोगे च P. viii. 2. 94 (KāśiVṛ. मतस्याविष्करणम्); द्वावनुयोगौ वेत्त्यधीते वा द्व्यनुयोगः JaineVyā. 54. 11 (*on* i. 3. 47); सः ...। अनुयोगांश्च शुश्राव PadmP.(Ra.) 35.84; प्रभुः। अनुयोगगणानुज्ञे तेषां द्रव्यादिभिर्ददौ TriṣaŚaPuC. iii. 1. 376; iii. 2. 153; Kāvyānu. (He.) 2. 19; अनुयोगो व्याख्यानं प्ररूपणा SthānṬ. 375B. 14; विभुस्तेषाम् ... सद्द्रव्यगुणपर्यायैरनुयोगं तथा गणम्। अन्वजानात् PārśvC. 6. 1356; अनुज्ञामनुयोगस्य गणानुज्ञां च सर्वतः। श्रीमल्लिर्देवतास्तेषां प्रत्येकं विधिपूर्वकम् MalliC. 7. 1142; महत्वामनुयोगस्य मण्डल्यां पाठघोषतः। स्खलति श्रुतपाठो मे PrabhāC. 16. 26; चतुर्विधः कार्योऽनुयोगोऽतः परं मया PrabhāC. 17. 4; 17. 7; **2Ai** interrogation, investigation नानुयोगा ब्राह्मणानां भवन्ति वाचा राजन् मनसा कर्मणा वा MahāBhā. iii. 190. 66 (*but* BhārBhāDī. अनुयोगः शासनम्); xiii. 95. 21; अत्यर्थं वैद्यवेशेन श्लाघमाना विशिखान्तरमनुचरन्ति ... न चानुयोगमिच्छन्त्यनुयोक्तुं वा मृत्योरिव चानुयोगादुद्विजन्ते CaraS. i. 29. 9; अनुयोगो नाम स यत्तद्विद्यानां तद्विद्यैरेव सार्धं तन्त्रे तन्त्रैकदेशे वा प्रश्नः प्रश्नैकदेशो वा CaraS. iii. 8. 52 (1941 Ed.); नूनमार्ये सर्वस्वत्यागादति-प्रकाशादाशङ्कनीयचर्मरत्नलाभा तदनुयोगायाङ्गराजेन समाहूयसे DaśKuC. 55. 22; वृत्तोऽपपाठोऽनुयोगे ŚākaṭāVyā. iii. 2. 65; SiddhaHe. vi. 4. 67; कः स्वतन्त्रमनु नन्वनुयोगः NaiṣC. 21. 104; नियोगस्तथास्त्विति विधिरनुयोगः कथमेतदिति चोद्यम् VedāntKa. 526. 24 (*on* iv. 1. 15); **2Aii** cross-examination (in a law-suit) अनेकेषु चाभियोगेष्वपव्ययमानः सकृदेव परोक्तः सर्वं भजेत्। वैषम्ये सर्वत्रानुयोगं दद्यात् ArthŚā. i. 157. 5 (2. 8); अन्धः शत्रुगृहं गच्छेत्, इत्यत आरभ्य सर्वे साक्षिविषया अनुयोगाः ManuBh. ii. 116. 22 (*on* 8. 99); **2Aiii** asking, inquiry (रामः) मन्त्रिवृद्धान्। अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैर्वार्तानुयोगमधुराक्षरया च वाचा RaghuVa. 13. 71; यत्नादमी विधेया गम्यस्य विमोक्षणोपायाः। ... स्वभावसंस्थापनानुयोगेषु KuṭṭaMa. 622; भवादृशानां न च धीविपर्ययस्तथापि हार्ददनुयोगमर्हसि RāmC. 5. 14; क स रामः क सा सीतेत्यनुयोगेषु योषिताम्। किं नु प्रतिज्ञासदृशं वक्ष्यसि RāmC. 31. 8 अनुयोगमु(?म)पेक्षन्ते विवक्षन्तोऽपि वाचकाः BṛKathāŚloSaṁ. 20. 189; 'कुतस्त्वम्' इत्यनुयोगोऽनुचितः RasSa. 26(2); **2Aiv** request, appeal ब्राह्मणं हत्वा ये लोका नरकादिलक्षणाः प्राप्यन्ते तत्कारिभिस्ते तव भवन्ति मिथ्या वदतस्तस्मात्सत्यं ब्रूहीत्यनुयोगः ManuBh. ii. 154. 19 (*on* 8. 89); प्रियसहचरयोरनुयोगो न प्रत्यादेशमर्हतीति कथयामि तावत् Mukundā. 207 (11); **2Av** asking (by a teacher) अनुयोगेन यो दद्याद् ब्राह्मणाय प्रतिग्रहम् BhaviP. 272A. 33 (i. 184. 3); CaturCin. iii(1). 510. 5; अनुयोगः परीक्षार्थं प्रश्नः किं पठसीत्येवंरूपः Aparā. 448. 23 (*on* 1. 122); **2B** censure, reproof, objection अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः NyāySū. v. 2. 22; तुल्य एष भवतोऽप्यनुयोगः AbidhKoBh. 123. 16 (*on* 3. 12); कारणाभावात्कार्याभाव इति अनुयोगः प्रसज्यते NyāyBh. 150. 13 (*on* ii. 2. 53); SarvaDaSaṁ. 15. 598; समासः क्रमादनिवृत्तोऽनुयोगः NyāyVār. 155. 12 (*on* i. 2. 42); समानोऽयमावयोरनुयोगः Kāśi. i. 115. 26 (*on* 2. 106 1/2); i. 121. 16 (*on* 2. 115); व्यापकं वैधर्म्यं मन्वानानामनुयोगो दर्शितः Kāśi. ii. 71. 22 (*on* 5 (3). 126); तादात्म्यतज्ज्ञननयोरपि चैष तेषां तुल्योऽनुयोग इति किं विफलैः प्रलापैः NyāyMañ. i. 107. 25; i. 367. 19; ĀtmaTaVi. 620. 17; Kiraṇā. 147. 10; स्वाङ्गोपनयनप्रयुक्तिर्द्वारभूताध्ययनप्रयुक्तिपूर्विका, न तु तत्पूर्विकाध्ययन-प्रयुक्तिरिति नाङ्गेन स्वद्वारं प्रयुक्तं स्यात् इत्यनुयोगः। न चाध्ययनाङ्गप्रवृत्त्यनुयोगः NayaVi. 23. 7 (*on* i. 1. 1); 39. 2 (*on* i. 1. 2); तस्माच्छब्दैः किं वाच्यमित्यनुयोगे किं प्रतिभासात् ĀtmaTaVi. 426. 14; वादे कथावसानस्य हेत्वाभासो हि कारणम्। तथा निरनुयोज्यानामनुयोग इति द्वयम् TārkiRa. 363. 12; अनुयोगो यशोऽर्थं धनार्थं वा सम्यगधीयानस्य न सम्यगधीष इत्याक्षेपः Aparā. 1117. 3 (*on* 3. 268); कस्यैतौ विरोध इति चानुयोगे स्वाश्रयस्येत्युत्तरम् KhaṇḍanKhā. 1269. 22; निरनुयोज्यानुयोगो निग्रहभूमिका। तवैवैषा समायाता व्यावर्तस्व ततो ग्रहात् PrabhāC. 180. 7; **2Ci** regular practice of questioning or investigation (an activity of a Bodhisattva) सर्वप्रथमं कोलितेन उपतिष्येण च वेदमन्त्रा अधीता अनुयोगो च दिन्नो आचार्यस्य च आचार्यशुश्रूषा कृता MaVastuAva. iii. 57. 1; iii. 383. 2; बोधिसत्त्वानाम् ... परवादिभिराकलनानुयोगो महत्यां च परिषदि धर्मदेशना BodhiBhū. 172. 4; **2Cii** (act of) questioning अनुयुज्यानुयोगैश्च निर्देशादिभिर्दिवं गतैः। द्रव्याणि जीवादीन्यात्मा विवृद्धाभिनिवेशनः। ... सुखमृच्छति Laghīya. 1.75; यदा त्वव्युत्पत्तिस(?सं)शीतिविपर्यस्तिसमधिकबोधस्याधिमुक्ति-युक्तिसंबन्धसविधस्य प्रमाणनयनिक्षेपानुयोगोपयोगावगाह्येषु ... तत्त्वेषु रुचिः संजायते YaśasCam. ii. 322. 17; अनुयोगगुणस्थानमार्गणास्थानकर्मसु। अध्यात्म-तत्त्वविद्यायाः पाठः स्वाध्याय उच्यते YaśasCam. ii. 415. 7; **3** accompaniment, i.e. retinue स्वेन स्वेनानुयोगेन सर्वे तेऽनुययुर्हरम् MahāBhā. iii. 1083*; **4** preoccupation बोधिसत्त्वस्य विज्ञेयमवैवर्तिकलक्षणम्। ... स्कन्धादावन्तरायेषु संभारे सेन्द्रियादिके। समरे मत्सरादौ च नेति योगानुयोगयोः AbhisaAlaṅ. 4. 49; **5A** devotion, addiction, application चतुर्दशभिः ... आकारैर्बोधिसत्त्वाः तृतीयायां भूमौ वर्तमानाः चतुर्थायां भूमौ विवर्तन्ते। ... अक्षवंकद्यूतक्रीडानुयोगमनुयुक्ताश्च भवन्ति MaVastuAva. i. 96. 5; या चेयममध्यमा प्रतिपदा आत्मकायबलमथानुयोगो दुःखः LaliVi. 26. 30 (5); 303. 5; कामसुखल्लिकात्मक्लमथयोरनुयोगोऽनुसेवनम् Sphuṭā. iii. 102. 5 (*on* 3. 94); **5B** religious vow क्रतौ श्राद्धे तदङ्गत्वाद् विप्राज्ञाभङ्गतो वृतः। भक्ष्यत्वादनुयोगेऽपि खादन्मांसान्यपि व्रती BṛhaspaSm. 351.153; SmṛtiCan. v. 411. 18; CaturCin. iii(1). 1518. 14; श्रीविजय-शिवमान्धातृवर्म्मा ... कौण्डिन्यसगोत्राय दत्तानुयोगाय तैत्तिरीयसब्रम्ह(ह्म)चारिणे देवशर्म्मणे मोदेकरनीनामहल्म् ... केदारं द[त्त]वान् EI. vi. 14. 10; **5Ci** union पद्मप्राभृतके स्वसोदरीप्रेयसोऽनुयोगे संदिग्धमानसां देवसेनामाह शशः AbhinBhā. ii. 352. 24 (*on* 16B. 12); **5Cii** spiritual union, religious meditation विहितविनयकर्मणा च लब्धो मिलदचलातलमौलिनानुयोगः PrabhāC. 6.19; **6Ai** continuous or persistent practice तदुपदिष्टानां च योगानामाभीक्ष्ण्येनानुयोगः KāmSū. 316.7 (6.2); JayaMa. 316. 13(*on* 6. 2); **6Aii** exertion, effort अनुयोगेन नो तैलं तिलेभ्योऽपि हि जायते (v.l. अनुयोगं विना तैलं तिलानां नोपजायते) PañcT. 2. 114 (124. 22) (Kale Ed.); **6B** continuous revolving, i.e. continuation अनुयोगेषु वेदानां घटिका मार्गवृत्तिषु। न कल्पसूत्रहीनानां लभ्यते कृत्स्नवेदता TantrVā. 166. 1 (*on* i. 3. 10); **7** construing (of the *sūtra*) with (its) meaning subsequently अनुयोजनमनुयोगः - सूत्रस्यार्थेन सह संबन्धः SthānṬ. 3B. 10; अनुरूपोऽनुकूलो वा यो योगो - व्यापारः सूत्रस्यार्थेन प्रतिपादनरूपः सोऽनुयोगः SthānṬ. 4A. 1; 200A.2; **8A** name of one of the four types of analyses or expositions इदमध्यवसायाहं कथां धर्मानुबन्धिनीम्। प्रस्तुते ...। प्रथमस्यानुयोगस्य गम्भीरस्योदधेरपि। वेलामिव MahāP. 1. 113; महाधिकाराश्चत्वारः श्रुतस्कन्धस्य वर्णिताः। तेषामाद्योऽनुयोगोऽयं सतां सच्चरिताश्रयः MahāP. 2. 98; प्रथमः सोऽनुयोगः स्यात्पुराणचरिताश्रयः YaśasCam. ii. 415. 10; **8B** name of one of the fourteen *aṅgas* of *nirvahaṇasandhi* (*lit.* investigation) निर्वहणम्... । अस्य चतुर्दशाङ्गानि। ...समयः। अनुयोगः। ... प्रशस्तिरिति NāṭaLaRaK. 889; 886; **9** basis, substratum, cf. **अनुयोगभूत** [Kośas give *anuyoga* as a synonym of the following words: *praśna*, AmaK. 330; ParyāRaMā. 1005; AbhidhāRaMā. (Vā.) 1825; KośaKaTa. 1. 1503; KalpaK.

446. 71; *pṛcchā*, AmaK. 330; ParyāRaMā. 1005; Vaija. 34. 37; ŚabdaRa. (Vā.) 1825; KośaKaTa. 1. 1503; KalpaK. 446. 71; *paryanuyoga*, Vaija. 34. 37; *anuyojana*, KalpaK. 446. 71; *kathaṅkathikatā*, KośaKaTa. 1. 1503; KalpaK. 446. 71; *jñīpsā*, KośaKaTa. 1. 1503 and NānārthāSaṁ. iii. 89. 12 gives *paryanuyoga* in the sense of *anuyoga*; ŚabdaRaSaK. 67. 4 gives *niyojana* as the meaning of *anuyoga*]; *n*. name of a section (dealing with great personalities) (राजा) सिद्धांवसंवद्धाम (v. 1. सिद्धान्तसंबद्धाम JMPJGM. Ed.) शृणोद्दुरुतः कथाम्। अनुयोगान्यतीतानां भाविनां च महात्मनाम् PadmP. (Ra.) 29. 112.

अनुयोगक (anuyoga-ka) *m*. question, inquiry प्रश्नः पृच्छानुयोगकः AgniP. 359. 62.

अनुयोगकृत् (anuyoga-kṛt) *m*. spiritual teacher or preceptor अनुयोगकृदाचार्यः AbhidhāCin. 78 [an interrogator, Apte]

अनुयोगक्षम (anuyoga-kṣama) *adj*. fit for questioning or asking किमभाङ्क्षीः क्षितिरुहान् किमक्षमवधीः शिशुम्। अनुयोगक्षमो नासि कपिजातेः परिप्लवात् RāmC. 21. 75.

अनुयोगक्षेत्रता (anuyogakṣetra-tā) *f*. the state of being the field, i.e. the topic of question or discussion यथा वा प्रमाणेषु तत्र (सामान्यरूपम्) दृश्यते तथा हेत्वाभासेष्वपि मा दर्शीति वस्तुस्वभावानामनुयोगक्षेत्रतानुपपत्तेः NyāyMañ. ii. 169. 6.

अनुयोगचतुष्टय (anuyoga-catuṣṭaya) *n*. group of four analyses or expositions (viz. *caraṇakaraṇānuyoga*, *dharmakathānuyoga*, *gaṇitānuyoga* and *dravyānuyoga*) पुरा चैकत्र सूत्रेऽभूदनुयोगचतुष्टयम् PrabhāC. 17. 8.

अनुयोगतस् (anuyoga-tas) *adv*. 1A due to union, i.e. combination समस्या सप्त तद्भेदा नानार्थस्यानुयोगतः। यत्र प्रदीयते तुल्यवर्णविन्यासमुत्तरम् AgniP. 342. 23; काचस्तद्वर्णमनुयोगतः। मणेर्मरकतस्य ... विजातयः YuktiKa. 131. 9; 1B due to association or basis ब्राह्मणादिकवर्णोऽहं शरीरस्यानुयोगतः BṛBrahmaS. ii. 3. 9; 2 due to exposition or analysis बन्धमोक्षज्ञता चेति फलं द्रव्यानुयोगतः YaśasCam. ii. 415. 16; 3 due to persistent effort आत्मवत्तान्यपत्यानि साधयत्यनुयोगतः BhaviP. 37B. 24 (i. 15. 13); 4 due to objection or censure निगृह्यतो निग्रहः स्यादचोद्यस्यानुयोगतः TārkiRa. 356. 8.

अनुयोगदान (anuyoga-dāna) *n*. administering of censure अधिकारेणाधीयानस्यानुयोगदानं 'किं पठसि नाशितं त्वये'ति ManuBh. ii. 433. 28 (*on* 11. 197)

अनुयोगदूतिका (anuyogadūtikā) *f*. puzzling question प्रवह्निका प्रहेलिकानुयोगदूतिका तथा। विपादिका च सा भवेद्दुरूहकानुयोजनम् KośaKaTa. 1. 1465.

अनुयोगद्वार (anuyoga-dvāra) *n*. 1 a techinical term for a particular type of knowledge, opening to the further inquiry अनुगमाख्यस्य तृतीयस्यानुयोगद्वारस्य भेदभूताया उपोद्घातनिर्युक्तेः प्रतिभेदभूतनिर्गमद्वारस्वभावम् ... अभिधित्सुः सूत्रकारः ... आह JñātāDhaṬ. 1A. 4; महापुरस्येव चत्वार्यनुयोगद्वाराणि भवन्ति SthānṬ. 3B. 9; अनुयोगद्वाराणि द्वाराणीवापुनर्भवपुरस्य SiddhāĀSta. 8; 2 name of a text, cf. **अनुयोगद्वारटीका**.

अनुयोगद्वारक्रम (anuyogadvāra-krama) *m*. order of the opening to the further inquiry अधुना कथंचित् प्रत्यवस्थानावसरे भणितमपि नयद्वारमनुयोगद्वारक्रमायातमिति पुनर्विशेषेणोच्यते SthānṬ. 37A. 1.

अनुयोगद्वारटीका (anuyogadvāra-ṭīkā) *f*. name of a commentary on the Anuyogadvāra इयं च गाथा ... इहाक्षरसममित्यादि व्याख्यायते, अनुयोगद्वारटीकायामेवमेव दर्शनात् SthānṬ. 396B. 9.

अनुयोगद्वारभूतता (anuyogadvārabhūta-tā) *f*. the state of being what has become the opening to the further inquiry यद्यात्र नयानां प्रमाणतुल्यकक्षताख्यापनं तत्तेषामनुयोगद्वारभूततया प्रज्ञापनाङ्गत्वज्ञापनार्थम् SyādvāMañ. 28 (44)

अनुयोगद्वारभेद (anyogadvāra-bheda) *m*. a particular type of opening to the further inquiry सांप्रतमनुयोगद्वारभेदभणनपुरस्सरमिदमेवाध्ययनमनुचिन्त्यते SthānṬ. 4B. 3.

अनुयोगद्वारविशेष (anuyogadvāra-viśeṣa) *adj*. which is a particular type of the opening to the further inquiry केवलमनुयोगद्वारविशेषस्योपक्रमस्य प्रतिभेदरूपप्रक्रान्तशास्त्रस्य ... अर्थतः आत्मागमत्वम् JñātāDhaṬ. 1A. 2.

अनुयोगद्वारसमास (anuyogadvāra-samāsa) *m*. enhancement to the opening to the further inquiry, JainaL.

अनुयोगद्वारसूत्र (anugogadvārasūtra) *n*. name of a Jain work, pw.

अनुयोगपरीक्षण (anuyoga-parīkṣaṇa) *n*. examination of one of the four types of analyses or expositions प्रथमः सोऽनुयोगः स्यात्पुराणचरिताश्रयः। अहो (?) धोमध्योर्ध्वलकेषु चतुर्गतिविचारणम्। शास्त्रकरणमित्याहुरनुयोगपरीक्षणम् YaśasCam. ii. 415. 12.

अनुयोगप्रदान (anuyoga-pradāna) *n*. administering of censure उत्कर्षहेतोरधीयानस्य किं पठसि नाशितं त्वयेत्येवं पर्यनुयोगोऽनुयोगप्रदानम् Mitā. 461. 26 (*on* 3. 265)

अनुयोगभाव (anuyoga-bhāva) *m*. position of spiritual union or religious meditation अवदत्स तेभ्यः। ... अष्टप्रकाराननुयोगभावान् VarāṅgaC. 30. 8.

अनुयोगभूत (anuyoga-bhūta) *adj*. who has become the basis or receptacle तुमुले विमर्दे शौर्यस्य पुंसामनुयोगभूतम्। ... ते योधमुख्याः ... प्रजघ्नुरन्योन्यममोघमोक्षैः VarāṅgaC. 17.76.

अनुयोगमुख्य (anuyoga-mukhya) *n*. principal or chief divisions of expositions करणं चरणं द्रव्यं प्रथमं च सभेदकम्। अनुयोगमुख्यं योगी जगाद वदतांवरः PadmP.(Ra) 106. 91.

अनुयोगयोग्य (anuyoga-yogya) *adj*. who deserves censure नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः NaiṣC. 6.103.

अनुयोगवाक्य (anuyoga-vākya) *adj*. summonned for interrogation, i.e. giving evidence or testimony तदेतद्गोरक्षकादिष्वनुयोगवाक्येषु ब्राह्मणेषु भवितव्यम् ManuBh. ii. 117. 21 (*on* 8. 103)

अनुयोगविधि (anuyoga-vidhi) *m*. A procedure of interrogating (a witness) अनुयोज्यः प्रष्टव्य इत्यर्थः। कोऽसावनुयोगविधिः ManuBh. ii. 87.1 (*on* 8.31); B procedure of cross-examination इतःप्रभृति सत्यवचनार्थः साक्षिणामनुयोगविधिः ManuBh. ii. 110. 27 (*on* 8. 81)

अनुयोगविवर्जितत्व (anuyogavivarjita-tva) *n*. the state of being free from devotion or addiction अन्तर्द्वयविवर्जितं कामसुखल्लिकात्मक्लमथानुयोगविवर्जितत्वात् BodhiBhū. 128. 23.

अनुयोगविवर्धन (anuyoga-vivardhana) *adj*. increasing the religious meditation, i.e. Yogic power प्रजापतिसुता ह्येते सर्वेषां तु महात्मनाम्। आद्यो गणस्तु योगानामनुयोगविवर्धनः BrahmāṇḍP. ii. 20. 2.

अनुयोगव्यतिकर (anuyoga-vyatikara) *m*. all manners (*lit*. transgression) of questions क्रमेण वर्तमाने सान्त्वनतर्जनप्राये प्रतिदिनमनुयोगव्यतिकरे ... प्रकृतिस्थोऽहमासम् DaśKuC. 58. 23.

अनुयोगसमासावरणीय (anuyogasamāsāvaraṇīya) *adj*. (action) covering, i.e. preventing the enhancement to the opening to the further inquiry, JainaL.

अनुयोगाचार्य (anuyogācārya) *m*. teacher (who is expert in) construing (the sūtra with its meanings) संगता औत्सर्गिकगुणयुक्तत्वेनोचिता आचार्यादितया अनुज्ञा समनुज्ञा, तथा हि - अनुयोगाचार्यस्यौत्सर्गिकगुणाः SthānṬ. 140A. 6.

अनुयोगाज्ञानिर्वर्तन (anuyogājñā-nirvartana) *n*. execution of order (in the form) of question अनुयोगाज्ञानिर्वर्तनाय किंचिदावेद्यते NīlaVi. 44. 12.

अनुयोगाधिकरण (anuyogādhikaraṇa) *n*. substratum, i.e. basis of exposition प्रत्येकं परिसमाप्त्या वर्तत इति अयमर्थो नैकत्र वर्तत इति तथाप्यनुयोगाधिकरणं निवर्तत इति NyāyVār. 217. 16 (*on* ii.1. 30)

अनुयोगाधिकरणव्यावृत्तिदोष (anuyogādhikaraṇvyāvṛtti-doṣa) *m*. defect of contradiction with (*lit*. exclusion of) the basis of exposition अनेकद्रव्यवृत्तिषु संख्यापृथक्त्वसंयोगविभागसामान्यादिष्वनुयोगाधिकरणव्यावृत्तिदोषो वक्तव्यः NyāyVār. 218. 1 (*on* ii. 1. 30)

अनुयोगानिवृत्ति (anuyogānivṛtti) *f*. non-cessation, i.e. non-removal of question भूतलघटस्पर्शः ... अनवस्थाप्रसङ्गात् च ... समुदायत्वं किंकृतमित्यनुयोगानिवृत्तेः ĀtmaTaVi. 715. 17.

अनुयोगानुज्ञा (anuyogānujñā) *f*. permission for exposition द्रव्यगुणैः पर्यायैश्च नयैरपि जगत्पतिः। ददावनुयोगानुज्ञाम् TriṣaŚaPuC. i. 3. 662; ii. 8. 819.

अनुयोगार्जव (anuyogārjava) *n*. straightforwardness in question (and answer) दृष्टदोषः स्वयंवादः स्वपक्षपरपक्षयोः। अनुयोगार्जवं हेतुः शपथश्चार्थसाधकः ArthŚā. ii. 11. 2 (3. 1) (comm. वादिप्रतिवादिनोरजिह्मप्रश्नोत्तरकरणम्)

अनुयोगार्थ (anuyogārtha) *m*. [Loc.] in the sense of interrogation कं कल्याणशिरोऽम्बुरुक्पुनरुरीकारानुयोगार्थयोः KośaKaTa. 2. 3198.

अनुयोगावतार (anuyogāvatāra) *m*. occurrence, i. e. appearance of question व्यङ्ग्यत्वमस्त्विति चेन्न व्यक्तिसदसद्भावयोरप्यनुयोगावतारात् ŚatDū. 208. 24.

अनुयोगावरणीय (anuyogāvaraṇīya) *adj*. which covers, i.e. prevents the inquiry, JainaL.

अनुयोगास्पद (anuyogāspada) *n*. occasion for or object of inquiry जातरूपधरस्य कथं तद्ग्रहणमित्येतदेव ह्यनुयोगास्पदम् ŚatDū. 231. 29.

अनुयोगिता (anuyogi-tā) *f*. the state of being the substratum (of relation), relational subjunctness न च शब्दस्मरणादीनामनुयोगिता भूतलविकल्पकं प्रत्यङ्गत्वात् ... घटस्य तु प्रतियोगितया TātpaṬ.(Vā.) 112. 7 (*on* i. 1. 4); रजतादौ प्रतियोगिता अनुयोगितया वा संबन्धेन उक्ततादात्म्यस्य न भ्रमे प्रसक्तिः GuruCandr. i. 16. 20; i. 33. 13; धात्वर्थभक्षणादेरनुयोगितया, गुरुमते तु विध्यर्थापूर्वांशे ... धात्वर्थभक्षणादेः प्रतियोगितयान्वयेऽपि न क्षतिः VyutpaVā. 59. 6.

अनुयोगिताप्रतियोगितावच्छेदकत्व (anuyogitāpratiyogitāvacchedaka-tva) *n*. the state of being the delimitor of the relational subjunctness and adjunctness स्वरूपतो घटत्वपटत्वयोरनुयोगिताप्रतियोगितावच्छेदकत्वबुद्धौ स्वरूपतस्तयोर्भेदधीरेव हेतुर्युक्ता च LaCandr. 802. 23.

अनुयोगितावच्छेदक (anuyogitāvacchedaka) *adj*. which delimits relational subjunctness संसर्गप्रतियोग्यनुयोगितावच्छेदकयोः भेदस्यावश्यकत्वात् GuruCandr. i. 31. 6.

अनुयोगितावच्छेदकता (anuyogitāvacchedaka-tā) *f*. the state of being delimitor of the relational subjunctness व्याप्यधर्म एव भेदे प्रतियोगितावच्छेदकतयानुयोगितावच्छेदकतया वा भासते LaCandr. 68. 10.

अनुयोगितावच्छेदकत्व (anuyogitāvacchedaka-tva) *n*. the state of being delimitor of the relational subjunctness विनान्तार्थे घटोत्पत्त्याद्यभावान्वयेऽनुयोगिविशेषणदण्डाद्यभावस्य च तदनुयोगितावच्छेदकत्वं भासते VyutpaVā. 149. 34.

अनुयोगितावच्छेदकरूप (anuyogitāvacchedaka-rūpa) *n*. feature, i.e. property delimiting the relational subjunctness प्रतियोग्यनुयोगितावच्छेदकरूपाभ्यां भेदाग्रहे संसर्गाग्रहात् GuruCandr. i. 30. 20; घटाभावे... किंचिद्विशिष्टघटाभावत्वेनानुयोगितावच्छेदकरूपेण आवश्यकभेदादेवोपपत्तेः GuruCandr. i. 78. 8; LaCandr. 156. 18.

अनुयोगितावत् (anuyogitā-vat) *adv*. like the relational subjunctness अर्थे वाच्यताख्या शक्तिः शब्दे वाचकताख्या शक्तिरस्ति सैव तयोः संबन्धोऽनुयोगितावत् SāṁkhyaPraBh. 124. 29 (*on* 5. 37)

अनुयोगिताविशेषघटित (anuyogitāviśeṣa-ghaṭita) *adj*. consisting of a particular kind of relational subjunctness अनुयोगिताविशेषघटितं प्रमात्वम् LaCandr. 69. 12.

अनुयोगिताविशेषरूप (anuyogitāviśeṣa-rūpa) *adj*. having the form of a particular kind of relational subjunctness अभावत्वस्यातिरिक्तत्वेऽप्यनुयोगिताविशेषरूपस्य तस्य प्रतियोगिताया इवातात्त्विकत्वसंभवात् GuruCandr. i. 190. 23; घटत्वावच्छिन्नप्रतियोगिताकत्वरूपेणानुयोगिताविशेषरूपोऽभावे घटादेः संबन्धो भाति LaCandr. 153. 25.

अनुयोगितासंबन्ध (anuyogitā-sambandha) *m*. relation (in the form) of relational subjunctness अनुयोगितासंबन्धेन वह्न्यादिविशिष्टाभावे ... अवच्छेद्यावच्छेदकभावभानोपगमेन सामञ्जस्यात् VyutpaVā. 135. 16; परिसंख्यात्वम् ... द्वयोः ... नित्यप्राप्तयोरनुयोगितासंबन्धेन इतरनिवृत्तिफलकनञाद्यसमभिव्याहृतविधित्वम् BhāṭṭCin. i. 73. 15 (*on* i. 1. 4)

अनुयोगित्व (anuyogi-tva) *n*. **A** the state of being the substratum (of relation), relational subjunctness एकरूपेण संबन्धत्वानुयोगित्वयोः असंभवात् GuruCandr. i. 26. 13; भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वयोरेव प्रकारताविशेष्यतारूपत्वसंभवेन तदतिरिक्ततत्कल्पने मानाभावः GuruCandr. i. 235. 1; रासभं विनापि घट उत्पद्यत इत्यादौ विनापदार्थोऽभाववान्। तत्पदसमभिव्याहृतद्वितीयाया अभावान्वयिप्रतियोगित्वमनुयोगित्वं वार्थः VyutpaVā. 149. 27; तद्वत्त्वं च प्रतियोगित्वानुयोगित्वतादात्म्यान्यतमसंबन्धेन SetuBa. 187. 21; **B** the state of being a substratum or subjunct (of simiarity) (प्रसिद्धेरनुरोधेन यः ... अवयवसामान्ययोगः सेहोपमा मता) 'प्रसिद्धेरनुरोधेन' इत्यस्य च 'यदुपमायां यस्य प्रतियोगित्वानुयोगित्वादिकं प्रसिद्धं तदनतिक्रमेण' इत्यर्थः AlaṅkāKau. (Vi.) 22. 6; 'गज इव गच्छति'... इत्यादावपि गजपदस्य ... तस्य प्रतियोगित्वेन सादृश्येऽन्वयः, तस्यानुयोगित्वेन धात्वर्थे गमने AlaṅkāKau. (Vi.) 90. 2.

अनुयोगित्वप्रतियोगित्वसंबन्ध (anuyogitvapratiyogitva-sambadha) *m*. relation of being the subjunct and the adjunct (of similarity) माधववीरभटौघेष्वनुयोगित्वप्रतियोगित्वसंबन्धाभ्यामन्यसादृश्यव्यवच्छेदेनानुपमत्वपर्यवसानमवगम्यते AlaṅkāMaṅ. 12. 1.

अनुयोगित्वमुख (anuyogitva-mukha) *adj*. proceeding from or conveyed through being subjunct (of comparison) मुखं चन्द्र इत्यादौ रूपके ... चोभयत्रापि वस्तुतश्चन्द्राभेद एव संसर्गः। क्वचिदनुयोगित्वमुखः ... विशेषणविशेष्यभाववैचित्र्यात् RasGaṅ. 314. 8.

अनुयोगित्वसत्त्व (anuyogitva-sattva) *n*. existence of the relational subjunctness वृत्तेराकाराख्यगौणविषयताश्रयस्य अविद्यातादात्म्यस्य शुद्धचित्यनुयोगित्वसत्त्वात् GuruCandr. i. 54. 19.

अनुयोगित्वसंबन्ध (anuyogitva-sambandha) *m*. **A** relation of being a substratum or subjunct (of similarity) इवादिभिः सादृश्यमनुयोगित्वसंबन्धेन बोध्यते AlaṅkāKau. (Vi.) 75. 3; अनुयोगित्वसंबन्धेन तद्बोधकत्वस्यापि वतिप्रत्ययस्य तुल्यार्थे विधानेन तद्योगे यथा आर्थी तथा वतिप्रत्ययप्रयोगेऽपि AlaṅkāKau. (Vi.) 78. 3; **B** relation (in the form) of relational subjunctness अन्योन्याभावस्य प्रतियोगित्वसंबन्धेन नानुयोगित्वसंबन्धेन चाभावान्निर्भेदः LalitāSaBh. 65. 28 (*on* 100)

अनुयोगित्वसंभव (anuyogitva-sambhava) *m*. possibility of relational subjunctness तादात्म्यत्वरूपेण संबन्धेऽपि तदतिरिक्तरूपेणानुयोगित्वसंभवात् GuruCandr. i. 26. 16.

अनुयोगिन् (anuyog-in) *adj*. [*f*. -ī] (also used as noun) **1** characterised by devotion आलब्धवीर्या सततानुयोगी उदग्रचित्ता ... अनुपादाय परिनिर्वृता MaVastuAva. i. 357. 12 [DBHS.]; **2Ai** substratum or subjunct (of absence etc.) घटाभावानुभवस्य तु घटस्मरणं हेतुरिति न प्रतियोगि, किन्तु अनुयोग्येव TātpaṬ.(Vā.) 112. 10 (*on* i. 1. 4); न प्रतियोग्यनुयोगिनोस्तथात्वं विरोधः KhaṇḍanKhā. 342. 22; अन्योन्याभावप्रत्यये प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वनियमात् Tarkāmṛ. 10. 17; न ह्यनुयोगिनि प्रतियोगिप्रसिद्धिः ... कारणम् BhāṭṭDī. iv. 96. 9 (*on* x. 8. 1); **2Aii** subjunct (of similarity) 'उपमा काव्यसंपदाम्। सर्वस्वं सा च साधर्म्यम्' इतीदानीं तस्य प्रतियोग्यनुयोगिनावाह AlaṅkāŚe. 13. 0 (106); **2B** related, i.e. relational substratum or subjunct एकैकामृचमित्यनेन संतानप्रतियोगिनः कीर्तनात्तदनुयोगिनोऽपेक्षायामुपस्थितत्वात् BhāṭṭCan. 103. 13 (*on* xvi. 1.7); चरमाया ऋचस्तृतीयावृत्तावनुयोगिन्या ऋचोऽभावान्निगदेनैव संतानो वचनान्तरेण विहितो युज्यते BhāṭṭCan. 103. 16 (*on* xvi. 1. 7); **3** inquiring, questioning पतिमवेत्य भामिनी। ... सखीमनुयोगिनी परुषमैक्षतापरा Acyutarā. 9. 23.

अनुयोगिनिष्ठत्वाभाव (anuyoginiṣṭhatvābhāva) *m*. absence of the state of being resident in subjunct स्तम्भनिष्ठं स्तम्भतादात्म्यं कुम्भे नास्ति ... उक्ततादात्म्यस्यानुयोगिनिष्ठत्वाभावात् LaCandr. 805. 19.

अनुयोगिनीतीर्थ (anuyoginītīrtha) *n*. name of a holy place of pilgrimage (on the banks of a sacred stream) अनुयोगिनीतीर्थं नरस्तत्र कृताप्लवः। ... योगसिद्धिमवाप्नुयात् SkandP. iv. 61. 176.

अनुयोगिपटादि (anuyogi-paṭādi) *adj*. piece of cloth etc. which are realtional subjuncts (घटत्वेन पटो नास्तीत्यादौ) अनुयोगिपटादेः सप्तम्यन्तानुपस्थाप्यत्वात् GuruCandr. i. 76. 3.

अनुयोगिपद (anuyogi-pada) *n*. word conveying the relational subjunct (समानाधिकरणः निषेधप्रत्ययः) अनुयोगिपदतत्समानविभक्तिप्रतियोगिपदयुक्तनञ्जन्यः LaCandr. 798. 35.

अनुयोगिप्रतियोगिसापेक्षत्व (anuyogipratiyogisāpekṣa-tva) *n*. the state of being what is expectant of relational subjunct and relational adjunct देवतात्वस्य च नियमेनानुयोगिप्रतियोगिसापेक्षत्वात् MīmāKau. ii. 220.6 (*on* iii. 1. 27); प्रथमावगतस्य देवतात्वस्य ... अनुयोगिप्रतियोगिसापेक्षत्वात् ... उद्देश्यतावच्छेदकत्वसिद्धिः BhāṭṭDī. i. 209. 8 (*on* iii. 1. 15)

अनुयोगिप्राप्ति (anuyogi-prāpti) *f*. obtainment of relational subjunct ऋगुद्देशेन संतानविधाने त्ववसानसामान्याभाव एव प्राप्यते, न चार्धर्चौ संदधातीति वचनादनुयोगिप्राप्तिः BhāṭṭCan. 103. 19 (*on* xvi. 1. 7)

अनुयोगिवाचकपद (anuyogivācaka-pada) *n*. word expressing relational subjunct यत्रानुयोगिवाचकपदे सप्तमी तत्रात्यन्ताभावबोधः, यत्र प्रथमा तत्रान्योन्याभावबोधः BhāṭṭCin. i. 121. 6 (*on* i. 1. 4)

अनुयोगिविनिर्मोक (anuyogi-vinirmoka) *m*. [Inst.] by leaving out relational subjunct अनुयोग्यनुपस्थितेर्नञोऽनुयोगिविनिर्मोकेनाभावबोधकताया अव्युत्पन्नत्वात् VyutpaVā. 118. 9.

अनुयोगिविशेषण (anuyogi-viśeṣaṇa) *adj*. which qualifies the relational subjunct स्वरूपसंबन्धात्मकमभावानुयोगितावच्छेदकत्वमनुयोगिविशेषणे नञ्पदजन्याभावप्रतीत्या गृह्यते ŚaktiVā. 154. 11.

अनुयोगिविशेषणदण्डाद्यभाव (anuyogiviśeṣaṇadaṇḍādy - abhāva)

m. absence of the stick etc. qualifying the relational subjunct दण्डं विना न घटोत्पत्तिरित्यादौ च विनान्तार्थे घटोत्पत्त्याद्यभावान्वयेऽनुयोगिविशेषणदण्डाद्यभावस्य च तदनुयोगितावच्छेदकत्वं भासते VyutpaVā. 149. 34.

अनुयोगिविशेषणावच्छेद (anuyogiviśeṣaṇāvaccheda) *m*. [Inst.] due to the delimitation by qualifier of the relational subjunct अनुयोगिविशेषणावच्छेदेनैव नञाभावः प्रत्याय्यते ŚaktiVā. 153. 21.

अनुयोगिवृत्तिनञर्थ (anuyogivṛtti-nañartha) *m*. meaning of negative particle occurring in, i.e. related to the relational subjunct निषेधाधिकारे प्रतियोगिनमुद्दिश्यानुयोगिवृत्तिनञर्थस्यैव विधेयत्वात् BhāṭṭDī. iv. 96. 12 (*on* x. 8. 1)

अनुयोगिवृत्त्यभावविधान (anuyogivṛttyabhāva-vidhāna) *n*. enjoining, i.e. predication of the absence occurring in the relational subjunct (ह्रदे वह्निर्नास्तीत्यादौ) वह्न्यादेरेव प्रतियोगित्वमङ्गीकृत्य तदुद्देशेनैवानुयोगिवृत्त्यभावविधानम् BhāṭṭDī. iv. 97. 13 (*on* x. 8. 1)

अनुयोगिवृत्त्यभावविषयक (anuyogivṛttyabhāvaviṣaya-ka) *adj*. referring to the absence occurring in the relational subjunct शाब्दबोधाजनकत्वं पदशाब्दबोधवदेव प्रतियोगिप्रसिद्धिमात्रेणानुयोगिवृत्त्यभावविषयकशाब्दबोधोपपत्तेः BhāṭṭDī. iv. 96. 24 (*on* x. 8. 1)

अनुयोगिस्वरूपत्वासंभव (anuyogisvarūpatvāsambhava) *m*. impossibility of being what is of the form of relational subjunct घटादेर्भेदरूपत्वम्, धर्मभेदपक्षे ... भेदस्यानुयोगिस्वरूपत्वासंभवात् LaCandr. 805. 30.

अनुयोग्यनुपस्थिति (anuyogy-anupasthiti) *f*. absence of recollection of the relational subjunct अनुयोग्यनुपस्थितेर्नञोऽनुयोगिविनिर्मोकिनाभावबोधकताया अव्युत्पन्नत्वात् VyutpaVā. 118. 9.

अनुयोजन (anu-yojana) *n*. **1A** questioning, asking पितामहादयो ये च जगत्कार्याधिकारिणः।... नानुयोजनमर्हन्ति परमात्मप्रवृत्तयः AhirbuS. 8. 20 [Kośas give *anuyojana* as the synonym of *praśna* and *pṛcchā*, AbhidhāCin. 263; ParaNā. 447; KalpaK. 446. 71]; **1B** cross-examination अनुयोजनं सत्यानृतजन्यपुण्यपापप्रतिपादकमन्वादिवचनैर्यथार्थकथनपरान् कृत्वा प्रस्तुतार्थप्रश्नकरणम् SmṛtiCan. iv. 541. 6; **1C** interrogation, cf. **अनुयोजनविधि B; 2A** employment स्तेनानीतसमादानं स्तेनानामनुयोजनम्।... अतिचारा जिनैः पञ्च गदिताः SubhāRaSaṁ. 847; **2B** act of connecting, construing अनुयोजनमनुयोगः सूत्रस्यार्थेन सह संबन्धनम् SthānṬ. 3B. 9.

अनुयोजनविधि (anuyojana-vidhi) *m*. **A** procedure of cross-examination (in a law-suit) साक्षिणां लक्षणानि अनुयोजनविधिं च वक्ष्यामि SmṛtiCan. iii. 173. 8; **B** text dealing with the procedure of interrogation अत्र केचित् -'नग्नो मुण्डः' इत्यादिश्लोकत्रयमपकृष्यानुयोजनविधौ निवेशनीयम्, अन्यथानन्वयः स्यादिति मन्यन्ते SmṛtiCan. iii. 205. 14.

अनुयोजित (anu-yojita) *adj*. employed along with उषसि शान्त्युदकं करोति ...। चातनैर्मातृनामभिर्वास्तोष्पत्यैरनुयोजितैः VaitāSū. 5. 10; शान्त्युदकं कृत्वा चातनेनानुयोजितम्। संप्रोक्ष्य विधिवन्मन्त्रैरानयेदरणी ततः AVPari. 21(6). 8.

अनुयोज्य (anu-yojya) *adj*. [*f*. -ā] **1A** to be used तानि तिलाक्षतादीनि तथापोह्य दर्शपूर्णमासानुयोज्यान्यस्मा उपाहरति VaikhāGS. 5. 4; **1B** to be appointed भूपाला अविमृश्य विधायिनः।... अनुयोज्या अमी चात्र दद्युश्चेत् सत्यमुत्तरम् PrabhāC. 188. 5; **1C** to be administered माषकादिक्रमेणैव अनुयोज्यं रसायनम् RaseCin. 9. 50 (132. 12); **2A** to be cross-examined (in a law-suit) ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि ManuSm. 8. 31 (ManuBh., ManvaMu. प्रष्टव्यः); अन्यथा ब्राह्मणेषु सत्यं ब्रूहीति यथा ब्राह्मणा एते कथं शूद्रवदनुयोज्याः ManuBh. ii. 117. 22 (*on* 8. 103); **2B** (used as noun) (a general statement) which is to be questioned (for specification) अथानुयोज्यम्। अनुयोज्यं नाम यद्वाक्यं वाक्यदोषयुक्तं तत्। सामान्यतो व्याहृतेष्वर्थेषु वा विशेषग्रहणार्थं यद्वाक्यं तदप्यनुयोज्यम् CaraS. iii. 8. 50 (1941 Ed.); **2C** to be ordered or commanded उभाभ्यामपि वां वासवनियोज्यो (v. l. वासवानुयोज्यो BÖHTLINGK Ed.) दुःषन्तः प्रणमति Śāk. 7.27(2) (*but* APTE, *m*. a servant, obedient and humble servant); **2D** to be censured or objected नियताचिन्त्यशक्तीनि वस्तूनीह प्रतिक्षणम्। भवन्ति नानुयोज्यानि दहने दाहशक्तिवत् TattvSaṁ. 438; तन्तुमृत्पिण्डविज्ञाने ह्यनुयोज्ये मते ŚlokaVār. 5 (3). 250 (341. 3); शक्तयः सर्वभावानां नानुयोज्याः स्वभावतः TantrVā. 344. 17 (*on* ii. 1. 1); सर्वैरेव वेदवादिभिस्तत्र स्थित्युत्पत्त्योर्यः परिहारः स प्रलयेऽपि समानः ... तस्मान्नापीतिमात्रमनुयोज्यम् Bhām. 342. 6 (*on* ii. 1. 9); **2E** to be asked or inquired षड्भेदयोगवादी यः सोऽनुयोज्यः समाहितैः MahāP. 21. 223; **3** capable of being made to be devoted अनियतगोत्रकः पुनर्महामते त्रिष्वप्येतेषु देश्यमानेषु यत्रानुनीयते तत्रानुयोज्यः LaṅkāSū. 2. 127 (109) (28. 11) [DBHS.]

अनुयोज्य (anuyoj-ya) *ger*. having appointed, having assigned विद्रवद्बलमवेक्ष्य कपीनां तन्निषेद्धुमनुयोज्य तदीशम्।... लक्ष्मणो रणरसेन तमाप RāmC. (App. 2) 40. 16.

अनुयोज्यता (anuyojya-tā) *f*. the state of being what is to be objected or censured अन्वयव्यतिरेकौ च गृह्येते व्यवहारतः। अनादिश्चैष संसार इति कस्यानुयोज्यता NyāyMañ. ii. 65. 10.

अनुयोज्यमान (anu-yojyamāna) *adj*. being used or employed पृथक्पदतया वाक्यकल्पः सः... अनुयोज्यमानः कविभिरुत्प्रेक्षावयव इत्युच्यते SaraKaṇṭhā. 468. 19.

अनुयोज्यानुयोग (anuyojyānuyoga) *m*. type of clincher (*lit*. censure of the censurable) वादिनोरनुयोज्यानुयोगमुद्भाव्य सदुत्तरेण कथा प्रवर्तनीया TārkiRa. 317. 1; स्मृत्युक्ता उभयाभासा यथायथमर्थान्तरमप्यनुयोज्यानुयोगासिद्ध्यादिनिग्रहस्थानहेत्वाभासादिष्वेव पर्यवस्यन्ति VīraMi. (Vyavahāra.) 54. 10.

अनुरक्त (anu-rakta) *adj*. [*f*.-ā] **1Ai** devoted to (the god) **ii** loyal **iii** devoted to, i.e. faithful **Bi** having a liking for **ii** inclined to, interested in **iii** who or which is liked by **C** kind, considerate, favourable **D** attached to, fond of, affectionate **Ei** who are in love with each other **ii** who is in love with, enamoured, passionate **iii** attracted to **F** influenced by **2A** who or which has become red, reddened or coloured **B** dyed, smeared with blood **3A** pleasing (to ears), i.e. harmonious **B** pleased, delighted **4** related to, associated or connected with **5** tied with, interwoven **1Ai** devoted to (the god) ग्राम्यस्त्वेकः पशुस्तत्र नाजहाच्छ्वा महामुनिम्। भक्तोऽनुरक्तः सततमुपवासकृशोऽबलः MahāBhā. xii. 117.9; किमनुक्रोशवैफल्यमुत्पादयसि मेऽनघ। आनृशंस्येऽनुरक्तस्य भक्तस्यानुगतस्य च MahāBhā. xiii. 5. 22; आह परमप्रीता देवं देवी...। प्रियार्थमनुरक्तानां सदा भूमण्डले त्वया। वर्तितव्यं जगन्नाथ प्रियां तनुमुपेयुषा AhirbuS. 33. 80; 35. 88; तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः।... ज्ञानं गुह्यतमम्...। अन्ववोचन् (मुनयः) BhāgP. i. 5. 29; iii. 4. 10, iv. 17. 7; उदीच्यामग्निकायमुमानुरक्ता हेमाङ्गविभूषणा हेमवस्त्रा मामुपासते मामेव वेदाश्चतुर्मूर्तिधराः। BhasmJāU. 566. 5; नारदः कथयामास ...। मां भक्तमनुरक्तं च ...। पञ्चरात्रमिदम् PañcaRā. (Nā.) i. 1. 43; आह विष्णुर्द्रुहिणं महात्मा। एते हि भक्ता मयि चानुरक्ताः AdhyāRā. vii. 9. 60; उचितज्ञोऽनुरक्तोऽसि भक्तोऽसि कुशलोऽप्यसि KaṁVa. 5. 24; 7. 14 (9); जिनधर्मानुरक्तस्वांतकुकेशवंशमंडन साह अमरदत्तभार्या EI. i. 324. 43; **1Aii** loyal (subject, minister, servant etc.) अनुरक्ताः प्रकृतयो द्रुपदस्य महात्मनः MahāBhā. i. App. I. 103 (64); कच्चिद्वैद्याश्चिकित्सायामष्टाङ्गायां विशारदाः। सुहृदश्चानुरक्ताश्च शरीरे ते हिते सदा MahāBhā. ii. 5. 80; ii. App. I. 4 (19); बृहत्सेनाम् ... परिचारिकाम्। ... अनुरक्तां सुभाषिताम् MahāBhā. iii. 238* (2); वक्ता हितानामनुरक्त आर्यः शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः (भृत्यः) MahāBhā. v. 37. 23; SūktiRa. 94. 8; शतशोऽपरे। अनुरक्ताश्च विजये भीष्मेण निहता रणे MahāBhā. viii. 24*(2); (मन्त्रिणा) तानि तान्यनुरक्तेन शक्यान्यनुतितिक्षितुम् MahāBhā. xii. 84. 31; xii. 112. 23; xiii. App. I. 15 (907); तैर्मन्त्रिभिः ...अनुरक्तैः ...। स पार्थिवो दीप्तिमवाप Rāmā. i. 7. 17; अनुरक्ता महात्मानं रामं सत्यपराक्रमम्। अनुजग्मुः प्रयान्तं तं वनवासाय मानवाः Rāmā. ii. 40. 1; ii. 1020*(1); रामः ... इदमब्रवीत्। विभीषणं च धर्मज्ञमनुरक्तं निशाचरम् Rāmā. vi. 29. 2; अनुरक्तः शुचिर्दक्षः.... दूतो राज्ञः प्रशस्यते ManuSm. 7. 64; (राजा) अनुरक्तं हितैषिणम्।... महानसे प्रयुञ्जीत वैद्यम् SuśruS. v. 1. 10; (राजा) शिक्षितमनुरक्तं कृतकर्माणं जनमासन्नं कुर्वीत ArthŚā. i. 103. 5 (1. 21); ii. 304. 3 (7. 10); बलम् ... तस्य... संख्यातः वीरपुरुषं च न चानुरक्तम् PratiYau. 1. 4; BṛhaspaSm. 301. 505; YuktiKa. 11. 4; बुद्धिमाननुरक्तोऽयम् ...। इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः Tantrākhyā. 9. 19; PañcT. 1. 37 (30. 1); Hitopa. 2. 66; Pañcā. 11. 7; Subhāṣi. 2843; अपि वृषलमनुरक्ताः प्रकृतयः MudrāRā. 1. 19 (13); 4. 12 (28); अनुरक्तः शुचिर्दक्षो बुद्धिमान् परिचारकः AṣṭāSaṁ. i. 6. 7 (1. 2); AṣṭāHṛ. i. 1. 28; राजा राज्यवर्धनम्... अनुरक्तैश्च महासामन्तैः कृत्वा साभिसरमुत्तरापथं प्राहिणोत् HarṣaC. 210. 6; विभीषणस्त्वाभिगामिकात्मगुणसंपन्न इति अनुरक्ताः प्रकृतयः MahāvīC. 4. 7 (2); शुचिर्दक्षोऽनुरक्तश्च जाने भृत्योऽपि दुर्लभः Hitopa. 3. 137; यत्त्वया शात्रवं जन्यमदायतमदायत। तेन त्वामनुरक्तेयं (पृथ्वी) रसायत Kāvyālaṅ. (Ru.) 3. 38; अनुरक्तः अहार्यो भवति (दूतः) ManuBh. ii. 21. 25 (*on* 7. 64); ii. 322. 8 (*on* 9. 304); (गोपालदेवम्) यं स्वामिनं राजगुणैरनूनमासेवते चारुतरानुरक्ता।... °लक्ष्मीः EI. xiv. 326. 19; xv. 296. 14; कुर्वन्ति ये सदुपलेपनवासचित्रं संमार्जनं गिरिसुतायतनेऽनुरक्ताः SaurP. 50. 59; सदोषः सगुणो वास्तु न मे त्याज्यो विभीषणः। अनुरक्तो विरक्तो वा माम् ... आगतः RāmāMañ. 304. 25;

नास्त्येव हि विपक्षोऽस्य राज्ये निहतकण्टके। अनुरक्ताः प्रजाश्चैता न हानिः परिदृश्यते KathāSaSāg. i. 6. 129; ii. 4. 38; vi. 8. 212; कुवलयापीडो भेजे कुवलयेशताम्। त्यागेन चक्रे विशदां योऽनुरक्तां नृपश्रियम् RājTa.(Ka.) 4. 373; नृपतिः ...। अचिन्त्यश्च यद्या ममानुरक्तोऽस्ति ...। श्रावको जिनदासाख्यः PariPar. 3. 57; नयपालः ... समररिपोः पूजा[नुरक्तः स]द्रा EI.xv. 296. 17; i. 327. 5; सन्ति ममानुरक्ताः ...अश्ववारास्तैः समेतोऽहम् ... युद्धं करिष्यामि PuruṣPa. 211. 8; 212.4; जनः सर्वोऽपि सिन्धुलेऽनुरक्तः PurāPraSaṁ. 13. 21; निर्गुणमप्यनुरक्तं प्रायो न समाश्रितं जहति सन्तः Subhāṣi. 242; उदयितो राजपदानुकूलं यो मण्डलं धारयतेऽनुरक्तम्। तिम्मभूपः Acyutarā. 1.8; आयुष्मन्, किमेवमतिवाह्यतेऽनुरक्तो लोकः KaṁVa. 5.35 (7); सत्यानुरक्तेरदिरावहेस्मिन् संत्रके (Read संपत्रके) संभृतसर्वलोके। (श्रीरा) श्रीरामराजे EI. ix. 338. 174; अत्रत्याः प्रकृतयोऽप्यनुरक्ता आर्यस्य प्रसादेन MadaKeC. 13(13); **1Aiii** devoted to, i.e. faithful नलः ... चिन्तामुपेयिवान् ...। मामियं ह्यनुरक्तेदं दुःखमाप्नोति मत्कृते MahāBhā. iii. 59.11; iii. 74. 21; (च्यवनः) सुकन्यया सहारण्ये विजहारानुरक्तया MahāBhā. iii. 125.10; भक्षयन्ति शिवा गृध्रा जनार्दन जयद्रथम्। संरक्ष्यमाणं भार्याभिरनुरक्ताभिरच्युत MahāBhā. xi. 22.10; एवं दत्तास्मि रामाय तदा तस्मिन् स्वयंवरे। अनुरक्ता च धर्मेण पतिम् Rāmā. ii. 110.52; v. 57.9; vi. 108.15; भवती। कथं त्वामेवमनुरक्तं विहाय गता Vikramo. 4.25(2); HarṣaC. 225. 10; (सीताम्) अनुरक्तां त्यजाम्येतां दयितामधुना कथम् PadmP. (Ra.) 96.59; AṣṭāSaṁ. ii. 171.23(6.1); (मैत्रेयीम्) अनुरक्तां प्रियां साध्वीं बद्ध्वा वित्तेन मां कथम्।... संन्यसन्ति भवद्विधाः BṛĀraUBhVā. ii. 4. 58; अनुरक्ता पत्युश्च सर्वाद्या च पतिव्रता।... शक्तिर्द्वितीया कथिता BrahmVaiP. ii. 1.24; तारा मय्यनुरक्ता .... कथं त्याज्या धर्मतो न्यायतस्तथा DevīBhāP. i. 11.59; अनुरक्ताश्च गृहिणीः कथं त्यक्ष्यसि निष्ठुरः PariPar. 2.222; अभव[च्छ्री प]रमर्दिराजः ... [साम्रा]ज्य[ल]क्ष्मीर्यमिहानुरक्ता पतिंवरेवाशु समाजगाम EI. i. 327.5; अनुरक्तः स्वभार्यायाम् ... अनुकूलो निगद्यते PuruṣPa. 190. 26; गुरुशुश्रूषणे युक्ता भक्ता मातृपदाम्बुजे। अनुरक्ताः स्वदारेषु न हि तान् बाधते कलिः MahNirvāT. 4.58; (दमयन्तीम्) मामनुरक्तां हित्वा यदि राजन् ... यातोऽसि मुक्त्वा वनमिदमेष्यति वनलक्ष्मीः RasGaṅ. 654.17; पतिः ... एकस्यामनुरक्तोऽनुकूलः ŚṛṅgāMañ. (A.) 49.19; PadyaVe. 398 (9); **1Bi** having a liking for तस्य बाह्येषु शतदलपद्मपत्रेषु योगपीठेषु रासक्रीडानुरक्ता गोप्यस्तिष्ठन्ति RādhU. 209.12(2); एको देवो नित्यलीलानुरक्तः RādhU. 212.19(4); अनुदिनमनुरक्तः पद्मिनीचक्रवाले ... जयति मिहिरकन्याकूलवन्याकरीन्द्रः StavMā. 121.4; PadyaVe. 30; **1Bii** inclined to, interested in अहमासं पण्डितको हैतुको वेदनिन्दकः। आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् MahāBhā. xii. 173.45; xiii. 37.12; शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित्। कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ViṣṇuP. vi. 7.43; येषामाभीरकन्याप्रियगुणकथने नानुरक्ता रसज्ञा।... धिक् तान् CāṇaNīDa. 12.5; अमृतपालः द्विजगुरुसुरभक्तः सर्व्व[शा](Read शास्त्रा)नुरक्तो गुरुरिव सकलानामुग्रदण्डायुधानाम् EI. i.65.7; **1Biii** who or which is liked by अनुरक्तेष्वपि शरीरादिषु साधूनां स्वामिन एव प्रणयिनो युष्मद्दर्शनादुपार्जितमेव ... कुशलजातम् HarṣaC. 159.6; विनयेन भवति गुणवान् गुणवति लोकोऽनुरज्यते सकलः। अभिगम्यतेऽनुरक्तः ससहायो युज्यते लक्ष्म्या Kāvyālaṅ.(Ru.) 7.85; न हि ... सभापतिर्वा युक्तवादिनमनुगृह्णन्ननुरक्तो द्विष्टो वा भवति Bhām. 374.9 (*on* ii. 1.34); **1C** kind, considerate, favourable (king, god, friend etc.) कच ...। सौहार्दे चानुरागे च वेत्थ मे भक्तिमुत्तमाम् (v.l. सौहृदेनानुरक्तां च भक्तां भजितुमर्हसि) MahāBhā. i. 72.11; i. 194.10; अनुरक्तो ह्यसंहार्यः पार्थान् प्रति जनार्दनः MahāBhā. xii. v. 86. 1; vii. 62. 22; सुहृत्...। आगन्तुश्चानुरक्तोऽपि काममस्तु बहुश्रुतः।... न मन्त्रं श्रोतुमर्हति MahāBhā. v. 86. 1; वाच्यं यदनुरक्तेन ... तदुक्तं लक्ष्मण त्वया Rāmā. iv. 26.16; vi. 107. 20; जनमनुरक्तम्। कृतमतिरपहाय पितृनगरात्स ततो विनिर्जगाम BuddhaC. 5.83; अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते ManuSm. 7.209; न बान्धवानुरक्तकृच्छ्रद्वितीयगुह्यज्ञान्वहिः कुर्यात् CaraS. i. 8. 25; यथा कश्चिदनुरक्तो मित्रसुहृत्त्वमवलम्ब्य मित्रार्थमनुक्तमपि प्रत्युपकारमनपेक्ष्य कुरुते। एवं प्रधानम् ... कुरुते MāṭhVṛ. 74.21 (*on* 60); कणकण्टकतिन्दुकेन्धनस्याग्निर्नक्तं दिनं जागृयात्तथानुरक्ताः स्त्रियः सुहृदश्च AṣṭāSaṁ. ii. 171. 23 (6. 1); किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि Hitopa. 2. 51(2); RājNīRa. 50.1; (स्वामिनः) अनुरक्तस्य विरक्तस्य च लक्षणम्। रक्ताद् वृत्तिं समीहेत विरक्तं च परित्यजेत् NītiSā. 5.47; 8.77; भृत्यानुरक्तो भगवान् प्रतिनन्द्येदमब्रवीत् BhāgP. iv. 9. 18; अनुरक्तस्य...। सुहृदः कृत्स्ना पृथिवी मूल्यमल्पकम् RāmāMañ. 394.26; न बान्धवत्वं सहजं जनस्य स एव बन्धुः किल योऽनुरक्तः DaśāvaC. 7.208; भिषग्विनीतः ...। मौलोऽनुरक्तो मधुरः कुलीनश्च प्रशस्यते Hastyāyur. 43.20 (1.5); यस्मिन्ननुरक्ताः सुहृद्गणाः।... तेन लोकत्रयं जितम् MahNirvāT. 8.64; भविष्यन्निव साम्राज्यस्यार्धभागी न कस्तदा। ततुनेष्वनुरक्तोऽभूत्न राज्ञि सुखस्थिते RājTa.(Śrī.) 1(7).151; सानुरागमनुरक्तम् ... यत् तन्मित्रमतिशयेन शस्यते ManvaMu. 285.18 (*on* 7.209); भक्तजनेष्वनुरक्तं धरणीधरकन्यया परिष्वक्तम्। प्रख्यातनामधेयं यजतितरां भागधेयं मे ĀryāŚ. 90; बाल्ये यं (राघवेन्द्रम्) समुदीक्ष्य लक्षणयुतं तातोऽनुरक्तोऽभवत् Vidvanmo. 1.8; **1D** attached to, fond of, affectionate अनुरक्तश्च तानासीत्पाण्डवान् स घटोत्कचः MahāBhā. i. 143. 35; अनुरक्तोऽस्मि भावेन भ्रातरं देवि तत्त्वतः Rāmā. ii. 18.13; स्निग्धा त्वमनुरक्ता च भगिनीव सहोदरा Rāmā. vi. 517*(1); सुतौ ...। अनुरक्तौ... कार्यकोविदौ MahāP. 8. 93; नायं धर्मो मातृवर्गाननुरक्तः सुतस्त्यजेत् BrahmVaiP. iii. 16. 20; (दशरथः) स राजसिंहः ... सहात्मजैः ...मिथोऽनुरक्तैः स्म पुरीं प्रतिष्ठते Rāgh. 4. 59 [AnekāSaṁ. 2. 187; NānārthāSaṁ. i. 135. 1083; MediK. 60. 48; ViśvaLoK. 127. 47]; **1Ei** who are in love with each other मिथुनं जायमानं वै समं तद्य प्रवर्धते ...एकैकमनुरक्तं च चक्रवाकसमम् MahāBha. vi. 8. 9; (तत्र) मिथुनानि प्रसूयन्ते ... अन्योन्यमनुरक्तानि MārkP. 59. 21; (ते) अन्योन्यमनुरक्ताश्च चक्रवाकसधर्मिणः BrahmāṇḍP. i. 15.79; चेष्टा भवति पुंनार्योर्या रत्युत्थानुरक्तयोः ... श्रृङ्गारो द्विविधो मतः ŚṛṅgāTi. (Ru.) 1. 21; वियोगार्त्तौ युवानौ तौ ...। चक्रवाकाविव चिरमनुरक्तावतिष्ठताम् PariPar. 2. 468; स्यादेकतरपञ्चत्वे दंपत्योरनुरक्तयोः। शृङ्गारः करुणाख्यः Vāgbhaṭā. 5. 20; Gaṅgāva. 6. 43; विलासिनी। यत्रानुरक्तावन्योन्यं संभोगोऽयमुदाहृतः SāhiDa. 181.7; RasiJī. 1033; **1Eii** who is in love with, enamoured, passionate (सुभद्रा) सा तु तं मनुजव्याघ्रमनुरक्ता मनस्विनी MahāBhā. i. App. I. 114(321); मरुत्तो नाम वीर्यवान्। (ययातेः) पुत्रस्तमनुरक्ताभूत् पृथिवी सागराम्बरा MahāBhā. xiv. 5. 12; वैशिकः। अनुयु(v.l. °र)क्तः शुचिर्दक्षः NāṭyaŚā. 23.3; 23.23; अयम् ...वारुणिकां नाम बन्धकीमनुरक्तः PadmPrā. 10. 18; 18. 16; अनुरक्तायां रागो भावयितव्यः DhūrtaViSaṁ. 18. 8; पुस्तकवाचकमृज्ज्योपगुप्तमनुरक्ता PādaTā. 28. 10; 33.7; जनमिममनुरक्तं विद्धि नाथ Mālavikā. 2.5.; 4.14(1); एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता Śāk. 6.21; (नायिका) तथास्य सानुरक्ता च सुविस्रब्धा प्रजायते KāmSū. 206.7 (3.2); यदा तु मन्येतानुरक्तो (नायकः) मयि ... तदैवैनम् ...। बालभावमोक्षाय त्वरयेत् KāmSū. 224.11 (3.4); कथं वसन्तसेनार्यचारुदत्तमनुरक्ता Mṛcch. 1. 32(8); EI. xii. 75. 35; HarṣaC. 225. 10; कथमियैनमनुरक्ता ... इयमवन्तिसुन्दरी DaśKuC. 35. 12; समगंसि चाहं शृगालिकामुखविसृतवार्तानुरक्तया राजदुहित्रा DaśKuC. 64. 10; यशः ... परिगीयतेऽनुरक्तैर्विद्याधरसुन्दरीनिवहैः EI. x. 87. 31; iii. 108. 39; xxi. 142. 25; xxii. 107. 31; पुरुषेष्वनुरक्तास्तास्ते च तास्वनुरागिणः MahāP. 3. 33; सफलय यौवनमेतत् सममनुरक्तेन सुतनु मया Kāvyālaṅ.(Ru.) 11. 13; SaraKaṇṭhā. 41. 8; AlaṅkāŚe. 6.1(3); नायकोऽनुरक्तस्तस्याम् Kāvyālaṅ.(Ru.) 14.6; यावदायुर्वृणोतु श्रीरनुरक्ता वधूरिव Kapphiṇā. 16. 47; (प्रायश्चित्तम्) अभिगम्यमानाया योषितप्रतिरूपया सैवेयमिति स्नेहेनानुरक्त इवालिङ्ग्य स्वपेत्(नरः गुरुतल्पगः)BālaKrī. ii. 125. 22 (*on* 3. 253); (पद्मस्य) नालमस्य दीर्घमनुरक्तस्य जायते परागो नाप्लीकाभिनिवेशोऽस्य हीयते NalaCam. 5.73(9); काचित् क्वचिदनुरक्ता लज्जावती वयस्यया भिन्नरहस्या क्रियते ViddhaŚā. 2. 14(5); देवरती राजा ..। बभूवास्य महादेवी रक्ता ...। रक्तायामनुरक्तोऽभूद् राजकार्यपराङ्मुखः BṛKathāK. 85. 3; अधन्यः खेचरगणो यः प्रकाममनुरक्तोऽपि दूरवर्ती ... मन्मथव्यथामहमिवोद्वहति TilaMañ. 175. 22; ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामास्तपः समचरन् भगवत्प्रपन्ना। सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता BhāgP. i. 16.32; iii. 23.38; (कृष्णः) रथस्थो मथुरां चागात् ...। गोपीभिरनुरक्ताभिः क्रीडिताभिर्निरीक्षितः AgniP. 12. 23; अनुरक्ता हि स्वयमेव गान्धर्वेण विवाहेन पाणिं ग्राहयति JayaMa. 208. 11 (*on* 3. 3); 280. 20 (*on* 5. 4); अतिवृद्धमनुरक्तया विस्तीर्णं मुखरमहोदधिमेखलं वहन्त्या। उरसि निहितबन्धुजीवमुर्व्या NavaSāC. 3.59; 6.80; कुटुम्बिनी। अनुरक्ता त्वयि ... योषित् GaṇeP. i. 7. 13; SaraKaṇṭhā. 547. 11; न च मयीयमनुरक्तेत्यपि निश्चयेन कृतं कामकृतान्मोहात् Loc. 66. 19 (*on* 2.3); अनुरक्तैव सा साध्वी मम विद्याधराङ्गना BṛKathāMañ. 14. 216; रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनम् KāvyPra. 416.3; Subhāṣi. 1363; (मदनमाला) अनुरक्तं नराधिपम्।.. बारयामास युक्तिभिः KathāSaSāg. vii. 4. 37; xii. 1. 20; ताम् ... चिरमनुरक्तां लतागृहे दृष्ट्वा। तच्चरितं गोविन्दे मनसिजमन्दे। सखी प्राह GītGo. vi. 12.1; राज्ञे देव्यनुरक्ताय... मन्त्रं प्रददौ RājTa.(Ka.) 3.465; 4.373; अनुरक्तैव मयि सा भूयोऽपि प्रार्थयस्व ताम् PariPar. 2. 489; Kāvyānu. (He.) 354. 19; Vāgbhaṭā. 5. 12; RasMañ. 2(3); अयमेष्यति दिव्यमूर्तितामनुरक्तस्त्रिदिवाङ्गनां प्रति PṛthvīVi. 12. 22; 5. 96. SamarāSaṁ. 9. 55; एषा मय्यनुरक्ता चेच्छायावदनुगामिनी PrabhāC. 6. 31; कमलश्रीः ... समुद्रदत्तेन स्ववशीकृता ... मम भर्ता भवत्विति चिन्त्य(? न्तय)मानाहर्निशमनुरक्ता जाता SamyaKau. 92. 18; नायकेष्वनुरक्तेषु रतिं पुष्यन्ति योषितः BhāvPra.(Śā.) 114.21(5); 113.10(5); (श्रीमुञ्जः) कस्यामपि योषित्यनुरक्तः ... द्वादशयोजनीं निशि प्रयाति प्रत्यायाति च PrabaCin. 21. 11 (FN 19); कौमार्यामपि निःस्नेहां (गणिकाम्) कोऽनुरक्तेति मन्यते SūktiRa. 114. 7;

Yādavā. 19. 17; जारेऽनुरक्ताया नार्याः ... बुद्धिर्जारमेव ध्यायति JīvanVi. 19.17; मत्पुत्र एतस्यामनुरक्तः ŚārṅgaPa. 521; 1586; (नायिका) भाषते सूनृतं स्निग्धामनुरक्ता SāhiDa. 140. 15; सोऽपि सर्वदा तस्यामनुरक्तः सुरतसुखमनुभवंस्तिष्ठति SiṁhāDvā. 29.0(6); त्वयि गाढमनुरक्ता सा VetāPañ.(Śi.) 10.40; राजकुमारी तस्मिन्ननुरक्ता जाता PurāPraSaṁ. 19.3; अनुरक्ता च शस्ता नारी नरायिते AnaṅgaRa. 10.30 (Add.34); तस्यामनुरक्तः ... पुरुषो नारीमुपेयात् Bhāv-Pra.(Bhā.) 1(3).23; एषा कथमनुरक्ता स्यादिति (पुरुषः) कुर्यात्प्रतिपत्तितो वीक्षाम् KandaCū. ii. 8.17; iii. 3.9; v. 5.22; हरिस्वामी ... स्वप्ने ... भावानुरक्तविद्याधरीशतेन ... परां प्रीतिमासाद्य VetāPañ. (Jam.) 92.13; सा कन्या ... रामेऽनुरक्ता स्वयम् JānaPa. 1.14; 1.47(1); 5.30(6); ĀnandRa. 4.3; अनुरक्तो भवाननङ्गलेखायाम् MadaKeC. 22(40); नायकमनुरक्ता ... नायिका मन्दं मन्दमनुगता AlaṅkāMañ. 79.5; 21.6; **1Eiii** attracted to रूप° ... °योगिनी गुणेष्वनुरक्ता न तथार्थेषु ... इति (नायिकागुणाः) KāmSū. 309.20(6.1); गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः। ... अपहारयेन्मनोरमामात्मवधूमिव श्रियम् Kirātā. 1.31; तद्वार्ताश्रवणमात्रेणैव हि ममातिमात्रं मनोऽनुरक्तम् (तस्मिन् पुरुषे) DaśKuC. 71.7; सुखनाम्नीषु दृष्टिषु। कास्वेतास्वनुरक्तोऽस्मि पतङ्गोऽग्निशिखास्विव YogVā. v.9.50; SaraKaṇṭhā. 547.11; अनुरक्तं च मनो यस्याः Loc. 230.8 (*on* 3.44); Kāvyānu. (He.) 141.16; निस्त्रिंशे ... रिपुकीलालपि व्यधात्। स्थानमेषोऽनुरक्तायाः क्रीडायै विजयश्रियः DvyāśraKā. 1.162; नयसारोऽदधाच्चित्तेऽनुरक्तं मयि मानसम्। रक्षितुं शक्यते नैव निषिद्धमपि युक्तिभिः MalliC.2.404; अपि चण्डानिलोद्धततरङ्गस्य महोदधेः। शक्येत प्रसरो रोद्धुं नानुरक्तस्य चेतसः MalliC.2.405; Subhāṣi. 3333; **1F** influenced by तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदामः BrahmSūBh. (Śaṅ.) 317.12 (*on* ii.1.15); एष पिङ्गलकः संजीवकवचनानुरक्तः स्वव्यापारपराङ्मुखः संजातः Pañcā.22.18; **2A** who or which has become red, reddened or coloured कश्मलाभिहता सन्ना बभौ सा रावणोरसि। संध्यानुरक्ते जलदे दीप्ता विद्युदिवासिते Rāmā. vi. 3132*(4); संध्यानुरक्ते नभसि स्थितानामिन्दीवरश्यामरुचां घनानाम्। ... यदि वियदेवं भवति सुभिक्षम् BṛSaṁ. 24.18; प्रथमतरकृतपावकप्रवेशा इवादह्यन्तानुरक्ता दिशः HarṣaC. 225.10; एतन्मुखं प्रियायाः शशिनं जित्वा कपोलयोः कान्त्या। तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम् Nāgā. 3.10 (*but* APTE, glowing); NalaCam. 5.73(9); न हि नीलिम्नेवानुरक्तमुत्पलं शब्दानुरक्तमर्थमुपलभामहे Kāśi. iii. 224.8 (*on* 5(10).11); कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ... अनुरक्ता प्रान्तलोहिता SaraKaṇṭhā. 547.11; Kāvyānu. (He.) 349.19; अनुरक्तास्ततः पश्चाद्यशसाच्छादिता दिशः PṛthvīVi. 5.96(comm. गैरिकादिना रञ्जिताः); क्षोणीभृतामरुणदीधितयोऽनुरक्ताः पादानलक्तकरसैरिव रञ्जयन्ति Yādavā.19.17; Acyutarā. 1.8; तस्मिन् किल श्रीः सरसेऽनुरक्ते स्थाने यदेतत् कृतसंनिधाना ĀnandRa. 4.3; अयं रविः ... अनुरक्तः सन् पश्चिमां दिशं प्राप्नोति AlaṅkāMañ. 79.16; **2B** dyed, smeared with blood भवं च दन्तैर्बिभिदे नाभिदेशे गजासुरः। दृष्ट्वानुरक्तं रुद्राभ्यां नवरुद्राः ... विव्यधुः ... शरीरममरद्विषः SkandP. i(2). 21.45; श्रीमद्रयाकर्ण इति प्रतीतः। यस्याहवेषूद्धतवैरिकंठ(कण्ठ) च्छेदास्र[पूर्णेव ध]रानुरक्ता EI. xxi. 95.15; **3A** pleasing (to ears), i.e. harmonious तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानम्। श्रोत्रेषु संमूर्च्छति रक्त(v.l. मूर्च्छत्यनुरक्त)मासां गीतानुगं वारिमृदङ्गवाद्यम् RaghuVa. 16.64; **3B** pleased, delighted प्रसीद स्वामितनय स्वश्रेयसमतः परम्। त्वयैवमनुरक्तेन कस्तस्यार्थो न सेत्स्यति RāmC. 9.86; मुखं प्रसन्नम् ...। स्नेहोऽधिकः संयमदर्शनं च सदानुरक्तस्य जनस्य चिह्नम् Ind.Spr. 2209 (First Ed.); दर्पणार्पितमालोक्य मायास्त्रीरूपमात्मनः। आत्मन्येवानुरक्तो वः श्रियं दिशतु केशवः PrabhāC.103.7; ŚārṅgaPa. 117; अनुराजति च। शृण्वतोऽनुरक्तान् करोतीत्यर्थः Sāy. *on* ṚV. ii. 43.1; **4** related to, associated or connected with पदं तु प्रकृतिभेदभिन्नं प्रकृत्यर्थानुरक्तप्रत्ययार्थप्रधानम् BhāvanāVi.82.2; पदार्थैरनुरक्तोऽसौ वाक्यार्थः संप्रतीयते ŚlokaVār. 7.233 (910.3); (विश्वे देवाः) ते च तेन पूर्वानुमितेन यागेनानुरक्ताः TantrVā. 530.20 (*on* ii.2.23); Kapphiṇā. 16.47; नियतगुणक्रियानुरक्तस्वार्थप्रतिपादने तु गोशब्दस्य न हेतुमुत्पश्यामः NyāyMañ. i. 365.19; Kāśi. iii.224.9 (*on* 5(10). 8-10); विष्णुः ... रामो भूत्वा मानुषचेष्टकः। ... अनुरक्त इवाशेषगुणेषु गुणवर्जितः AdhyāRā. iv. 5. 22; EI.i. 327.5; **5** tied with, interwoven (इण्ड्वशिक्यासन्दीषु मुञ्जरज्जवस्त्रिवृतो मृद्दिग्धाः) आसन्दी च अनुरक्ता रज्जवो मृद्दिग्धा भवन्ति ... कर्दमलिप्ताः comm. *on* KātyŚS. xvi. 5.2; *n.* continuous (flow of) blood, cf. **अनुरक्तभाव** 2.

अनुरक्तक (anurakta-ka) *adj.* who is in love with or enamoured दूतीं विद्याधराधिपः। प्राहिणोत् ... सीतां व्रज ब्रूहि दशास्यमनुरक्तकम् PadmP.(Ra). 46.166.

अनुरक्तकटाक्षमोक्ष (anuraktakaṭākṣa-mokṣa) *adj.* casting around loving side-glances अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुनिवेशयतोर्वयस्यैः। वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् BhāgP.x.21.7.

अनुरक्तकरण (anurakta-karaṇa) *n.* movement or gesture of one who is in love तद्घटितः... । कार्योऽनुरक्तकरणे चैव प्रचारे ललिते ... VişṇuDhaP. iii.24.58.

अनुरक्तगण्डस्थल (anurakta-gaṇḍasthala) *adj.* whose temples have become red उभयकर्णान्दोलितकुण्डलमणिप्रभानुरक्तगण्डस्थलः ... पुरुषं महापुरुषलक्षणोपेतः Kād. 170.2.

अनुरक्तचित्त (anurakta -citta) *adj.* **Ai** whose mind is attracted to अन्येऽपि ये स्त्रीष्वनुरक्तचित्ता विश्वासमायान्ति नराः प्रमत्ताः YaśasCam. ii. 164.3; **Aii** whose mind is devoted to, cf. **अनुरक्तचित्तता; B** (used as noun) one whose mind is attached to or affectionate towards कथं प्रियाया... सङ्गम् ... शिशूनां कलाक्षराणामनुरक्तचित्तः ...। त्यजेत BhāgP. vii. 6. 11.

अनुरक्तचित्तता (anuraktacitta-tā) *f.* the state of having the mind devoted to भगवद्गुणादिष्वनुरक्तचित्तता भवति ŚrutaPra. iA. 113. 5 (*on* i.1.1).

अनुरक्तचेतस् (anurakta-cetas) *adj.* **A** whose mind is devoted, i.e. faithful to अनन्यभावामनुरक्तचेतसं त्वया वियुक्तां मरणाय निश्चिताम्। नयस्व ... साधु Rāmā. ii. 24.18; **B** whose mind is attached to, having affectionate mind सहचरमनुरक्तचेतसं प्रियमकरन्द कथं न मन्यसे MālaMā. 9.131.

अनुरक्तचेष्टा (anurakta-ceṣṭā) *adj.* (*f.*) having actions (indicative) of love इमां च विन्द्यादनुरक्तचेष्टां प्रियाणि वक्ति स्वधनं ददाति BṛSaṁ. 78.5; VetāPañ. (Śi.) 16.16.

अनुरक्तजन (anurakta-jana) *m.* **A** loyal people अनुरक्तजनाकीर्णा...। राजव्यसनसंसृष्टा सा पुरी विनशिष्यति Rāmā. ii. 45.16; ii. 1942*(1); राजा ... देशमावसेत् ... अनुरक्तजनान्वितम् MatsyaP. 217.3; **B** person who is in love अनुरक्तजनत्यागे पातकान्तो न विद्यते BrahmP. 107.34; अनुरक्तजनविरक्ता ... विरक्तरागिण्यः। ... नार्यः KalāVi. 3.9; *adj.* **A** (city) possessing, i.e. inhabited by loyal people कपिलवास्तु ... अनुरक्तजनं स विहाय... वनं ययौ Saund. 3.1; **B** to whom people are attached जनप्रियः स्मितपूर्वमृद्वभिभाषणादिभिरनुरक्तजनः (वरः) Mitā. 18.17 (*on* 1.55)

अनुरक्ततर (anurakta-tara) *adj.* **1** more reddened or colourful (समवसरणः) जनानामकरोच्चित्रमनुरक्ततरं मनः MahāP. 22.86; **2** more attached. MahāP. 22. 86.

अनुरक्तता (anurakta-tā) *f.* **1** the state of being reddened नीलालिभिः कोकनदमनुरक्ततां धत्ते KāvyKaVṛ. 131.21 (4.5); **2A** the state of being loved नीलालिभिः कोकनदमनुरक्ततां धत्ते ... एवं यो रक्तपदार्थः स सदृशेन जितः कोपादिव रक्तोऽप्यथवा कयाचिद्युक्त्या सानुरागो भणनीयः KāvyKaVṛ. 131.21 (4.5); **2B** the state of being devoted to शुभानि प्रीणनं सर्वजगतामनुरक्तता। सद्गुणाः सुखमित्यादीन्याख्यातानि मनीषिभिः BhaktiRaSi. i.1.17 (?16)

अनुरक्तत्व (anurakta-tva) *n.* **A** the state of being loyal, loyalty क्षत्रसारत्वं शस्त्रज्ञत्वं शौर्यसारत्वमनुरक्तत्वं चेत्यौत्साहिकस्य (बलस्य) गुणाः NītiVā. 22.13; **B** the state of being closely attached to or fond of (अपरिहार्यममन्त्रविस्रावीति मित्रसंपत्) अपरिहार्यं न परेण ह्रियते, अनुरक्तत्वात् JayaMa. 72.2 (*on* 1.5)

अनुरक्तधी (anurakta-dhī) *adj.* **A** whose mind is attached to or fond of गुणानुरञ्जनाख्यायां कथायामनुरक्तधीः। सौधर्मो विबुधाध्यक्षं जगौ BṛKathāK. 34.3; **Bi** whose mind is loyal to वैरेण यं नृपतयः ...। ध्यायन्त आकृतिधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किम् BhāgP. xi.5.48; PadyāTa. 270; **Bii** whose mind is devoted to अनुरक्तधियो भक्ताः केचन ज्ञानवर्त्मनि। शान्तस्याश्रयभिन्नत्वे वैरस्यं नानुमन्वते BhaktiRaSi. iv. 8.35 (?38)

अनुरक्तपति (anurakta-pati) *adj.* **A** who is devoted, i.e. faithful to husband यावदेनामनुरक्तपतिं कुलगामिनीं पश्यामि तावत् कुतो मे निःसङ्गता KaumuMa. 2.1(5)

अनुरक्तप्रकृति (anurakta-prakṛti) *adj.* **A** to whom subjects are loyal, having loyal subjects (रामः) नित्यानुरक्तप्रकृतिः प्रजानामनुरञ्जकः Rāmā. ii. 20*(6); अनुरक्तप्रकृतिः सुसहायत्वादल्पेनाप्यनुग्रहेण कार्यं साधयति ArthŚā. ii. 288.3 (7.3); सः ... विनयानुरक्तोऽनुरक्तप्रकृतिः ... प्रजाः पालयति स्म JātaMā. 6.15 (2.0(4)); अनुरक्तप्रकृतिरल्पदेशोऽपि भूपतिर्भवति सार्वभौमः NītiVā. 29.67; स्वतोऽनुरक्तप्रकृतिर्गुणाधिको मृगाङ्कदत्तः सुसहायवानयम् KathāSaSāg. xii. 36.228; राजा हरति लोकस्य हृदयम् ... रक्तमण्डलोऽनुरक्तप्रकृतिः Kāvyānu. (He.) 227.5; सदानुरक्तप्रकृतिः ... नृपतिर्भूयसीं श्रियमश्नुते ŚārṅgaPa. 1288; **B** having loyal constituents of the state मित्रमाक्रन्दश्च मे शूरवृद्धानुरक्तप्रकृतिर्विपरीतप्रकृतिः परः पार्ष्णिग्राहश्चासारश्च, शक्ष्यामि मित्रेणासारमाक्रन्देन पार्ष्णिग्राहं वा विगृह्य यातुम्

ArthŚā. ii. 258.3 (7.4)

अनुरक्तप्रकृतिक (anuraktaprakṛti-ka) *adj.* **1** having loyal subjects तनयमनुरक्तप्रकृतिकं निवेश्य स्वे राज्ये ... सहस्रानीकः ... महाप्रस्थानाय ... अगच्छद्धिमगिरिम् KathāSaSāg.ii.2.217; तं भक्तिप्रवणमनुरक्तप्रकृतिकं प्रतीक्ष्यः संप्रेक्ष्य ... गुरुरसौ ... प्राह प्रभुरनघगोविन्दतनयम् ĀnandRa. 1.46; **2** having affectionate nature, ĀnandRa. 1.46.

अनुरक्तप्रकृतिकमनीया (anuraktaprakṛti- kamanīyā) *adj.(f.)* charming or covetable due to loyal subjects स राजा ... अनुरक्तप्रकृतिकमनीयाम् ... विधाय वसुमतीमेकातपत्रशेखरं साम्राज्यसिंहासनं भेजे UdaySuKa. 24.14.

अनुरक्तप्रकृतिमण्डल (anurakta-prakṛtimaṇḍala) *adj.* having circle of loyal ministers (गर्भधारकः) अनुरक्तप्रकृतिमण्डलः चिरं धर्मेण वसुमतीं पालयामास ĀnandRa. 2.18(11)

अनुरक्तप्रज (anurakta-praja) *adj.* who has loyal subjects अनुरक्तप्रजं राजाध्रुवंचक्रेभुवःपतिम् BhāgP. iv.9.66; अनुरक्तप्रजो राजा ... अन्विष्यमाणोऽभूद् ग्राम्याटविकमण्डलैः RājTa. (Ka.) 4.474.

अनुरक्तबहुतरजन (anurakta-bahutarajana) *adj.* to whom a larger number of people are attached, who is liked by a larger number of people जनप्रियोऽनुरक्तबहुतरजनः(वरः) VīraMi. 117.21 (*on* 1.55)

अनुरक्तभाव (anurakta-bhāva) *m.* **1** feeling of love पार्थिवम्। अनुरक्तभाव इव शिश्रिये बलान्न कया निविश्य हृदि राजविद्यया PṛthvīVi.9.65; PratāYaBhū. 404.3 (comm. नायिकासंबन्धात् ... अनुरक्तत्वेन); **2** the state of having a continuous (flow of) blood कृपाणलतिका गृह्णाति कण्ठेष्वरीन्। तद्योगादनुरक्तभावविवशाः संमीलिताक्षाश्चिरं शून्यान्तःकरणा भजन्ति खलु ते (अरयः) भावस्थितिं कामपि PratāYaBhū.404.3 (comm. अनुवृत्तरक्तो भावः स्वरूपं येषां ते)

अनुरक्तमण्डल (anurakta-maṇḍala) *adj.* **1** having a reddened orb जहिहि शयनमुद्रमस्य कालः समुपनमत्यनुरक्तमण्डलस्य। भुवनशिरसि JānaHa. 3.77; सः (भास्करवर्मा) ... भुवनपतिरिवोदयानुरक्तमृ(म)ण्डलः EI.xii.75.35; xviii. 245.19 (v.l.); राजानुरक्तमण्डल उदयी मृदुकरः कान्तिमानिति SaraKaṇṭhā. 544.23; सादरं स हरिराजमब्रवीदङ्ग, कच्चिदनुरक्तमण्डलः। चन्द्रमा इव नवोदयोज्ज्वलः स्वाधिनोषि कुमुदादिकाः प्रजाः Rāgh. 11.63; **2** having loyal circle (of constituents of the state), JānaHa. 3.77; SaraKaṇṭhā. 544.23; Rāgh. 11.63; *n.* **1** loyal circle (of feudatories) योऽप्यनुरन्ता (Read ष्यनुरक्त)मण्डलयुत(:) पद्माकरानन्दितो मार्त्तण्ड (Read मार्तण्डः) EI. xviii. 245.19; **2** reddened orb, EI. xviii. 245.19.

अनुरक्तमति (anurakta-mati) *adj.* whose mind is devoted to प्रभूतपक्षबलो हि भूपालः शैल इव कस्य भवति वश इत्यनुरक्तमतीरपि प्रकृतीरसमञ्जसयति YaśasCam. i. 436.5.

अनुरक्तमनस् (anurakta-manas) *adj.* whose mind is inclined to or interested in सा दाक्षिणात्या प्रवृत्तिः। ... तामनुरक्तमनाः स यन्नेपथ्यः सारस्वतेय आसीदिति समानं पूर्वेण KāvyMī .9.19.

अनुरक्तमनस्विनी (anurakta-manasvinī) *f.* name of a subsection in the Saduktikarṇāmṛta (*lit.* proud woman who is in love) मानिन्युदात्तमानिन्यनुरक्तमनस्विनी तदीयोक्तिः ... श्रीधरदासेन सतारचि शृङ्गारप्रवाहोऽयम् SaduktiKa. 67.2.

अनुरक्तमानिनी (anurakta-māninī) *f.* name of a subsection in the Saduktikarṇāmṛta (*lit.* proud woman who is in love) अनुरक्तमानिनी SaduktiKa. 99.11.

अनुरक्तमुक्तिवनिता (anurakta- muktivanitā) *f.* damsel (in the form) of liberation who is in love एता भान्त्यनुरक्तमुक्तिवनिताचञ्चत्कटाक्षच्छटाक्षेपाः ... दीप्तयः HammīMaMa. 5.13 (?14)

अनुरक्तमौलभृत (anurakta-maulabhṛta) *m.* loyal hereditary servant अनुरक्तमौलभृतमित्रश्रेणीबलावाप्तराजश्रीः परममाहेश्वरः EI. xi. 106.3; iii.320.2; i. 86.2; viii. 190.2; iv. 76.2; xix. 303.2.

अनुरक्तरामा (anurakta-rāmā) *f.* beautiful woman who is in love अनुरक्तरामया पुनरागतये स्थापितोत्तरीयस्य। अप्येकवाससस्तव सर्वयुवभ्योऽधिका शोभा ĀryāSaŚa. 48.

अनुरक्तराष्ट्र (anuraktarāṣṭra) *n.* name of a former Buddha भगवता ... येषु सम्यक्संबुद्धेषु कुशलमवरोपितं तेषाम् ... कानि नामानि ... ग्रहकोशः अनुरक्तराष्ट्रः MaVastuAva. i. 141. 14 [DBHS.]

अनुरक्तरुद्रादि (anurakta-rudrādi) *adj.* Rudra and others who are devoted उपासितपदाम्बुजस्त्वमनुरक्तरुद्रादिभिः प्रपद्य पुरुषोत्तमं पदमदभ्रमुद्भ्राजितः। ... शचीसुत मयि प्रभो कुरु मुकुन्द मन्देक्षणम् StavMā. 10.22.

अनुरक्तललना (anurakta-lalanā) *f.* woman in love स जयति संकल्पभवः...। यस्यानुरक्तललनानयनान्तविलोकनं वसतिः KuṭṭaMa.1; SubhāRaK. 14.7.

अनुरक्तलिङ्ग (anurakta-liṅga) *n.* sign or characteristic of one who is in love दूरादेवेक्षणं मुखप्रसादः संप्रश्नेष्वादरः, प्रियेषु वस्तुषु स्मरणं, परोक्षे गुणग्रहणं, तत्परिवारस्य सदानुवृत्तिरित्यनुरक्तलिङ्गानि NītiVā. 32.4.

अनुरक्तलोक (anurakta-loka) *adj.* **1** to whom people are attached, who is liked by people नायकः ख्यातः ...अनुरक्तलोको निर्व्यूढभरः Kāvyālan. (Ru.) 15.2; स्वनुगतपरितोषितानुजीवी मधुरवचाश्चरितानुरक्तलोकः। महारम्भः ... भवति चिरं नृपतिः प्रदीप्तरश्मिः NītiSā. 5.91; एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः। हस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः BhāgP. iv. 20.15; दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता SāhiDa. 97.9; **2** which has reddened the world, NītiSā. 5.91 [*m.* person to whom everyone is attached, MW.]

अनुरक्तवत् (anurakta-va(n) t) *adj.* who is in love, who is passionate (च्यवनः) सुकन्यया सहारण्ये विजहारानुरक्तया (v. l. °अनुरक्तवान्) MahāBhā. iii. 125. 10; अलभ्यमनुरक्तवान् कथय किं नु नारीजनम् MudrāRā. 6.16 (34)

अनुरक्तवित्तहरण (anurakta-vittaharaṇa) *n.* taking away wealth from one who is in love अर्थोष्मा पितृलालनं विटघटामेलः ... वेश्यानामनुरक्तवित्तहरणे कुर्वन्ति साहायकम् Mugdhopa. 43.

अनुरक्तश्री (anurakta-śrī) *adj.* to whom the goddess of fortune is attached °सिंहादित्यः ... श्यामोन्नतविपुलवक्षस्थलस्थिरातिशयानुरक्तश्री[:] EI.xi. 18.17.

अनुरक्तसर्वप्रकृति (anurakta-sarvaprakṛti) *adj.* where all the subjects are loyal जनपदानाम् ... अनुरक्तसर्वप्रकृतीनाम् EI. viii. 44. 11.

अनुरक्तसाधन (anurakta-sādhana) *adj.* endowed with favourable aids अनुरक्तसाधनः कुलाभिमानी ... नराधिपः। परैस्त्वदन्यः क इवापहारयेत् ... श्रियम् Kirātā. 1.31.

अनुरक्तहृदय (anurakta-hṛdaya) *adj.* [*f.* -ā] **A** whose heart is attached to सः ... प्रभवानुरक्तहृदयैः ... राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास Kād. 7.7; अस्य मुरारिदेहच्छायेति ... लक्ष्मीः। शङ्के ... कृपाणपट्टेऽनुरक्तहृदयारचयत्प्रतिष्ठाम् HarVi. 13.55; **B** whose heart is enamoured or full of love or passion खण्डितया ... यः प्रियं प्रति भेदो विहितस्तत्र तस्यामेव भवान् निर्व्याजमनुरक्तहृदयः ... इति नायकस्यान्यत्रानुरागातिशयः साध्यः VyaktiVi. 115.25; अस्याः प्रियो निकट एव न विप्रलम्भकर्तानुरक्तहृदयोऽपि ŚṛṅgāMañ. (A.) 20.7.

अनुरक्ताङ्गना (anuraktāṅganā) *f.* woman who is in love अनुरक्ताङ्गनालोललोचनालोकिताकृतिः। स्वस्थीकर्तुं मनः शक्तो न विवेको महानपि YogVā. i. 26. 38.

अनुरक्ताङ्गी (anuraktāṅgī) *adj.* *(f.)* whose part (i.e. mind) is devoted to, i.e. faithful सा त्वब्रवीच्च मा मेवं वक्तुमर्हो दिवौकसौ। भर्तारमनुरक्ताङ्गी BhaviP. 46B. 24 (i. 19. 32)

अनुरक्तात्मक (anuraktātma-ka) *adj.* of loving nature (माम्) अनुरक्तात्मकं तत्किं त्यक्तुं समुचितं तव PadmP. (Ra.) 116.16.

अनुरक्तापरक्तजन (anuraktāparakta-jana) *m.* persons, who are loyal or disloyal प्रयुक्ताश्च स्वपक्षपरपक्षयोरनुरक्तापरक्तजनजिज्ञासया ... प्रणिधयः MudrāRā. 1.15(10)

अनुरक्ति (anu-rakti) *f.* **1Ai** devotion अनुरक्तिर्भक्तिः PārāSū. 41.5; 42.14; सा परानुरक्तिरीश्वरे BhaktiSū. (Śā.) i. 1.2; अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः AvadhūU². 337.4; TriBrU. 29; वनवासे पञ्चवट्यादिषु रघुनाथचरितचारुस्थलदर्शनात्तत्रैवानुरक्तिस्तेषां (विष्णुभक्तानाम्) स्वाभाविकी CaitaCa. 171.10(7); परां मुख्यां भक्तिविशेषमुद्दिश्यानुरक्तिर्लक्षणत्वेन विधीयते LalitāSaBh. 58.32 (*on* 93); **1Aii** liking हितानि कुर्वन्नपि नानुरक्तये जनस्य जल्पन् परुषं रुषा नृपः MadhuVi. 3. 31; **1B** affection, attachment, fondness दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः Hitopa. 1.70; **1C** kindness, consideration तत्सेवकेऽप्यनुरक्तिर्दानं प्रीतिविवर्धनम् Hitopa. 2.53; स्वामिनो मय्यनुरक्तिर्न वेति विज्ञापयेत् RājNīRa. 49.17; 50.13; **1D** love, passion अनुरक्त्या वदनरुचिम् ...। तस्या मदनः कुर्वन्नुपमिन्वे चारुतामवधिम् KuṭṭaMa. 274; (रामः) प्रत्ययहेतवे प्रियायाः। व्यतरत् खरकन्धरात्कलिन्ताम्गिमपुम् ...। अनुरक्तिमिवात्मनः सुदीर्घामसुतुल्यामनुदैवदुरनीताम् RāmC. 8.18; धूमप्रबन्धव्याजादालिङ्ग्यमानाकृतिरिव निशया मूर्तिमत्यानुरक्तेः।... रात्रिप्राणेश्वरो वो वितरतु वितताननन्दिसंदोहमग्निः SṛiKaC. 12.72; एकत्रैवानुरक्तिर्धियुर्नोर्हस्यः स चाधमः (कामः)

BhāvPra. (Śā.) 113.14(5) [Viśva Pra. 24.9; DharK. 332]; **1E** yearning ब्रह्मणो गुणनिरूपणेन तत्रानुरक्तिः VedāntKau. 254. 20 (*on* iii. 1. 1); **1F** satisfaction, cf. **अनुरक्तिफलप्रद;** **2** redness, KuṭṭaMa. 274.

अनुरक्तिफलप्रद (anuraktiphala-prada) *adj.* bringing about the fruit (in the form) of satisfaction or gratification अपश्चात्तापकृत् सम्यगनुबन्धिफलप्रदः (v.1.अनुरक्तिफलप्रदः Ṭīkā. BI. Ed.) ... प्रशस्तो मन्त्र इष्यते NītiSā. 12.35.

अनुरक्तिमुक्तकण्ठम् (anuraktimuktakaṇṭham) *adv.* (lamenting) unreservedly due to yearning क्वचन च यमुनावनान्तलक्ष्मीमवकलयन्ननुरक्तिमुक्तकण्ठम्। विलपति ... अखिलेशः CaitaCa. 223. 2(9); 224. 8(9)

अनुरक्तेशलिङ्ग (anuraktesa-liṅga) *n.* characterstics of a kind or considerate master दूरादवेक्षणं हासः संप्रश्रेष्वादरो भृशम्। ...अनुरक्तेशलिङ्गानि दोषेऽपि गुणसंग्रहः Hitopa. 2. 53.

अनुरक्ष् (anu-rakṣ-) I. U. **1A** to protect, to guard सधमप्रमादमस्माकमेतोरनुरक्ष जागृवि AV. (P.) xvi. 73. 3; ब्राह्मणं क्षत्रियं वा सहस्रेण (गवाम्) शताश्वेनावक्रीय संवत्सरायोत्सृजन्ति सर्वकामिनमन्यत्रा ब्रह्मचर्यात्। तथा चैवानुरक्षन्ति ŚāṅkhāŚS. xvi. 10. 10; के पृष्ठतोऽस्य ह्यभवन् (v. 1. ऽन्वरक्षन्त) ...युध्यतः MahāBhā. vii. 139. 12; विधूयाथ चितां तां तु वैदेहीं हव्यवाहनः (v. 1. जानकीमन्वरक्षत) Rāmā. vi. 3266*(1); CaraS. ii. 6. 8 (1941 Ed.); **1B** to take care of, to look after, to support कः ...। अनुरक्षति मामन्यस्त्यक्त्वा त्वां पुण्यभाषिणीम् Rāmā. vi. 522*(2); पिङ्गलः ... तृणकाष्ठादिविक्रयात्। अनुरक्षति तां पत्नीं मग्नो दारिद्र्यसागरे PadmP.(Ra.) 26.14; **2** to rule over अम्भोनिधिवलयवृतामन्वरक्षद्धरित्रिम् ...विक्रमादित्यभूपः EI. ix. 51.21; xviii. 230. 20; चालु(क्य)] [भी]मः। ... त्रिंशत्समा भूतलमन्वरक्षत् EI. iv. 234. 44; **3** to preserve, cf. **अनुरक्षितव्या;** **4** to control, cf. **अनुरक्षणा 2.**

अनुरक्षण (anu-rakṣaṇa) *n.* **1** watching over, guarding भृत्यानां चान्वेक्षणे (v.1.अनुरक्षणे)। ...विदुरः(नियोजितः) MahāBhā. v. 146. 9; **2** protecting, cf. **अनुरक्षणता.**

अनुरक्षणता (anurakṣaṇa-tā) *f.* the state of protecting अप्रतिहतचित्तता धर्मालोकमुखमात्मपरानुरक्षणतायै संवर्तते LaliVi. 4. 0(51); बहुजनचित्तानुरक्षणतयापि अपवादपरिहारं चेच्छतः शासनस्य महामते मांसमभक्ष्यं कृपात्मनो बोधिसत्त्वस्य LaṅkāSū. 8. 0(39) (101.9) [DBHS.]

अनुरक्षणा (anu-rakṣaṇā) *f.* **1** guarding, protection बोधिसत्त्वोऽनुरक्षणाप्रयोगेण मेधां रक्षति BodhiBhū. 195. 11; [illegible]5. 9 [DBHS.]; **2** control, cf. **अनुरक्षणाधर्मन्.**

अनुरक्षणाधर्मन् (anurakṣaṇā-dharman) *m.* [illegible] six types of Arhat (*lit.* one whose duty is to control senses) अ[illegible]णाधर्मा अर्हन् कतमः। मृद्विन्द्रियप्रकृतिको विक्षिप्तो दृष्टधर्मसुखविहारात् पा[illegible]णमेति अविक्षिप्तो न परिहाणमेति AbhidhSa. 91. 8i सूत्र उक्तं षडर्हन्तः परिहाणधर्मा चेतनाधर्मा अनुरक्षणाधर्मा...इति AbhidhKoBh. 372. 19 (*on* 6. 56)

अनुरक्षत् (anu-rakṣat) *adj.* protecting, guarding पुरुषो मतिमानात्मनः शरीरमनुरक्षन् शुक्रमनुरक्षेत् CaraS. ii. 6. 8 (1941 Ed.); बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान् SiddhYo. 51. 2.

अनुरक्षमाणा (ánu-rákṣamāṇā) *adj.* (*f.*) guarding, protecting अनु श्रुताममतिं वर्धदुर्वी बर्हिरिव यजुषा रक्षमाणा। नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ṚV. v. 62. 5 (*but* Sāy. अनु वर्धत् अनुवर्धयन्तौ better *adn.* अनु)

अनुरक्षा (anu-rakṣā) *f.* **A** preserving virtue आर्येण मम चित्तानुरक्षया न च्छोरितः Divyāva. 52. 10; अपर एकधर्मो महायानसंग्रहाय संवर्तते स्वस्खलितप्रत्यवेक्षणतया सर्वसत्त्वानुरक्षेति ŚikṣāSa. 127. 7; 124. 17; **B** protection, guarding, keeping, sparing क्षमा हि शक्तस्य परं विभूषणं गुणानुरक्षा निपुणत्वसूचनात् JātaMā. 189. 2 (28. 45); [Inst.] by way of sparing one's thought, i.e. so as not to hurt one's feelings आर्येण ममान्तिके कालपानकं पाययितव्यमिति। ...एवमेव कथयत्यपरापि। तेन तासामनुरक्षया स्तोकस्तोकं गृहीत्वा पूर्वाह्णिका कृता GiMs. iii(2). 144. 10 [DBHS.]

अनुरक्षितव्या (anu-rakṣitavyā) *adj.* (*f.*) to be preserved असेवनादपि हि प्रीतिरनुरक्षितव्या JātaMā. 145. 23 (23.16(3)

अनुरक्षितुम् (anu-rakṣitum) *inf.* to rule over अविजित्य जयैषिणां सदा न भुवः शक्यतयानुरक्षितुम् JānaHa. 4. 32.

अनुरक्षिन् (anu-rakṣin) *adj.* who guards, i.e. controls (speech) वाचानुरक्षी मनसा सुसंवृतः ... [आ]राधयेन्मार्गमृषिप्रवेदितम् EI. iv. 135. 1.

अनुरक्ष्य (anu-rakṣya) *adj.* to be protected वयं चार्जुन ते दासा ह्यनुरक्ष्या ह्यनाथकाः MahāBhā. iv. 1052*(2)

अनुरङ्ग (anu-raṅga) *m.* nasalisation, nasalised vowel अनुरङ्गाः पञ्चैकान्मात्रिका भवन्ति AmoghŚi. 41; *adj.* attached, i.e. addicted to इत्थं राज्ञ प्रभवति यदा षिङ्गसङ्गानुरङ्गः प्रत्यासन्नः प्रलपति गुणी ... क्व यामः ŚatTrayī. 824.

अनुरङ्गिणी (anuraṅgiṇī) *f.* name of a type of movement (in dance) पादपार्श्वयुगे स्थित्वा धरण्यां संचरेद् द्रुतम्। मध्ये च स्थीयते तत्र गतिरुक्तानुरङ्गिणी NṛttaSaṁ. 117.

अनुरचित (anu-racita) *adj.* **1** prepared, decorated सुवर्णयूथिकाप्रवालैर्मणीनारङ्गप्ररोहैरानन्दक्रीडास्थानमनुरचितं भवति SāmaraU. 253. 7; **2** provided, endowed with बोधिमण्डवृक्षोऽभूत् ... सर्वतथागतविषयविकुर्वितनिर्घोषापुररचितः (v. 1 °रचितः DBHS.) GaṇḍVyū. 208. 24 [DBHS.]; **3** put on subsequently, cf. **अनुरचितकिरातवेषा.**

अनुरचितकिरातवेषा (anuracita-kirātaveṣā) *adj.* (*f*). who has subsequently put on the dress of a person of mountain-tribe अवनिपतिः ... ताम् ... ईशानरचितानुरचितकिरातवेषामिव भवानीम् ... ददर्श Kād. 10.23.

अनुरचितगन्धगर्भ (anuracitagandhagarbha) *m.* a kind of jewel supposed to emit a perfume, GaṇḍVyū. 79. 26 [DBHS.]

अनुरचितगन्धमणिराज (anuracita-gandhamaṇirāja) *m.* excellent jewel provided or endowed with perfume उद्यानस्य मध्ये विचित्रध्वजं नाम महाविमानम्... अनुरचितगन्धमणिराजसमीरितगन्धम् GaṇḍVyū. 79. 26.

अनुरजनि (anurajani) *adv.* [P. ii. 1. 6] at each and every night, night after night तनुरनुसरति श्रीसंस्तवं यस्य शृङ्गेष्वनुरजनि सुधांशोर्मूर्तिर्मिर्बिम्बिताभिः ŚrīKaC. 4. 48.

अनुरज्जु (anurajju) *adv.* [P. ii. 1. 14] along the rope or cord शिरसि परिश्रिते यूपायावशिष्य शेषमनुरज्जु पुरुषौ संधाय पश्चाङ्ग्या शङ्कुं विनिहन्ति MānŚS. 219. 7; अनुरज्जु चतस्रः सीताः कृषति KātyŚS. xxi. 4. 1 (comm. रज्जुमनु लक्ष्यीकृत्य)

अनुरज्य (anuraj-ya) *ger.* **1** having pleased, having delighted तैरेव सहितः सर्वैरनुरज्य च तान्नृपान्। कुलूतवासिनं राजन्वृहन्तमुपजग्मिवान् MahāBhā. ii. 24. 4; **2** having become enamoured of अनुरज्य चलप्रकृतौ त्वय्यपि भर्ता यया मुक्तः Kāvyālaṅ.(Ru.) 2. 41.

अनुरज्यत् (anu-rajyat) *adj.* [*f.* -ntī] **1** becoming red, reddened संध्याकालानुरज्यद्दिनकरसरुचा कालधौतेन गाढं व्यानद्धः ... मन्मथारेरुदारो मध्यः ... दिशतु सदा संगतिम् ŚivaPāKeSt. 21; **2A** being in love with, loving, enamoured of इमाः (स्त्रियः) ...। अनुरज्यन्त्य एव भवन्ति कारणमनर्थपरंपरायाः YaśasCam. ii. 61.9; जयति...चामरैर्वीज्यमानः। जिनपतिरनुरज्यन्मुक्तिसाम्राज्यलक्ष्मीयुवतिनवकटाक्षक्षेपलीलां दधानैः JinaCatur. 8; **2B** being attached to जीवश्च सुखैकान्वेषी सुखाभासाय तुच्छेषु तेष्वनुरज्यन् व्यतीतासंख्येयजनुः ... निजस्वामिनं प्राप्य GoviBh. 326. 2 (*on* iv. 4. 22); **3** being pleased or delighted व्रजनवयुवराजस्याष्टकम् ... यः प्रयत्नादधीते। परिजनगणनायां नाम तस्यानुरज्यन् विलिखति ... वृन्दारण्यराज्ञीरसज्ञः StavMā. 42. 1; अकैतवे भक्तिसवेऽनुरज्यन् स्वमेव यः सेवकसात् करोति GoviBh. 313. 10 (*on* iv. 4. 1); **4** being endowed or associated with, cf. **अनुरज्यदुत्कल 2.**

अनुरज्यदुत्कल (anurajyad-utkala) *adj.* **1** with whom people of Utkal are pleased अयं (नृपः) गुणौघैरनुरज्यदुत्कलः NaiṣC. 12. 78 (comm. अनुरज्यन्तोऽनुरक्ता भवन्तः उत्कला लक्षणया तद्देशनिवासिनो लोका यत्र); **2** who is endowed or associated with excellent (sixty-four types of) *kalās*, NaiṣC. 12. 78 (comm. अनुरज्यन्त उत्कृष्टाश्चतुःषष्टिकला यत्र तैरुपलक्षितः)

अनुरज्यमान (anu-rajyamāna) *adj.* [*f.* -ā] **1** being delighed or pleased with अनैकान्तिकश्च विसंवादने दोषः। दृश्यन्ते बहवो विसंवादिता भृशतरमनुरज्यमानाः DhūrtaViSaṁ. 24. 14; **2A** being connected with इन्द्रियादिप्रणाडिकया चैतन्यमेव तेन तेनार्थेनानुरज्यमानं तत्प्रकाशतया तदीयत्वेन व्यवतिष्ठते ĀtmaSi. 49. 9; **2B** being construed or qualified (गोत्वेन न हि शुक्लत्वं गोत्वं वा तेन रज्यते) असत्यपि तयोः परस्परानुरागे व्यक्तिरेका ताभ्यामनुरज्यमाना वाक्यार्थो भविष्यति NyāyRa. 854. 19 (*on* 7. 31); YuktiSneha. 151. 9 (*on* i. 1. 7); **3** being coloured, cf. **अनुरज्यमानवपुस्.**

अनुरज्यमानवपुस् (anurajyamāna-vapus) *adj.* whose form is being coloured दर्शनसमनन्तरोत्पत्त्यवाप्तदर्शनच्छायानुरज्यमानवपुषो विकल्पाः प्रत्यक्षायन्ते NyāyMañ. i.31.10.

अनुरञ् (anu-rañj-) I. P., IV. U. **1A** to become attached to, to be fond of, to show affection towards (*caus.*) **i** to cause to become attached or

¹**अनुरुध्यमान** (anu-rudhyamāna) *adj.* [*f.* -ā] **1A** following closely, i.e. being faithful **B** being followed, i.e. attended **C** following, depending on **2** regarding, considering **3Ai** adhering to, sticking to **ii** being devoted to, being attached to **B** relating to, referring to **4A** obeying **B** being requested or urged **5Ai** approving, accepting, complying with **ii** being accepted or approved, being recognised **B** being in conformity with or in accordance with **6** practising, observing **7** disregarding **8A** longing for, desiring **B** cherishing, feeling **1A** following closely, i.e. being faithful अनुरुध्यमाना भर्तारं दृश्यन्ते वीरपत्नयः। शुश्रूषया क्लिश्यमानाः पतिलोकं जयन्त्युत MahāBhā. iv. App I.17 (7); **1B** being followed, i.e. attended अयमनुरुध्यमानस्तापसीभ्यामबालसत्त्वो बालः Śāk. 7.13(4); **1C** following, depending on पदार्थासङ्गतेऽर्थे चेद् वाक्यं साक्षात्प्रवर्त्तते।... तेनाज्ञातपदार्थोऽपि बुध्येतैव स्वभावतः। तान्वानुरुध्यमानस्य कारणं स्युस्त एव ते ŚlokaVār. 7.107 (875.7); (शब्दाः) ते हि स्वसामर्थ्यमनुरुध्यमानास्तिरस्कृतान्यार्थानयथार्थान् प्रत्ययान् जनयन्ति TātpaṬ. (U.) 60.8 (*on* 2.62); न एनं चाक्षुषं पुरुषमुररीकृत्य तं प्रत्यनुग्रहाय एते रश्मयः स्वामिकर्तव्यवशात्पूर्वमागच्छन्तोऽपि पुनः तत्कर्मक्षयमनुरुध्यमाना इव नोपयन्ति न प्रत्यागच्छन्ति एनम् BṛĀraUBh. 708.16 (*on* v.5.2); प्रमाणान्तरप्रतिपन्नवस्तूपस्थापनायोपादीयमानं वक्तुस्तदर्थसिद्धिमनुरुध्यमानमेव प्रमाणभावमनुभवति ĀgaPrā. 2.1; न हीश्वरः प्रबलतरपवन इव जन्तून् प्रवर्तयत्यपि तु तद्वैतन्यमनुरुध्यमानो रागाद्युपहारमुखेन Bhām. 580.12 (*on* ii.3.41); **2** regarding, considering (सर्वार्थसिद्धः) तपोधनांश्चैव स तान् ददर्श। तपांसि चैषामनुरुध्यमानस्तस्थौ शिवे श्रीमति वृक्षमूले BuddhaC. 7. 36; **3Ai** adhering to, sticking to स्तोत्रक्रममनुरुध्यमानस्य प्रधानक्रमो विरुध्येत। तस्मान्न स्तोत्रक्रमोऽनुरोद्धव्यः ŚābaBh. 1309. 11 (*on* v. 1.35); पुण्डरीकानि नरपतिस्तु प्रियजनप्रणयभङ्गकातरं दाक्षिण्यमनुरुध्यमानः ... कथं कथमपि ... तानि जग्राह HarṣaC. 154.3; केचित्तु पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति उत्तराणि सिद्धान्तसूत्राणि इत्येतां व्यवस्थामनुरुध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयन्ति BrahmSūBh. (Śaṅ.) 833.16 (*on* iv. 3.14); निजप्रतिज्ञानमनुरुध्यमाना महोद्यमाः कर्म समारभन्ते ŚārṅgaPa. 229; **3Aii** being devoted to, being attached to यां कामपि व्रजकुले वृषभानुजायाः प्रेक्ष्य स्वपक्षपदवीमनुरुध्यमानाम्। सद्यस्तदिष्टघटनेन कृतार्थयन्तीं देवीं गुणैः सुललितां ललितां नमामि StavMā. 286.28 (comm. अनु लक्षीकृत्य रुध्यमानां वश्याम्); **3B** relating to, referring to आख्यातप्रत्ययः ... ब्राह्मणो यजमान इतिवदुपपदाधीनविशेषावस्थानत्वात्तदधीनजात्यादिवृत्तित्वमनुरुध्यमानो न... °अधिकारित्वनिर्णयः स्यात् TantrVā. 185.9 (*on* i. 3.11); **4A** obeying निर्धना स्त्रीति। ... यदि स्मृतिमनुरुध्यमाना परवशा निर्धना च स्यात् यजेतेत्युक्ते सति न यजेत ŚābaBh. 1360.211 (*on* vi. 1.13); सोऽपि ... पुरोहितस्य वाचमनुरुध्यमानः ... दुर्जातजातस्य शान्तये कृत्स्नमेव कोशजा(तं) द्विजातिसाच्चकार AvantiKa. 60.13; **4B** being requested or urged सारिकयानुरुध्यमानः कथयितुमारेभे (शुकः) VāsaDa. 109.5; तया चाहमनुरुध्यमानस्तां बकुलमालामात्मनः कण्ठादवतार्य दत्तवान् MālaMā. 1.305; अन्तः सौहार्दमनुरुध्यमानया ... निवर्तितो गमनादेतया मान्यया TilaMañ. 283.5; **5Ai** approving, accepting, complying with एवमघटमानसकलोपायसंपादितपदार्थेऽस्मिन्प्रार्थनामात्रकमेव केवलमनुरुध्यमानः शृणोतु देवः HarṣaC. 296.2; यद्यपि भवतो बुद्धिमनुरुध्यमानैरस्माभिः प्रवृत्तिरभ्युपगम्येत तथापि तस्याः प्रवृत्तेरर्थाभावात् प्रयोजनाभावादित्यर्थो न तस्य चेतनत्वाद्भोगो न पुरुषस्य BrahmSūBh. (Bhā.) 111.17 (*on* ii. 2.6); अत्रापरीक्षिताभ्युपगमादिति यथाश्रुतपञ्चमीनिर्देशमनुरुध्यमानाः ...एवं व्याचक्षते NyāyMañ. ii. 129.15; **5Aii** being accepted or approved, i.e. being recognised यदि वृद्धव्यवहारे समधिगतपदसामर्थ्येऽनुरुध्यमानेऽन्वयावगतिर्नोपपद्यते ... कामं लक्षणाश्रीयताम् ĀgaPrā. 36.5; **5B** being in conformity with or in accordance with स्मृतिर्हि ... प्राचीं प्रतीतिमनुरुध्यमाना ...न प्रमाणम् PrakaPañ. 125.4; अथापि भवतः श्रद्धाम् अनुरुध्यमानाः। स्वाभाविकीमेव प्रधानस्य प्रवृत्तिम् अभ्युपगच्छेम BrahmSūBh. (Śaṅ.) 357.1 (*on* ii. 2.6); अस्तु लौकिकानां पदसंघातानां प्रेक्षावत्पुरुषसंदृब्धानां संदर्भितुरभिप्रायमनुरुध्यमानानामनुपपत्त्या अनधिगतार्थलक्षणापरत्वम् TattvBi. 135.2; **6** practising, observing भूपतिरनुवर्तमानो (v. l. अनुरुध्यमानो) लौकिकमाचारमाचार्यवचने चोत्थाय ... तामेव भूमिमयासीत् HarṣaC. 331.12; एवं नामायुक्तमनुरुध्यमानाः पुमांसो महत्ययुक्तगह्वरे पात्यन्ते MahāvīC. 5. 45 (1); **7** disregarding न गुणमपेक्ष्याभिवर्धते, ना(मिमोषेऽपि दोषे) न व्यावर्तते। तथा हि यमयोस्त्वतिमानुषरूपमनुरुध्यमाना ... क्षुद्रम(लो ?ली)काभिमानगर्वं दुर्योधनमतिनिर्भरमालिलिङ्ग लक्ष्मीः AvantiKa. 47.8; **8A** longing for, desiring (सः) रतिमनयानुरुध्यमानः ...। व्यसनरहितराजराज्यभारः स्वमुपचिकाय यशो धनंजयेन RāghPāṇ. (Dha.) 2.34 (comm. कामयमानः); तथा हि कैश्चिद्विनेयः प्रसिद्धिमनुरुध्यमानो दृष्ट इति सप्रसिद्धेतिवृत्ते नाटके विनेयः AbhinBhā. ii. 410.21 (*on* 18.8); **8B** cherishing, feeling कृपामनुरुध्यमानः न निष्ठुरं व्यवहरति TilaMañ. 112.23.

²**अनुरुध्यमान** (anu-rudhyamāna) *adj.* **A** being delimited or confined to लिङादयः ... ते तु स्वशक्तिमनुरुध्यमानाः किंचिदेव विदधति न सर्वम् TantrVā. 717.4 (*on* iii. 1.13); संसर्गस्तु ... घटादीननुरुध्यमानो न व्यापको भवति NyāyRa. 749.21 (*on* 6.75); **B** being restricted or restrained वीक्ष्याननं नरपतेरनुरुध्यमानः किंचिद्विवक्षुरपि यन्न किमप्युवाच PṛthvīVi. 4.50.

अनुरुन्धत् (anu-rundhat) *adj.* [*f.* -ī, ntī(irr.)] **1A** loving, being fond of क्रूरं भ्रातृवचो हित्वा सा त्वामेवानुरुन्धती MahāBhā. i. 1552*(6); द्वयमिदमनुरुन्धन्दक्षिणः सारसाक्ष्योरधित ... आनन्दवृद्धिम् YātrāPra. 5.132; **1B** cherishing, feeling तन्मैत्रीमनुरुन्धता तव मया तत्संगराग्रे कृतं न व्रीडां गमितोऽसि येन न पुनः स्यां संभवे येन च BālRā. 6.70; कुन्त्या सह शिवादेवी रोहिणी देवकी तथा। सौजन्यमनुरुन्धत्यश्चेलुः PāṇḍaC. 14.279; **2** practising, observing तं भार्या प्रत्युवाचेदं धर्ममेवानुरुध्यती (v.l. अनुरुन्धती) MahāBhā. iii. 183.4; मन्ये दुर्बल इव चोरवृत्तिम् अनुरुन्धन्नधुना दशकन्धरोऽयम् अपूर्व इति मयि विस्रम्भादिव स्वयमप्यपूर्वतामवलम्बेत विमानम् इदम् JānaPa. 1.28 (2); **3A** following closely, i.e. being faithful भर्तारमनुरुध्यन्त्यः (v.l. अनुरुन्धन्त्यः) क्लिश्यन्ते वीरपत्नयः MahāBhā. iv. 15.32; **3B** following, depending on मनोऽनुरुन्धती भर्तुः MahāBhā. xiii. 95.39; स्वचित्तोत्थविकल्पार्थैः

प्रत्यक्षाप्यस्मि विस्मृता। सदाचार्योपदेशेन सत्तर्कमनुरुन्धता LakṣmīT. 7.45; **3C** following, i.e. imitating अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम्। मानुषं लोकमासाद्य तज्जातिमनुरुन्धतः BhāgP. x. 7.3; **4** being in conformity with तद्य सामान्यविज्ञानमनुरुन्धन् विभाव्यते। नीलाद्याकारलेशो यः स तस्मिन् केन निर्मितः PramāVār. 3.23; शुक्तिसंयुक्तेन्द्रियेण दोषसहकारिणा रजतसंस्कारसचिवेन सादृश्यमनुरुन्धता शुक्तिकाविषयो रजताध्यवसायः कृतः NyāyKa. 181.9; **5** adhering to, clinging to श्रीखण्डपादपेनेव कृतं स्वं जन्म निष्फलम्। जिह्मगानां द्विजिह्वानां संबन्धमनुरुन्धता VairāŚ. (Pa.) 58; **6** blocking, stopping, i.e. destroying अनुपुरमनुरुन्धन्नान्तरध्वान्तराशिम् ... अवतु भवतुपारादक्षरव्योमसूर्यः PāñcRāRa. 79.1.

अनुरुन्धान (anu-rundhāna) *adj.* [*f.* -ā] **1** conforming to तदेषां बुद्धिप्रतिभासमनुरुन्धानैः बुद्धिपरिवर्तिनामेव भावनामाकारविशेषपरिग्रहाद् बहिरिव स्फुरतां सामान्यमित्युच्यते PramāVāSvopVṛ. 24.31; भवादृशीनां बुद्धयः ... कार्यमनुरुन्धानाः परिणमन्ति ViddhaŚā. 4.16(10); ऋगादिशब्दाः... वेदशब्दम् अनुरुन्धानाः ... वेदलक्षणार्थाः VedāntKa. 118.15(*on* i.1.8); **2** approving, admitting यदि वा नैयायिकादिमतेन सर्वसर्वगतमेवास्तु। तथाप्यभिव्यञ्जिकानां व्यक्तीनां या शक्तिस्तामनुरुन्धानैर्नान्तरा गृह्यते Śarka. 8.12; **3A** following, depending on अनुभवस्तावत् ध्वस्तः ...तमेव च अनुरुन्धाना स्मृतिर्जायते PratyabhiVi. i. 92.2 (*on* i. 2.3) (Bhāsk. अपेक्षमाणेति यावत्); शब्दार्थयोर्हि प्रसिद्धो यः संबन्धो वाच्यवाचकभावाख्यस्तमनुरुन्धान एव गमकत्वलक्षणो व्यापारसामग्रन्तरसद्भावादौपाधिकः प्रवर्तते VyaktiVi. 29.12; **3B** following, supporting (view etc.) अथ मन्यसे स्वसिद्धान्तमनुरुन्धानेन भवता यथार्थज्ञानं तत्रोत्पादनीयम् KhaṇḍanKhā. 1038.23; प्रायेण सर्वप्राणिनस्तावत् यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। भस्मीभूतस्य देहस्य पुनरागमनं कुतः इति लोकगाथामनुरुन्धानाः ... चार्वाकमतमनुवर्तमाना एवानुभूयन्ते SarvaDaSaṁ. 1.19; केचित्तु ... उपासनानुवादमनुरुन्धानाः... वाक्यार्थं वर्णयन्ति UpaParā. 49.22; महाकविभिः प्राचीनपरंपरामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्गणितम् RasGaṅ. 24.1; **4** practising, observing परदारव्रतं चानुरुन्धानो भर्तारं व्यापाद्य सभर्तृकामभर्तृकां करोति KaumuMi. 8.9(15); **5A** cherishing, feeling महाब्राह्मणाः ... महाजनानामादरमतिमहान्तमनुरुन्धानाः समादिशन्ति AdbhuDa. 1.5 (8); उपजप्तोऽपि बहुधा तैरस्माकं स केवलम्। सौहार्दमनुरुन्धानः शस्त्रघातं हतोऽजनि Jīvān. 267.2; **5B** obeying एके तमनुरुन्धाना ज्ञातयः पर्युपासते BhāgP. x.2.4; मैथिलास्तु बौधायनवचनमनुरुन्धाना दक्षिणकरधृतकमण्डलुर्मूत्रपुरीषे कुर्यादिति निबन्धेषु लिखितवन्तः VīraMi. (Āhnika.) 40.23.

अनुरुन्ध्यत् (anu-rundhyat) *adj.*[*f.*-ntī] *irr.* **1** following closely, i.e. being faithful भर्तारमनुरुध्यन्त्यः (v.l. अनुरुन्ध्यन्त्यः) क्लिश्यन्ते वीरपत्नयः MahāBhā. iv. 15.32; **2** satisfying, gratifying गर्भाधानविधानेन न काममनुरुन्ध्यता। पुत्रार्थं जनितश्चायं पुत्राम्नो बिभ्यता मुने MārkP. 75.16.

अनुरुसु (an-urusu) Gr. not having the prefixes *uru* and *su* अश्रुतिसहत्यो कृल्लोपे। अनुरुसुभ्याम् VājaPrāti. 5.31 (Uvaṭa उरु सु इत्येताभ्यां परयोरश्रुतिसहत्योः कृल्लोपे सत्यवग्रहो भवति)

अनुरुह् (anu- ruh-) I. U. **A** to grow forth, to increase अनु यत्पूर्वा अरुहत् सनाजुवः ṚV. i. 141.5; विद्वाँ अस्य व्रता ध्रुवा वयाइवानु रोहते ṚV. ii.5.4; viii. 13.6; विद्वाँ अस्य व्रता ध्रुवा वया इवानुरोहत इति संनुप्ताविभमन्त्र... वैश्वानर्यां शिक्यमादत्ते ĀpaŚS. xvi.15.7; MānŚS. 104.8; VaikhāŚS. 18.13; **Bi** to ascend, to mount afterwards पश्चं पुदानि रूपो अन्वरोहम् ṚV. x.13.3; स धर्मात्मा ...। शोकविप्रहतज्ञानो यानमेवान्वपद्यत (v.l. अन्वरोहत) MahāBhā. xi. 9.4; सीतामारोप्य रामोऽपि लक्ष्मणश्चाप्य(v.l. -च) रोहताम् Rāmā. ii. 1172* (4); vi. 29.10; **Bii** to ascend (the funeral pyre) after (the dead husband) उदीर्ष्व नारीत्यनया मृतं पत्न्युनुरोहति BṛDe. 7.13.

अनुरुहा (anuruhā) *f.* name of a grass (*cyperus Berienius*), pw.; MW.

अनुरुह्य (anuruh-ya) *ger.* [w. r. for अवरुह्य] BṛKathāMañ. ix.2.66.

अनुरूढस्नेहप्रसर (anurūḍha- snehaprasara) *adj.* whose expanse or flow of affection has grown or increased अनुदिनानुरूढस्नेहप्रसरश्च स तत्रातीव ममता-कृष्टहृदयोऽभवत् ViṣṇuP. iv. 2.113.

अनुरूप (ánu-rūpa) *adj.* [*f.* -ā] **1Ai** similar, like, conforming to (used as noun) similarity, conformity or agreement [Inst.] in similarity, in conformity or in agreement with **ii** equal (in quantity) **B** (son, student etc.) worthy **C** capable, competent **2A** proportionate in size, shape or measurement (used as noun) [Inst.] in proportion to **B** which is in accordance with or corresponding to (used as noun) [Inst.] in accordance or correspondance with **3A** suitable, well-matched **Bi** befitting (words etc.) (used as noun) what is befitting **ii** befitting (action etc.) (used as noun) what is befitting **iii** befitting (feelings) **iv** befitting (behaviour etc.) **Ci** right, proper, fit, favourable (used as noun) what is right, proper, fit, favourable **ii** appropirate, commendable **4** agreeable, pleasant **1Ai** similar, like, conforming to द्वाभ्यामाक्रमयति (अश्वम्) प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पुशवः प्र जायन्ते TaiS. V. i. 2.6; KāṭhS. 19.3 (ii. 3. 4); KapiKaS. 30.1 (138.7); अनुरूपश्च वां एतत्क्रियते यज्ञस्यावरुद्ध्यै MaiS. iii.1.4 (iii. 5 .9); अहरेव तदह्नोऽनुरूपं कुर्वन्त्यहर्वाह्नोऽनुरूपम् KauṣīBr. 28. 10 (138. 6); अयं वै लोको रथन्तरमसौ लोको बृहदस्य वै लोकस्यासौ लोकोऽनुरूपोऽमुष्य लोकस्यायं लोकोऽनुरूपः AitBr. 36. 2 (899); (सत्त्रिणः) शिखा अनु प्र वपन्ते... अथो गवामेवानुरूपा भवन्ति PañcBr. iv. 9. 23; वामदेव्यं गेयम् ...। न बृहतो न रथन्तरस्यानुरूपं गेयम् PañcBr. vii. 9. 15; यद्यमुमसान् जुहोति। तेनैवानुरूपेण यजमानस्सुवर्ग लोकमेति TaiBr. I. iv. 1. 3; पवमानो अजीजनदिति जनद्वान् अनुरूपो भवति JaimiBr. 3. 59; वैराजस्य ह खलु वा एतद् अनुरूपं साम JaimiBr. 3. 81; पशूनामेवैतत् पशूननुरूपान् कुर्वन्ति JaimiBr. 3.175; पश्यामः खलु पदानुरूपान् स्तोभानृचोऽन्ववयतः NidāSū. 60.13 (3.12); अनुपूर्वश्च 'सूक्तानुरूपाश्च्छन्दोमान् करोति पृष्ठ्यच्छन्दोमानामकृतकाराय NidāSū. 69. 13 (4. 6); सकृद्विन्तय दैवतम्। तस्मात्ते भवितापत्यमनुरूपमसंशयम् MahāBhā. i. 115.15; भीमस्य पुत्रः ... महास्त्रविद्यापि तवानुरूपः MahāBhā viii. App. I. 20 (36); देवा मानुषरूपेण (v.l. देवानामनुरूपा हि) चरन्त्येते (राजानः) महीतले Rāmā. iv. 18. 38; पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव RaghuVa. 5. 34; Vikramo. 5. 21; नैते ममानुरूपा इत्यभिहितास्तन्मातरः परित्यागभयात्तत्पुत्रान् जघ्नुः ViṣṇuP. iv. 19. 15; VāyuP. ii. 37.133; भवान् ...। मात्रानुरूपो रूपेण पितुर्वीर्येण जायते BrahmāṇḍP. ii. 7. 111; ii. 70. 21; अनुरूपो हि गाव्यादिर्गोशब्दस्य ŚābaBh. 289.7 (*on* i. 3.28); चन्द्रापीडस्यापि कादम्बर्याः सखी रूपानुरूपा ... प्रक्षालितवती चरणौ Kād. 192.18; अनुरूपो हि संसर्गी स्यादित्यन्यार्थकल्पना TattvSaṁ. 775; पृथिव्या हि अप्रकाशात्मिकाया अनुरूपा रात्रिः ChāndoUBh. 286. 9 (*on* v. 6. 1); Bhām. 525. 10 (*on* iii. 1. 1); (रूपं रूपं प्रतिरूपो बभूव) प्रतिरूपोऽनुरूपो वा यादृक्संस्थानौ मातापितरौ तत्संस्थानः तदनुरूप एव पुत्रो जायते BṛĀraUBh. 344.17 (*on* ii. 5. 19); 223. 17 (*on* ii. 1. 8); 474. 11 (*on* iii. 9. 22); नैतदस्त्यनुरूपं तु क्षणिकत्वे धियां तव ŚlokaVār. 5(2). 187 (263.1); श्रीभरसहशब्द (Read ब्द) गीतमहिमा कारणानुरूप(Read पः)कायजन्मतोऽपि तथाविध एव EI. xv. 3.3; xxv. 155.8; क्षीरं महोदरहितम् ... तदनुरूपगुणौषधाढ्यम् KalyāKā. 11. 179 (? 178); अनुरूपेण प्रमाणेन प्रमेयं प्रमीयते NyāyMañ. i. 51. 5; भावनाः स्वानुरूपाः स्मृतीरारचयन्ति ĀgaPra. 5. 16; ममावतारैः ... दिशः समस्ता गिरयोऽम्बुदाश्च। व्याप्ता भरद्वाज ममानुरूपैः VāmaP. 89. 57; चैतन्यमस्य धर्मो यः प्रभा भानोरिवामला। तया स्फुरति जीवोऽसौ स्वत एवानुरूपया LakṣmīT. 13.26; यदि हि पूर्वज्ञानमुत्तरस्य जनकं भवति ततोऽनुरूपं विरूपं वा जनयति Kāśi. ii. 87.13(*on* 5(2). 189); iii. 209. 23 (*on* 5(8). 45); अस्या वीथ्या मोचापनकाले अपरवीथी अनुरु (Read °रूपा) ... मोक्तव्या EI. i. 178.38; मोक्षदशायां भक्तिस्त्वयि कुत इव मर्त्यधर्मिणोऽपि न सा राजति। ततोऽनुरूपामारोपय Stotrā. 19.13; येन कर्मणा यादृक् शरीरमारब्धम् ... तस्य विपाकस्य अनुगुणा अनुरूपा या वासनास्तासामेवाभिव्यक्तिर्भवति RājMār. 68.7; विश्वं नाना ... अनुरूपाणां परस्परौचित्यावस्थितीनां ग्राह्याणां ग्राहकाणां च भेदात् PratyabhiHṛ. 6. 13(3); एतावानेवायं समभिव्याहार इति तत्र श्रोतुरभिमानः- न तत्संदेहेऽपि श्रुतानुरूपसंसर्गावगमात् NyāyKuA. ii(1). 209. 11; आर्यपुत्रायमेकाकी नूपुरो न विराजते। अनुरूपस्तदेतस्य द्वितीयः परिकल्प्यताम् KathāSaSāg. v.2.173; तदौषधानि स्युरनुरूपाणि हेतुभिः ŚārṅgaS. i. 1. 55; आत्मानुरूपैर[ध] त [1] सुलब्धैर्दे (read ब्धैर्देवीषु) देवप्रति[म]: कुमारैः EI. vi. 339.37; अचेतनेभ्यो भूतेभ्यश्चेतनो जायते कथम्। कारणस्यानुरूपं हि कार्यं जगति दृश्यते Triṣa- ŚaPuC. i. 1. 354; i. 6. 49; तस्यानुरूपं तनयं विधाता विधातुमल्पप्रतिभो यदासीत् PṛthvīVi. 6. 36; रामस्येव गृहीतसत्यतपसस्तस्यानुरूपो गुणैः सौमित्रेरुदपादि तुल्यमहिमा वाक्पालनामानुजः EI. xiv. 326.9; अनुरूपमस्य जगतः प्रकृतितां त्रिगुणं प्रधानमुपयाति न परः NayaMañ. II. ii. 1.1; (used as noun) similarity, conformity or agreement with यत्र वै यज्ञस्यानुरूपं क्रियते तद्यजमान ऋध्नोति MaiS. iii. 1. 4 (iii. 5. 8); KāṭhS. 19. 3(ii. 3. 3); KapiKaS. 30.1 (138.6) (also *adv.* ?, cf. Viśva.) नात्र प्रत्यक्षानुरूपं कुर्वन्ति JaimiBr. 3.206; 3.241; वेदवचनानुरूपं स्मृतिभिरपयुक्तम् VajraSūU. 260.23; सारूप्यमनुरूपस्य सारूप्यात्क्षोभवर्धनम् SāhiDa. 342. 18; [Inst.] in similarity, in conformity or in agreement with स्वरितस्यानुरूपेण कम्पं कुर्वीत शास्त्रवित् SvarāṅŚi. 20; Upalekha. 70. 4; उत्सवेषु च सर्वासामनुरूपेण पूजापानकं च KāmSū. 252.22 (4.2) (Jaya Ma. कुलवयोऽनुरूपा); सर्वासां चानुरूपेण गम्याः सहायाः KāmSū. 363.23 (6.6); नमो वृन्दारण्यविहारिणे।

तदनुरूपेण तदा साक्षिणे नमोऽनुरूपाय SāmaraU. 247.10; **1Aii** equal (in quantity) (नदी) सा ताभिरनुरूपाधिकरूपा सती न निवर्तते ŚaṅkaVi.(Ā.) 214.20; **1B** worthy (son, student etc.) भारतसंहिताम् ...। अन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ प्रभुः MahāBhā. i. 1. 63; स पुरोहितमनुरूपमन्विच्छमानः परं यत्नमकरोत् MahāBhā. i. 3. 10; श्रूयते यादवी कन्या अनुरूपा कुलस्य नः MahāBhā. i. 103. 5; संगृह्णीयादनुरूपान् सहायान् MahāBhā. v. 37. 22; यः प्रादात् ... द्विजातिभ्योऽनुरूपेभ्यः कामानुच्चावचांस्तथा MahāBhā. xii. 29. 126; अनुरूपाय शिष्याय स्वां विद्यां यः प्रयच्छति MahāBhā. xiii. App. I. 15 (3354); राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक्। गुणवन्तोऽनुरूपाश्च Rāmā. i. 17. 10; मुनिरूपोऽनुरूपेण सूनुना ददृशे Kirātā. 11. 2 (comm. दर्शनप्रदानयोग्येन); देवस्य सद्भावगर्भमपहाय हृदयमेकमन्यमनुरूपं प्राभृतमेव दुर्लभं लोके तथाप्यस्मत्स्वामिना ... पूर्वजोपार्जितम् ... कृतार्थीकृतम् HarṣaC. 289. 12; अयमपि कुमारस्यानुरूपमेव मित्रम् AvantiKa. 164. 3; सोऽनुरूपं ततो लब्ध्वा सूनुम् ...। तत्रारोपितगार्हस्थ्यः सन् प्रशान्तिमतः श्रयेत् MahāP. 38. 148; आसीन्न संदेशहरोऽनुरूपः RāmC. 3. 22; देवस्यानुरूपस्त्यमात्मजः TriṣaŚaPuC. i. 5. 480; अथानुरूपेण जनेन गुप्ता ... मनुजेन्द्रकन्या। उपाययौ लोचनवर्त्म राज्ञाम् RāghPāṇ. (Ka.) 2. 6; भारद्वाजादयः षड्ऋषयः ... पिप्पलादं गुरुं विद्यानिष्क्रयार्थमनुरूपमन्यदपश्यन्तः ... प्रणम्य प्रोचुः VedāntKa. 98.5 (*on* i. 1. 4); पश्य कीर्तिरनुरूपमाश्रिता त्वां विभाति नरसिंह भूपते Ekāva. 8. 39 (8) (290. 8); अनुरूपेण पुत्रेण कुलं तिष्ठति सीमनि PuruṣPa. 165. 5; दानसंस्कार-मानादावनुरूपे पराङ्मुखः। ... भूपतिः Rāj Ta. (Jo.) 1276; श्रीराजवल्लभः ...। अर्हतामनुरूपाणामुपाचक्रे पृथुप्रथः Ballā C. 112. 2; **1C** capable, competent पञ्चत्वमपि संप्राप्तं यदि त्वं परिषस्वजे:। बाहुभ्यामनुरूपाभ्यां स जीवेदिति मे मतिः MahāBhā. iv. 215* (8); अनुरूपाविमौ बाहू राम कर्म करिष्यतः। अभिषेचनविघ्नस्य कर्तृणां ते निवारणे Rāmā. ii. 20. 34; वाराहीमात्मयोनेस्तनुमवनविधावास्थितस्यानुरूपाम् MudrāRā. 7.19; **2A** proportionate in size, shape or measurement यूपं करोति सक्षीरं स्थूलं मूले वालाग्रमनुरूपम् ṢaḍviBr. iv. 4.1; गदा श्रेष्ठा ...। अनुरूपा च भीमस्य गाण्डीवं भवतो यथा MahāBhā. ii. 3.6; पाञ्चाली ...। सा पात्यमाना बाहुभ्याम्...। वृत्ताभ्यामनुरूपाभ्यामूरू समवलम्बत MahāBhā. iii. 144.3; उपधानम्...। शयनस्यानुरूपं हि शीघ्रं वीर प्रयच्छ मे MahāBhā. vi. 115.45; ततोऽपश्यत्... सः ... न्यग्रोधम् ...। शाखाभिरनुरूपाभिर्भूषितम् MahāBhā. xii. 163. 12; शतम् ... प्रयातु ...। चणकानां कुलित्थानाम् ...। अतोऽनुरूपं स्नेहम् Rāmā, vii. 91. 20; पयोघटैराश्रम-बालवृक्षान्संवर्धयन्ती स्वबलानुरूपैः। ... स्तनंधयप्रीतिमवाप्स्यसि त्वम् RaghuVa. 14. 78; एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते Śāk. 1. 15(4); (अग्नौ) ध्वजकुम्भहयेभभूभृतामनुरूपे वशमेति भूभृताम्। धरा YogYā. 8.17; तथानुरूपैर्वमनैः सनस्यकैः। उदराग्नीनपि साधयेद् भिषक् KalyāKā. 2.13; (गणपतेः) तद्वदनानुरूपवपुःसंपादनसमाहितहृदयेन ... पितामहेन विहितसकलसत्त्वातिशायिदेह ... तिष्ठ तिष्ठ YaśasCam. i. 483. 4; ऋषयः पितरश्चैव ...। स्वप्रभाभरणाः कार्याः ... एतत्प्रमाणमनुरूपमनिन्दितं च ViṣṇuDhaP. iii. 37. 17; द्वारस्योभयतः कार्याः ...। निधयश्चानुरूपाश्च शङ्खाब्जोज्ज्वललक्षणाः SamarāSū. 34.25; स्पर्शादिदं स्यालुलितं हि शिल्पं मनोभुवोऽनङ्गतयानुरूपम् NaiṣC. 10.126; (used as noun) [Inst.] in proportion to अनुरूपेण चामुक्ते तत्प्रमाणे हि जायतः। एवंविधे ममैते वै कुण्डले MahāBhā. xiv. 56.27; ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्। तस्य कर्मानुरूपेण देयोंऽशः सह कर्तृभिः ManuSm. 8. 206 (Manva Mu. कृतानुसारेण); यथादेशं क्रोशमात्रं नदीपात्रमित्याद्यनुरूपेण ... विद्यात् ManvaVi. 1109. 10 (*on* 8. 406); **2B** which is in accordance with or corresponding to चोदितातिक्रमे दण्डेन न हन्यादुष्ट-वाक्यैर्न शपत्यतिक्रमानुरूपं कृच्छ्रमादिशति VaikhāGS. 2.8; (क्षत्रियादीनाम्) तेषामेव तुल्यापकृष्टवधे यथाबलमनुरूपान् दण्डान् प्रकल्पयेत् BaudhDS. i. 10. 20; तुलामानप्रतीमानव्यवहारार्थसंस्थापनं देशद्रव्यानुरूपम् ŚaṅkhaLiDS. 320; परिसंख्याय ... आयव्ययावनुरूपां च वृत्तिम् MahāBhā. vi. 37. 22; सत्त्वानुरूपा सर्वस्य श्रद्धा भवति MahāBhā. vi. 39. 3 = BhagGī. 17.3; अनुरूपं फलं तस्य कर्मणो लभ्यतां त्वया Mahā Bhā. xii. 36. 39; तदर्हसि विशालाक्ष हृदयेऽपि पराङ्मुखे। रूपस्यानुरूपेण दाक्षिण्येनानुवर्तितुम् BuddhaC. 4. 69; गुरुवृद्धसिद्ध-र्षीणामभिशापाभिचाराभिध्यानानुरूपचेष्टाहारव्याहारं तैरुन्मत्तं विद्यात् CaraS. vi. 9. 20 (1941 Ed.); अपराधानुरूपं च दण्डं दण्ड्येषु दापयेत् ViṣṇuSm. 3.91; दद्यात्। ... दायानुरूपमंशम् ViṣṇuSm. 6. 36; पापानामनुरूपाणि प्रायश्चित्तानि ...। तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः ViṣṇuP. ii. 6. 37; BrahmP. 22. 35; PadmP. iv. 93. 12; शब्दानुरूपेण सत्त्वेन च भवितव्यम्। सत्त्वानुरूपेण च पराक्रमेण Tantrākhyā. 11. 1; PañcT. 1. 50 (15) (34. 9); Pañcā. 12. 17; अग्न्याश्रितं यत्फलमुक्तमस्मिन्... सर्वेषु च वह्निकार्येष्वेवं वदेदस्य यथानुरूपम् YogYā. 8. 19; परिश्रमस्यानुरूपं फलमधिगमिष्यामि MudrāRā. 1. 19 (67); अचिरादस्य दाक्ष्यस्यानुरूपं फलमधिगमिष्यसि MudrāRā. 2.15 (15); 5.12; योऽस्मच्छासनमतिक्रामेत् तदनुरूपं दण्डमर्हति EI. xv. 252. 14; ii. 351. 13; दर्शितातिप्रसादस्तदनुरूपम् ... प्रादाद्य ब्रह्मदेयपरिमितम् AvantiKa. 10.17; अनुवाक्याद्वयस्य ... अनुरूपा याज्यापि कल्पयितव्या TantrVā. 461. 20 (*on* ii. 2. 3); धर्माधर्मौ साक्षादीक्षितेऽनुरूपं फलं दातुं तस्मात् धर्माध्यक्षः ViṣṇuSaBh.56. 1(*on*28); अनेकात्मसमवेतधर्माधर्म-संस्कारपरिपाकानुरूपप्रसरदीश्वरेच्छाप्रेर्यमाण° ... °द्व्यणुकादिकार्यक्रमेण शरीराद्यवयवि-निर्वृत्तिः NyāyMañ. ii. 74. 1; सर्गसमये पुनरक्षीणकर्माशयानुरूपशरीरादिसंबन्धे सति दुःखसंभवात् NyāyMañ. ii. 77. 8; अहं च ते च कामिन्यौ ...। सृष्टवत्यस्तु मिथुनान्यनुरूपाणि च त्रिधा LakṣmīT. 5.6; भिक्षुर्नैहिकामुष्मिकापेक्षः। यद्यपेक्षास्ति तदनुरूपो भवति NāraPaU. 5.1; सः ... तैजसं शरीरं कृत्वा कर्मणानुरूपं फलमनुभूय तस्य संक्षये पुनरिमं लोकं प्रतिपद्यते NirU. 29.12 (2) (*but* Viśva. *adv.*); श्रद्धानुरूपा धीर्देवता BhāvU. 549. 9; कृशोऽहं दुःखदग्धोऽहं हस्तपादा-दिवानहम्। इति भावानुरूपेण व्यवहारेण बाध्यते MahāU. 4.125; भावसंवित्प्रकटिता-मनुरूपा (v.l. पाम् Viśva.) च मारुते। ... वासनां मुनयो विदुः MuktiU. 2. 24; स्यादेतदेवं यदि त्रिगुणमयः प्राकृतोऽस्य देहः स्यात्। स तु स्वाभिमतः स्वानुरूपोऽप्राकृत एवेति सर्वमुपपन्नम् BrahmSūBh. (Rā.) 213.8 (*on* i. 1. 21); चिदंशस्य च कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानविकासरूपविकारो भवति BrahmSūBh. (Rā.) 522.19 (*on* ii. 3. 18); भव्यं भवतु [भ]गवत् पूर्वकन्मा(र्मा)-नुरूपम EI. vii. 198. 2; संपदामनुरूपो हि स्त्रीणां संपद्यते वरः PariPar. 3. 197; नागरैरुत्सवश्चक्रेऽनुरूपः स्वस्वसंपदाम् PariPar. 8. 258; यथाशक्त्यनुरूपं तु दण्डमेषां प्रकल्पयेत्।... अनुरूपं दोषानुरूपम् SmṛtiCan. iv. 724. 6; नागानां जातिभेदाङ्गनिरिह कथिता कालयोगानुरूपा MātaLī. 1. 26; अभिप्रेतमनुरूपं क्रियाफलं यत्र निष्पन्नं स फलयोगः NāṭaLaRaK. 89; आख्यानुरूपविजितारिनृपाल-मौलिर्विख्यातिमान् जगति कृष्णपनायकेंद्रः EI. iii. 245. 125; (used as noun)[Inst.] in accordance or correspondance with तपो व्रतं दानं जपयज्ञादिकाः क्रियाः। कर्मणस्त्वनुरूपेण फलं दास्यन्ति भावतः BrahmP. 173. 17; युगानामनुरूपेण पादः पादोऽस्य हीयते (धर्मस्य) BrahmP. 175. 19; तस्य प्रेम्णोऽनुरूपेण यथा तावय्यदीप्यताम् PāṇḍaC. 1. 537; युगह्रासस्यानुरूपेण शक्त्यपेक्षया धर्मो अवस्थितः ManvaVi. 69. 7 (*on* 1. 85); **3A** suitable, well-matched मैमी किल स्म भर्तारं द्वितीयं वरयिष्यति। स्वैरवृत्ता यथाकाममनुरूपमिवात्मना MahāBhā. iii. 74. 23; सत्यवाननुरूपो वै भर्तेति मनसा वृतः MahāBhā. iii. 278. 10, तस्य दारक्रियां तात चिकीर्षुरहमच्युत। अनुरूपादिव कुलादिति चिन्त्य मनो दधे MahāBhā. v. 170.8; मिथुनम् ...। एकैकमनुरक्तं (v. l. एकमेवानुरूपं) च चक्रवाकसमं विभो MahāBhā. vi. 8. 9; द्विजः। विन्देतानन्तरं भार्यामनुरूपां यथाविधि MahāBhā. xiii. 128.37; पायसं देवनिर्मितम्। ... भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै Rāmā. i. 15. 18; अनुरूपः स वो नाथो लक्ष्मीवांल्लक्ष्मणाग्रजः Rāmā. ii. 2. 11; ii. 40. 8; iii. 17. 4; कौतुकाद्यानुरूपौ युक्ताविमौ परस्परस्य KāmSū. 283. 7 (5.4); (हिमालयः) मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे KumāSam. 1. 18; तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः। विलम्बितफलैः कालं स निनाय मनोरथैः RaghuVa. 9. 33; शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा RaghuVa. 6.85; SaraKaṇṭhā. 653.7; SāhiDa. 595.4; अहमिमं वृणोमि वृणोम्यहं नैव तवानुरूपः ViṣṇuP. iv. 2. 92; विदर्भराट् तस्मै स्वसुताम् ... अनुरूपां न्यवेदयत् BrahmāṇḍP. ii. 49. 2; नृपोत्तमः। भार्याभ्यामनुरूपाभ्यां रममाणोऽवसच्चिरम् BrahmāṇḍP. ii. 55. 25; iii. 14. 22; पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः Kirātā. 10. 50; अचिरेणैव कालेनानुरूपा-भिर्वधूभिरुपेतमालोकयिष्यामि Kād. 94.14; अनुरूपो देव इत्यात्मसंभावना HarṣaC. 57. 2; AlaṅkāSa. 117. 5; कन्येयं दीयतां तस्मै भवतां यदि संमतम्। चिरादुत्पद्यतां योगो दंपत्योरनुरूपयोः PadmP. (Ra.) 15. 41; आचार्येण च अनुज्ञातः अनुरूपान् दारानाहृत्य TaiUBh. 216. 7 (*on* 1.11); धिक् ... तावकीं रूपसं[पद]म्। त्रैलोक्येऽप्यनुरूपो यद् वरस्तव न लभ्यते KāvyālaṅSāSaṁ. 5. 9 (* 8); [मु]ग्धस्य मृगेक्षणे कमप्यनुरूपं विसदृङ् न शोभते RāmC. 12. 79; (वीर[से]नः) निरुपमरूपयानुरूपया रूपवत्यभिधानया... प्रियया सह मकरकेतनकेलिकला[म]नुभव-न्नतिचिरमासांचक्रे NalaCam. 4. 9 (41); 5. 21 (7); मम त्वं मन्दभाग्याया अनुरूपं वृषं दिश BṛKathāK. 73. 271; (हरिः) मुहूर्तं एकस्मिन् नानागारेषु योषिताम्। सविधं जगृहे पाणीननुरूपः स्वमायया BhāgP. iii. 3. 8; ix. 6. 44; तवानुरूपा रूपेण वयसा कुलशीलतः।... तव पत्नी SkandP. iv. 13. 54; vii(1). 166. 28; सोऽनुरूपाम् ... कञ्चुकाख्यामकुण्ठधीः [।] सवर्ण्णाम्बि (Read सवर्ण्णां वि) धिनोवाह EI. i. 126. 12; ii. 162. 10; नानुरूपोऽयं मम JayaMa. 228. 1 (*on* 3.5); आस्तां खल्वनुरूपया सफलया पुष्पश्रिया दुर्विधे संबन्धोऽननुरूपयापि न कृतः किं चन्दनस्य त्वया BhallaŚ. 36; Subhāṣi. 811; अनुरूपे कुले जाताम् ...। लभेत ... कन्याम् BhaviP. 24B. 17 (i. 6. 28); अस्या अनुरूपो भर्ताहं सृष्टो धात्रा न संशयः PadmP. ii. 77. 88; (लक्ष्मणः) तवानुरूपो भविता पतिस्तेनैव

संचर AdhyāRā. iii. 5. 14; चिन्ता मे पुत्र यद्भार्या नानुरूपा तव क्वचित् KathāSaSāg. i. 3. 57; अनुरूपस्तदेषोऽस्तु भर्तास्या दुहितुर्मम KathāSaSāg. vii. 5. 155; ix. 1. 178; राजासावनुरूपरूपविभवामम्मंगनाम्ना भुवि प्रख्यातामुपयच्छति स्म EI. vi. 338. 28; v.77.35; अनुरूपं पतिमनासादयन्त्याः कस्या अपि ... परिदेवितमिदम् KaumuMi. 1. 9 (1); तयोः ...। अनुरूपोऽभवद् योगः TriṣaŚaPuC. i. 2. 62; अनुरूपाविमावेवेतीभ्याम्यां परया मुदा। तयोरेव मिथोऽकारि पाणिग्रहमहोत्सवः PariPar. 2. 246; मुरद्विषश्चरणः। स जयति येन कृता श्रीरनुरूपा पद्मनाभस्य ĀryāSa Śa. 13*; दाराणामनुरूपाणां भ्रातुरुद्वाहहेतवे। गवेषणाय स प्रैषीन्निजान्प्रतिदिशं नरान् PāṇḍaC. 1. 266; 2. 162; 4. 315; 6. 244; नाभिसंवीक्ष्य ... अनुरूपं वरं भुवि। स नृपोऽन्वेषयामास PārśvC. 5.159; स्थानेऽनुरागः स्वामिन्या अनुरूपो ह्ययं वरः SamarāSaṁ. 2.77; SiddhāRa. 5 (70.4); रूपयौवनसंपन्नामनुरूपां प्रियां भजेत् RasRaSa. 30. 88; कन्यासौ ... वृध्दकुमारी भूत्वा केनाप्यनुरूपेण महीमहेन्द्रेण सोपरोधमूढा सती ... परामुन्नतेः कोटिं नेष्यति PrabaCin. 126. 23; स ताभ्यामनुरूपाभ्यां समतुष्यत् समेयिवान् (देवकीरोहिणीभ्याम्) Yādavā. 1. 33; 5. 66; 11. 81; गीर्नः श्रेयः परं दद्यादजा सा चतुराकृतिः। अनुरूपमजं वव्रे या पतिं चतुराननम् HariC. (Pa.) 1; गङ्गा गौरी च कन्यके भवतः। पूर्वा तयोः पुरस्तादनुरूपं रमणमम्बुधिं प्राप्ता PārvPa. 1. 18; 4. 2 (21); एतस्या अनुरूपोऽत्र भविष्यति पुरे पुनः। कस्यचित् कथितुं नैव शक्यते रातिहेतवे RatnaCūKa. 457; एतावन्ति दिनानि चेतस्येवं विकल्प आसीत् यन्मे गेहिनी ममानुरूपा न वा PurāPraSaṁ. 18. 7; अघार्दन तया विना जगति कानुरूपास्ति ते UjjvaNīMa. 223. 1; 244. 9; त्वं च कुलशीलादिभिर्मेऽनुरूपा TristhaSe. 335. 30; नायकयोः ... अनुरूपयोः कुतुकतो घटनं स्यादप्रयोगेऽपि KandaCū. v. 4. 36; सीतैव वा किं भवतोऽनुरूपा RasGaṅ. 675. 4; अनुरूपया नृपकुमार मया ... नन्द Rāgh. 8. 36; तस्य ... अनुरूपेषु दारेषु उदारगुणौ ... वेङ्कटश्रीवेङ्कटाख्यौ बभूवतुः (पुत्रौ) Ānand Ra. 2. 31 (1); सात्म्यानुरूपान्प्रविधाय पूर्वं विज्ञः पुमान्बाह्यरतोपचारान्। विधिश्लथीभूतवराङ्गदेशां भजेत कान्तां रतिकेलिरङ्गे AnaṅgaRa. 10. 1; AlaṅkāMañ. 136. 1; **3Bi** befitting (words, etc.) वचनमब्रवीत्। यद्युक्तमनुरूपं च MahāBhā. i. 43. 37; कथाभिश्चानुकूलाभिः (v.l. श्चानुरूपाभिः) सह रंस्यामहे वने MahāBhā. iii. 2.11; xiii. 10. 39; MārkP. 24. 2; DaśKuC. 46.3; ते वै मामनुरूपाभिः ... अस्तुवन् मुनयो वाग्भिः MahāBhā. iii. 166. 23; पाण्डवान् प्रति भाषितम्। धर्मार्थसहितम् ... तत्रानुरूपं भीष्मेण MahāBhā. iv. 28. 2; सुरगणान् ...। स्तुतिभिश्चानुरूपाभिरानर्चायतलोचना Rāmā. ii. 22. 12; ii. 107. 5; अतिस्निग्धमनुरूपं चाभिहितम् PañcRā. 3. 4 (1); अनुरूपमेतद् भवत्याभिहितम् SvapnVā. 1. 10(5); समानविद्याबुद्धिशीलवित्तवयसां सह वेश्याभिरनुरूपैरालापैरासनबन्धो गोष्ठी KāmSū. 53. 3 (1.4) (JayaMa. परस्परस्तुत्यनुरागपरिहासानुविद्धैः); स्थाननुरूप (Read स्थानेऽनुरूप)मादेशं ददत् ... श्रीध्रुवसेनः EI. viii. 192. 33; i. 87. 26; शृणुमस्तावद् भवतः प्रज्ञावतः संप्रत्यनुरूपमुपदेशम् VeṇīSaṁ. 5. 67; अनुरूपमेवेदं प्रतिवचनं श्रोत्रस्य श्रोत्रमित्यादि KenUBh. 32. 8 (*on* 1.2); मुख्यं प्राणं प्रत्यनुरूपमेव वागादिभिरुक्तम् ChāndoUBh. 266. 8 (*on* v.1. 15); अनुरूपमेव उक्तम् (तत्) GītāBh. (Śaṅ.) 381. 8 (*on* 13.12); श्रुतार्थः। तस्य यद्यनुरूपमुत्तरं भवति ततो लेख्यम् BālaKrī. i. 205. 7 (*on* 2. 7); आस्पदाधिगमगर्वितोऽस्तु वाप्यस्तु वानुदितभूतिविक्रयः। ... पक्षयोर्यदनुरूपमुक्तयोस्तत्तदेव च समर्थयिष्यते RāmC. 2.53; यदि परश्छलादीनि जानीयात् तेषु चानुरूपमुत्तरमभिदधीत NyāyMañ. ii. 152. 16; देवि, अनुरूपमभिहितम् SubhaDha. 5. 11 (29); निर्विकल्पो महानन्दपूर्णो यद्वद् भवांस्तथा। भवत्स्तुतिकरी भूयादनुरूपैव वाङ् मम Stotrā. 6. 4; उचितं प्राहुराचार्याः सदृशं किल यस्य यत्। ... यत्किल यस्यानुरूपं तदुचितमुच्यते AuciViCa. 7(1); श्रीजयदेवभणितम् ...। हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम् GītGo. ii. 5. 9; वचोभिः। अस्ताविषुः स्वस्वधियोऽनुरूपैः पौराः ... पतिमम्बिकायाः ŚivLī. 21. 28; प्रागेव हि मयोक्तम् ...। विद्युज्जिह्वेन तु तदनुरूपो मन्त्रो न कृतः JānaPa. 4.24(8); श्लाघ्यमिदं वैराग्यमुमुक्षयोरनुरूपं पुरुषस्य वचनम् AmṛUda. 3.19 (1); (used as noun) what is befitting अनुरूपं ततो राजा प्रत्युवाच युधिष्ठिरम् MahāBhā. i. 187. 13; यस्मात्त्वयानुरूपं मे प्रोक्तम् BrahmP. 165. 43; 'मधुररसास्वादनानन्तरमम्लरसोऽपि मनागास्वादनीयः' इति वृद्धोक्तेरनुरूपमेव संजातम् RasSa. 179 (2); **3Bii** befitting (action etc.) पूजया चानुरूपया। सोदर्यां पूजयामास MahāBhā. 1.44.15; अनुरूपं महेष्वास कर्म त्वं कर्तुमर्हसि MahāBhā. vii. 85. 66; viii. 14. 58; अनुरूपेषु कर्मसु। सर्वांस्ताननुवर्तेत MahāBhā. xii. 120. 22; xiii. App. I. 14 (64 (*1)); कर्तव्यं यद्वयस्येन अनुरूपं च युक्तं च कृतं सुग्रीव तत्त्वया Rāmā. iv. 7. 16; अनुरूपाणि कर्माणि ... रणे। करिष्यत्येषः... अङ्गदः Rāmā. iv. 22.12; तस्य विक्रान्तमनुरूपं महात्मनः Rāmā. v. 37.30; कर्मैतदनुरूपं वां पात्रं चायं नराधिपः HariVaṁ. 5.34; ViṣṇuP. i. 13.53; BrahmāṇḍP. i. 36. 166; BrahmP. 4. 62; यवनराजेन ... तत्कारितया च राजानुरूपकृतविधानया तस्मि (Read तस्मिन्) यदि दृष्ट्या प्रनाड्या EI. viii. 43. 9; यदत्रावसरप्राप्तम् ... अस्मदागम... नुरूपम् ... तत्र प्रभवति भवती Kād. 158. 15; तदेतत्तावदनुरूपम् यच्छौर्यो... मदिरोन्मत्तसमस्तसामन्तमण्डलसमुद्रमथनमन्दिरे तादृशि पितरि मृते तपोवनं ... गम्यते वल्कलानि वा गृह्यन्ते HarṣaC. 249.7; तस्य च प्रणयमनुरूपमखण्ड... ... ऐक्षन्त ... कुमाराः AvantiKa. 226. 11; दुष्करः कन्यान्तःपुरप्रवेशः तदनुरूपमुपायमुपपाद्य श्वः परश्वो वा नताङ्गीं संगमिष्यामि DaśKuC. 30.2; यद्यानुरूपं रुषः प्रारब्धम् ... तत्कर्म तातेन मे VeṇīSaṁ. 3.92; यदमन्द... थोचितमनुरूपं यत्तथानुरागस्य। ... तत्सुरतं प्रस्तुतं ताभ्याम् KuṭṭaMa. 37... कपयः प्रथमं प्रपन्नमनुरूपमिदम् RāmC. 26.34; 33.40; अभिवादस्यानुरू... प्रत्यभिवादनमित्येवं योजना क्रियते ManuBh. i. 140.13 (*on* 2.126); (मुनिः) नृदे... ... सपर्यया पर्यगृह्णात् प्रतिनन्द्यानुरूपया BhāgP. iii. 21.48; यद्वानुरूपमथात्मनस्तदकृ... रुषामन्दो मन्दोदरीतनयो रणे RāmāCam. 6.75; यथा च प्रत्यक्षस्य प्रसज्यरूपाभावग्र... अभाव विकल्पोत्पादनशक्तिरेव तथा विकल्पानामपि तदनुरूपानुष्ठानशक्तिरेव... भावग्रहणमुच्यते TarkBhā. (Mo.) 29.15; तस्यैव तद्राजवचोऽनुरूपमिदं पुनः ... च मेऽनुरूपम् SūktiRa. 77.12; (used as noun) what is befitting सकृदेव सदं... स्तोतव्यं वयसोऽनुरूपं कृत्वा JaimiBr. 2. 417; अनुरूपं कृतं चापि भीष्मद्रोणकृपादिभिः MahāBhā. vii. 1379* (7); ix. 64. 29; रुमण्वन्मिश्रैः सह संप्रधारितं स्वामिभक्त्या इच्छति विभवस्य चानुरूपम् TāpaVa. 1.4(13); विधेहि विद्वन्नधुनानुरूपं किमध्वना गच्छसि शालभेन RāmC. 22.4; अत्रानुरूपं राजर्षे विमृश स्वमनीषया BhāgP. i. 17.20; एवं ताभिः (गोपीभिः) कृष्ण एवानुरूपं कर्ता तत्तद्गोपिकाभावद... ĀdiP. 10.42; गुरोः विरिञ्च्यादेशादनुरूपमस्माभिरेव तावदनुष्ठितम् PārvPa. 2. 16(2); **3Biii** befitting (feelings) न चैतदनुरूपं ते यत्ते ग्लानिररिंदम MahāBhā. v. 73. 23; राजर्षिवध्वास्तव नानुरूपो धर्माश्रिते भर्तरि जातु शोकः Saund. 6.39; अनुरूपं हि मानमयस्य महीभुजां हृदयस्यारिपरिभवासहिष्णुत्वम् AvantiKa. 38. 20; **3Biv** befitting (behaviour etc.) अनुरूपमेतन्महानुभावतायाः KundaMā. 1.15(6); त्रयाणां श्रुत्युक्तानि सामान्यानि, तानि तेनानुरूपेण शेषेष्वपि द्रष्टव्यानि ChāndoUBh. 33.14 (*on* i. 3.7); 475.4 (*on* viii. 1. 3); अनुरूपः आत्मभावः संपत्तिः PrakriKau. i. 477. 7; Prasā. i. 477. 18; SiddhāKau. 162B. 7 (*on* vi. 3. 81); पदार्थस्य ... यः स्वभावोत्कर्षस्तस्योचितमनुरूपम् VakroJī. 194. 22; आशिषः...। नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः BhāgP. i. 10. 19; यदि रञ्जयसि कृष्णमिदमेतदनुरूपम् GītGo. 19.4; LaŚabdeŚe. i. 534. 9; अनुरूपयोर्द्वयोर्यत्र क्रियते यदि वर्णनम्। तत्र परिज्ञेयं समालङ्करणम् AlaṅkāMañ. 135. 8; **3Ci** right, proper, fit, favourable अल्पकालं जीवितं यन्मनुष्ये ...। भूयश्च तद्वयसो नानुरूपम् MahāBhā. v. 27. 3; v. 194. 8; चिन्तयानस्य ब्रह्मर्षिं तपन्तमतिधार्मिकम्। अनुरूपा मतिः क्षिप्रमुपजाता स्वभावजा MahāBhā. xiii. App. I. 2(21); यो हि भृत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे। कुर्यात्तदनुरागेण (v.l. तदनुरूपं हि) Rāmā. vi. 1.7; स्त्रीवधो नानुरूपो वै विशेषेण मनस्विनः Rāmā. vi. 1813*(2); एवं तु वक्तुं भवतोऽनुरूपं सत्त्वस्य वृत्तस्य कुलस्य चैव BuddhaC. 11. 56; स्थानानामनुरूपैश्च लिङ्गैः शेषान् रोगान् विनिर्दिशेत् CaraS. vi. 28. 58 (1941 Ed.); मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपम् MeghDū. 13; अनुरूपमिदं वित्त गृहाणार्पय मेऽबलाम् MārkP. 8. 55; प्रमापणे प्राणभृतां दद्यात् तत्प्रतिरूपकम्। तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः ParāSm. 9.26; नैतदनुरूपं भवतः Kād. 146. 10; वैरिवर्गस्य मध्ये भर्त्रा क्षिप्तानामेतदेवानुरूपम् ŚiśuVa. 19. 119 (comm. उचितम्); भूयो विचारस्तव नानुरूपः VarāṅgaC. 19.8; यत्र यत्रानुरूपं यत्तत्र तन्न्यासमाचरेत् PāraS. 6. 165; नैतत् संविदनुसारिणामनुरूपम् PañcPā. 8. 15 (*on* i. 1. 1); महाभाग सर्वमनुरूपमस्य ते ... आशयस्य TilaMañ. 26. 15; चेष्टास्तत्र प्रवर्तन्ते लीलाद्या दश योषिताम्। दाक्षिण्यमार्दवप्रेम्णामनुरूपाः प्रियं प्रति DaśRū. 4. 70; दृष्ट्वानुरूपमर्थं यः पृष्टो नैवापि गूहति LiṅgaP. i. 10. 17; वृत्तिभिश्चानुरूपाभिस्तान्विभज्य सुतान् मुनिः।... पूजयेत् परमात्मानम् LiṅgaP. i. 29. 72; यशोरूपस्य यदनुरूपम् ... तादृशामाशयं प्रकाशयन्ती भरतोपज्ञा विज्ञापना RāmāCam. 2. 80 (3); दुष्प्रयोजा बहुतरसंदेहप्रसरा च तत्र प्रतिपत्तिर्न नाट्येऽनुरूपा स्यात् Loc. 321. 10 (*on* 3.6) (KSS. 135, 1940 Ed); कस्यचित्कवेः ... अनुरूपमपरमपश्यतः ... स्वाभिप्रायाविष्करणमेतत् VyaktiVi. 56. 21; प्रत्युपकारमाधातुमनुरूपं निरोजसः उपकारं स्मरन्तोऽपि विस्मरन्ति महौजसः KaumuMi. 6.10; अहमपि एतत्कार्यानुरूपस्वाभिप्रायज्ञापनाय विदग्धद्वितीयस्य राज्ञः सकाशमेव गच्छामि EI. viii. 108. 39; अनुरूपोऽनुकूलो वा यो योगो व्यापारः सूत्रस्यार्थप्रतिपादनरूपः सोऽनुयोगः SthānṬ. 3B. 10; चित्त्वेत्यधिष्ठानमिहानुरूपम् ... विभज्य ...°तन्मध्यनाडी रचयेत् TantrSa. 2. 17; महाराज प्रतिहारभूमौ किंचिद्विश्रम्यते। ... अनुरूपमिदम् MadaKeC. 19 (17); (used as noun) what is right, proper, fit, favourable युक्तमाह भवानस्माननुरूपं चिकीर्षति BṛĀraUBhVā. ii. 4. 41; क्लिश्नाति साधुचरितानसाधूननुरुध्यते। अनुरूपं न जानाति युवराज विधिर्जडः RāmC. 9. 71; किं नामान्यदतिविविक्तात् कन्यापुरादस्याभिमतसिद्धयेऽनुरूपम् SubhaDha. 2.7 (7); राजा रजनिशेषमति-

वाहयितुमनुरूपं निरूप्यं किंनरमिथुनस्य शयनम् ... Nala Cam. 6.55 (2); त्वदग्रे शरणागतानां पराभवो नाथ न तेऽनुरूपम् SūktiRa. 202.3; **3Cii** appropriate, commendable सः ...। जगाम भगवान्स्थानमनुरूपमिवात्मनः MahāBhā. ix. 35. 10; अनुलेपनम्। मया दत्तमिदं सीते तव गात्राणि शोभयेत्। अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति Rāmā. ii. 110. 18; भूषणानि ...। स्त्रीणां यान्यनुरूपाणि पुरुषाणां तथैव च। ... फलन्त्यन्ये नगोत्तमाः Rāmā. iv. 42. 46; वयोऽनुरूपं वेषं कुर्यात् ViṣṇuSm. 71. 5; मृगाक्षि घोषवासस्यानुरूपोऽयं हल्लीसकनृत्तबन्ध उपयुज्यताम् BālC. 3. 3(8); भवस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम्। प्रसाधनम् ... न्यस्तं पुरस्तात् पुरशासनस्य KumāSam. 7. 30; काममप्रतिरूपम् (v. l. °मनुरूपम् Apte) अस्य वयसो वल्कलं न पुनरलंकारश्रियं न पुष्णाति Śāk. 1. 18(1); त्वद्वपुरस्यानुरूपमाभरणस्य Kād. 203. 15; नानुरूपा तवाकृतेरसौ ... मेखला AvantiKa. 157. 18; 90. 8; अस्मिन्भजन्ति ... नार्योऽनुरूपमधिवासमधित्यकासु ŚiśuVa. 4. 40 (comm. इच्छासदृशम्, आत्मसदृशम्); (भक्तोत्तमान्) प्रासादेष्वनुरूपेषु कल्पितेष्वग्रतो विभोः। ... प्रतिष्ठाप्य ... अर्चयेत् PāraS. 8. 198; मृदादिदृष्टान्ता अनुरूपा भविष्यन्ति BrahmSūBh. (Śaṅ.) 309. 17 (*on* ii. 1. 14); देशं कालं च संभारानुत्साहं सत्त्वमेव च। अनुरूपेषु सर्वेषु कामः सिध्यति नान्यथा ParaS. 13. 60; अतोऽन्यप्रकारैर्वाज्ञानस्यानिर्वाच्यस्य निवृत्तिरनुरूपा IṣṭaSi. 86. 3; सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः। नानुरूपं यदाविन्ददभूत्स विमना इव BhāgP. iv. 25. 11; निर्लेपस्येश्वरस्य निर्लेपं चक्षुरेव स्थानमनुरूपम् Bhām. 174. 15 (*on* i. 2. 13); उन्मादनमिदं रूपमनुरूपं मनोभुवः। समुल्लसितमिवासक्तं करोति मम मानसम् DarpDa. 3. 84; रूपम् ... तव कृष्ण तनोति तनोरनुरूपम् GītGo. viii. 17. 2; अनुरूपं कृतं सद्य हारेण कुचमण्डलम् Candrā. 5. 81; Kuval. 91; इयमनुरूपा ननु कुसुमेषोर्जयति धनुःश्रीः ChandaśCū. 2. 168 (3); शस्त्रप्रभृतयोऽनुरूपामेव पादादिकां प्रकृतिमाक्षिपन्ति Prasā. i. 146. 16; अस्य दिव्यवस्त्ररचितस्य वेषस्यानुरूपेण दिव्यगन्धानुलेपनेन भवितव्यम् KamVa. 5. 24(4); अनन्तमाख्यामधिगम्य योषाम्। ... अनुरूपां सुधीमणिः सोऽयमवाप शोभाम् Yātrā Pra. 1. 17; अहंमदशाहुधरणीसार्वभौमेन ... प्रेषितानि... अनुरूपाणि उपायनानि ĀnandRa. 8. 31 (7) [Vaija. 261. 54]; **4** agreeable, pleasant, cf. **अनुरूपकथावादिन्.**

अनुरूप (ánu-rūpa) *m.* **1** the antistrophe which has the same characteristics as of strophe (*stotriya*), the second of the three verses recited together आश्रावयेति स्तोत्रियाः प्रत्याश्रावो अनुरूपः VājaS. 19.24; आत्मा वै स्तोत्रियः प्रजानुरूपः AitBr. 12.12(351); Kauṣi Br. 15.4(67.19); मध्ये योनिं चानुरूपं च शंसति AitBr. 13.11(382); स्तोत्रियं स्तोत्रियस्यानुरूपं करोति AitBr. 27.2 (690); 36.2 (899); पवस्वेन्दो वृषासुत इत्यनुरूपो भवति PañcBr. xi.6.3; xi. 6.4; xii.7.7; xiii.7.7; पश्चानामहामनुरूपैः प्रत्यवयन्ति PañcBr. xv. 7.6; स्तोत्रियानुरूपौ संशस्तौ सप्त चतुरुत्तराणि संपद्यन्ते Kauṣi Br. 15.5 (68.16); 22.4 (98.22); षष्ठस्याह्नः स्तोत्रियाननुरूपान् कुर्वीरन् Kauṣi Br. 25.15 (119.24); सार्द्धं स्तोत्रियः शस्त्वा सार्धमनुरूपं शंसेत् Śat Br. XIII. v.1.2; XIII. v. 1.10; अह्न एव रूपं स्तोत्रियेणारभन्तेऽनुरूपेण साम्नः ... स्तोत्रियानुरूपौ भवतः। प्राणो वै स्तोत्रियोऽपानोऽनुरूपः JaimiBr. 3.21; 3.136; स्तोत्रियैर्वा इतो रेतो दधतो यन्त्यनुरूपैरत्र प्रतिपद्यन्ते JaimiBr. 3.279; उक्थं सप्तविधम्। शस्यते स्तोत्रियोऽनुरूपः JaimiUBr. iii. 4. 1; तोषा वृत्रहणा हुव इत्यच्छावाकस्य स्तोत्रियानुरूपौ GopBr. ii. 3. 15 (202.5); स्तोत्रियायानुरूपाय प्रगाथायोक्थमुखाय परिधानीया इति पञ्चकृत्व आह्वयन्ते GopBr. ii. 4. 4(212. 12); ii. 5. 11 (237. 12); एन्द्र याहुप नः ... इत्यतोऽनुरूपः AitĀ. V. i. 1.7; रथन्तरस्य स्तोत्रियानुरूपौ शंसति ŚāṅkhāĀ. 2.4 (6.19); स्तोत्रियानुरूपेभ्यः ... इति पृथगाह्वानम् ĀśvaŚS. I.v. 10. 13; स्तोत्रियेणानुरूपस्य छन्दःप्रमाणलिङ्गदैवतानि ĀśvaŚS. I.v. 10. 26; ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव शस्यं विहरेत् ĀśvaŚS. I. vi. 3. 2; प्रत्यृचं स्तोत्रियानुरूपेषु प्रथमानि पदानि द्विरुक्त्वावस्यन्ति ĀśvaŚS. I. vi. 4. 2; ऊर्ध्वमनुरूपेभ्यः ऋजुनीनिनः ... आरम्भणीयाः शस्त्वा स्वान्त्स्वान् परिशिष्टानावपेरन् ĀśvaŚS. II. i. 2. 10; स्तोत्रियानुरूपाणां यद्यनुरूपे स्तुवीरन्स्तोत्रियोऽनुरूपः ĀśvaŚS. II. i. 4.5; अनुरूपस्योत्तमा ĀśvaŚS. II. iii. 11. 18; Śāṅkhā ŚS. vii. 11. 1; अनन्तरमनुरूपात्परिधानीयायै च ŚāṅkhāŚS. vii.14. 6; प्रथमेषु रात्रिपर्यायेषु गायत्राणां स्तोत्रियानुरूपाणां प्रथमान् पादानभ्यस्यन्ति ŚāṅkhāŚS. vii. 26. 12; यज्ञायज्ञीयस्य स्तोत्रियेणोक्थ्यस्तोत्रियान्संशस्य। अनुरूपेणानुरूपान् ŚāṅkhāŚS. xi. 2. 13; xii. 12.14; xviii. 23. 10; उपरिष्टात्स्तोत्रियानुरूपाभ्याम् ... व्यत्यासं प्रतिगृणाति HirŚS. ix. 7. 19 (961. 26); तस्य संपद् यथा पूर्वस्यायातो यज्ञायज्ञीयानुरूपो बृहदग्निष्टोमसामा, तस्य कल्पो यज्ञायज्ञीयमनुरूपे गायत्रं स्तोत्रियपर्यासयोः Kṣudra. 2.5; अथ यज्ञायज्ञीयानुरूपे NidāSū. 32. 25 (2. 7); 167. 7 (9. 10); दशमस्य बहिष्पवमानं द्वितीयप्रभृतीनां पश्चानामहामनुरूपाः LāṭyāŚS. iii. 7. 1; DrāhyŚS. ix. 3.14; अनुरूपेषु तृचा प्रतिलोमा ऋचो नवर्चं इति गौतमः LāṭyāŚS. iii.7.2; DrāhyŚS. ix.3.15; LāṭyāŚS. vi.3. 5; DrāhyŚS. xvi. 3. 5; LāṭyāŚS. vii. 12.2; DrāhyŚS. xxi.3.14; अहिंकारम् अनुरूपायोक्थमुखाय परिधानीयायै VaitāSū. 20.16; 25.5; स्तोत्रियानुरूपयोः प्रथमानि पदानि पुनरादायमर्धर्चशस्यवच्छंसति VaitāSū. 26. 3; पृष्ठस्तोत्रियानुरूपौ बार्हतौ प्रगाथौ VaitāSū. 31. 18; 33. 18; 37. 5; एतेषाम् अनन्तरोऽनुरूपः संभवे VaitāSū. 42. 10; ज्योतिष्टोमे बहिष्पवमाने त्र्यस्तयाभृवन् स्तोत्रियोऽनुरूपः पर्यासश्चेति ṬupṬ. 72. 4 (*on* v. 3. 7); ŚāstrDī. 431. 6 (*on* v 3.4); NyāyMāVi. 289. 3 (*on* v. 3. 4); BhāṭṭDī. ii. 193.6 (*on* v. 3. 4) [Nānārthā Saṁ. iii. 26.5] **2A** name of a deity (*lit.* of befitting form) अनुरूपाय स्वाहा (इत्यश्वरूपाणि जुहोति) TaiS. VII. iii. 18.1; KāthS. 4. 8 (iii. 161. 2); **2B** name of the Being (belonging to the eyes) स यो ऽयं चक्षुष्येयोऽनुरूपो नाम। अन्वङ् ह्येष सर्वाणि रूपाणि। तमनुरूप इत्युपासीत JaimiUBr. i. 27. 4; **2C** name of a type of passion (*rāga*) रागोऽनु सह पश्चाद्वानुरूपोऽनुगतोऽपि वा। पूर्वोरपूर्वः पूर्वानुरागशब्देन शब्द्यते SaraKaṇṭhā. 561.9; रागोऽनुवृत्तोऽविच्छिन्नमनुराग उदाहृतः। अनुरूपोऽथवा राग इति वा निर्णयो भवेत् BhāvPra. (Śā.) 82. 2(4); **3** the word *anurūpa* अमुना वानुरूपान्ते रसरूपपदं वदेत् PañcaRā. (Nā.) iii. 14. 13.

अनुरूप (anu-rūpa) *n.* **1** similarity of form, conformity अपि जनकसुतायास्तच्च तच्चानुरूपं स्फुटमिह शिशुयुगे नैपुणोन्नेयमस्ति UttaRāC. 6. 26 (*but* Apte suitability, fitness); SaraKaṇṭhā. 600. 10; **2** proper form, cf. **अनुरूपगुणवद्भाजन** [resemblance, likeness, Apte]

अनुरूपक (anurūpa-ka) *adj.* [*f.* -ikā] **1** right, appropriate नैवानुरूपकं लिङ्गं वक्ता वा नास्ति कश्चन। सुषुप्तिस्थितशून्यस्य बोद्धा कोऽन्यात्मनः परः SarvaVeSāSaṁ. 596; **2A** who is in accordance with or conforming to प्रथमप्रहरे जन्म यस्य सोऽल्पायुरेव च। ... चतुर्थे चिरजीवी स्यात्कणानामनुरूपकः BrahmVaiP. ii. 36. 134; **2B** what is proportionate, cf. **अनुरूपकता;** **3** suitable, well-matched असौ ह्यस्या युवा भर्तानुरूपकः KathāSaSāg. v.2.164; एतां गान्धर्वविधिना स्वयम्। नरवाहनदत्तोऽसावुद्वहत्यनुरूपिकाम् (कन्याम्) KathāSaSāg. vi. 8. 239; राज्ञीषु मध्यादेकां त्वं सुविचार्यानुरूपिकाम् KathāSaSāg. ix.5.53; राज्ञे ... मुनिः। अप्सरःसंभवां कन्यां तां ददावनुरूपिकाम् KathāSaSāg. xii. 27. 48; अस्माभिः समागत्य कन्यां तां परिणीय च। मत्पुत्राय ... वध्वास्त्वं ह्यनुरूपकः KathāSaSāg. xviii. 4. 169.

अनुरूपकता (anurūpaka-tā) *f.* the state of being what is proportionate रक्षायामनुरूपकता। यस्य (गोपालकस्य) नान्यदन्नं स एकस्या गोः क्षीरमादद्यात् दशतः ManuBh. ii. 180. 7 (*on* 8. 231)

अनुरूपकथावादिन् (anurūpakathā-vādin) *adj.* who speaks agreeable or pleasant matter अनुकूलाः कथा वच्मि (v.l. अनुरूपकथावादी) विप्रियं परिवर्जयन्। अधर्मेणापि संयुक्तं प्रियनाम्यां करोम्यहम् MahāBhā. iii. 204. 24.

अनुरूपकर्मन् (anurūpa-karman) *adj.* (used as noun) one whose action is proper or right वशंवदो विधिरनुरूपकर्मणां न शर्मणे शिखिनि पतङ्गसाहसम् RāmC. 15. 33.

अनुरूपकारणकल्पना (anurūpakāraṇa-kalpanā) *f.* assumption of similar or conforming source न तेभ्यः (अनुमानादिभ्यः) कर्तव्यतावगतिः। तस्मात् कर्तव्यतास्मरणस्यानुरूपकारणकल्पनायां वेद एवोपदिश्यते ManuBh. i. 63. 9 (*on* 2. 6)

अनुरूपकार्योत्पत्ति (anurūpakāryotpatti) *f.* origination of similar or conforming result अनुरूपकार्योत्पत्तौ विच्छित्तिविशेषवशेन सौन्दर्यातिशयदर्शनात् कारणानुरूपत्वे कार्यस्य न किंचिद्वाच्यत्वमिति न वाच्यम् AlaṅkāRa. 61(16); सर्वज्ञत्वाभावे हि यथोचितोपादानकारणाद्यनभिज्ञत्वादनुरूपकार्योत्पत्तिर्न स्यात् SyādvāMañ. 6(29); विवेचितं च (अलंकारसर्वस्व)विमर्शिनीकृता 'कारणादनुरूपकार्योत्पत्तिर्हि लोकप्रसिद्धा' RasGaṅ. 608. 10; 608. 7.

अनुरूपकुला (anurūpa-kulā) *adj.* (*f.*) **1** who is from conforming or similar lineage अद्य श्लोकरसज्ञास्ता भविष्यन्ति निशाचर। अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः Rāmā. iii. 29. 11; **2** who is from a worthy family अनुरूपकुलां कन्याम् ... विवाहितः। भुङ्क्ते वैषयिकं सुखम् PrabhāC. 121. 22.

अनुरूपक्रियादि (anurūpa-kriyādi) *adj.* similar or conforming action, i.e. behaviour etc. ('चन्द्रीयति मुखम्' इत्यत्र) उपमानपदेन लक्षणयोपस्थितम् ... विशेषणम्। विशेष्यं चाश्रयतयोपमेयम्। क्यजर्थाचारश्चानुरूपक्रियादिः RasGaṅ. 254. 11.

अनुरूपक्रियार्थिता (anurūpakriyārthi-tā) *f.* the state of aiming at or leading to a conforming action अवश्यं च व्यतिरिक्तानित्यताद्वारेणापि वस्तुन एवानवस्थायिनमात्मानं प्रतिपद्यते, तदनुरूपार्थक्(क्रि)यार्थितया प्रवृत्तेः HetuBiṬ. 42. 24.

अनुरूपगात्र (anurūpagātra) *m.* name of a former Buddha सम्यक्संबुद्धानां

कानि नामानि ... ततो भूयो धुतधर्मधर अतोऽनन्तरं भगवान् चित्रभानुः ... अनुरूपगात्रः MaVastuAva. i. 140. 4[DBHS.]

अनुरूपगुण (anurūpa-guṇa) *adj.* [*f.* -ā] A possessing similar or conforming qualities देवशर्म्मणः पुत्रस्य तदनुरूपगुणस्य स्वामिशर्म्मणः पुत्राय ... सोमशर्म्मणे ... दत्तोऽयं ग्राम EI. xix. 260. 18; B possessing befitting qualities अथाप्तबान्धवः। अनुरूपगुणामचिन्तयन्ननवद्येषु कुलेषु कन्यकाम् ŚaṅkaDigVi. (Mā.) 5. 35.

अनुरूपगुणग्राम (anurūpaguṇa-grāma) *m.* multitude of befitting qualities प्रकामकमनीयेऽस्मिन्निर्मितेऽम्भोजभूर्धुवम्। अनुरूपगुणग्रामनिर्माणे विक्लवोऽभवत् PāṇḍaC. 6. 274.

अनुरूपगुणग्रामा (anurūpa-guṇagrāmā) *adj.* (*f.*) possessing multitude of befitting qualities अनुरूपगुणग्रामा पाण्डोरुड्डामरौजसः। का कलत्रं भवित्रीति चिन्ताभूद्भीष्मचेतसि PāṇḍaC. 1. 395.

अनुरूपगुणत्व (anurūpaguṇa-tva) *n.* the state of being one possessing befitting qualities सोऽपांपतेस्तु तनुजामुपयेमे ... । अनुरूपगुणत्वाद्य तस्य भार्या गुणार्णवा BrahmP. 88. 3.

अनुरूपगुणप्रकर्ष (anurūpaguṇa-prakarṣa) *m.* excellence of befitting qualities इच्छानुरूपमनुरूपगुणप्रकर्षं संकर्षिणि त्वमभिमृष्य यदा विमर्षि। जायते... तदानीं देवः शिवोऽपि भुवनत्रयसूत्रधारः DeviPañ. 2. 16.

अनुरूपगुणवद्भाजन (anurūpaguṇavad - bhājana) *n.* vessel having proper quality औषधानि ...। गृहीत्वा चानुरूपगुणवद्भाजने संस्थाप्य ... शिक्येष्वासज्य स्थापयेत् AṣṭāSaṁ. ii. 167. 10(5. 8)

अनुरूपग्राह्यग्राहकभेद (anurūpagrāhyagrāhaka- bheda) *m.* differentiation of corresponding, i.e. mutually related objects and subjects (विश्वं) तत्राना अनुरूपग्राह्यग्राहकभेदात् PratyabhiHṛ. 6. 10 (3)

अनुरूपचरित (anurūpa-carita) *adj.* i having proper behaviour स्वतन्त्राहं सदा देवाः स्वेच्छाचारविहारिणी। ममानुरूपचरितो भविता तु मम प्रियः BrahmāṇḍP. iii. 15. 2; ii having favourable conduct राजाक(क) रोत् ... आत्मानुरूपचरितम् .... श्रीराज्यपालमिह दूतकमात्पुत्रम् EI. xviii. 307. 51; i. 80. 25.

अनुरूपचेष्ट (anurūpa-ceṣṭa) *adj.* whose activity is befitting (to genus) ऐक्षत जनः ...। नागं पुनर्मृदु सलीलनिमिलिताक्षं सर्वः प्रियः खलु भवत्यनुरूपचेष्टः ŚiśuVa. 5. 6 (comm. स्वजात्युचितव्यापारः)

अनुरूपजनन (anurūpa-janana) *n.* creation of similar or conformable (thing) यदि हि पूर्वज्ञानमुत्तरस्य जनकं भवति, ततोऽनुरूपं विरूपं वा जनयति।... न च निष्पन्नस्य क्षणमप्यवस्थानमस्तीति कदा जनयिष्यतीति जनकत्वानुपपत्तौ दूरोत्सारितमनुरूपजननम् Kāśi. ii. 87. 16 (*on* 5(2). 188)

अनुरूपतनु (anurūpa- tanu) *adj.* having proportionate body श्यामासि चन्द्रधवलासि च हेमगौरी ... अनुरूपतनुं स्मरामः BṛDharmaP. i. 41. 27.

अनुरूपतम (ánurūpa-tama) *adj.* [*f.* - ā] 1 the most similar or conforming प्र॒जाप॑ति॒राल॒ब्धोऽश्वोऽभवत्। तस्मा॒दश्वः॑ प्र॒जाप॑तेः पशूनामनु॑रूपतमः TaiBr. III. ix. 22. 2; 2 the most suitable or matching नटवत्परिगृह्य ...। अनुरूपतमास्वपि ध्रुवं नगरस्त्रीषु न सङ्गमेष्यति Yādavā. 9. 97.

अनुरूपतर (anurūpa-tara) *adj.* more appropriate वाग्वै हविष्कृद् वाचमेवैतदाह्वयति इति। ... तस्मात्पत्न्यां हविष्कृति लिङ्गमनुरूपतरं भवति ŚābaBh. 758. 6 (*on* iii. 2. 8)

अनुरूपतस् (anurūpa- tas) *adv.* 1 in a befitting manner, befittingly आज्ञापयत्तदा राजा सुग्रीवः ...। और्ध्वदेहिकमार्यस्य क्रियतामनुरूपतः Rāmā. iv. 24. 24; जैवन्तिः ... निवेशितोऽनुरूपतश्च सत्कृतः PratiYau. 2. 3 (4); क्रमागतं ज्ञानं मुखादेव ...। वैश्यान्तं ब्राह्मणाद्यं हि घृणया चानुरूपतः LiṅgaP. i. 7. 10; कुरु कल्याणकैकर्यमावयोरनुरूपतः BṛBrahmaS. iii. 6. 53; 2A in accordance with, accordingly अन्ये कृतयुगे धर्माः ...। अन्ये कलियुगे नृणां युगह्रासानुरूपतः ManuSm. 1. 85; कृते कर्मणि यः स्वामी न दद्याद् वेतनं भृतेः। राज्ञा दापयितव्यः स्याद्विनयं चानुरूपतः BṛhaspaSm. 147. 11; मङ्गलगायकान्। नर्तकांश्च ... समावेश्य ... मण्टपे न्यस्य विस्तारस्यानुरूपतः PāraS. 17. 436; पूर्ववत्पूजयेद्विद्वान्स्ववित्तस्यानुरूपतः NīlaP. 664; स नरकं याति स्वर्गं वा स्वेन कर्मणा। ततः स कालं वसति कर्मणामनुरूपतः ViṣṇuDhaP. ii. 116. 43; पित्तेन स्यान्मृदुः कोष्ठः ..। मध्यमः समदोषत्वान्मात्रा योज्यानुरूपतः SiddhYo. 74. 2; यथा यथा महालिङ्गं पूजा श्रद्धा यथा यथा। तथा तथा महत्पुण्यं विज्ञेयमनुरूपतः ŚivU. 3. 14; अवतारा: ...। भवन्ति बहवः कामं प्रकृतेरनुरूपतः DevīBhā P. iv. 16. 20; पिशाचा: ... त्यजन्ति विष्ठामूत्राणि। ... तत्रैव तांस्ते सर्वाणि भोजयन्त्यनुरूपतः BṛDharma P. i. 55.62; प्रवर्तयेत्ततो युद्धं गजानामनुरूपतः Mānaso. iv. 3. 643; क्षेत्रोपकरणं सेतुं पुष्पमूलफलानि च। विनाशयन् हरन् दण्ड्यः शताद्यमनुरूपतः DaṇḍaVi. 141. 12; अनुरूपतो विनाशे चापहृतमूल्यानुसारेण देशकालशक्त्यनुसारेण च DaṇḍaVi. 141. 19; 2B in proportion to, proportionately राजा कर्मसु युक्तानां स्त्रीणाम् ... प्रत्यहं कल्पयेद् वृत्तिं स्थानकर्मानुरूपतः ManuSm. 7. 125.

अनुरूपता (anurūpa- tā) 1 similarity, conformity उपपत्तिद्विरूपत्वमाधिक्यमनुरूपता AnuVyā. 38A.5 (*on* 3. 1); 2 appropriateness, propriety संयोगादिलक्षणस्यानुरूपता द्वेधा– स्तुतिपर्यवसायिनी, निन्दापर्यवसायिनी च RasGaṅ. 607. 8; अनाधत्वादिविशिष्टस्य स्नेहार्द्रत्वादिविशिष्टेन संसर्गस्यानुरूपता भागीरथीस्तुतिपर्यवसायिनी RasGaṅ. 607. 14.

अनुरूपतावर्णन (anurūpatā-varṇana) *n.* description of similarity वस्तुतोऽननुरूपयोरपि कार्यकारणयोः श्लेषादिना धर्मैक्यसंपादनद्वारानुरूपतावर्णने ... अनुपदमेव दर्शितत्वात् RasGaṅ. 608. 12.

अनुरूपत्व (anurūpa-tvá) *n.* 1 similarity, likeness or conformity हि॒र॒ण्य॒ग॒र्भः स॑मव॒र्त॒ताग्रे इत्याघारमाघारयति प्र॒जाप॑ति॒र्वै हि॑रण्यग॒र्भः प्र॒जाप॑तेरनु॒रूप॒त्वाय॑ TaiS. V. v. 1. 2; अनुरूपेणे॑वान्नाद्य॑मवरुन्धे पर्ग्वाद्य॑रुर्भवत्यनुरूपत्वाय॑ MaiS. iii. 4. 7 (iii. 55. 4); यत्पूर्वःरूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते PañcBr. xiii. 1. 9; xiii. 7. 7; प्राजापत्यो वा अश्वः प्रजापतेरनुरूपत्वा- (v. l. त्वा Viśva.) य BaudhŚS. ii. 378. 1; तदशक्तिश्चानुरूपत्वात् MīmāSū. i. 3. 28; TantrVā. 226. 15 (*on* i. 3. 23); VaiyāSiMañ. 68. 15; तेषामेवाशक्त्योच्चारणमनुरूपत्वात् VaiyāSiMañ. 86. 8; यत्किंचिद्दोषपरिहारानुपयुक्तत्वस्य वैयर्थ्येऽनुरूपत्वात् NyāySiA. 231. 1; अनुरूपत्वं नाम भगवद्विग्रहगुणाद्युपनेयविग्रहगुणादिमत्त्वम् Vedānt RaMañ. 1. 5 (70. 9); अनुरूपसंसर्गः सम्म्।... तत्रोत्पत्तिलक्षणस्य संसर्गस्यानुरूपत्वम् RasGaṅ. 604. 16; 2 the state or characteristic of being antistrophe पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वं रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वम् PañcBr. xi. 6.4 ; स्तोत्रियत्वात्कारणादनुरूपत्वाद्वा एतमुक्तं प्रग्रथनधर्मं प्रगाथा लभन्ते ŚāṅkhāŚS. vii. 25. 17; 3 the state of being what is proportionate, proportionateness पश्चात्त्वरुर्भवत्यनुरूपत्वायेति HirŚS. xii. 8. 10 (123. 21); पश्चात् त्सरुर्भवत्यनुरूपत्वायेति विज्ञायते ĀpaŚuS. iv. 13. 13 (comm. तथाकारसंपादनाय); 4 propriety स्वजातीयवधे वध एव हन्तुः। तत्र तस्यैवानुरूपत्वात् 'घातने तु प्रमापणम्' DaṇḍaVi. 73. 11.

अनुरूपत्वप्रतिपादन (anurūpatva-pratipādana) *n.* explanation of conformity प्रजापत्यर्थकहिरण्यगर्भपदयुक्तमन्त्रेणाघारणं प्रजापतेरनुरूपं भवतीति वाक्यशेषे प्रजापतेरनुरूपत्वप्रतिपादनम् MayūMāli. 682. 11 (*on* x. 3. 2)

अनुरूपदण्डनार्थम् (anurūpadaṇḍanārtham) *adv.* for the sake of corresponding penalty यैस्त्वनुरूपदण्डनार्थं 'माषो विंशतितमो भागः पणस्य परिकीर्तितः' इति नारदेनोक्तमाषः स्वीकृतः Smṛti Can. iv. 493. 16.

अनुरूपदोहदसंपत्ति (anurūpadohada-sampatti) *f.* wealth of befitting longing of a pregnant woman उत्पन्नगर्भप्रभावादनुरूपदोहदसंपत्तिसंपत्त्यधिककमनीयकान्तिः... प्रियङ्गुमञ्जरी बभूव NalaCam. 3. 22(34)

अनुरूपनिदेशदान (anurūpanideśa- dāna) *n.* act of giving a proper order or command विस्रब्धमादिश किमाहरतु ...। संभावयैनमनुरूपनिदेशदानाच्छिन्धि द्विषन्निधनसूत्रमिदं प्रदीर्घम् RāmC. 36. 7.

अनुरूपनिश्चयानुगतव्यापार (anurūpaniścayānugata-vyāpāra) *adj.* having the function or operation followed by appropriate determination यत्र यत्रोच्यते प्रत्यक्षं वस्तूपदर्शकं वस्तुग्राहकमित्यादिना शब्देन तत्र सर्वत्रानुरूपनिश्चयानुगतव्यापारमेव बोद्धव्यम् DharmoPra. 20. 22.

अनुरूपपरिवारपरिकर (anurūpa-parivāraparikara) *adj.* having a multitude of right attendants सप्रयत्नेन भूत्वा लिखितमेकं मया दिव्यकुमारिकारूपमनुरूपपरिवारपरिकरम् TilaMañ. 164. 4.

अनुरूपपर्यास (anurūpa-paryāsa) *m.* (du.) antistrophe and particular concluding strophe in a certain hymn अथात आवापवान् एकाहोऽपि चर्विंगपोहन इत्याचक्षतेऽन्तरेणानुरूपपर्यासौ गायत्राणि पावमानानि तृचसूक्तान्यावपेद् यावन्ति कामयेत Kṣudra. 2.9 [Viśva.]

अनुरूपपात्रघटन (anurūpapātra-ghaṭana) *n.* bringing together, i.e. union with matching or suitable personalities अनुरूपपात्रघटनं कुर्वाणस्याद्य कुसुमबाणस्य। सुचिराद् बत संजातः शरासनाकर्षणश्रमः सफलः KuṭṭaMa. 144 (comm. योग्यभाजनेन घटनं संयोजनम्)

अनुरूपप्रतिपत्त्युपपादन (anurūpapratipatty-upapādana) *n.* act of granting appropriate honour उपदिशन्ति हि विनयमनुरूपप्रतिपत्त्युपपादनेन वाचा विनापि भर्तव्यानां स्वामिनः HarṣaC. 126. 14.

अनुरूपप्रत्यपकार (anurūpa-pratyapakāra) *m.* befitting retaliation in return अस्मत्परिगृहीतानां दाराणामभिगमनेन दूषयिता। ततश्चानुरूपप्रत्यपकारेण शत्रोरानृण्यं गन्तव्यमिति तदस्यापि दारानेवाभिगमनेन दूषयन्प्रतिकरिष्यामि JayaMa. 66. 17 (*on* I. 3)

अनुरूपप्रमाण (anurūpa-pramāṇa) *n.* [Inst.] with proportionate measurement द्विकलं द्विकलं ज्ञात्वा यथाभागं कृपीकृतम्। अनुरूपप्रमाणेन नातितीक्ष्णाङ्गमेव च। ... एतत् गण्डपरावृत्तं स्थानम् ViṣṇuDhaP. iii. 39. 22.

अनुरूपप्रौढप्रहरण (anurūpapraudha-praharaṇa) *n.* proper and grand weapon सा कन्या रत्नमजीजनत् ... वहोः कालादनुरूपप्रौढप्रहरणप्राप्तिप्रीतहृदयेनास्फोटितमिव ... कुसुमसायकेन NalaCam. 3. 25(1)

अनुरूपफल (anurūpa-phala) *n.* appropriate fruit or result हितं हितानुज्ञानानामाधाराणाम् ... मन्त्रात्मा संप्रयच्छति। सद्यो वृत्तवशाद् ब्रह्मन्ननुरूपफलं हि यत् PauṣkS. 25. 28.

अनुरूपभर्तृगामिनी (anurūpabhartṛ-gāminī) *adj.* (*f.*) who obtains a suitable husband वत्से, अनुरूपभर्तृगामिनी भूयाः Nāgā. I. 17 (11); एनाम् ... अनुरूपभर्तृगामिनीनां वासवदत्तादीनां वर्णनेन ग्राहयानुशयम् DaśKuC. 69.1.

अनुरूपभाषण (anurūpa-bhāṣaṇa) *n.* befitting speech परगतवचनानुरूपभाषणरूपभाणयोगश्च किं ब्रवीषीत्याकाशभाषिते AbhinBhā. ii. 408. 18 (*on* 18.4)

अनुरूपभोग्य (anurūpa-bhogya) *adj.* to be enjoyed, i.e. ruled by the right (person) राज्यं कुरूणामनुपूर्वभोग्यं (v. l. अनुरूपभोग्यं) क्रमागतो नः कुलधर्म एषः MahāBhā. v.146.29.

अनुरूपम् (anurūpam) *adv.* [P.ii.1.6] **1A** proportionately यो बात्ययाजी स्नातकः ... म्रियेत तस्य ... विशेषार्थी यथाविभवानुरूपं दक्षिणां दत्त्वा ... पूर्वोक्तेन विधिना दहनं कुर्यात् VaikhāGS.5.9; (कविः) अनुरूपं च कविक्लेशस्य ... संमानडम्बरेण पूजितो राज्ञा UdaySuKa.157. 10; चूर्णीकृतमनुरूपं क्षिपेन्नरा यदि न भल्लातः RaseCin. 8. 37; **1B** in like manner or the same way ततोऽनुरूपमायं (? पं) च यमस्तस्मादनन्तरम्।... धर्मस्यापत्यमेतद्वै सुदेव्यां समजायत MatsyaP. 171. 47; यस्तु प्रहर्तारं प्रहृत्य तस्मिन् तूष्णीं तिष्ठति अनुरूपं प्रतिकृत्य विवदते ... एतयोर्यथोक्तादधिको दण्ड: DaṇḍaVi.248.15; **2A** appropriately, properly आहिताग्नेः यज्ञपात्राणि ... पृषदाज्येन पूरयित्वानुरूपं निदधाति KauśiSū.81.3; **2B** in a befitting manner संग्रहेष्वलुब्धाः प्रत्यन्तेषु मौलाः शुचयोऽर्धकृत्येषु ... अन्येषु यथानुरूपं नियोज्याः (जनाः) SaṅkhaLiDS. 251; इच्छाविभूत्योनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा। सभ्यः सभायाम् ... तस्थौ KumāSaṁ. 7. 29; सः (सरयूम्) तामपकृष्टनक्राम्। विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः RaghuVa.16.55; किमसावतिमहद्भिः पूर्वाचार्यैस्तस्या दिव्याकृतेर्घटिताया अनुरूपं घटेते न वेति प्रष्टुमर्हथ AvantiKa. 13. 15; पुरुषज्ञानलोकज्ञानपुरुषविशेषज्ञोऽनुरूपमुपकारी भवति ManuBh. ii. 64. 26 (*on* 7.206); ईश त्वां स्तोतुमिच्छामि ...। नैव वर्णयितुं शक्तोऽस्म्यनुरूपमनीहकम् BrahmVaiP.iii.13.41; सकीर्तिं ... भर्तुर्भूयादित्यबुदिधरः। सनामारीनहन्प्रत्यर्थ्यनुरूपं कृतायुधः DvyāśraKā. 5. 42; **3** accordingly, correspondingly धर्मं कुरुकुलोचितम्। अनुरूपं महाबाहो पूर्वेषामात्मनः कुरु MahāBhā. i. 195.12; यो हि भृत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे। कुर्यात्तदनुरूपं हि Rāmā. v.70.7; तेनार्चितौ तावपि चानुरूपम् BuddhaC. 9.3; क्रोशितुमपि रुजानुरूपमसमर्थस्य ... परिषेकं कुर्यात् AṣṭāSaṁ. ii. 170.4 (*on* 6.1); वस्त्वन्तरे रतिमुपेयुरथानुरूपम् VarāṅgaC. 1.43; रागद्वेषभयादीनामनुरूपं चरन्नपि। योऽन्तर्व्योमवदच्छन्नः स जीवन्मुक्त उच्यते VarāU.4.24; YogVā. iii. 9.8; जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवोपाधय उत्पद्यन्ते BrahmSūBh.(Rā.) 163.15 (*on* i.1.4); जगत्कारणविशेषाकाङ्क्षायामाकाशशब्देन ... अन्यत् सर्वं तदनुरूपमेव वर्णनीयम् BrahmSūBh.(Rā.) 219. 18 (*on* i. 1. 23); आशाभिपूर्तेरनुरूपमेव वर्षन्प्रकर्षाद्धसुमण्डलानि। ... व्यनक्ति यः सोदरताविलासम् Acyutarā. 1.9; **4** in a befitting form यथार्थो योग्यता। अनुरूपं सुरूपो वहति JaineVyā. 47. 29 (*on* i. 3. 5); अनुरूपं स्वरूपी भवति CāndraVṛ. *on* ii. 2. 2; योग्यतायामनुरूपम्। रूपयोग्यं भवतीत्यर्थः KāśiVṛ. *on* ii.1.6; अनुरूपमित्यत्र योग्यतायामनुशब्दः। योग्यं रूपं वहतीत्यर्थः Nyās.i.341.27 (*on* ii.1.6); रूपस्य योग्यमनुरूपम् MugdhaBo. 6. 61 (61. 16); PrakriKau. i. 476.4; SiddhāKau. 162A. 5 (*on* ii.4. 18); LaŚabdeŚe. i. 536. 10; अनुरूपमिति योग्यतायामव्ययीभावः RasGaṅ. 596. 3.

अनुरूपमाय (anurūpamāya) [w. r. for अनुरूपमापम्], MatsyaP. 171.47.

अनुरूपयत् (anu-rūpayat) *adj.* [*f.*-nti] closely looking at सिंहासनस्थान्नृपतीन् भरतस्त्वनुरूपयन्। गिरा पप्रच्छ कुशलम् ViṣṇuDhaP. i. 209. 62; कंदर्पशत्रुरयमित्यनुरूपयन्ती सैषा पपात पुर एव पुरां विजेतुः BhikṣāKā. 8.6.

अनुरूपयत्न (anurūpa-yatna) *m.* due or proper effort अथानुरूपयत्नेन सम्यगन्वेषणे कृते। मूलाभावात्र विज्ञातं भवेद्बाधकबाधकम् TattvSaṁ. 2869.

अनुरूपरमण (anurūpa-ramaṇa) *m.* suitable lover, i.e. husband अनुरूपरमणमासादयेति तामाशिषावर्धयदर्धचन्द्रमौलिः PārvPa. 3. 8 (7)

अनुरूपरमणविरह (anurūparamaṇa-viraha) *m.* absence of a suitable lover वपुरिदमनुपममीदृग् यदि विहितं तेन धात्रा। अनुरूपरमणविरहात् किमिति कृतं वन्ध्यजन्मफलम् KuṭṭaMa. 815.

अनुरूपरसा (anurūpa-rasā) *adj.* **1** having befitting, i.e. favourable passion or love इयमेव नर्मदा मम वंशप्रभावानुरूपरसा ĀryāSaŚa. 455 (comm. अनुकूलरतिमती); **2** having proper quantity of water, ĀryāSaŚa. 455 (comm. रसो जलम्)

अनुरूपरूप (anurūpa-rūpa) *n.* **i** proper form अनुरूपरूपरतिशीलशुभां लभते स्त्रियं सुभग एव पुमान् Rāgh. 8. 20; **ii** conforming form, cf. **अनुरूपरूपा**.

अनुरूपरूपसंपत्ति (anurūparūpa-sampatti) *f.* wealth of befiting beauty प्रथममिह तावदभिजात्यवित्तविद्याविवेकविभवैरनाकुले कुले जन्म ततोऽप्यनुरूपरूपसंपत्तिः ... इति महती भाग्यपरंपरा NalaCam. 6.35(6)

अनुरूपरूपा (anurūpa-rūpā) *adj.* (*f.*) possessing conforming form अशेषरूपेष्वनुरूपरूपा देवी जगन्नेतुरनुप्रजज्ञे Yādavā. 12.1 (comm. समानाकारा तत्तदवताराद्यनुरूपाकारा)

अनुरूपलक्षितत्व (anurūpalakṣita-tva) *n.* [w. r. for **अनुपलक्षितत्व**] AbhinBhā. i.310.15 (*on* 6.45)

अनुरूपलोभ (anurūpa-lobha) *m.* eagerness or longing for suitable (husband) अहोऽनुरूपलोभेन सखी मां मुग्धमानसीम्। दग्धुमभ्युद्यता पापा BṛKathāMañ. ix .1. 356.

अनुरूपवत् (anurūpa-va(n)t) *adj.* possessing similar traits (एको नारायणो देवः) चैतन्यमस्य धर्मो यः प्रभा भानोरिवामला। तया स्फुरति जीवोऽसौ स्वत एवानुरूपया (v.l.अनुरूपवान्) LakṣmīT. 13. 26.

अनुरूपवपुस् (anurūpa-vapus) *adj.* possessed of proper body त्वरितत्तरमुत्थाय चलितमभिरूपमभिनवारूढयौवनमनुरूपवपुषा ... राजसुतया ... मुहुर्यावित्वा ... निपत्य पादयोः प्रसाद्यमानमेकं नृपकुमारमद्राक्षम् TilaMañ. 397.15.

अनुरूपवराप्राप्ति (anurūpavarāprāpti) *f.* non-finding or non-obtainment of a suitable bridegroom कन्यासौ अनुरूपवराप्राप्त्या वृद्धकुमारी भूत्वा केनाप्यनुरूपेण महीमहेन्द्रेण सोपरोधमूढा सती सतीमतल्लिका तमुद्धोढारं च स्वं च जनकं च परामुन्नतेः कोटिं नेष्यति PrabaCin.126.23; KumāPraPra.92.22.

अनुरूपवरार्थ (anurūpavarārtha) *m* .[Loc.] for the sake of (obtaining) a suitable bridegroom कन्या स्वयंप्रभा नाम ...। अनुरूपवरार्थेऽस्याश्चिरं चिन्तापरायणः। अरोचकी कविरिव तस्थावग्निजटी नृपः TriṣaŚaPuC. iv. 1. 462.

अनुरूपवर्तनाभरण (anurūpa-vartanābharaṇa) *n.* appropriate make-up (*lit.* application of colours) and decoration or ornamentation सात्त्विकभावोन्मीलनमभिनयमनुरूपवर्तनाभरणम्। मिश्रामिश्रे नाट्ये लयच्युतिं वर्णयन्ति मञ्जर्याः KuṭṭaMa. 805 (comm. भूमिकोचितं वर्तनं वर्णैः उपवर्णैश्च अङ्गवर्तनम्)

अनुरूपविचेष्टित (anurūpa-viceṣṭita) *n.* befitting action एतन्नम (?) प्रथममम्ब मयि त्वदीये प्रेम्णे पुनस्तदनुरूपविचेष्टितेभ्यः। यन्मां प्रतीत्यमुपदेशविधिस्तवायं मा भूद्विजेतरि पुरामनुरागबन्धः BhikṣāKā. 23.18.

अनुरूपविषयिन् (anurūpa-viṣayin) *adj.* referring to appropriate objects (रागः) न केवलं लावण्यादिनैव रज्यते किं तर्ह्यनुरूपविषयिणाभिलाषेणापीति प्रतीयते SaraKaṇṭhā. 645. 6.

अनुरूपवीरसंवाद (anurūpavīra-saṁvāda) *m.* speaking to the worthy hero अनुरूपवीरसंवादप्रमोदभरद्विगुणितावष्टम्भसंक्षोभितभुवनत्रयस्य निरन्तरप्रहीयमाणबाणपञ्जरमध्यवर्तिना रामभद्रेण क्रीडाशकुन्तकौतुकं पूर्यते राक्षसराजस्य AnarghaRā. 6.71(1)

अनुरूपवृत्तघटना (anurūpavṛtta-ghaṭanā) *f.* **1** composition in appropriate metre (नगरी वाराणसी नाम) अनुरूपवृत्तघटना सत्कविकृतरूपकेषु लोके च। रमणीवचने यस्यां माधुर्यं काव्यबन्धे च KuṭṭaMa.15; **2** occurrence of proper conduct, KuṭṭaMa. 15.

अनुरूपवेला (anurūpa-velā) *f.* proper time अमात्यः ... प्रागेव मरणाबाधभयाद् राज्ञः ... राजव्यञ्जनमनुरूपवेलायां प्रकृतीनां दर्शयेत् मित्रामित्रदूतानां च ArthŚā ii. 218. 4 (5. 6)

अनुरूपवेश (anurūpa-veśa) *m.* proper dress वयःकर्मार्थश्रुताभिजनानां प्रत्येकमनुरूपवेशभाषणबुद्धिवृत्तिः कार्या Aparā. 165. 16 (*on* 1.123)

अनुरूपवेष (anurūpa-veṣa) *m.* proper dress (राजा) कुशलविरचितानुकूल- (v.l.°रूप)वेषः क्षितिपसमाजमगात् RaghuVa.5.76; लोकवृत्तं वृत्त्यर्थितया प्रायशो

यदाचरति स्वगुणानुख्यापनानुरूपवेषधारणादिकं लोकस्तत्र वर्तते न वर्तयेत् ManvaVi. 58. 18 (on 4.11)

अनुरूपव्यय (anurūpa-vyaya) *adj.* i expended or spent in a befitting manner ललितापीडनामा ... वसुमतीपतिः। ... दुष्कृतेनार्जितं वित्तं पित्रा निरयभागिणा। यद्धारणादिषु न्यस्यन्ननुरूपव्ययं व्यधात् RājTa.(Ka.) 4. 662; कोशः सुस्सलभूपतेः। तेनातिव्ययिना स्वैरमनुरूपव्ययः कृतः RājTa. (Ka.) 8. 1949; ii who makes proper or corresponding expenditure श्रीगर्भपदपर्यायच्छन्नजाड्यप्रभावतः। तयार्जितस्य कोशस्य सोऽनुरूपव्ययोऽभवत् RājTa.(Ka.) 7.1108.

अनुरूपशस् (anurūpaśas) *adv.* conformably or agreeably to, APTE.

अनुरूपसंयोग (anurūpa-saṁyoga) *m.* 1 union of conforming objects कविना विच्छित्तिविशेषोपनिबद्धं कार्यकारणयोरानुरूप्यमनुरूपसंयोगः सामग्रीसाकल्यं च समम्। अनुरूपसंयोगस्य ... चारुत्वादलंकारता AlaṅkāRa. 61.3; 2 union of suitable ones, cf. अनुरूपसंयोगरसिक.

अनुरूपसंयोगरसिक (anurūpasaṁyoga-rasika) *adj.* one who is delighted by the union of suitable ones अनुरूपसंयोगरसिकेन विश्वसृजा तथा रचितं यथा सा तथा सारिका VetāPañ.(Jam.) 30.16.

अनुरूपसंसर्ग (anurūpa-saṁsarga) *m.* union or coming together of conforming ones समालंकारः - अनुरूपसंसर्गः समम् RasGaṅ. 604.15.

अनुरूपसंसर्गत्व (anurūpasaṁsarga-tva) *n.* the state of being the union or coming together of conforming ones अनुरूपसंसर्गः समम्। ... अनुरूपसंसर्गत्वेन सामान्यलक्षणेन सर्वे भेदाः संगृहीताः RasGaṅ. 604. 20.

अनुरूपसखीजन (anurūpa-sakhījana) *m.* worthy female companion अनुरूपसखीजनैरुपेतां दमयन्तीं ददृशुर्विहंगमास्ते Nalābhyu. 2. 37.

अनुरूपसखीजनपरिवृता (anurūpasakhījana-parivṛtā) *adj.* (*f.*) surrounded by worthy female companions अनुरूपसखीजनपरिवृतां दुहितरमिमां गौरीं समित्कुशदूर्वाधुपहरन्तीं परिचर PārvPa. 1. 21 (5)

अनुरूपसंकेत (anurūpa-saṅketa) *m.* sign indicative of the corresponding things यथापकरिदृष्टविषयमनुरूपसंकेताहितसंस्कारभेदमेकत्वाध्यवसायिप्रकृतिभ्रान्तं स्मार्तमिदं ज्ञानमुत्पद्यते TattvSaṁPañ. 46. 12 (on 59-60)

अनुरूपसंगम (anurūpa-saṅgama) *m.* union of the proper things सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे Kirātā.4.4(comm. योग्यसमागमे)

अनुरूपसंघटनात्मक (anurūpasaṅghaṭanātma-ka) *adj.* of the nature of the union or coming together of conforming ones अनुरूपसंघटनात्मक एव समालंकारः RasGaṅ. 608.8.

अनुरूपसंघटनारूप (anurūpasaṅghaṭanā-rūpa) *adj.* of the form of the union or coming together of conforming ones विषयस्य विरूपसंघटनारूपायाः प्रथमभिदाया विपर्ययोऽनुरूपसंघटनारूपश्चारुत्वहेतुत्वादलंकारत्वेन गणितः Ekāva. 8.39 (2) (290.2).

अनुरूपसमागम (anurūpa-samāgama) *m.* union of conforming ones ज्येष्ठमासन्नसंग्रामं गतो मुक्त्वा विभीषणः।... न मां द्रक्ष्यति सौमित्रिर्ज्येष्ठभ्रातृवधोद्यतम्। सुग्रीवस्त्यक्ष्यति व्रीडामनुरूपसमागमे RāmC. 24. 137; अनुरूपसमागमस्तु प्रस्तूयतेऽत्रेति समम् Ekāva. 8.39 (4) (290.4).

अनुरूपस्थाननिवेशन (anurūpasthāna-niveśana) *n.* placing or arrangement (of objects) in a proper place (वासगृहे ... नागदन्तासक्ता वीणा। चित्रफलकम्) वीणादयः ... नागदन्तेष्वासज्य स्थापिता यथाप्रयोजनं चादातव्याः। अनुरूपस्थाननिवेशनमपि। वैदग्ध्यजननमिति गम्यते JayaMa. 46.21 (on 1.4)

अनुरूपस्थानन्यास (anurūpasthāna-nyāsa) *m.* depositing in a proper place अस्मत्स्वामिना संदेशशून्यतां नयता पूर्वजोपार्जितं वारुणातपत्रमाभोगाख्यमनुरूपस्थानन्यासेन कृतार्थीकृतमेतत् HarṣaC. 289. 14.

अनुरूपस्थालिका (anurūpa-sthālikā) *f.* proportionate cooking vessel कचघटीम् ... रसगर्भिणीमधस्तर्जन्यङ्गुलिप्रमाणितछिद्रायामनुरूपस्थामलिकायाम् (? स्थालिकायाम्) आरोप्य ... वर्धमानकमापूरणीयम् RaseCin. 2.5 (8.17)

अनुरूपस्वर (anurūpasvara) *m.* 1 name of a Bodhisattva अहं सर्वत्र बोधिसत्त्वजननी भविष्यामि। यथा च मैत्रेयस्य बोधिसत्त्वस्य ... अनुरूपस्वरस्य GaṇḍVyū. 348.6 [DBHS.]; 2 (anurūpa-svara) appropriate or proper tone, cf. अनुरूपस्वरवश.

अनुरूपस्वरवश (anurūpasvara-vaśa) *m.* [Inst.] on account of appropriate or proper tone स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव। ... क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यम् SāhiDa. 61.12.

अनुरूपा (anu-rūpā) *f.* 1 one of the three types of nature of dramatic character (*lit.* conforming one) अनुरूपा विरूपा च तथा रूपानुरूपिणी। त्रिप्रकारेह पात्राणां प्रकृतिश्च विभाविता NāṭyaŚā. 26.1; स्त्रियो हि स्त्रीगतो भावः पौरुषः पुरुषस्य च। यथावयो यथावस्थमनुरूपेति सा स्मृता NāṭyaŚā. 26.14; 2 (anurūpā) name of the wife of Atri दक्षेण दत्ताः ...। संततिश्चानुरूपा च ऊर्जा स्वाहा स्वधा तथा। ... अत्रिर्वासिष्ठो वह्निश्च पितरश्च यथाक्रमम्। ख्यातास्ता जगृहुः कन्याः ... साधका वराः ŚivaP. ii (1). 16.22 (60A.9)

अनुरूपाग्निष्टोमसामन् (anurūpāgniṣṭomasāman) *adj.* having corresponding Agniṣṭoma chant अथातोऽनुरूपाग्निष्टोमसामा द्वादशाहः स्याद् इत्याहुः Kṣudra. 3. 3; अथाग्र एवानुरूपाग्निष्टोमसाम दशममहर्भवेत्येतस्माद् वा एतानि योनेरसृज्यन्तेति भवति Kṣudra. 3.3; *n.* corresponding Agniṣṭoma chant अथाप्यनुरूपाग्निष्टोमसाम्नि वारवन्तीयस्यैवानुरूपं कल्पयतीति NidāSū. 68. 1 (4.4)

अनुरूपात्मदर्शन (anurūpātmadarśana) *adj.* having manifestation of one's own self according to the (desired) form (देवः) स उपव्रज्य ...। हरिम्। ... भक्तानामनुरूपात्मदर्शनम् BhāgP. iii. 20. 25.

अनुरूपानन्तर्य (anurūpānantarya) *n.* immediacy of the *tṛc* or triad of verse (viz ṚV. ix.64. 28-30 to be used in the *bahiṣpavamāna stotra*) प्रकृतिक्लृप्तस्यानुरूपानन्तर्यस्य पर्यासे बाधे प्रमाणाभावात् BhāṭṭDī. ii. 193. 15 (on v.3.4)

अनुरूपाभिनिवेशतोषिन् (anurūpābhiniveśa-toṣin) *adj.* one who is delighted at proper persistence (पार्वती) अनुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा। ... जगाम गौरीशिखरं शिखण्डिमत् KumāSaṁ. 5.7.

अनुरूपारिलाभ (anurūpāri-lābha) *m.* act of meeting a right rival तावुभावनुरूपारिलाभलम्भितसंमदौ। अभूतामुद्धरोमाञ्चत्रुटत्कञ्चुकबन्धनौ PāṇḍaC. 13. 680.

अनुरूपार्घ (anurūpārgha) *m.* proper value or price दिनमणिः ... दिनवणिजा ...। अनुरूपार्घमलब्ध्वा पुनरिव रत्नाकरे निहितः SubhāRaK. 27. 20.

अनुरूपार्थ (anurūpārtha) *adj.* containing proper or appropriate matter यदिदं मेऽनुरूपार्थं मया साधु सुमन्त्रितम्। भवन्तो मेऽनुमन्यन्ताम् Rāmā. ii. 35 *(1)

अनुरूपार्थक्रियार्थिता (anurūpārthakriyārthi-tā) *f.* the state of being desirous of the action conducive to proper result तदनुरूपार्थकृ(क्रि)यार्थितया प्रवृत्तेः ... अनित्यसाध्यार्थक्रियार्थी ... किमनित्यताविचारं प्रत्याहितास्थः HetuBiṬ. 42. 24.

अनुरूपार्थान्वय (anurūpārthānvaya) *m.* a type of *vipralambhaśṛṅgāra* (*lit.* union or coming together of suitable objects) प्रथमानुरागे ...। अत्रैवानुरूपार्थान्वयः SaraKaṇṭhā. 653. 5.

अनुरूपालंकारालंकृत (anurūpālaṅkārālaṅkṛta) *adj.* decorated with proper or appropriate ornament (पुरुषम्) अनुरूपालङ्कारालङ्कृतम् ... कामेष्ववसृजेत् CaraS. i. 15. 17 (1941 Ed.)

अनुरूपासनदेशन (anurūpāsana-deśana) *n.* showing, i.e. offering of proper seat अनुरूपासनदेशनेन च। झगित्यनैपीद् बहुमानपात्रतां पृथक्पृथग्यूथपतीन् जगत्पतिः RāmC. 5. 9.

अनुरूपिन् (anurūp-in) *adj.* [*f.*-iṇī] 1 worthy (person) तदिदम् (रामायणम्) ... श्रोतव्यमनसूयया (v. l. अनुरूपिणा) Rāmā. i. 5. 4; 2 suitable, matching सचिवैरनुजस्यानुरूपिणीम्। कन्यामन्वेषयामास विजयानन्दरङ्गराट् ĀnandRa. 5. 40.

अनुरूपे (anurūpe) *adv.* in (or upon) form बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नरुरूपे चरति Śatasāhasrikā prajñāpāramitā 765. 2 [DBHS.]

अनुरूप्यदर्श (anurūpyadarśa) [w. r. for अनुरुध्य दर्श] AvantiKa. 105.

अनुरूप्यम् (anurūpyam) *adv.* after silver बीजे तानि न्यसतु ... च्युतचरमराजीनि लोहेऽनुरूप्यम् TantrSa. 1. 105 (Vimarśinī अनुरूप्यं रूप्यानन्तरम्, *but* Vivaraṇa रूप्यस्य पश्चात् सुवर्णरजतयोरनन्तरमित्यर्थः)

अनुरेवती (anurevatī) *f.* name of a plant, MW.; *Croton tiglium*, PW.

अनुरेवापुलिनम् (anurevāpulinam) *adv.* [P. ii. 1. 16] along the sandy beach of (the river) Revā, i.e. Narmadā अनुरेवा पुलिनं (? अनुरेवापुलिनं) गृहाण यात्राम् NavaSāC. 5. 78.

अनुरोग (anu-roga) *adj.* continuously sick विद्यां न गृह्णन्ति ... नराः। अलसाश्चानुरोगाश्च MāṇḍūŚi. 16. 5; *m.* continuous sickness, cf. अनुरोगिन्.

अनुरोगिन् (anurog-in) *adj.* having continuous sickness क्षामक्षामक्षतरुजाश्वासमूर्च्छानुरोगिणाम्। ... सर्वरोगान् निहन्ति (गुडः) HāriS. i. 10. 18.

अनुरोति (anuroti) [w. r. for अनराति] AV. (P.) ix. 3. 13.

अनुरोदन (anu-rodana) *n.* weeping after रुदता कुत एव सा पुनर्भवता ...। अत्र हि 'कुत एव तु सानुरोदना' दिति युक्तः पाठः VyaktiVi. 59. 22 [condolence, sympathy, Apte]

¹अनुरोद्धव्य (anu-roddhavya) *adj.* **1A** to be followed or imitated **B** to be followed , to be depended upon **2** to be adhered to, to be stuck to **3** to be obeyed or honoured **4** to be accepted or admitted **5** to be regarded or considered **1A** to be followed or imitated शेषक्रियायां लोकोऽनुरोद्धव्यः BaudhDS. i. 5. 112; **1B** to be followed, to be depended upon अर्थप्रधानो हि ग्रन्थोऽनुरोद्धव्यः TantrRa. 101. 6; कथकाभ्यां यावता विना तदभिलषितं न पर्यवस्यति तावदनुरोद्धव्यम् KhaṇḍanKhā. 29. 10; परमर्षिप्रणीतानि व्याख्येयानि, तेषां च महर्षिप्रणीतानि व्याख्यानानि (च) सन्ति चेत्, तान्येवानुरोद्धव्यानि ŚrutaPra. iA. 2. 15 (*on* i. 1. 1); **2** to be adhered to, to be stuck to स्तोत्रक्रममनुरुध्यमानस्य प्रधानक्रमो विरुध्येत। तस्मात्र स्तोत्रक्रमोऽनुरोद्धव्यः ŚābaBh. 1309. 12 (*on* v. 1. 35); मुख्यधर्मानुग्रहस्य वक्ष्यमाणत्वात्तन्न्यायेन प्रकृतेऽप्यर्थवादस्य मुख्यत्वात्स एवानुरोद्धव्यः MayūMāli. 232. 6 (*on* iii. 3. 1); **3** to be obeyed or honoured दक्षाद्युक्तश्शङ्खलीनियमोऽनुरोद्धव्यः BālaKrī. i. 39. 15 (*on* 1. 20); **4** to be accepted or admitted करणव्यवहारास्तित्वमेवमनुरोद्धव्यं स्यात् KhaṇḍanKhā. 470. 21; आत्मशब्दस्वारस्यभङ्गहेतवोऽनुरोद्धव्याः ŚrutaPra. i B. 174. 18 (*on* i. 1. 5); वेदोपरा वेदान्ता इत्यभियुक्तवाक्यं परमास्तिकेन भवतानुरोद्धव्यं स्यात् NyāySu. (Ja.) 74A. 11 (*on* i. 1. 1); लिङ्गकारकयोः कारकस्य प्राधान्यात् कारकान्वयस्वारस्यमेवानुरोद्धव्यम् PūrvottaVāNaMā. 132 .19; **5** to be regarded or considered ब्रह्मोपक्रमस्तु नानुरोद्धव्यः ŚivārkaMaDī. i. 538. 24 (*on* i. 4. 16).

²अनुरोद्धव्य (anu-roddhavya) *adj.* to be obstructed or prevented आ शुद्धेः ब्रह्मवधादिजनितस्य पापस्य प्रायश्चित्तादिना अपगमपर्यन्तं सम्यक् प्रतीक्ष्योऽनुरोद्धव्यः (पतिः) VīraMi. 140. 6 (*on* 1. 77)

अनुरोद्धव्यत्व (anuroddhavya-tva) *n.* the state of being what is to be accepted or admitted कारणैकत्वावधारणस्यानुरोद्धव्यत्वात् ... परमकारणत्वमभ्युपगन्तव्यम् ŚrutaPra. iB. 137. 4 (*on* 1. 1. 4); मुख्यामुख्यार्थानुग्राहकेषु मुख्यानुग्राहकस्यानुरोद्धव्यत्वं चास्मिन्नधिकरणे व्युत्पाद्यम् ŚrutaPra. iB. 180. 24 (*on* i. 1. 6)

¹अनुरोद्धुम् (anu-roddhum) *inf.* **1** to respect अरण्यवासिनः पार्थान्नानुरोद्धुं त्वमर्हसि MahāBhā. iii. 251. 15; **2** to follow, i.e. to imitate यज्ञैर्विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि BhāgP. iv. 14. 21; **3** to coax, to conciliate, to propitiate प्रणयिनीमनुरोद्धुं प्राप दाशरथिरात्मनिकेतम् Rāgh. 5. 54; सः ...। (लक्ष्मणम्) रुष्टमेनमनुरोद्धुमादरादादिदेश विवशः स्ववल्लभाम् Rāgh. 11. 51; किं वा मे विनिपात्य मानवशसी कामोऽनुरोद्धुं क्षमः JānaPa. 2. 25.

²अनुरोद्धुम् (anu-roddhum) *inf.* to overrule, to block एतत्र प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हति BrahmSūBh. (Śaṅ.) 429. 13 (*on* ii. 3. 6); तर्कः ... नाश्रयासिद्धिमपि तावद् वास्तवीमनुरोद्धुमधिकरोति KhaṇḍanKhā. 1336. 22.

¹अनुरोध (anu-rodha) *m.* [Dhātu Pra. 4. 69 (94. 25)] **1Ai** acceptance or compliance अनुरोधविरोधाभ्यां समः स्यादचलो ध्रुवः। सुकृतं दुष्कृतं चोभे नानुरुध्येत कर्मणि MahāBhā. xii. 269. 14; अनुरोधविरोधाभ्यां शीतोष्णाभ्यामिवार्दितः। शर्म नाप्नोति Saund. 13. 48; 17. 67; इयं तु राज्ञोऽनुरोधविरोधौ विचिन्त्य यथोचितमाचरतु KaṁVa. 5. 35 (11); [Abl.] due to acceptance or compliance with अनुरोधाच्च तेनास्यामेकैव जनिता सुता। चिरमाराधितो भक्त्या विरक्तोऽपि हि रज्यते BṛKathāŚloSaṁ. 18. 557; **1Aii** following, i.e. accepting (a view) संशुद्धं तत्त्वभूतं यद्ब्राह्मणं स एव परिन्यासः। नानानुरोधादिति NāṭaLaRaK. 584; **1B** conformity, accordance प्राणस्य प्राणमिति कस्माद् द्वितीयैव न क्रियते। बहूनामनुरोधस्य युक्तत्वात् KenUBh. 33. 8 (*on* 1.2); [Abl.] in conformity or accordance with ग्राम्यः ... पादस्य तदुत्तरस्य चानुरोधाद् ग्राम्याणि ... पदानि ... तिष्ठति SaraKaṇṭhā. 110. 20; दृष्टेऽपह्नुत्यभावात् अनुमितिविषये लाघवस्यानुरोधात् ... इदमखिलतमः कर्शनं दर्शनं नः TattvMu. 5. 136; ब्रह्मात्मश्रुत्यपहतपाप्मत्वाद्यन्वयानुरोधात् दहराकाशान्तर्वर्त्यपि परमेश्वर इत्यभ्युपगन्तव्यम् ŚivārkaMaDī. i. 439. 11 (*on* i. 3. 16); वीररसस्य चातुर्विध्यं प्रपञ्चितं प्राचामनुरोधात् RasGaṅ. 50. 8; 388. 15; 439. 3; शसो नः पुंसीत्यादेरनुशासनस्यानुरोधात् VaiyāBhū. 121. 21(*on* 25); (अनन्तरा) महासंज्ञा तु प्राचामनुरोधादेव LaŚabdeŚe. i. 52. 13; i. 527. 9; [Inst.] in conformity or accordance with न ... युष्मदादीनामनुरोधेन मध्यमादयो भवितुमर्हन्ति ŚābaBh. 1127. 12(*on* iii.8.22); यानि व्यञ्जकमीक्षन्ते वृतत्वान्मलशक्तिभिः। व्यञ्जकस्यानुरोधेन तानि सुर्व्याहतान्यपि MṛgendraT. i. 5. 15; यद्धि यस्यानुरोधेन स्वभावमनुवर्तते। ततस्य गुणभूतं स्यान्न प्रधानाद्गुणो यतः NaiṣkaSi. 37. 2; लक्ष्मणीयानुरोधेनैव हि सर्वत्र परिग्रहपरित्यागौ TattvBi. 155. 7; व्याप्त्यनुपयोगिनोऽपि दृष्टान्तदृष्टधर्ममात्रस्यानुरोधेनानुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्गः ĀtmaSi. 10. 25; वरं मुख्यार्थानुरोधेन विधानमेव कल्प्यताम् TātpaṬ. (Vā.) 630. 17 (*on* iv. 1. 60); प्रसिद्धेरनुरोधेन यः परस्परमर्दयोः। भूयोऽवयवसामान्ययोगः सेहोपमा मता SaraKaṇṭhā. 399. 9; स राजा ... प्रयोजनानुरोधेन शत्रुर्वा मित्रं वोदासीनो वा भवति ManvaVi. 759. 13 (*on* 7. 10); भग्नः श्रीविजयेशोऽपि तेनेति कथयोत्थितम्। प्रक्रान्तस्यानुरोधेन शोकशल्यं सहामहे RājTa. (Jo.) 762; (प्रथमश्रुतप्रमाणम्) तदनुरोधेनैव चरमश्रुतप्रमाणस्य नेतव्यत्वात् PāṇiTaVāNaMā. 28. 6;29.20; बलवत्तरस्यानुरोधेन ... बहुत्वलक्षणासंभवात् ... उपांशुत्वं विधीयते GuruCandr. i. 271. 7; i. 280. 13; श्रौतक्रमानुरोधेन... पर्यवसानम् ... इदं च प्राचामनुरोधेन व्याख्यातम् SetuBa. 277. 13; इष्टाजनके आन्तरालिकश्रमे द्वेषाभावदशायामप्रवृत्तेः सर्वसिद्धायानुरोधेन तस्य प्रवर्तकत्वावश्यकत्वात् VaiyāBhū. 78. 21(*on* 22); प्रयोजनम् ... सप्तम्यन्तैः कृतस्याधिकारिनिर्णयस्यानुरोधेनैव प्रकटीकृतम् Bhāsk. i. 17. 9 (*on* i. 1. 1); सा ... अनुरोधेन वा मधुमासवासराणाम् ... मामाभिगन्तुमुद्यतवती Mukundā. 184 (5); इदं प्राचामनुरोधेन LaŚabdeŚe. i. 24. 8; i. 125. 7; i. 148. 3; इदमर्वाचामनुरोधेन LaŚabdeŚe. i. 340. 3; **2** [Abl.] due to adherence सत्यानुरोधात् समये वेलां स्वां नातिवर्तते Rāmā. ii. 12. 6; [Inst.] due to adherence to प्राणानुज्झितवानरातिभवने सत्यानुरोधेन यः। तस्यानुजः ... श्रीहर्षः ... समाज्ञापयति EI. i. 72. 7; iv. 210. 6; vii. 157. 7; **3** [Inst] by following or practising गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम् Rāmā. ii. 707* (8); SūktiRa. 74. 11; **4A** gratification or fulfilling (of one's interest, wish etc.) तस्याप्योदन एवेप्सिततमो न तु गुणेष्वस्यानुरोधः MahāBh. i. 332. 24 (*on* i. 4. 49); iii. 441. 12 (*on* viii. 3. 61); अनुरुध्यते आनुकूल्येन प्राप्यते इति अनुरोधः प्रयोजनम् PadMañ. *on* KāśiVṛ. *on* P. viii. 3. 61 (551. 9); **4B** consideration, regard गत्वापि तत्राप्यपरत्र गच्छति। एवं जने त्यागिनि कोऽनुरोधः BuddhaC. 9. 36; प्रियेष्वनित्येषु कुतोऽनुरोधः Saund. 5. 43; वेदोपकरणे चैव स्वाध्याये चैव नैत्यके। नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ManuSm. 2. 105; कश्चफलं राजलक्ष्मीं प्रत्यनुरोधोऽयमार्यस्य HarṣaC. 250. 7; व्रीहित्वं च प्रधानं साक्षात् ... व्रीहिभिर्यजेतेति। तस्मात्र तेष्वनुरोधः कार्यः ŚābaBh. 1428. 20 (*on* vi. 3. 41); जनः कुमारस्य स्व इवान्तरात्मा क इवात्रानुरोधः Kād. 209. 21; मलीमसानां न स्वार्थात्किचिदतिरिच्यतेऽनुरोधः HarVi. 17. 57; PāṇḍaC. 6. 394; [Abl.] out of consideration, regard or respect युक्तं न वा युक्तमिदं विचिन्त्य वदेद्विपश्चिन्महतोऽनुरोधात् PañcT. (Kos.) 1. 113 (19. 19); धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्गीकरोमि Kād. 160. 6; तत्तत्कर्मव्यतिकरकृतः पारतन्त्र्यानुरोधात् सज्जः सर्वे व्यवसितहठोन्मूलनाय प्रयत्नात् RājTa. (Ka.) 2. 93; [Inst.] out of consideration or regard (राजा) भृत्यानामनुपरोधेन (v.1. 'मनुरोधेन) क्षेत्रं वित्तं च ददद् ब्राह्मणेभ्यो यथार्हमनन्ताँल्लोकानभिजयति ĀpaDS. ii (10). 26. 1; VīraMi. (Rājanīti.) 139. 1; क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् ManuSm. 7. 166; ManvaVi. 837. 2 (*on* 7. 166); NītiPra. 8. 83; महाश्वेतानुरोधेन च विदितकादम्बरीचित्ताभिप्रायाः ... प्रतीहार्यः ... निवारयांचक्रुः Kād. 192. 13; युष्माकमनुरोधेन वयमस्य ... उपसर्गं करिष्यामः TriṣaŚaPuC. i. 4. 418; **4C** obeying, obedience (केयूरकोऽब्रवीत्) यदियमागत्य मामवदत्तरलिका तत्कथय किमयं गुरुजनवचनानुरोधः Kād. 180. 9; [Inst.] by obeying वत्स नैव नियुक्तेयं वनवासे मनस्विनी। पितुर्वाक्यानुरोधेन गतस्य (v. l. गच्छस्व) विजनं वनम् Rāmā. ii. App. I. 15 (5); **5** request, pressing or insistence सा तु तदनुरोधादविच्छिन्नबाष्पजलधारासंतानापि ... शनैः प्रत्यवादीत् Kād. 135. 23; तुल्यायामदृष्टकल्पनायां कः संस्कारेऽनुरोधः SphoṭSi. 91. 2; अनङ्गमुनिमण्डलीविहितसहसंवासानुरोधमिव निर्दलितनिखिलाबाधम् ... उद्यानमपश्यत् YaśasCam. i. 94. 2; क्रियासंतत्यविच्छेदार्थं नानध्यायानुरोधः ManvaVi. 180. 5 (*on* 2. 106); कस्तावत्तस्यानुरोधः CaitaCa. 159. 10 (7); सत्यां विभक्तौ ... 'दान्तत्वादिनिर्णयानुरोधस्य सत्त्वात् ... इत्याशङ्कां मनसिकृत्याह VaiyāBhū. 131. 24(*on* 27); [Abl.] due to request, pressing or insistence पश्यन्नपि ... कुठारम्। दत्तोत्सेकः प्रलपति याज्ञवल्क्यानुरोधात् मिथ्याध्मातः किमपि ... क्षत्रबन्धुः MahāviC. 3. 28; 5. 59 (4); भूपतिभिः ... अस्मदीया धर्म्मगौरवादस्मत् अनुरोधाच्च स्वदत्तिरिवानुपालनीया EI. xi. 94. 18; viii. 142. 22; iii. 343. 24; आर्योऽनुरोधान्न युनक्ति यत्र तत्राहमम्बानियमात्स्वतन्त्रः RāmC. 3. 53; प्रथमपूज्योऽयं देवाकृतिरुदारधीः। यस्यानुरोधात्सुलभा दुर्लभापि कलावती SamaMā. 7. 31; रुचिरदेवेन सोऽर्थितः ...। अनुरोधाच्च वत्सेशसुनुस्तत्प्रत्यपद्यत KathāSaSāg. xi. 1. 11; गोदावरीपर्यन्तं तु रामानन्दानुरोधात् तेषां सङ्गोऽङ्गीकृतः CaitaCa. 159. 8 (7); [Inst.] due to request, insistence or pressing सानुरोधेन सख्या वनभयेन च गमनाय समुत्तस्थौ भूयोऽपि परितापिनी

PadmP. (Ra.) 17. 112; सखीनामनुरोधेन सा किलानङ्गमोहिता। ... हार दंष्ट्रे NavaSāC. 6. 110; ममानुरोधेन क्रियतामर्कचन्द्रयोः ... निर्विघ्ना गगने गतिः DaśāvaC. 5. 66; तथापि वोऽनुरोधेन चक्रिणोऽस्य महौजसः । मशकाः कुञ्जरस्येव करिष्याम उपद्रवम् TriṣaŚaPuC. ii. 4. 219; **6A** liking, fondness आधारानुरोधात् त्रिपुरविजयिनः पातु वो दुःखनृत्तम् MudrāRā. 1. 2; तस्याः पतिरपर इव पाकशासनः ... नाभ्युपेता पापरुच्यनुरोधस्य AvantiKa. 7. 15; लङ्केश्वर चिरसंचरणादत्र नः अनुरोधं तर्कये MahāviC. 7. 26 (3); योद्धव्यमनुरोधं च विमुच्य सह पाण्डवैः PāṇḍaC. 13. 124; सेनापते ममानुरोधान्नात्मानं व्यापादयिष्यसि Hitopa. 3. 136 (3); **6B** propitiation, conciliation or coaxing राजपुत्रेण फलभूतिस्तदैव सः। कृतानुरोधः प्रहितो ययौ कुण्डलयोः कृते KathāSaSāg. iii. 6. 205; शिवायास्ते मूर्तेः क इह महिमानं निगदतु ... परममनुरोधं गिरिभुवो विहाय श्रीकण्ठः शिरसि नियतं धारयति याम् GaṅgāL. 12; [Inst.] by propitiation or conciliation धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितम्। अतन्द्रितोऽनुरोधेन मार्गेणात्मवशं नयेत् Bhāg P. xi. 20. 19; काप्यपेक्षा मुमुक्षूणां न यद्यप्युत्सवादिषु। तथापि मेऽनुरोधेन तातोऽप्येवं करिष्यति TriṣaŚaPuC. ii. 6. 640; **7** following, i.e. basis or dependence 'बोध्यः' शिष्यस्तस्य 'अनुरोधः' तदवबोधनप्रतिज्ञापारतन्त्र्यं तस्मात् प्रतिज्ञादीनि पञ्चापि प्रयोक्तव्यानि PramāMī. 52. 17 (*on* ii. 1. 10); [Inst.] by following, on the basis or dependence कार्यमेव विनाश इति तु केनानुरोधेन व्यवहर्तव्यम् ĀtmaTaVi. 236. 2; **8** persistence, cf. अनुरोधश्रम; **9** respect, cf. अनुरोधाभ्यधिक [Kośas give *anurodha* as a synonym of the following words: *anuvartana*, AmaK. 1492; KośaKaTa. 1. 5891; *anuvṛtti*, AbhidhāCin. 733; ŚabdaRa. (Vā.) 2572; ParaNā. 2345; KośaKaTa. 1. 5891; *prasāda*, Vaija. 243. 55] [reference or bearing of a rule, MW.]

[2]**अनुरोध** (anu-rodha) *m.* obstruction, hindrance सर्वाधिकारी ... बभूव ... सुप्रभवदेवनामा ...। विनानुरोधात् स्वहितेच्छयैव महीपतिर्यस्य वचश्चकार ŚiśuVa (Praśasti) 2 (comm. उपरोधभावमृते)

अनुरोधक (anurodha-ka) *adj.* compliant, complying with, obeying or conforming to, having regard to, caring for, APTE.

अनुरोधगद्गद (anurodha-gadgada) *adj.* stammering with respect or obedience मुनयो मय्यनुरोधगद्गदाः कथयन्ति RāmC. 13. 9.

अनुरोधतन्तु (anurodha-tantu) *m.* thread in the form of regard or respect यश्चानुरोधतन्तुस्तं चिरं लक्ष्म्यां निबद्धवान्। स छिन्नो रागवेगेन लासासौन्दर्यजन्मना RājTa. (Jo.) 478.

अनुरोधतस् (anurodha-tas) *adv.* **1** through conciliation, propitiation or soothing हा प्रिये वासवदत्ते, कामं दुष्करमेतदेव यदहं त्यक्तस्त्वया जीवितस्तत्रमास्त्वनुरोधतः प्रणयिनां को वा स्वतन्त्रो भवेत् TāpaVa. 4. 14; **2** at the insistence or request मुद्रैषा खेचरी प्रोक्ता भक्तानामनुरोधतः ŚivS. 4. 53; वररुचिस्तस्य प्रणतस्यानुरोधतः। सर्वमाजन्मवृत्तान्तम् ... अब्रवीत् KathāSaSāg. i. 2. 29; xii. 4. 15; पारयित्वा ततो ध्यानं रामस्तस्यानुरोधतः। तद्दर्शितपथो भैक्ष्यं सार्थादिभ्योऽग्रहीत्तदा PāṇḍaC. 18. 185; **3** by accepting, i.e. complying तम् .. सा ज्ञात्वा निश्चलनिश्चयम्। एवं जन्मान्तरे भावीत्यभ्यधादनुरोधतः RājTa. (Ka.) 3. 428; **4** in conformity or accordance with अस्तु प्रमाणमामेति राज्ञाप्यूचेऽनुरोधतः PārśvC. 3. 890; सट्टके स्त्रीप्रधानत्वाद्रूपकस्यानुरोधतः। नृपः स्त्रीवत्पठेत् NāṭaLaRaK. 2156; बीजप्रकाशनं यत्र ... भवेत्। तत् स्यात् प्रतिमुखं बिन्दोः प्रयत्नस्यानुरोधतः RasāSu. 220. 15 (3. 39)

अनुरोधन (anu-rodhana) *n.* **1A** means of causing love, means of winning the affection of आञ्जनस्य ...। तुरो भगस्य हस्ताभ्यामनुरोधनमुद्धरे AV. vi. 102. 3 (Sāy. वशीक्रियते अनेन); AV. (P.) xix. 14. 3; **1B** soothing, conciliating or coaxing नारीणामनुरोधने। ... नता कार्या नासिका नाट्ययोक्तृभिः NāṭyaŚā. 8. 133; **2** acceptance, i.e. compliance प्राप्तार्थग्रहणं द्रव्यपरिवर्तोऽनुरोधनम्। उपेक्षा ... अमात्यस्य दूषणम् Hitopa. 2. 93[Kośas give *anurodhana* as the meaning of *prasāda*, TrikāŚe. iii. 3. 208; NānārthāSaṁ. ii. 23. 143]

अनुरोधपुर (anurodhapura) *n.* name of a city सिंहलेन्द्रः ... अनुरोधपुरं धिनोति BālRā. 3. 41.

अनुरोधवती (anurodhavatī) *f.* name of a *surāṅganā*, i.e. celestial lady, Ind. St. 15. 444 [pw.; *nt.*]

अनुरोधविधि (anurodha-vidhi) *m.* act of conciliation or coaxing असौ ... सहधर्मिणीप्रणीतसमधिकानुरोधविधिरतिमहान्तमन्वभूदानन्दम् YātrāPra.2. 85 (5)

अनुरोधविधित्सा (anurodha-vidhitsā) *f.* [Inst.] with an intention to make propitiation or conciliation पाण्डुर्विमृश्यान्तेऽनुरोधविधिवत्सया (? धित्सया) ... प्रैषीत्कुन्तीं कंसान्तकान्तिकम् PāṇḍaC. 17. 195.

अनुरोधविधिवत्सा (anurodhavidhivatsā) [w. r. for अनुरोधविधित्सा] PāṇḍaC. 17. 195.

अनुरोधविरोधविप्रमुक्त (anurodhavirodha-vipramukta) *adj.* free from compliance and aversion (one of the pairs of opposites from which the perfected are freed) विप्रसन्नमनाः। षडङ्गमन्वागतः। अननुरोध (? अनुरोध)विरोधविप्रमुक्तः MahāVyu. 19. 75 [DBHS.]

अनुरोधविरोधविग्रह (anurodhavirodha-vigraha) *adj.* of the form of compliance and aversion परिस्रवाः। अनुरोधविरोधविग्रहाः सततं सुव्रत नैव नैव ते GiMs. iii (1). 11. 12.

अनुरोधविरोधापगत (anurodhavirodhāpagata) *adj.* free from the compliance and aversion (one of the pairs of opposites from which the perfected are freed) अनुन्नतोऽनवनतः। अनुरोधविरोधापगतः ŚikṣāSa. 203. 4 [DBHS.]

अनुरोधशालिता (anurodhaśāli-tā) *f.* the state of being possessed of consideration or regard अतिथे परिगृह्यतामियं समवस्थासदृशी ममार्हणा। महतामनुरोधशालिता विषमस्थे हि जनेऽतिरिच्यते RāmC. 13. 37; धिगुदारतां धिगनुरोधशालितामतिमानुषीम् ... स यदायतेर्जनवदस्ति भाजनम् RāmC. 20.32.

अनुरोधशालिन् (anurodha-śālin) *adj.* possessed of consideration or regard न जातु जानन्त्यनुरोधशालिनो भवादृशा वक्तुमसूनृतं वचः RāmC. 5.57.

अनुरोधश्रम (anurodha-śrama) *m.* exertion due to persistence or continuation दिशतु वः श्रेयोर्द्धनारीश्वरः। यस्यार्द्धे ललिताङ्गहारवलनैरर्द्धे च भीमोद्भटैर्नाट्यारंभरयैर्जयत्यभिनयद्वैधानुरोधश्रमः EI. xiv. 159. 3.

अनुरोधसत्त्व (anurodha-sattva) *n.* possibility of persistence णोपदेशत्वषोपदेशत्वनिर्णयायेव यत्नान्तरापत्तिगौरवापत्तेश्चानुरोधसत्त्वादित्याशङ्कां मनसिकृत्याह VaiyāBhū. 131. 25 (*on* 27)

अनुरोधा (anurodhā) *f.* name of the queen of Candrodara and mother of Virādhita चन्द्रोदरे कालं प्राप्ते कर्मनियोगतः। वनितास्यानुरोधाख्या असूत च सुतम् ... (असौ)विराधिताभिख्यां प्रापितः PadmP. (Ra.) 9. 40. cf. अनुराधा 2A.

अनुरोधाप्रतिरोध (anurodhāpratirodha) *m.* name of a samādhi अनुरोधाप्रतिरोधो नाम समाधिः MahāVyu. 21. 103 [DBHS.]

अनुरोधाभिधान (anurodhābhidhāna) *n.* mention of practice अनध्यायानामनुरोधाभिधानात् स्नातकव्रतकरणेऽध्यापकं प्रति कथितानामनध्याया-नामध्ययनकारिणं ब्रह्मचारिणं प्रत्यन्वयोऽपेक्षितः ManvaVi. 180. 7 (*on* 2. 106)

अनुरोधाभ्यधिक (anurodhābhyadhika) *adj.* surpassing the (level of) respect वयमप्सरसः परश्शताः शतमन्युप्रभृतीनुपास्महे। मरुतः सुकृतात्तुलाधृतादनुरोधाभ्यधिकेन चाटुना RāmC. 13. 5.

अनुरोधार्थम् (anurodhārtham) *adv.* for the sake of performance or practice श्राद्धे दैवकर्मणोऽनुरोधार्थं कुतपे प्रारम्भः ManvaVi. 432. 15 (*on* 3. 256)

अनुरोधावधानयोग्य (anurodhāvadhāna-yogya) *adj.* fit for paying attention to request or solicitation प्रथमप्रेतपिण्डभुजि भुक्ते द्विजन्मनि ... अनुरोधावधानयोग्येषु हृदयेषु ... देवो हर्षः महाजनेन मौलेनाकाले आत्मानं वेष्ट्यमानमद्राक्षीत् HarṣaC. 241. 11.

अनुरोधिता (anu-rodhitā) *adj.* (*f.*) which is followed or adhered to वरं मुख्यार्थानुरोधेन विधानमेव कल्प्यताम्। एवं सति श्रुतिरनुरोधिता भवति TātpaṬ. (Vā.) 630. 18 (*on* iv. 1. 60)

अनुरोधिता (anurodhi-tā) *f.* the state of being one who has acceptance or compliance with उक्तः प्रियया राजा पापभीतोऽपि तत् पुनः। अङ्गीचकार धिगहो कष्टां स्त्रीष्वनुरोधिताम् KathāSaSāg. iii. 6. 197.

अनुरोधिन् (anu-rodhin) *adj.* [*f.* -ī] [P. iii. 2. 142; JaineVyā. 114. 35 (*on* ii. 2. 118); CāndraVṛ. *on* i. 2. 96; Kātan. iv. 4. 22; Kātan Vṛ. *on* iv. 4. 22; DEBRU. 345] **1A** following, i.e. approaching ऋतुस्नातां सतीं भार्यामृतुकालानुरोधिनीम्। अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गतः Rāmā. ii. 1802* (9); **1B** following, i.e. depending upon अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि BrahmSūBh. (Śaṅ.) 315. 16 (*on* ii. 1. 14); **2** observing, practising तदेवमेतं त्वमनुव्रता सती पतिव्रतानां समयानुवर्तिनी (v.l. समयानुरोधिनी) Rāmā. ii. 2377* (2); **3A** having due regard or consideration for षट् सर्वरोगाणां प्रोक्ताः सम्यगुपक्रमाः। साध्यानां साधने सिद्धा मात्राकालानुरोधिनः CaraS. i. 22. 42; **3B** conciliating भवतु भवतीह मयि सततमनुरोधिनी GītGo. x. 19. 3; **4A** conforming to, according to लौकिकानि

वचनानि पुरुषाधीनरचनतया तदभिप्रायानुरोधीनि TattvBi. 137. 4; ततः स पालको भ्रात्रा पश्चादेत्य न्यवर्त्यत। गोपालकेन वाक्यज्ञः पितृकार्यानुरोधिना Kathā SaSāg. ii. 5. 30; **4B** supporting ऐक्यस्य ब्रह्मभेदानङ्गीकारात्, विरोध्यनुरोधिनां सर्वेषां ब्रह्मणि कल्पितत्वेन तज्ज्ञानबाध्यत्वेन व्याप्तीनामसिद्धेः Advai Si. 791. 11; **5** compliant, obliging अनुरोधी नृपः स्त्रीभिराक्रीडी भजते जलम् Rāvaṇā. 11. 25.

अनुरोधिनी (anurodh-inī) *adj.* (*f.*) obstructing, i.e. concealing गिरा सत्यानुरोधिन्या सा तं प्रत्यब्रवीत्पतिम् KathāSaSāg. iii. 3. 141.

अनुरोध्य (anu-rodhya) *adj.* [*f.*-ā] **1** to be practised, i.e. to be administered दोषतारतम्याद्दण्डतारतम्यमनुरोध्यम् DaṇḍaVi. 82. 20; **2** to be fulfilled, to be gratified स्वतन्त्रा पुरुषकामनानुरोध्येति स्वतः प्रवृत्तां पुरुषकामनामेव खल्वनुवदन्त्यधिकारवाक्यस्थाः कमिश्चतयः Śivārka MaDī. ii. 417. 8 (*on* iii. 4. 50); **3** to be accepted or admitted यद्युपांशुत्वस्य निरवकाशत्वं स्यात्तदा ... दुर्बलमप्युपांशुत्वमनुरोध्यं स्यात् MayūMāli. 115. 16 (*on* ii. 1. 13); **4** to be conformed to or accorded to तत एव प्रकरणमपि नानुरोध्यम् MayūMāli. 260. 8 (*on* iii. 4. 1); 576. 6 (*on* ix. 1. 2); **5** to be considered, cf. **अनुरोध्यत्व 2**; **6A** to be adhered to, cf. **अनुरोध्यत्व 4A**; **6B** to be followed, cf. **अनुरोध्यत्व 4B**.

अनुरोध्यत्व (anurodhya-tva) *n.* **1** the state of being what is to be practised or observed व्यवस्थिते प्रायश्चित्ते यत्र विशेषवचनं नास्ति तत्र दण्डोऽप्येवमेव द्रष्टव्यः। ... उभयत्र व्यवधानाव्यवधानयोरनुरोध्यत्वात् DaṇḍaVi. 77. 8; **2** the state of being what is to be considered or regarded न चेदं युक्तमेकत्रविधावपरविध्यविरोधस्यानुरोध्यत्वात् विधिनिषेधयोर्वैधयोरेकतरेण स्पृष्टेऽन्यतरानवकाशात् DaṇḍaVi. 241. 21; **3** the state of being what is to be accepted or admitted न च ब्रह्मशब्दस्वारस्यानुरोधादिदंशब्दस्य प्रसिद्धार्थपरत्वं हातव्यम्। प्रथमचरमश्रुतयोः प्रथमश्रुतस्यैवानुरोध्यत्वात् Śivārka MaDī. i. 87. 18 (*on* i. 1. 1); लोलुवादौ यङ्लुकः साधुत्वप्रतिपत्त्यर्थं शिष्टप्रयोगस्यावश्यमनुरोध्यत्वेन शिष्टप्रयोगदर्शनसापेक्षया अङ्गवृत्तपरिभाषया लोलुवादेरन्यथासिद्धिर्वक्तुमुचिता PāṇiTaVāNaMā. 67. 21; (काव्यम्) काव्यत्वाभावेन महाकविभिः ... काव्येषु निबद्धमपि नास्माभिर्गणितं वस्तुस्थितेरेवानुरोध्यत्वात् RasGaṅ. 24. 2; **4A** the state of being what is to be adhered to or resorted to न च न्यायविरोधमुपन्यस्य स्मृतिवचनं कथमुपेक्ष्यत इति वाच्यम्। ... परस्परपराहतेषु, तेषु (स्मृतिवचनेषु) न्यायस्यानुरोध्यत्वात् ŚivārkaMaDī. i. 261. 30 (*on* i. 1. 22); **4B** the state of being what is to be followed, i.e. depended upon वैशब्दमात्रस्य स्वारस्यभङ्गोऽस्तु परमेश्वरविषयाणामुपक्रमोपसंहारपरामर्शानामनुरोध्यत्वात् ŚivārkaMaDī. i. 547. 12 (*on* i. 4. 19)

अनुरोध्यत्वापत्ति (anurodhyatvāpatti) *f.* undesired contingency of the state of being what is to be considered प्रपञ्चसत्यत्वादिवादिभिस्तदसत्यत्वाभ्युपगमे दोषाणामप्युच्यमानत्वेन तेषामप्यनुरोध्यत्वापत्त्या अनेकान्तवादिनः तत्तद्वाद्युक्तदोषभाक्त्वस्यापि प्रसङ्गात् ŚivārkaMaDī. ii. 102. 28 (*on* ii. 2. 31)

अनुरोह (anu-rohá) *m.* **1** act of increasing or growing afterwards, act of mounting after प्ररो॒होऽस्यनुरो॒होऽसि TaiS. IV. iv. 1. 3; अनू (v. l. नु)-रोहेणानू(v. l. नु)रोहांवानूरोहम् MaiS. ii. 8. 8 (ii. 113. 2); KāthS. 17. 7 (i. 250. 14) (v. l. नु); अनुरोहोऽस्यनुरोहाय त्वा सवितृप्रसूता बृहस्पतये स्तुत PañcBr. i. 10. 10; GopBr. ii. 2. 14 (179. 15); अनुरोहोऽस्यनुरोहाय त्वानुरोहं जिन्व इति VaitāSū. 26. 11; **2** (anuroha) name of an animal (recommended for partaking as food) उपवासस्तथा कार्यः सूनामांसाशने भवेत्। अजाविकानुरोहांश्च पृषतान्महिषांस्तथा। ... भक्षयेत् ViṣṇuDhaP. ii. 73. 45 [mounting or growing up to, MW.]

अनुरोहण (anu-rohaṇa) *n.* [enumerated in the *utthāpanādi gaṇa*, GaṇRa. 6. 366 (397)] act of increasing or growing afterwards उत्थापनादिभ्यश्छः। उत्थापनादिभ्यस्तदस्य प्रयोजनमित्यस्मिन् विषये छो भवति। उत्थापनीयम् । ... उत्थापन। ... अनुरोहण CāndraVṛ. *on* iv. 1. 132.

अनुरोहणीय (anu-rohaṇīya) *adj.* [Vār. 1 *on* P. v. 1. 111; CāndraVyā. iv. 1. 132; SaraKaṇṭhā. (Gr.) v. 1. 121; Debru. 209] serving the purpose of ascending or mounting after (छः) उदुपाभ्यां परात् स्थापेरनोः ... रुहेः ... प्रयोजनमस्य। ... अनुरोहणीयम् GaṇRa. 6. 366 (397)

अनुरोहत् (anurohat) *m.* name of a man, pw.

अनुर्याजाह्व (anuryājāhva) w. r. [for अनुयाजाह्व, Viśva.] AV. (P.) xvi. 52. 3.

अनुर्वीकुर्वाण (anurvī-kurvāṇa) *adj.* making (wide into) non-wide, i.e. narrowing अनूपान् जङ्गलीकुर्वन् जङ्गलानप्यनूपयन्। उर्वीमनुर्वीकुर्वाणः ...। व्यक्तशक्तिर्जरासंधः PāṇḍaC. 12. 321.

अनुर्ह्राद (anurhrāda) *m.* name of a *yakṣa* (father of Guhyakā) यक्षो राजतनाभाख्यः ...। अनुर्ह्रादसुता भार्या तस्यासीद्रूप गुह्यका ViṣṇuDhaP. i. 197. 10.

अनुलक्ष् (anu-lakṣ-) x. a. **1** to observe subseqently स निर्जितानुपाश्रीषीत्पाण्डवाननुलक्षये MahāBhā. iii. 39*(6); **2** to characterise, cf. **अनुलक्षित**; **3** to know, cf. **अनुलक्ष्य 2**; **4** to aim at, cf. **अनुलक्ष्य 1**.

अनुलक्षण (anu-lakṣaṇa) *n.* secondary characteristics जात्यादीनाम् ... तेषामपि चत्वार्यनुलक्षणानि भवन्ति AbhidhKoBh. 76. 11(*on* 2. 46); सन्ति चोत्पादादीनामुत्पादादयो न चानवस्थाप्रसङ्गो लक्षणानुलक्षणानां परस्परनिष्पादकत्वात् PrasaPa. 148. 2.

अनुलक्षित (anu-lakṣita) *adj.* characterised by, i.e. possessing पाणी (v. l. पाणी) पृषत्का लिखिता ममेमे धनुश्च संख्ये विततं सबाणम् (v. l धनुःशराभ्यामनुलक्षिताविमौ) MahāBhā. viii. 49. 95.

अनुलक्षीकृ (anulakṣī-kṛ-) viii. u. to aim at, to refer to, cf. **अनुलक्षीकृत्य**.

अनुलक्षीकृत्य (anulakṣīkṛt-ya) *ger.* having aimed at, having referred to शिष्यमनुलक्षीकृत्य ब्रूते अध्यापयतीत्यर्थः ViraMi. (Paribhāṣā.) 89. 2.

अनुलक्ष्मणम् (anulakṣmaṇam) *adv.* [P. ii. 1. 6] following or after Lakṣmaṇa दशमुखस्वरंस्तमभिवीक्ष्य रामं रुषा व्रजन्तमनुलक्ष्मणं जनकजां जहाराश्रमे KalkiP. iii. 3. 36.

अनुलक्ष्य (anu- lakṣya) *adj.* **1** which conforms to the purpose or aim, what is to be aimed at अनुलक्ष्याख्यानं स्यात् ...। लक्ष्यमनुगतम् अनुलक्ष्यम् GaṇRa. 4. 308 (348) [*but ind.* participle, conforming to, MW.]; **2** to be perceived or known अस्याः किल मध्यमागः। अणुः परं योगिदृशानुलक्ष्यः PadyaVe. 209.

अनुलक्ष्य (anu-lakṣya) *n.* visible mark (of boundary) (मर्यादायाः प्रभेदे तु ... दण्डा अधमोत्तममध्यमाः) तुशब्देनानु-लक्ष्यभेदनव्यवच्छेदः ViraMi. 636. 9 (*on* 2. 155)

अनुलक्ष्याख्यान (anulakṣyākhyāna) *n.* narration which conforms to the purpose or aim अनुलक्ष्याख्यानं स्यात् ...। लक्ष्यामनुगतम् अनुलक्ष्यम् GaṇRa. 4. 308 (347)

अनुलग्न (anu-lagna) *adj.* **1** attached to, connected with मुखात्तस्य निरगात्पावकध्वजः। अनुलग्नश्च तस्याग्निरुञ्ज्गान(?म) निरन्तरम् PadmP. (Ra.) 41. 85; **2** followed, i.e. coming after तन्मार्गतोऽनुलग्नं हि क्षौद्रकं युगलं परम्। ... दृष्टं नरैः Bṛ KathāK. 73. 252 [intent on, pursuing after, MW.; Apte]

अनुलग्न (anu-lagna-) *denom.* to cling on behind तेषं पश्चानां वाणिजकशतानां यो वा तस्य हयराजस्य ... महाकारपृष्ठिस्मिन्तस्य अनुलग्निष्यति MaVastuAva. iii. 73. 4[DBHS.]

अनुलग्नय (anu-lagnaya-) *denom.* to cling on behind तेषां पञ्चानां वाणिजकशतानाम् ... तेषां पि च पुरुषाणां परस्परस्य अवलम्बिष्यति (v.l. अनुलग्नयिष्यन्ति) MaVastuAva. iii. 73. 3.

अनुलग्नसितोपलांशु (anulagnasitopalāṁśu) *m.* ray of adjacent or attached white rock परमशितिशिलीवरश्मिभिन्नं क्वचिदनुलग्नसितोपलांशुयुक्तम्। जलमिह सितदन्ति भाति बाढं हरिहरयोरिव संगतं शरीरम् PadmP. (Ra.) 42. 65.

अनुलङ्घ् (anu-laṅgh-) i. a. to cross over, i.e. to transgress कम्पते न तरोः पत्रम् ...। शासनेन विना यस्य तं कालं कोऽनुलङ्घते ParamāKā. 45. 41.

अनुलप् (anu-lap-) i. p. **1** to talk to, to converse with जटायुरिव लक्ष्यते। तदेनमनुपलप्यामि (v. l. अनुलपामि) तावत् AnargharaRā. 5. 5 (33); **2 A** to repeat after, i.e. to imitate (in talking), cf. **अनुलपन A**; **2B** to sing or produce (music) in accordance with, cf. **अनुलपन B** ; **2C** to utter repeatedly, cf. **अनुलप्य**.

अनुलपन (anu-lapana) *n.* **A** act of repeating after, i.e. imitation (in talking) पण्याङ्गनाजनस्य कलगलोल्लसल्लोहलोल्लपितानुलपनपरसारिकाशावसंकुलकुलायकरलोपकण्ठजरठितभिनवाङ्गनारतिचेतसि (रमन्ते कामिन्यः) Yaśas Cam. i. 102. 3; **B** act of singing or producing (music) in accordance with, i.e. in harmony with (जातिसाधारणमेकांशानामविशेषाज्ञातीनाम्) एकोंऽशो यासां जातीनां तासां यो विशेषहीनः प्रयोगः वाद्यंशानुलपनलक्षणान्तरमार्गरूपस्तुल्यः AbhinBhā. iv. 33. 2 (*on* 28. 34)

अनुलप्य (anulap-ya) *ger.* having uttered after, having repeated after स्नात्वा च ललितातीर्थे ...। लभेत्सर्वत्र लालित्यं यद्वा तद्वानुलप्य च SkandP. iv. 70. 21.

अनुलब्ध (anu-labdha) *adj.* **A** understood, apprehended (ब्रह्मचारी) स यथा श्रेयस उपद्रष्टैवं हि शश्वदीश्वरोऽनुलब्धः पराभवितोः Jaimi UBr. i. 54.

3; यस्य ब्राह्मणस्य अनुवित्तः अनुलब्धः ... आत्मा... सः ... विश्वस्य कर्ता BṛĀraUBh. 633. 12 (*on* iv. 4. 13); **B** obtained or reached subsequently ततो बभौ भास्करबिम्बतुल्यं कुबेरयानं तपसानुलब्धम् AdhyāRā. vi. 13 . 60.

अनुलब्धवत् (anulabdha-va(n)t) *adj.* who has obtained or reached subsequently ऋषिषु प्रविष्टां तां वाचमन्वविन्दन् अनुलब्धवन्तः Vedānt Ka. 182. 16 (*on* i. 3. 33)

अनुलब्धि (anu-labdhi) *f.* obtainment or securing subsequently (अनुवन्ध्या) मैत्रावरुणी भवति मित्रस्यैवानुलब्ध्यै KauṣīBr. 18. 11 (83. 2)

अनुलभ् (anu-labh-) I. Ā. **1A** to grasp or to take hold of (from behind) तथा न कुर्याद्यथा पुराश्चं धावन्तमनुलिप्सेत तं नानुलभेतैवं ह स यज्ञं नानुलभते Śat Br. III. ii. 1. 36; Śat Br. (K.) IV. ii. 1. 26; **1B** to catch, to get, to collect यदि कलशो दीर्येतानुलिप्सध्वमिति ब्रूयात्स यद्यनुलभेरन् ... यथाप्रभावं प्रचरेयुः ŚatBr. IV. v. 10. 7; यदनुलभेरंस्तदेकधनैरभ्युन्नीय प्रभावयन्तः प्रचरेयुः KātyŚS. xxv. 12. 24; **2** to know आत्मनि लब्धे सर्वमनुलभते Bṛ ĀraUBh. 115. 19 (*on* i. 4. 7); **3** to obtain, to reach सोऽपि क्षमापस्त्रिनेत्रः स्वकुलकुलगिरिं योऽनुलेभे तपोभिः Ragh Pāṇ. (Ka.) 1. 25 (comm. प्राप); **4** to gain, cf. अनुलाभ .

अनुलम्ब् (anu-lamb-) I. U. **1** to hang about यज्ञस्य वै सृष्टस्योल्बमन्वलम्बत तद्वांसः MaiS. iii. 6. 7 (iii. 68. 7); (*caus.*) to cause to hang about (ध्वजस्य) नानाकुसुमचित्रां च स्रजं तस्यानुलम्बयेत् BhaviP. 206 B. 3 (i. 138. 66); **2** to cling to, to resort to पदार्थाः यद्यपि प्रत्येकं न क्रममनुलम्बन्ति परस्परं मिलितास्तु संयोगादिवद्वितितरूपं क्रमं बिभ्रति ŚāstrDī. 406. 2 (*on* v. 1. 1); **3** to depend upon, cf. अनुलम्ब.

अनुलम्ब (anu-lamba) *adj.* [*f.* -ā] **i** dependent, i.e. concerned. वरासी नेष्टुरनुलम्बेव ह्येषा होत्रा PañcBr. xviii. 9. 16; **ii** dependent, i.e. subordinate चैत्ररथीनामेकः क्षत्रपतिर्जायतेऽनुलम्ब इव द्वितीयः PañcBr. xx. 12. 5.

अनुलम्भ (anulambha) *m.* name of a type of *lambhaka* (wherein same *udgrāha* is sung with different *dhruvas* each time) उद्ग्राहसमन्वितः। ध्रुवको गीयते यत्र स लम्भपदमुच्यते। ध्रुवभेदेऽनुलम्भोऽसौ SaṁgīRa. ii. 265. 5 (4. 173)

अनुलसती (anu-lasatī) *adj.* (*f.*) (irr.) shining or appearing alike (शाहमहीपतेः भार्या) नाम्नान्यत्र कनिष्ठतानुलसती निष्ठा कनिष्ठा ParamāKā. 3. 20.

अनुलसन्नाद (anulasan-nāda) *adj.* which has reverberating sound तदनु हसन्नादाय त्वरितो गाण्डीवमतुलसन्नादाय (?अनुलसन्नादाय) सोऽनलभा वरविशिखानमुञ्चदस्मै (वराहाय) YudhiVi. 4. 56.

अनुला (anulā) *f.* name of a female Arhat or Buddhist saint, also of a queen of Ceylon, MW.

अनुलाप (anu-lāpa) *m.* **i** one of the twelve types of oral representation *vācikābhinaya* काव्यवस्तुषु निर्दिष्टो द्वादशाभिनयात्मकः (वाचिकः)। .... अनुलापोऽथ संलापस्त्वपलापस्तथैव च NāṭyaŚā. 22. 52; Bhāv Pra. (Śā.) 10. 21(1); बहुशोऽभिहितं वाक्यमनुलापः NāṭyaŚā. 22. 55; BhāvPra. (Śā.) 11. 3(1); वागारम्भो द्वादश एव। ... अनुलापोऽसकृद्वचः AgniP. 338. 52; अनुलापो मुहुर्भाषा Agni P. 359. 64; अनुलापापलापौ च ...। एवं द्वादशधा प्रोक्ता वागारम्भा विचक्षणैः RasāSu. 60. 13 (1. 220); अनुलापो मुहुर्वचः RasāSu. 62. 4 (1. 223); UjjvaNīMa. 324. 7; **ii** one of the seven types of repetition (*vacanavikalpa*) अनुलापो मुहुर्भाषा JñātāDhaṬ. 57A. 3; सप्तविधो वचनस्य विकल्पः ... अनुलाप इति पाठस्तत्र अनुलापः पौनःपुन्यभाषणम् SthānṬ. 408B. 1; **iii** one of the ten types of cleverness in speech (*uktivaicitrya*) causing *unmāda* उक्तिवैचित्र्यतोऽपि च।... उन्मादो बहुधा मतः। तत्र प्रलाप आलापः ...। अनुलापः ... वैचित्र्यं दशधा गिराम् AlaṅkāKau. (Ka.) 225. 18; AmaK. 342; AbhidhāRaMā. 1. 150; Vaija. 32. 22; AbhidhāCin. 274; ParyāŚaRa. 56; ŚabdaRa. (Vā.) 1855; KośaKaTa. 1. 1528; KalpaK. 448. 87.

अनुलापार्थ (anulāpārtha) [w.r. for **अनुलेपार्थ**], ViṣṇuDhaP. iii. 26. 48.

अनुलापिन् (anu-lāpin) *adj.* uttering again and again, repeating after मान्त्रिका मान्त्रिका वैद्या वैद्या इत्यनुलापिनम्। चाणक्यश्चन्द्रगुप्तं द्राक्कर्णे भूत्वैवमन्वशात् PariPar. 8. 334.

अनुलाभ (anu-lābha) *m.* ultimate profit or gain वीर्यं परं शुक्लगणस्य मध्ये तन्निश्रितस्तस्य यतोऽनुलाभः। वीर्येण सद्यः सुसुखो विहारो लोकोत्तरा लोकगता च सिद्धिः MaYānaSū. 114. 4(16. 65)

अनुलालित (anu-lālita) *adj.* fondly coaxed दशरथनृपसूनुसत्तमाभ्याम् ...। कुशिकसुतवचोऽनुलालिताभ्यां सुखमिव सा विबभौ विभावरी च Rāmā. i. 631* (3) [entertained, Apte]

अनुलाषुक (anu-lāṣuka) *adj.* [P. iii. 2. 154] obliging or favouring, i.e. fulfilling the desire (लोलेन्द्रियैर्लोकमनोऽनुकूलैः स्वाजीवनावागम एष मृग्यः) लोकमनोऽनुकूलैर्यथालोकचित्तमनुलाषुकैः comm. *on* YaśasCam. ii. 130. 7 [*nt.*]

अनुलास (anu-lāsa) *m.* corner, enclosure वास्तुच्छिद्रानुलासेषु श्रेणिप्रवहणिकनिकाया आवसेयुः ArthŚā. i. 129. 4 (2. 4) (comm. वास्तुच्छिद्रावकाशेषु) [peacock, MW.; Apte]

अनुलासक (anulāsa-ka) *adj.* (used as noun) peacock (*lit.* dancing) मयूरः ... भुजङ्गभोजी च मेघनादानुलासकः RājNi. 277. 1 [*but m.*, pw.]

अनुलासिन् (anulās-in) *adj.* [*f.* -ī] (used as noun) **i** peacock (*lit.* dancing) मयूरो बर्हिणो बर्ही ... मेघनादानुलास्यपि AmaK. 1048; Vaija. 29. 38; ŚabdaRa. (Vā.) 1577; **ii** peahen (*lit.* dancing) वन्दे ...। मेदिनीं हरिदोस्तम्ब(Read स्तम्भ)मेघनादानुलासिनीम् EI. viii. 309. 14.

अनुलास्य (anu-lāsya) *m.* peacock, MW.

अनुलिख् (anu-likh-) VI. P. to scratch over (with the wooden sword) वरुणप्रघासेषु वेदी क्रियमाणेऽग्रेणाहवनीयादधि स्फ्येनानुलिखेदा दक्षिणस्याः MānŚS. 140. 16.

अनुलिखत् (anu-likhat) *adj.* scratching over चैत्यस्तूपस्य सोपानपङ्क्यः...। गगनतलमनुलिखन्तः शोभन्ते दधिमुखा रम्याः SthānṬ. 233A. 13.

अनुलिङ्गिन् (anu-liṅgin) *adj.* according to one's characteristic marks उत्तरासङ्गिनं कुर्याद् यथावेषानुलिङ्गिनम्। दक्षिणे भगवतस्याधः महोदधितलादि Āryamañjuśrīmūlakalpa 133. 7 [DBHS.]

अनुलेप्स्यमान (anu-lepsyamāna) *adj.* who is going to be anointed or smeared with दिव्यो यो मानुषो गन्धश्च स माविशतादिहेति समुन्नीय चन्दनेनानुलेप्स्यमान एवं प्रोक्षत्येवमनुलिम्पेत् BhārGS. 2. 20 (52. 15)

अनुलोक् (anu-lok-) I. Ā. to see, to notice यदा देवं नानुलोके (अहं शुक्रः) मनागपि वरान्मुखम्। तदान्यं नियमं घोरं जग्राह ŚivaP. ii (5). 50. 14 (281A. 15)

अनुलोकम् (anulokam) *adv.* as shown (by the *mantra*), i. e. in the light (of the *mantra*) मन्त्रानुदिशं चैनां प्रोक्षेन्मन्त्रानुलोकं चेति BaudhŚS. iii. 58. 7; iii. 131. 10 [VIŚVA.] cf. **मन्त्रानुलोकम्.**

अनुलोम (anu-lomá, ánu-loma, ŚatBr.) *adj.* [*f.*-ā] [P. v. 4. 75; vi. 1. 163; AltGr. II. 1. 115; 308] **1A** being in the natural ditection, i. e. directed downwards (*lit.* according to the direction of hair) **B** being in the proper, i.e. prescribed direction **C** being, i.e. rising upwards **D** being, i. e. employed in the reverse direction **E** direct, straight **2Ai** being, i.e. blowing in the same direction, i. e. favourable **ii** conducive **B** asupicious, propitious **C** obedient or lenient **3Ai** occurring in the normal or successive order **ii** being in the prescribed order **B** being in the natural course **C** being in the regular order **D** following the proper course (of behaviour) **E** being in the progressive order **F** being in the desecending order **4A** proportionate **B** similar, conforming to **5** (woman) who is of inferior or lower caste than that of a man with whom she is connected, mixed caste **1A** being in the natural direction, i.e. ditected downwards (*lit.* according to the direction of hair) चक्षुश्च श्रोत्रं च मनश्च वाक्च प्राणापानौ देह इदं शरीरम्। द्वौ प्रत्यंञ्चावनुलोमौ विसर्गावेतं तं मन्ये दशयन्त्रमुत्सम् ṚV. (Khila.) ii. 12. 1; (जायाम्) त्रिरेनामनुलोमामनुमार्ष्टि ŚatBr. XIV. ix. 4. 20; BṛĀraU. vi. 4. 21; अथ शोधनयोः सम्यग्विधिमूर्ध्वानुलोमयोः। असम्यक्कृतयोश्चैव दोषान् वक्ष्यामि सौषधान् CaraS. viii. 6. 3 (1941 Ed.) (comm. ऊर्ध्वानुलोमयोरिति वमनविरेचनयोः); अनुलोमे हि वायौ सुखं प्रसूयते SuśruS. iii. 10. 4; AṣṭāSaṁ. i. 208. 17 (2. 3); रूक्षस्या(ध्य)शनेनोत्प(त्पी)ति(डिता) वातपित्तश्लेष्माणि(ण) ऊर्ध्वमधो वा नानुलोमा भवन्ति BhelaS. 83. 22 (4 .4); अनुलोमो भवति तेनास्य वायुः Hastyāyur. 71. 20 (1. 9); 83. 15 (1. 12); **1B** being in the proper, i.e. prescribed direction पात्राणि चिनोति सर्वाण्यनुलोमानि ध्रुवावर्जम् BhārPiMe. i. 5. 17; HirPiMe. xxviii. 1. 5 (comm. उदगग्राणि); अनुलोमा भवेद् योनिः पार्श्वभेदो न विद्यते। आनुलोम्येन मथितः (वह्निः) सर्वान् कामान् प्रयच्छति AVPari. 22 (6). 1; सदा वश्यश्च नो द्रुमः। अनुलोमस्तथा स्तब्धस्तेन नाभ्येति वेतसः MahāBhā. xii. 114. 10; **1C** being, i.e. rising upwards हूयमानो हुताशनः। ... विधूमः कुण्डली यः स्याद् अनुलोमश्च सिद्धये AVPari. 24 (4). 4; हुताशनः। अनुलोमः सुगन्धश्च ... स्फुलिङ्गरहितो हितः AgniP. 218. 11; **1D** being, i.e. employed in the reverse direction (as of the pierced) सर्वशल्यानां तु महतामणूनां वा द्वावेवाहरणहेतू भवतः प्रतिलोमोऽनुलोमश्च SuśruS. i. 27. 6; AṣṭāSaṁ. i. 182. 1 (1. 37); **1E** direct, straight भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः SūrySi. 7. 4; ताराग्रहयोः समलिप्तीकरणायाह ग्रहयोरन्तरं भाज्यं प्रतिलोमानुलोमयोः MahBhāsk. 6. 49; वल्मीकस्थाणुगुल्मक्षुपतरुमथनः स्वेच्छया हृष्टदृष्टिर्यायाद् यत्रानुलोमस्त्वरितपदगतिर्वक्त्रमुन्नाम्य चोच्चैः MātaLī. 9. 10; **2Ai** being, i.e. blowing in the same direction, i.e. favourable वातास्ते वान्तु पथि पुण्यगन्धाः ... अनुलोमा BaudhPiMe. iii 2. 3; GautPiMe. i. 2. 41; ĀgniveGS. iii. 4. 2 (136. 20); प्रतिलोमेषु वातेषु ईतिबाहुल्यमादिशेत्। अनुलोमेषु वातेषु निरीतिं तु समादिशेत् AVPari. 59 (1). 9; यशो रक्षत भद्रं वो जेष्यामो वै वयं पुरम्। अनुलोमाश्च नो वाताः सर्वतो मृगपक्षिणः MahāBhā. i. App. I. 103 (94); तस्य वाक्यस्य निधने प्रादुरासीच्छिवोऽनिलः। अनुलोमः सुगन्धी च पृषतेश्च समन्वितः MahāBhā. vi. 114. 36; अनुलोमः सुखो वायुरनुसारयतीव माम् Rāmā. iii. 1357* (4); भूयाद् गन्धवहैः सार्धमनुलोमोऽर्कनन्दनः YaśasCam. i. 334. 1; अनुलोमा तडिच्छस्ता शक्रचापं तथैव च ViṣṇuDhaP. ii. 163. 29; (वराहसंहितायाम्) द्विरुदितमनुलोमं च प्रशस्तमम्भः प्रयच्छति च। (इन्द्रधनुः) अनुलोममिति यात्रासमये बोद्धव्यम् AdbhuSāg. 298. 3; **2Aii** conducive प्रतिलोमानुलोमं वा यद्धा नो मन्यसे हितम् Rāmā. vi. 45. 11; कृञो हेतुशीलानुलोमेषु CāndraVyā. i. 2. 7 (Vṛ. अनुलोमोऽनुकूलः); अनन्तवीर्यपर्यायस्तस्यानारतसेवने। सर्वा क्रियानुलोमा स्यात्फलाय हितकामिनाम् YaśasCam. ii. 359. 25; विवादाध्यक्षान् सामनीत्यानुलोमान् कृत्वा SthānṬ. 365B. 5; सोऽनुसामोऽनुलोमः स्वान्नृपानूचे चमूपतिः DvyāśraKā. 19. 105; **2B** auspicious, propitious शुक्रसूर्यौ च युक्तौ कौन्तेयानामनुलोमौ जयाय MahāBhā. i. 1. 129; गोमायवश्चानुलोमा वडा गृध्राश्च सर्वशः। आचरेयुर्यदा सेनां तदा सिद्धिरनुत्तमा MahāBhā. xii. 103. 7; **2C** obedient or lenient, कच्चित्पुत्राः स्थविरस्यानुलोमाः MahāBhā. ii. 52. 5; एतावन्त्येव दासानां सहस्राणि ...। प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा MahāBhā. ii. 54. 16; **3Ai** occurring in normal or successive order त्र्यहः प्रतिलोमोऽनुलोमश्चानिरुक्तमहरावृत्तः ĀśvaŚS. II. v. 3. 8; अनुलोमाः षडहाः स्युः षडहा वावर्तेरन्ननुलोमान्यहानि ĀśvaŚS. II. v. 7. 19; गो आयुषी ईदृशी स्तोमे। अनुलोमे षण्मासान्। प्रतिलोमे षट् ĀśvaŚS. II. vi. 5. 3; पार्ष्ठिकानि त्रीण्युत्तराणि प्रतिलोमानुलोमानि KātyŚS. xxiv. 2. 17; (सामतन्त्रम्) प्रतिलोममग्निष्टोमेषु अनुलोममुक्थ्येषु NidāSū. 97. 28 (6. 2); पृष्ठ्याभिप्लवाननुलोमान् मासावर्तकारिणः LāṭyāŚS. iv. 7. 6; DrāhyŚS. viii. 3. 25; एकाङ्गुल्या पृथक् पर्वभिः सर्वान् देशाऽश्मसा मिताः स्युस्तैरनुलोमैरिति शौचिवृक्षिः LāṭyāŚS. viii. 9. 10; DrāhyŚS. xxiv. 1. 11; बोधिपक्षसंगृहीता हि प्रज्ञा ...। सा ...। द्वयं पुनर्धर्मतत्वं (त्त्वं?) च दुःखादिसत्यं। तदज्ञानादिका च वृत्तिरनुलोमः (? प्रतिलोमः) प्रतीत्यसमुत्पादः MaYānaSū. 179. 10 (20-21. 21); (प्रयोगाः) अनुलोमा दश JayaMa. 105. 20 (*on* 2. 3); **3Aii** being in the prescribed order श्रुतिमन्त्रपाठक्रमानुसारेण ज्योतिष्टोमोऽनुविधेयः। ... उत्तरे निगमा यथेष्टं जोषणाश्रुतेः। ... अनुलोमा वा चोदनागुणत्वात् KātyŚS. v. 12. 17; **3B** being in the natural course प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः शोभन्ते मृगमाश्रित्य Rāmā. iii. 41. 25; iii. 789* (29); **3C** being in the regular order (from beginning to the end) अनुलोमां विलोमां वा गायत्रीं यः पठेत् सदा। सर्वार्थास्तस्य सिध्यन्ति न चानर्थान् समश्नुते AVPari. 34. 7; एष स्य स च स्वराश्च पूर्वे भवन्ति व्यञ्जनमुत्तरं यदेभ्यः। तेऽन्यक्षरसंधयोऽनुलोमाः ṚPrāti. 2. 3; (मन्त्रम्) प्रकृतं चानुलोमंच ... शृणु KāliViT. 22. 20; विद्याम् ...। अदृश्यः स्यात्परस्यैतामनुलोमां पठन्नरः। प्रतिलोमां पठन्कुर्यादिष्टरूपप्रकाशनम् KathāSaSāg. xii. 7. 134; यत्र लिप्यक्षराणि निमित्तीभवन्ति तथाविधमन्यदपि प्रतिलोमानुलोमापशब्दाभासादि यदाश्चर्यकारितया चित्रं तद्वित्रम् AlaṅkāRa. 6 (2); मातृकाम् ... विलोमामनुलोमाम् ... समालिखेत् ParaśuKS. 17. 1 (317. 12); 10. 29 (263. 7); TantrRā. 19. 40; मातृकाक्षरैः। विलोमैरनुलोमैश्च ...। चतुरस्रत्रये बाह्ये यन्त्रस्याग्रे समालिखेत् TantrRā. 18. 63; **3D** following the proper course (of behaviour) ब्राह्मणानाम् ... संख्यातोपश्रुतिः पुरा। राजधर्मेष्वनुपमा (v. l. अनुलोमा राजधर्मे) लोक्या सुचरितैरिह MahāBhā. xii. 64. 6;

3E being in the progressive order सा च शक्तिरचेतनाया ... तत्र महदादिमहाभूतपर्यन्तोऽस्या बहिर्मुखतयानुलोमः परिणामः RājMār. 78. 3; 3F being in the descending order, cf. **अनुलोमक्रम; 4A** proportionate (दिनादिफलम्)अनुलोममैन्दवं मासादिनावशेषलब्धियुतौ BrāhmSphuSi. 13. 24; देशान्तरमनुलोमं भुजान्तरं चार्कफलमसवः BrāhmSphuSi. 13. 25; **4B** similar, conforming to धीरस्तं कल्पयेत् सम्यगनुलोमार्जवं तरुम् SamarāSū. 16. 41; **5** (woman) who is of inferior or lower caste than that of a man with whom she is connected, mixed caste, who is in regular gradation हीनां त्वनुलोमां स्त्रियं गां च गच्छतो मध्यमः दण्डः BālaKrī. i. 295. 1. (*on* 2. 29); अनुलोमाः स्त्रियः, प्रतिलोमाः पुमांसः, तयोः संभवे श्वपाकवेणौ प्रतिलोमजातीयौ ManuBh. ii. 337. 4 (*on* 10. 19) [mixed as a tribe, Apte] [Kośas give *anuloma* as the syononym of following words: *anukūla*, ParyāRaMā. 1033; ŚabdaRa. (Vā.) 3363; KośaKaTa. 2. 525; *anūcīna*, Vaija. 211. 127; ŚabdaRa. (Vā.) 3363]

अनुलोम (anu-loma) *m.* **1** one born of a mother inferior in caste to the father, mixed or lower caste [Inst.] on account of mixed caste **2Ai** name of a son of Siṁhikā **ii** name of a man or tribe, (pl.) optional patronymic term for descendants of a man named Anuloma **B** type of a *mūlamantra* **C** regular gradation **3Ai** proper direction **ii** proper i.e. prescribed direction **iii** downward direction **iv** upward direction **v** normal, natural or regular direction **3Bi** regular order **ii** normal or successive order **iii** progressive order **iv** descending order **4** favourable means **1** one born of a mother inferior in caste to the father, mixed or lower caste अनुलोमानन्तरैकान्तरद्व्यन्तरासु ज्ञा (जा?) ताः सवर्णाम्बष्ठोग्रनिषाददौष्मन्तपारशवाः GautDS. i. 4. 14; BaudhDS. i. 9. 9; शूद्रानुलोमैः स्पृष्टं तेषामन्नं च वर्जयेत् VaikhāDS. ii. 15. 7; ब्राह्मणात् क्षत्रियकन्यायां जातः सवर्णोऽनुलोमेषु मुख्यः VaikhāDS. iii. 12. 4; ततोऽनुलोमादनुलोमायां जातश्चानुलोमः पितुर्मातुर्वा जातिं वृत्तिं भजेत् VaikhāDS. iii. 13.7; ब्राह्मणः क्षत्रियश्चैव ... । प्रतिलोमानुलोमश्च भवत्यथ शतक्रतुः MahāBhā. xiii. 40. 32; सवर्णासु चैषामचरितव्रतेभ्यो जाता व्रात्याः। इत्यनुलोमाः ArthŚā. ii. 42. 7 (3 .7); संसाधनीयं श्राद्धार्थं स्वजातीयेन वै चरुः। अनुलोमेन विहितम् ... दोषकृत् PauṣkS. 27. 186; PāraS. 19. 372; प्रतिलोमानुलोमानां दुर्गगणसुभैरवाः। पूजनीयाः VṛHārīSm. 2. 45; अन्तरजा अप्यनुलोमा वर्णा एव BālaKrī. i. 6. 20 (*on* 1. 1); अनुलोमास्तु सत्यपि संकीर्णयोनित्वे मातृजातीयत्वादधिकारित्वाच्च नेह गृह्यन्ते ManuBh. i. 461. 22 (*on* 5. 88); प्रतिलोमानुलोमानां शूद्राणाम् ...। सर्वेषां च त्वया दृष्टम् VarāP. 180. 28; केवलश्चानुलोमानां दूर्वैव स्त्रीचतुर्थयोः (ब्रह्मग्रन्थिः) ĪśānŚiPa. i. 7. 18; एकोच्छिष्टे तदर्धं स्यादनुलोमे तदर्धकम् ĪśānŚiPa. ii. 20. 34; अनुलोममुक्त्वा प्रतिलोममाह DīpKa. 13. 12 (*on* 1. 93) [Vaija. 81. 118]; [Inst.] on account of mixed caste शैवभार्योद्भवापत्यमनुलोमेन मातृवत्। समाचरेत् MahNirvāT. 9. 281 (comm. अनुलोमेन वर्णेन); **2Ai** name of a son of Siṁhikā अनुलोमः शुचिश्चैव ... इत्येते सिंहिकापुत्राः VāyuP. ii. 7. 19; **2Aii** name of a man or tribe, (p1.) optional patronymic term for descendants of a man named *Anuloma* वोपकादिभ्यः ... अनुलोमप्रतिलोम एतौ बाह्वादी JaineVyā. 85. 20 (*on* i. 4. 139); CāndraVṛ. *on* ii. 4. 114; उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ... जन्तुक। अनुलोम KāśiVṛ. *on* ii. 4.69; Prasā. i. 729.15; अपजग्धानुलोमौ च दामकण्ठोऽप्यबन्धकः GaṇRa. 1.31 (61) (comm. अनुलोमस्य । अनुलोमाः) **2B** type of a *mūlamantra* सबिन्दुं मन्त्रमुच्चार्य मूलमन्त्रं समुच्चरेत्। अकारादिळकारान्तमनुलोम इति स्मृतः MahNirvāT. 5. 153; **2C** reguler gradation, cf. **अनुलोमपरिणीत; 3Ai** proper direction, cf. **अनुलोमकृष्ट ; 3Aii** proper, i.e. prescribed direction, cf. **अनुलोमकृता ; 3Aiii** downward direction, cf. **अनुलोमग 2A; 3Aiv** upward direction, cf. **अनुलोमम् 2B; 3Av** normal, natural or regular direction, cf. **अनुलोमग 2Bi; 3Bi** regular order, cf. **अनुलोमग 3A ; 3Bii** normal or successive order, cf. **अनुलोमग 3B; 3Biii** progressive order, cf. **अनुलोमवर्तिनी ; 3Biv** descending order, cf. **अनुलोमाङ्गीकृति; 4** favourable means, cf. **अनुलोमतस् 1.**

अनुलोम (anulomá) *adv.* [P.vi. 2.189] in the natural direction तद् शिरस्तोऽग्रेऽनुलोमाभ्यनक्ति ŚatBr.(K.) IV. i.3.8 (*but* Viśva. अनुलोमन्)

अनुलोमक (anuloma-ka) *adj.* being in the regular or fixed order (from beginning to the end) अष्टान्तरालेष्वेकैकं बाह्यवृत्ते तु मातृकाम्। चतुरस्रे च विलिखेत् प्रतिलोमानुलोमकम् TantrRā. 23. 67 (comm. वृत्तवीथ्यां प्रतिलोमं चतुरस्रेऽनुलोमं च)

अनुलोमकर (anuloma-kara) *adj.* of favourable rays अनुलोमकरः सूर्यो अयने द्वे चचार ह HariVaṁ. 41.15.

अनुलोमकलिता (anuloma-kalitā) *adj. (f.)* fixed or attached to each and every hair अहं यथाण्डमध्येऽस्मिन्रचितः सृष्टिकर्मणि। तथानुलोमकलिता ब्रह्माण्डे ब्रह्मकोटयः SkandP. ii(2). 27. 24.

अनुलोमकल्प (anulomakalpa) *m.* name of the thirty fourth chapter of the Atharvavedapariśiṣṭa तत्र द्वासप्ततिः परिशिष्टाणि भवन्ति... अनुलोमकल्पः AVPari. 49 (4). 9.

अनुलोमकृता (anuloma-kṛtā) *adj. (f.)* held in the proper, i. e. prescribed direction अनुलोमकृतया वारण्या स्रुचा ... जुहोति BhārPiMe. i. 12. 2; HirPiMe. xxviii. 3. 12.

अनुलोमकृष्ट (anuloma-kṛṣṭa) *adj.* ploughed in the right or proper direction अनुलोमकृष्टं क्षेत्रं प्रतिलोमं कृषति KāśiVṛ. *on* v. 4. 58.

अनुलोमक्रम (anuloma-krama) *m.* (Inst.) in the descending order (of castes) अनुलोमक्रमेणैव दास्यं भवति न प्रतिलोमक्रमेण। यथा ब्राह्मणस्य क्षत्रियो दासो न तु वैश्यस्य ViraMi. 662. 16 (*on* 2.183)

अनुलोमग (anuloma-ga) *adj.* **1** moving propitiously प्रदक्षिणा ग्रहाश्चापि भविष्यन्त्यनुलोमगाः MahāBhā. iii. 188. 88; iii. 953* (1); **2A** being in the downward direction यच्च योगावहं तत्र कषायं तिक्तकानि च। तस्माद्याप्यं समाख्यातं यदुक्तमनुलोमगम् CaraS. ii. 2.15 (1922Ed.) संसृष्टा व्याधयो यस्य प्रतिलोमानुलोमगाः CaraS. v.7.20; सा (शर्करा) त्वस्मिन्ननुलोमगे। निरेति सह मूत्रेण प्रतिलोमे विबध्यते AṣṭāHṛ. iii. 9. 19; शर्करा। अणुशो वायुना भिन्ना सा तस्मिन्ननुलोमगे। निरेति सह मूत्रेण प्रतिलोमे निरुध्यते RugVi. 32. 14; **2Bi** on which (the planet) moves in the normal, natural or regular direction अनुलोमगानि मन्दाच्छीघ्रात्प्रतिलोमगानि वृत्तानि Āryabh. 3.21 (65); **2Bii** moving in the normal or regular direction भगणैः कृतो मध्यः। अनुलोमगो विलोमो विलोमगो वानुलोमगतिः BrāhmSphuSi. 13.38; अथोच्चोनग्रहसमेऽपि चलकेन्द्रे तत्केन्द्रमपचीयमानमुच्चादनुलोमगम् SiddhāTaVi. 132.19; **2C** moving in the same direction, following behind अनुलोमगेऽभ्रवृक्षे समुद्गते यायिनः नृपस्य वधः BṛSaṁ. 30.19; काकः ... वामोऽनुलोमगः श्रेष्ठः ViṣṇuDhaP. ii. 164. 46; **3A** spreading or extending (between the planets) in regular order अथेदानीं ग्रहयुद्धस्वरूपमुपदिदिक्षुराह इष्टग्रहान्तरं भाज्यं प्रतिलोमानुलोमगम् LaBhāska. 7.4; **3B** being in normal or successive order मेषादेरनुलोमं संधिग्रहो लग्नमप्यनुलोमगम् SiddhāTaVi. (ŚeṣaVā.) 45. 11 [straight going, Apte]

अनुलोमगत (anuloma-gata) *adj.* moving, i.e. blowing favourably अनुलोमगते प्रदक्षिणे सुरभौ देहसुखेऽनिले गतः।... हन्ति बलानि विद्विषम् YogYā. 5.17.

अनुलोमगति (anuloma-gati) *adj.* **Ai** going or moving in normal, natural or regular direction, i.e. anti-clockwise अनुलोमगतिवृत्ते मन्दगतिर्यो ग्रहो भ्रमति Āryabh. 3. 20 (64); यातानुलोमगतीन् प्रतिलोमगतीन् ग्रहान्... यो वेत्ति स कालतन्त्रज्ञः BrāhmSphuSi. 13.8; भगणैः कृतो मध्यः। अनुलोमगो विलोमो विलोमगो वानुलोमगतिः BrāhmSphuSi. 13. 38; **Aii** going in regular direction, i.e. going towards अनुलोमगतिनौस्थः पश्यत्यचलं विलोमगं यद्वत् Āryabh. 4.9 (76); **B** moving in the proper direction यदि वाम एव विरुयान्मुहुर्मुहुर्यायिनोऽनुलोमगतिः (काकः) BṛSaṁ. 95. 27.

अनुलोमगमन (anuloma-gamana) *n.* sexual intercourse with a (woman of) mixed or lower caste अनुलोमगमने निष्कृतिरुक्ता स्त्रीणां प्रतिलोमगमने तु विशेषो व्यक्तीभविष्यति पारदार्यप्रकरणे BālamBha. iii. 155. 24 (*on* 3. 260)

अनुलोमचरिता (anuloma-caritā) *adj. (f.)* behaving favourably अपि भवन्त्युपप्रलोभनप्रवीणैरुपचर्यमाणाः क्रूरजन्तवोऽप्यनुलोमचरिताः (कुस्त्रिय) YaśasCam. ii. 61. 4 (comm. अनुलोमचरिताः सानुकूला भवन्ति)

अनुलोमचर्या (anuloma-caryā) *f.* course of conduct conforming (to a Bodhisattva's vow to attain Bodhi) चत्वारीमानि बोधिसत्वानां बोधिसत्वचर्याणि। प्रकृतिचर्या प्रणिधानचर्या अनुलोमचर्या अनिवर्तनचर्या MaVastuAva. i.1.3; i.46.7; i.63.11 [DBHS.]

अनुलोमज (anuloma-ja) *adj.* [*f.* -*ā*] (also used as noun) **1** (one) born of a mother inferior in caste to the father (enumerated as Mūrdhāvasikta, Ambaṣṭha, Niṣāda or Pārāśava, Māhiṣya, Ugra and Karṇa), mixed tribe ब्राह्मणा ब्रह्मणा सृष्टाः ...। तेभ्यो वर्णविशेषाश्च प्रतिलोमानुलोमजाः MahāBhā. ब्राह्मणा ... संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।... तान्प्रवक्ष्यामि ManuSm. viii. 23.32; संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः। ... तान्प्रवक्ष्यामि ManuSm. 10. 25; शूद्रं चाप्यनुलोमजम्। ज्ञात्वा ... चरेच्चान्द्रायणं व्रतम् BṛYamaSm. 2. 4; गां नृपं चैव वैश्यं च शूद्रं वाप्यनुलोमजम्। क्षत्रियादिस्त्रियं गत्वा विप्रश्चान्द्रायणं चरेत् BṛParāSm. 8. 182; 8. 246; असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः YājñaSm. 1.95; VṛHārīSm. 7. 152; (मन्त्रं लिखित्वाञ्जलिपुटे दद्यात्) शूद्रानुलोमजेषु पौराणमेव PārāSū. 6.5; निगमो ह्रीश्वरस्य ते। अवेक्षेते

. . . वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजम् BhāgP. xi. 20.2; मध्ये मुनीनां सूतोऽयं कस्मान्निन्द्योऽनुलोमजः SkandP. iii (1). 19. 21; एते च ... षट् अनुलोमजाः पुत्राः वेदितव्याः Mitā. 32. 3 (*on* 1. 92); अनुलोमजानाम् ... स्वत्वहेतुषु यद्यदसाधारणमुक्तम् ...तत् तत् सर्व निर्विष्टशब्देनोच्यते Mitā. 217. 24 (*on* 2. 114); CaturCin. iii (1). 526. 10; उत्तमवर्णेन हीनवर्णायां परिणीतायामुत्पन्नाः अनुलोमजाः Aparā. 119. 19 (*on* 1. 95); अन्येष्वनुलोमजेष्वौरसेषु सत्सु न प्रतिनिधिरस्ति Aparā. 739. 28 (*on* 2. 132); 808. 9 (*on* 2. 206); अनुलोमजानुक्त्वा प्रतिलोमजानाह ManvaVi. 1285. 23 (*on* 10. 11); Subodhi. 106. 26 (*on* 2. 290); इतरे संकरजा अनुलोमजाः प्रतिलोमजाश्च (जनाः) DīpKa. 1.9 (*on* 1.1); 13. 19 (*on* 1. 95) जातयोऽनुलोमजा अम्बष्ठादयः DaṇḍaVi. 200. 17; उत्कृष्टवर्णादपकृष्टवर्णायां जातोऽनुलोमजः (पुंत्रः) VīraMi. 160.4 (*on* 1. 90); 171. 2 (*on* 1. 95); अनुलोमजानां मूर्धावसिक्तादीनां क्षत्रियादिवन्निर्णयो मातृसमानधर्मत्वात् VīraMi. (Rājanīti.) 269. 2; VīraMi. (Saṁskāra.) 747. 20; अनेनैव प्रकारेणोत्पन्नानां स्त्रीणामनुलोमजानामिमान्येव नामानि BālamBha. i. 286. 24 (*on* 1.94); ii. 340.9 (*on* 2.290) [Vaija. 18. 108; 81. 117; KalpaK. 202. 2]; 2 rising in progressive or obverse order, i.e. from creation to dissolution इयं चतुर्विधा शक्तिः प्रतिलोमानुलोमजा। चतुर्धा सोदयं याति LakṣmīT. 57. 11; 3 produced in the regular or fixed order (from beginning to the end) प्रागुक्तवज्रे साध्याख्यं तथालिख्यानुलोमजान्। कूटान् ... संलिखेत् TantrRā. 16. 93 (comm. पञ्चत्रिंशत्पटलोक्तक्रमभिन्नविद्यानुलोमरूपान् षट्त्रिंशद्विद्यात् कूटान्) [born in due gradation, Apte]

अनुलोमजत्व (anulomaja-tva) *n.* the state of being (one) born of a mother inferior in caste to the father वेश्यायाः साधारण्यं न जातितः। अनुलोमजत्वेन तस्याः सवर्णस्त्रीत्वात् DaṇḍaVi. 190. 1.

अनुलोमजन्मन् (anuloma-janman) *adj.* (one) born of a mother inferior in caste to the father अन्येऽनुलोमजन्मानः ...। स्वपारंपर्यतो दृष्टं मनाग्वर्त्म न तत्यजुः SkandP. iv. 43. 51 [born in due gradation, mixed tribe, Apte]

अनुलोमजप्रतिलोमजभेद (anulomajapratilomaja-bheda) *m.* difference between (one) born of the mother inferior in caste to the father and (one) born of the mother superior in caste to the father परंपरासाधारण्योत्पादनोपादानान्न संकरजसंकराव्याप्तिः। सोऽपि द्विविधोऽनुलोमजप्रतिलोमजभेदात् VīraMi. 160. 3 (*on* 1. 90)

अनुलोमजबहिर्भूत (anulomaja-bahirbhūta) *adj.* excluded from those born of the mother inferior in caste to the father वर्णानुलोमजबहिर्भूतानां प्रायश्चित्तानर्हाणां श्राद्धादौ प्रसक्तिरेव नास्ति BālamBha. iii. 40. 29 (*on* 3. 16)

अनुलोमजविजातीयविषय (anulomajavijātīya-viṣaya) *m.* [Loc.] with reference to (the one) different from (one) born of the mother inferior in caste to the father (बौधायने त्वविशेषेण दशाह इत्युक्तम्) इत्युक्तमिति। अनुलोमजविजातीयविषयेऽपीति। दशाहादिति भावः BālamBha. iii. 72. 5 (*on* 3. 22)

अनुलोमजविषय (anulomaja-viṣaya) *adj.* referring to the (one) born of the mother inferior in caste to the father प्रतिलोमजमात्रविषयः अयं श्लोको नानुलोमजविषयः ManvaMu. 431. 30 (*on* 10. 31)

अनुलोमजस्त्री (anulomaja-strī) *f.* woman born of a mother inferior in caste to the father सप्तमे पञ्चमेऽपि वा (युगे) पितृसमानवर्णभावो ज्ञेयः। एतद्यानुलोमजस्त्रीविषयम् Aparā. 119. 24 (*on* 1.16)

अनुलोमजात (anuloma-jāta) *adj.* born of a mother inferior in caste to the father अत्रानुलोमजाता ये युक्ता एव द्विजातिषु। तेषामध्वविशुद्ध्यादि कुर्यात् ŚivaP. vii (2). 15. 65 (563 A. 11)

अनुलोमजाति (anuloma-jāti) *f.* caste of (one) born of the mother inferior in caste to the father, i.e. belonging to mixed caste वर्णशब्दोऽनुलोमजातीनामप्युपलक्षकः Subodhi. 106. 14 (*on* 2. 290)

अनुलोमजातिसहित (anulomajāti-sahita) *adj.* inclusive of the mixed caste (आलोच्य योग्यताम्। भक्तियुक्तान् गुणांश्चापि क्रमाद्वर्णे ससंकरे ... वदेत्) ससंकरे अनुलोमजातिसहिते। वर्णे ब्राह्मणादिवर्णेषु इत्यर्थः NityoNi. 6.9.

अनुलोमज्या (anuloma-jyā) *f.* conforming sine (of an arc) विलोमानुलोमज्ययात्रापातादयोग्येऽपि तेभ्यो महद्भ्यो नमोऽस्तु SiddhāTaVi. 217. 16.

अनुलोमतस् (anuloma-tas) *adv.* 1 by favourable means प्रतिलोमानुलोमैश्च सामदानादिभेदनैः (v. l. सामदानविभेदैश्च प्रतिलोमानुलोमतः)। आवर्तयत वैदेहीम् Rāmā. v. 20. 35; 2 in the due or descending order (of castes) त्रितत्त्वविद् द्विजातीयो दीक्षयेदनुलोमतः JayāS. 18. 19; सूतौ मृते च दासानां पत्नीनां चानुलोमतः। स्वामितुल्यं भवेच्छौचम् ManuBh. i. 449. 2 (*on* 5. 60); चतुर्धा भेदिता जातिर्ब्रह्मणा कर्मभिः पुरा। तत्तत् सांकर्यासांकर्यात् प्रतिलोमानुलोमतः ŚukraNī. iv. 3. 11; 3A in straight way, directly तेन बाणेन स रथो ययौ खमनुलोमतः PadmP. iv. 41. 25; 3B in normal or regular direction, i.e. anticlockwise कुटिलेऽल्पतरेऽनुलोमतो वा अनृजुखगयोस्तु शीघ्रगेऽल्पे युतिरनयोः प्रगता GrahaLā. 13.2 (comm. मार्गगतिग्रहात्); 3C in the proper or right direction, i.e. clockwise एते षोडश श्लोकाश्चक्रे ... अनुलोमतो लिखिता अन्ये षोडशारात् अत एव च नाभेरारभ्य पुनरनुलोमतो लिखिता अन्ये षोडश Kāvyānu. (He.) 268. 22; 3D in the regular or fixed order, from preceding to the following or beginning to the end अनुलोमतोऽपि च विलोमगतैर्लिपिवर्णकैः सह मनुं जपतः। वशमेति विश्वभुवनम् ĪśānŚiPa. i. 23. 17; 4 in the normal course शिष्यस्ततः शक्रजालमखिलं परिनिर्मितम्। चकर्त वाञ्छुलीं यष्टिं भ्रामयन्ननुलोमतः ParamāKā. 147. 63 (65)

अनुलोमता (anuloma -tā) *f.* 1. the state of being in natural, i.e. downward direction बुद्धीन्द्रियमनःशुद्धिर्मारुतस्यानुलोमता। सम्यग्विरिक्तलिङ्गानि CaraS. i. 16. 6; भवत्येषु मृदुत्वं च मारुतस्यानुलोमता AṣṭāSaṁ. ii. 32. 12 (4.6); AṣṭāHṛ. iv. 4. 3; 2A obedience or compliance (दूती) सा नायकस्य चरितमनुलोमतां कामितानि च कथयेत् KāmSū. 278. 3 (5.4); कथयेन्नायकचरितं कामित्वं चानुलोमतां चैव KandaCū. v. 4. 11; 2B favourableness पश्य जन्मान्तराञ्शत्रून् ...। भवे संघटयत्याशु विधिर्यातोऽनुलोमताम् MahāP. 7. 151; 3 the state of being similar, conformity कारणे सति तत्प्रतीत्य प्राय सुमत्यादेऽनुलोमतानुसारिता SarvaDaSaṁ. 2. 311; (कृत्ो हेतुताच्छील्यानुलोम्येषु) आनुलोम्यमनुलोमता Prasā. ii. 516. 17.

अनुलोमत्व (anuloma-tva) *n.* 1 the state of being favourable फलादानेऽनुलोमत्वान्नामी (सुराः) स्युर्विघ्नकारिणः BṛĀraUBhVā. i. 4. 1481; 2 the state of being born of a mother inferior in caste to the father स्मृत्यन्तरे वैश्यायां ब्राह्मणाज्जातो भृज्जकण्टकः स्मर्यते। ... स ह्यनुलोमत्वान्न पापात्मा ManuBh. ii. 337. 19 (*on* 10. 21)

अनुलोमद्विज (anuloma-dvija) *m.* twice-born who is born of a *(kṣatriya)* mother inferior in caste to the *(brāhmaṇa)* father विधिना ब्राह्मणः प्राप्य नृपायां तु समन्त्रकम्। जातः सुवर्ण इत्युक्तः सानुलोमद्विजः (v. l. सोऽनुलोमद्विजः) स्मृतः AuśaSm. 24.

अनुलोमन् (anu-lomán) *n.* ŚatBr. (K.) IV. i. 3. 8. [Viśva.], cf. अनुलोम. *adv.*

अनुलोमन् (anu-loman) *adj.* favourable वामनस्तु गणपाठात् समासान्ताभावेऽनुलोमानः। प्रतिलोमानः कुमारा इत्याह GaṇRa. 1. 31 (62)

अनुलोमन (anu-lomana) *adj.* [*f.* -ā, ī] [Debru. 200] 1 which carries (defects or disorders) off in the right channel or which regulates (wind) in natural, i.e. downward direction, act of purgative, laxative अभयापिप्पलीमूलविश्वैर्वातानुलोमनी CaraS. i. 2. 29; यवागूभिरुपाचरेत्। ... ताश्च ... अनुलोमनाः CaraS vi. 3. 152 (1941. Ed.); अम्लः ... पवननिग्रहणोऽनुलोमनः SuśruS. i. 42. 9.(2); i. 46. 522; गुणांश्चैकैकशस्तेषां धूमपानकृतान् शृणु। ... प्रतिबुद्धस्य चेद्धूमो मारुतस्यानुलोमनः BhelaS. 8. 19 (1.6); मद्ययुक्तं त्रिवृच्चूर्णं पेयं स्यादनुलोमनम् KāśyaS. 139A. 26; अन्नपानौषधं तत्र युञ्जीतातोऽनुलोमनम् AṣṭāSaṁ. i. 19. 17 (1. 5); AṣṭāHṛ. i. 4. 24; AṣṭāSaṁ. i. 209. 8 (2. 3); पेया ... क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा मलानुलोमनी पथ्या AṣṭāHṛ. i. 6. 27; i. 8. 16; iv. 4.7; कृत्वा पाकं मलानां यद्भित्त्वा बन्धमधो नयेत्। तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ŚārṅgaS. i. 4. 4; BhāvPra. (Bhā.) 6 (1). 215; दोषाणां चानुलोमनः (बस्तिः) Hastyāyur. 602. 14 (4. 5); 2 favourable द्विषतापि हिते प्रोक्ते सन्तस्तदनुलोमनाः YaśasCam. i. 392. 7 (comm. सानुकूलाः)

अनुलोमन (anu-lomana) 1 *n.* act of carrying off (defects or disorders) in the right channel, regulation of (wind) in the natural, i.e. downward direction, act of purging पानानि बस्तयश्चैव शस्तं वातानुलोमनम् CaraS. i. 17. 13 (1941 Ed.); AṣṭāHṛ. i. 4. 3; कुपितानिलमूलत्वात् संचितत्वान्मलस्य च। सर्वोदरेषु शंसन्ति बहुशस्त्वनुलोमनम् SuśruS. iv. 14. 9; छर्द्यां छर्दनमतिसारेऽनुलोमनम् AṣṭāSaṁ. i. 75. 5 (1. 12); अम्लः ... करोति कफपित्तास्रं मूढवातानुलोमनम् AṣṭāHṛ. i. 10. 11; स्वेदोऽनुलोमनं चैव प्रशस्तं सर्वगुल्मिनाम् SiddhYo. 30. 7 [regular gradation, Apte]; 2 acting conformably to, cf. **अनुलोमनता.**

अनुलोमनता (anulomana-tā) *f.* the acting conformably to आनुलोमिकधर्मक्षान्ति धर्मालोकमुखं सर्वबुद्धधर्मानुलोमनतायै संवर्तते LaliVi. 4. 0 (98) [DBHS.]

अनुलोमनान्न (anulomanānna) *n.* food, i.e. purgative which carries off (the defects or disorders) in the natural, i.e. downward direction उपाचरेद् वर्तिनिरूहबस्तिस्नेहैर्विरेकैरनुलोमनान्नैः CaraS. vi. 26. 11 (1941 Ed.)

अनुलोमनार्थम् (anulomanārtham) *adv.* for carrying off (defects or

disorders) in the right channel, for regulating (wind) in the natural, i.e. downward direction पित्तात्मिकायामनुलोमनार्थं द्राक्षाविदारीक्षुरसैश्शृतं स्यात् CaraS. vi. 20. 26 (1941 Ed.); SiddhYo. 15. 4; (मासे) अष्टमे ... मधुघृतमिश्रेणास्थापयेत् पुराणपुरीषशुद्ध्यर्थमनुलोमनार्थं च वायोः SuśruS. iii. 10. 4.

अनुलोमपरदार (anuloma-paradāra) *m.* another person's wife who is born of a mother inferior in caste to the father अनुलोमपरदारगमने दण्डस्यापकर्षः प्रतिलोमतद्गमने तूत्कर्षो युक्तः DaṇḍaVi. 169. 1.

अनुलोमपरस्त्री (anuloma-parastrī) *f.* another person's wife who is born of a mother inferior in caste to the father सवर्णदारान् यो गच्छेत् (? द्) अनुलोमपरस्त्रियम्। दमस्तस्य धनादानं मासैकं कणभोजनम् MahNirvāT. 11. 37.

अनुलोमपरिणीत (anuloma-pariṇīta) *adj.* married in regular gradation Apte.

अनुलोमपरिणीता (anuloma-pariṇītā) *f.* married in regular gradation, MW.

अनुलोमप्रणिधान (anuloma-praṇidhāna) *n.* continued successive fixation of mind नमः ... सम्यक्संबुद्धाय यस्यान्तिकेऽनेनैव भगवता शाक्यमुनिनानुलोमप्रणिधानं कृतम् MaVastuAva. i. 1. 11 [DBHS.]

अनुलोमप्रतिलोम (anuloma-pratiloma) *m.* [*n.* DBHS.] **1** offspring born of a mother inferior in caste to the father or that born of a mother superior in caste to the father, mixed caste चातुर्वर्ण्यसंकरेणोत्पन्नानामनुलोमप्रतिलोमान्तरालव्रात्यानामुत्पत्तिं नाम वृत्तिं च VaikhāDS. iii. 11.1; अन्तरे प्रभव उत्पत्तिर्येषां तेऽन्तरप्रभवाः अनुलोमप्रतिलोमा मूर्धावसिक्ताम्बष्ठक्षत्तृवैदेहकादयः ManuBh. i.4.3 (*on* 1.2); अन्तरप्रभवाश्चानुलोमप्रतिलोमाः ManuBh. ii. 332. 28 (*on* 10. 4); ते च सवर्णेभ्योऽनुलोमप्रतिलोमेभ्यश्च भिद्यमानाः साधारणधर्मैर्हिंसादिभिरधिक्रियन्ते Mitā. 30. 26 (*on* 1. 90); संकीर्णानामनुलोमप्रतिलोमानाम् आपद्धर्ममापदि धर्मोत्पादनविधिम् ManvaVi. 85.10 (*on* 1. 116); **2A** name of certain winds अनुलोमप्रतिलोमा वायवो वान्ति Divyāva. 64. 30; 65. 4; **2B** name of an ocean सः ... अनुलोमप्रतिलोममहासमुद्रमवतरति Divyāva. 64. 32; 65. 3; **2C** name of a mountain अनुलोमप्रतिलोमं महासमुद्रं समतिक्रम्य अनुलोमप्रतिलोमो नाम पर्वतः Divyāva. 65. 4 [DBHS.]; **2D** type of figure of speech called *citra* (where a verse gives the same reading when read in the regular and reverse order (i.e. from the beginning to the end and from the end to the beginning) अनुलोमप्रतिलोमैरर्धभ्रममुरजसर्वतोभद्रैः। ... भेदैर्विभिद्यमानं संख्यातुमनन्तम् (चित्रम्) Kāvyālaṅ. (Ru.) 5. 3 (comm. क्रमव्युत्क्रमाभ्यां यः सदृशः सोऽनुलोमप्रतिलोमश्लोकः); अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे KāvyPra. 759. 1; अत्र यमकानुलोमप्रतिलोमयोः शब्दालंकारयोः परस्परापेक्ष-त्वेनाङ्गाङ्गिसंकरः AlaṅkāSa. 199. 10.

अनुलोमप्रतिलोमक्रम (anulomapratiloma-krama) *m.* progressive and regressive order (s) भूतानामुत्पत्तिप्रलयौ अनुलोमप्रतिलोमक्रमाभ्यां भवतः BrahmSūBh. (Śaṅ.) 444. 3 (*on* ii. 3. 15)

अनुलोमप्रतिलोमज (anulomapratiloma-ja) *adj.* born of a mother who is inferior in caste to the father and of a mother who is superior in caste to the father एतेऽहिंसादयो वर्णानाम् अनुलोमप्रतिलोमजानां संकीर्णानां धर्मस्य कारणम् DīpKa. 16. 26 (*on* 1. 122); संकीर्णानाम् अनुलोमप्रतिलोमजानाम् उत्पत्तिम् ... एतद्दशमे ManvaMu. 31. 4 (*on* 1. 116); (पूजनीया जनैर्देवी ... अन्यैश्च भुवि मानवैः) अन्यैः अनुलोमप्रतिलोमजैः LalitāSaBh. 223. 9 (*on* 291)

अनुलोमप्रतिलोमजात (anulomapratiloma-jāta) *adj.* born of a mother who is inferior in caste to the father and of a mother who is superior in caste to the father, born of mixed castes इतरे अनुलोमप्रतिलोमजाता मूर्धावसिक्तादयः Mitā. 1. 12 (*on* 1. 1); अनुलोमप्रतिलोमजातानां अम्बष्ठक्षत्तृकर्णप्रभृतीनां तेषां विजातीयमैथुनसंभवत्वेन ... पृथक्प्रश्नः ManvaMu. 3. 2 (*on* 1. 2)

अनुलोमप्रतिलोमता (anulomapratiloma-tā) *f.* the state of being in regular and reverse order मातृकाभिः संपुटीकरणमानुलोम्येनैव वानुलोमप्रतिलोमतया वा SetuBa. 172. 20.

अनुलोमप्रतिलोमभेद (anulomapratiloma-bheda) *m.* difference between one born of a mother inferior in caste to the father and one born of mother superior in caste to the father अन्तरालाः विजातीयमातापितृजन्याः असवर्णा इति यावत्। ते चानुलोमप्रतिलोमभेदात् द्विविधाः BālamBha. i. 284. 10 (*on* 1. 94)

अनुलोमप्रतिलोमलक्षण (anulomapratiloma-lakṣaṇa) *adj.* having the characteristic of being progressive and regressive order(s) अनुलोमप्रतिलोमलक्षणपरिणामद्वये सहजं शक्तिद्वयमस्ति ... बहिर्मुखतयानुलोमः परिणामः [illegible] परिणामः प्रतिलोमः RājMār. 77. 26.

अनुलोमप्रतिलोमवायुद्वय (anulomapratiloma-vāyudvaya) *n.* pair of favourable and unfavourable wind-currents एवमनुलोमप्रतिलोमवायुद्वयसंघट्टवशाद्वाय्वोः तत्प्रेरिततृणतूलकादौ चोत्क्षेपणव्यवहारो भाक्तः Upask. 25. 11 (*on* i. 1. 7)

अनुलोमप्रतिलोमशब्द (anulomapratiloma-śabda) *m.* word (which gives the same reading when) read in regular and reverse order (s) एकार्थत्वे अनुलोमप्रतिलोमशब्दा यथा - कलङ्क पतदातप KāvyKaVr. 100. 12 (3. 5)

अनुलोमप्रतिलोमा (anuloma-pratilomā) *f.* women born of a mother inferior in caste to the father and of a mother superior in caste to the father(परस्त्रीगमनम्) तत्समानजातीयासु परकीयास्वनुलोमप्रतिलोमासूढास्वनूढासु च स्वयम् ManuBh. ii. 338. 4 (*on* 10. 24)

अनुलोमप्रतिलोमादि (anulomapratilomādi) *adj.* one born from the mother inferior in caste to the father and one born from the mother superior in caste to the father, etc. परेषामपीत्युक्तत्वादनुलोमप्रतिलोमादीनामपि स्वस्तिकं लिङ्गमेवेष्टम् ĪśānŚiPa. ii. 37. 36 (8)

अनुलोमप्रतिलोमापवाद (anulomapratilomāpavāda) *m.* abusing or defaming of one born of a mother inferior in caste to the father by one born of a mother superior in caste to the father वर्णजात्योर्जातिष्वेव वानुलोमप्रतिलोमापवादे पूर्वोक्तन्यायेन ... दण्डः कल्पनीयः Subodhi. 89. 20 (*on* 2. 206)

अनुलोमप्रयोग (anuloma-prayoga) *m.* employment (of letters) in the regular or fixed order (of *na* to *pha*) अनुलोमप्रयोगाद्य मालिनीममृतप्रभाम्। चिन्तयेत् तनुनिष्पत्त्यै तद्ध्यानगतमानसः MālinīT. 11. 5.

अनुलोमभाग (anuloma-bhāga) *m.* portion, i.e. ingredient (of purgative) carrying off (defects or disorders) in the right channel or in downward direction सुरदारुशताह्वैलाकुष्ठमधुकपिप्पलीमधुस्नेहाः। ऊर्ध्वानुलोमभागाः सर्षपाः ... आवापो बस्तीनाम् CaraS. viii. 10. 13 (1922 Ed.)

अनुलोमभाज् (anuloma-bhāj) *adj.* liable to be in or resorting to the downward direction पश्चात्मकानां षट्त्वं च रसानां येन हेतुना। ऊर्ध्वानुलोमभाजश्च यद्गुणातिशयाद्रसाः। ... तत् सर्वमवदन्मुनिः CaraS. i. 26. 109 (1941 Ed.)

अनुलोमभाव (anuloma-bhāva) *m.* the state of being in the downward direction गतेऽनिले चाप्यनुलोमभावं सम्यग्विरिक्तं मनुजं व्यवस्येत् SiddhYo. 74. 20.

अनुलोमम् (anulomám) *adv.* [P.v. 4.75; JaineVyā. 277. 18 (*on* iv. 8.71); CāndraVyā. iv. 4. 60; KāśiVr. *on* v. 4. 75; KātanVr. *on* ii. 6. 41 (23); MugdhaBo. 6. 76 (63. 9); SiddhāKau. 210 A. 11 (*on* v. 4. 75)] **1A** in the normal or successive order **B** in the regular order, as obtained directly **2A** along the hair, in the direction of the hair **B** in the upward direction **C** downwards, in the downward direction **Di** in the normal, i.e. reverse direction **ii** in the normal, i.e. reverse direction (as of piercing) **E** in the normal or regular direction **F** in the outward direction **G** in the right or proper direction **3A** in a compliant way **B** favourably **1A** in the normal or successive order सारस्वतौ होमौ पुरस्तात् जुहुयादमावास्यां वै सरस्वत्यनुलोममेवैनावालभते TaiS. III. v. 1. 4; सर्वमेव वा एतद्यदनुलोमं पृष्ठानि यदेकधा पृष्ठानि भवन्ति PañcBr. xxii. 3. 3; xxii. 10. 2; आग्नीध्र एव जुहुयाद्दशहोतारम्। ... अनुलोममविग्राहम् TaiBr. II iii. 2. 2; ĀpaŚS. xiv. 15. 1; HirŚS. x. 7. 17 (1103. 16); पुरस्तात्प्रत्यङ् तिष्ठन् होतृचमसे ध्रुवमवनयति ध्रुवं ध्रुवेण ... इति। पश्चात्प्राङासीनोऽनुलोममवनयतीत्येकेषाम् BhārŚS xiv. 15. 2; **1B** in the regular order as obtained directly प्रतिमण्डलेऽपि। ततो विलोमं खलु तुङ्गभागैर्मेषादिरस्मात् खचरोऽनुलोमम्। देयः Golā. 200. 12 (23. 13); **2A** along the hair, in the direction of the hair नवनीतेनाभ्यङ्क्ते अनुलोमं यजुषा व्यावृत्त्यै TaiS. VI. i. 1. 5; तमभ्यनक्ति। शीर्षतोऽग्रेऽआ पादाभ्यामनुलोमम् ŚatBr. III. i. 3. 9; (जायाम्) त्रिरेनामनुलोमा (v. l. लोम) मनुमार्ष्टि ŚatBr. XIV. ix. 4. 20 (Sāy. मूर्धानमारभ्य पादान्तम्); BaudhŚS. i. 158. 2; ĀpaŚS. x. 6. 13; MānŚS. 12. 7; आशुपिष्टानि संयुत्य तैरनुलोममश्वं प्रलिम्पति BaudhŚS. ii. 235. 6; मुखमग्रेऽनुलोममङ्गानि BhārŚS. x. 4. 9; HirŚS. x. 1. 43 (1029. 15); आचान्तोदकाः प्रत्यभिमृशेरन्मुखं शिरोऽङ्गानीत्यनुलोमम् GobhiGS. iii. 8. 21; अग्रेण नाभिं पवित्रे अन्तर्धायानुलोममाकृत्य दर्भमुद्धरन्ति GobhiGS. iii. 10. 28; अनुलोमं नाभिदेशे दर्भमास्तृणाति KauśiSū. 44. 29; प्रत्यङ्ङ्चो वैधः ... अनुलोमं शस्त्रं निदध्यादा पृष्ठदर्शनात् SuśruS. i. 5. 7; आलेप आद्य उपक्रमः ... तत्र प्रतिलोममालिम्पेन्नानुलोमम् SuśruS. i. 18. 4 (*but* Apte in regular or natural order); लोम्नामनुगतमनुलोमं मर्दनम् Loc. 54. 8 (*on* 1. 19); एषण्यान्वेष्य विधिवदनुलोमं प्रपाटयेत् Hastyāyur. 383. 15 (3.4);

2B in the upward direction उत्तानाया अनुलोममधस्तात्प्रतीचीनप्रवणं प्रजनने कुर्वन्ति BaudhŚS. i. 43. 3; यं त्वायः स्वधितिरित्यनुलोमं परशुनाङ्गान्कल्पयति HirŚS. iv. 1. 25 (399. 1) (comm. अधस्मादारभ्योर्ध्वम्); आग्नीध्रः संमार्गं स्रुच्यमुपसंयम्य यथापरिधितम् अनुलोमं त्रिः संमार्ष्टि MānŚS. 19. 17; 22. 16; दर्भावच्छिन्नप्रान्तौ प्रक्षाल्यानुलोममनुमार्ष्टि KauśiSū. 1. 37; 67. 25; **2C** downwards, in the downward direction शुल्बमनुलोमं त्रिरनुमार्ष्टि MānŚS. 8. 7; लाघवं मनसस्तुष्टिरनुलोमे गतेऽनिले।... पाचनं पाययेत् ŚārṅgaS. iii. 4. 44 (comm. अधोभागम्); तेन वातमुदावर्तं वातगुल्मं च संहतम्। अनुलोमं जनयति विशुद्धं च प्रमेहति Hastyāyur. 83. 15 (1. 12); 455. 10 (3. 10); **2Di** in the normal; i.e. reverse direction (tip with tip etc.) दर्भमयं पवित्रं त्रिगुणरज्जु शाखायामनुलोममवसृजेद् ग्रन्थिमकुर्वन् MānŚS. 10. 12; **2Dii** in the normal, i.e. reverse direction (as of piercing) सर्वशल्यानां तु ... द्वावेवाहरणहेतू भवतः प्रतिलोमोऽनुलोमश्च। तत्र प्रतिलोममवाचीनमानयेदनुलोमं पराचीनम् SuśruS. i. 27. 7; **2E** in the normal or regular direction, i.e. anticlockwise कक्ष्याप्रतिमण्डलगा भ्रमन्ति सर्वे ग्रहाः स्वचारेण मन्दोच्चादनुलोमं प्रतिलोमं चैव शीघ्रोच्चात् Āryabh. 3. 17 (62); BrāhmSphuSi. 21. 24; (पूर्वा) तस्यामुदेति दिनकृदनुलोमं ततः पुनः। अश्वानां पृष्ठतो याति स प्रतीचीमनुक्रमात् SamarāSū. 33. 45; ग्रहोऽनुलोमं निजकक्षिकायां भ्रमन्नपि स्वाजमुखात्स्फुटोऽसौ SiddhāTaVi. 130. 23; 381. 22; विमारण्यशीघ्रप्रतिवृत्तयोर्मेषाभ्यां विलोमं पातान्तरे तयोः संपातः बिम्बीयकदम्बवृत्तावध्यनुलोमं तयोर्मृदुस्फुटौ स्तः SiddhāTaVi. (ŚeṣaVā.) 26. 23; 45. 11; **2F** in the outward direction (from inside) बाहुद्वयप्रतिपन्नस्योर्ध्वमुत्पीड्यांसौ शिरोऽनुलोममानीयापहरेत् SuśruS. iv. 15. 9; परिवृत्त्रगर्भाम् ... योनिमनुलोममनुसुखमभ्यज्य स्फिजौ पादाभ्यां पीडयेत् AṣṭāSaṁ. i. 210. 5 (2. 3); **2G** in the right or proper direction अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति SiddhāKau. 325 B. 7 (*on* v. 4. 58); **3A** in a compliant way यद्य भाषन्ति ते तुष्टास्तत्तद् गृह्णामि मेधया। समाधिमात्मनो नित्यमनुलोममचिन्तयन् MahāBhā. xiii. 36. 8; **3B** favourably आतुरोऽपि (बस्तिनेत्रम्) तदनुलोममवलम्बेत AṣṭāSaṁ. i. 148. 23 (1. 28); दद्याच्छापभयात्सा चेदनुलोमं तदाचरेत् BṛĀraUBhVā. vi. 4. 34.

अनुलोममारुत (anuloma-māruta) *adj.* whose wind humour is regulated in downward direction आसवं कृत्वा ... अष्टौ पानान्यष्टाहं दद्यात्। ततोऽनुलोममारुतोऽपहृतपित्तः स्वस्थो वारणो भवति Hastyāyur. 62. 9 (1. 9)

अनुलोममूर्धावसिक्तादि (anuloma-mūrdhāvasiktādi) *adj.* mixed or lower caste and one born of Brahmin father and Kṣatriya mother and so on विप्रायामसवर्णायामुत्पन्नेऽनुलोममूर्धावसिक्तादौ ... ब्राह्मणत्वाद्यभावः BālamBha. i. 275. 22 (*on* 1. 90)

अनुलोमय (anulomaya-) *denom.* [P. iii. 1. 25] **1Ai** to regualte (wind) in downward direction आम्लरसः ... वातमनुलोमयति CaraS. i. 26. 42; स्निग्धम् ... वातं चानुलोमयति CaraS. iii. 1. 24 (2) (1941 Ed); वातं मूत्रम् ... । अनुलोमयते शीघ्रं निरूहः साधु योजितः KāśyaS. 148B. 36; स्निग्धलघूष्णानि हि वह्निमीदर्यमुदीरयन्ति ... अनिलमनुलोमयन्ति AṣṭāSaṁ. i. 65. 17 (1. 10); लवणं शोधयेत्कायं मारुतं चानुलोमयेत् Hastyāyur. 675. 22 (4. 23); (pass.) to be regulated in downward direction वायुः ... । व्याप्नोति सर्वस्रोतांसि स ध(?घु)मो (मे) नानुलोम्यते BhelaS. 9. 1 (1. 6); **1Aii** to make to descend down, to send in right channel गर्भिणी व्याध्युत्पत्तौ ... मधुराम्लेनान्त्रोपहितेनानुलोमयेत् SuśruS. iii. 10. 67; **1B** to place (embryo) in the normal direction प्रतिलोमम् (गर्भम्) अनुलोमयेत् SuśruS. iii. 10. 10; **2** to rub over or along the hair (णिज् भवति) लोमान्यनुमार्ष्टि अनुलोमयति Jaine Vyā. 91. 5 (*on* ii. 1. 22); CāndraVṛ. *on* i. 1. 45; Kāśi Vṛ. *on* iii. 1. 25; ŚṛṅgāPra. 104. 27; Mugdha Bo. 21. 17 (134. 1); Prakri Kau. ii. 384. 8; Siddhā Kau. 451A . 9 (*on* iii. 1. 21); **3** to make propitious or favourable दुष्करमसमग्रसंदोह इव श्रेयसि मामनुलोमयिष्यति सामन्तनिवहः YaśasCam. ii. 70. 10 (comm. सानुकूलो भवति); (pass.) to be made propitious or favourable न त्वेव कार्यं नैराश्यमस्माभिर्विजयं प्रति। सुनीतैरिह सर्वार्थैर्दैवमप्यनुलोम्यते MahāBhā. viii. 6. 14; मन्त्रग्रामैः सुविहितैरौषधैश्च सुयोजितैः। यत्नेन चानुकूलेन दैवमप्यनुवर्तते (v. l. प्यनुलोम्यते) HariVaṁ. 47. 7.

अनुलोमयायिन् (anuloma-yāyin) *adj.* who goes along in the proper or right direction न ताड्यमानोऽप्यनुलोमयायी। ... शुभं न भर्तुस्तुरगोऽभिधत्ते BṛSaṁ. 93. 14; न ताड्यमानोऽप्यनुलोमयायी। ... शिवं न भर्तुस्तुरगो विधत्ते YogYā. 11. 15.

अनुलोमयितुम् (anulomayitum) *inf.* to cause to carry off disorders in the downward direction क्रूरकोष्ठस्तु दीप्ताग्निरनुलोमयितुं मलान्। तप्तं क्षीरं पिबेदूर्ध्वं चूर्णं भवति सुखं RasRaSa. 28. 70.

अनुलोमलिखित (anuloma-likhita) *adj.* written in the regular order चत्वार एते नेमिश्लोकाः ...। पुनरनुलोमलिखिताच्छ्लोकषोडशकाच्चैवमेवान्त्यमक्षरं त्रिषु लिखितेषु चतुर्थं भवति Kāvyānu. (He.) 269. 20.

अनुलोमलिपि (anuloma-lipi) *f.* a kind of script कतमां मे भो उपाध्याय लिपिं शिक्षापयसि ... संख्यालिपिं अनुलोमलिपिम् LaliVi. 10. 5 (6) [DBHS.]

अनुलोमवर्ण (anuloma-varṇa) *m.* class or caste of one born of a mother inferior in caste to the father, mixed or lower caste (मतशास्त्रैः) तैर्यदि द्वितीये जन्मनि प्रवेशिताः। समानवर्णेऽनुलोमवर्णे प्रतिलोमवर्णे वा ... जीवाः संक्रियन्ते PārāSū. 2. 7.

अनुलोमवर्णज (anulomavarṇa-ja) *adj.* born of a mixed or lower caste संस्कृतः समानवर्णजोऽनुलोमवर्णजो वा PārāSū. 3. 25.

अनुलोमवर्तिनी (anuloma-vartinī) *adj.* (*f.*) occurring or functioning in the progressive order कलापरिणतिर्द्विधा स्थिता। अणुवन्धवृत्तिरनुलोमवर्तिनी प्रतिलोमतः पुनरपोह्यते त्वया HarVi. 6. 139. (comm. एषा चानुलोमिनी सृष्टिक्रमेण प्रवर्तमाना)

अनुलोमवर्त्मन् (anuloma-vartman) *m.* [Inst.] in the normal, i.e. reverse direction (as of piercing) अभ्यगादगणितव्यथस्तथा कोऽप्यरिं कपियुवा जवोत्तरः। संविवेद न यथा विनिर्गतं कुन्तमन्तरनुलोमवर्त्मना RāmC. 29. 46.

अनुलोमवश (anuloma-vaśa) *m.* [Inst.] on account of being mixed caste सर्वास्वेव हि शुद्धासु जातिषु भुवीति अवतीर्णानामिति शेषः। शुद्धास्विति अनुलोमवशेन संस्कारवत्सु जातिषु AbhinBhā. ii. 376. 15 (*on* 17. 47)

अनुलोमवात (anuloma-vāta) *adj.* having favourable wind अदक्षिणामुखम् ... अनुलोमवातमनीकं स्वभूमौ व्यूहेत Arth Śā. iii. 119. 1 (10. 3) (comm. अप्रतिवातम्); *m.* favourable wind, cf. **अनुलोमवातादि.**

अनुलोमवातादि (anulomavātādi) *adj.* favourable wind etc. युक्ते च दैवे ... दृष्टस्वप्नदर्शननिमित्तेषु चानुगुणेष्वनुलोमवातादिषु ... प्रथमं योद्धुं गच्छेत् ManuBh. ii. 59. 15 (*on* 7. 197)

अनुलोमविधान (anuloma-vidhāna) *n.* arrangement of mixed caste अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम्। अनुलोमविधानं च प्रतिलोमविधिं तथा AuśaSm. 1.

अनुलोमविलोम (anuloma-viloma) *adj.* [*f.* -ā] which is (read) in regular and reverse orders अनुलोमविलोमस्य मनोर्मध्ये स्वनाम च। प्रयोजनं चाप्युच्चार्य जपेत् ĪśānŚiPa. i. 29. 13; वाक्कामशक्तयोऽनुलोमविलोमाः पुनरनुलोमाः इति श्रियोऽङ्कवाला Paraśu KS. 10. 29 (263. 7) (comm. वाक् ऐं कामः क्लीं, शक्तिः सौः। इमाः प्रथमं क्रमेण पठित्वा पश्चात् विपरीतं पठित्वा पुनः क्रमेण पठेत्)

अनुलोमविलोम (anuloma-viloma) *m.* **1** natural and reverse orders अनुलोमविलोमौ च बाह्याभ्यन्तरसंपुटे बाह्याभ्यन्तःपरावृत्तौ तथा व्याकीर्णमित्यपि कर्णिकायाम् ... संलिख्य सर्वतः योजयेत् Tantr Rā. 25. 35; [Inst.] in regular and reverse orders अनुलोमविलोमेन मूलमन्त्रं केवलं न्यसेत् Ṣo U. 472. 14; अनुलोमविलोमेन वर्णाद्वर्णस्य वै पुनः। संख्या संज्ञा च या सम्यक् सामान्या सा महामते JayāS. 6. 58; LakṣmīT. 25. 28; (नरः) अनुलोमविलोमेन प्रजपन्मात्रिकाक्षरैः BrahmāṇḍP. iii. 41. 25; Tantr Rā. 1. 64; अनुलोमविलोमाभ्यां गणयेन्मन्त्रवित्तमः KulārT. 15. 49; अनुलोमविलोमाभ्यां सौम्याग्नेयी निगद्यते LakṣmīT. 29. 30; नवकाष्ठविभागेन विद्यामेदं च विन्दति। अनुलोमविलोमेन समस्तव्यस्तयोगतः AgniP. 311. 2; अनुलोमविलोमेन प्रोक्ता संप्तसरस्वती ŚaktiSaṁT. iii. 20. 2; [Inst.] in natural and reverse orders ततः पश्येत् पितामहम्। अनुलोमविलोमाभ्यां तथा व्यस्तसमस्तयोः PadmP. v. 18. 238; **1B** successive and reverse orders, cf. **अनुलोमविलोमम्**; **2A** [Inst.] in the normal and opposite direction अनुलोमविलोमाभ्यां संचारं वापिकाजले। तन्वाना सततं तारा कक्ष्यामेनां हि रक्षति BrahmāṇḍP. iii. 35. 24; **2B** [Inst.] in normal or regular (i.e. anticlockwise) and retrograde direction दक्षिणायनादनुलोमविलोमाभ्यां षट्त्रिंशद्विरंशकेरुत्तरमध्यमोत्तमध्यममध्यमदाक्षिणदाक्षिणाः पञ्च मार्गा भवन्ति Adbhu Sāg. 137. 15; **2C** [Inst.] in downward and upward prescribed directions अनुलोमविलोमेन देहेऽधिष्ठाप्य कर्तरीम्। मुद्रया मुद्रयेताम् Rasā. 12. 209; **3** one born of mother inferior in caste to the father and one born of mother superior in caste to the father; cf. **अनुलोमविलोमतस् 2.**

अनुलोमविलोमका (anulomavilomakā) *f.* a type of *cārī* which has movements in forward and backward directions चारी त्रिकोणचारी ...। स्वस्थाने स्थापितपदा ततस्तत्रापि कुट्टिता। तदा निगदिता सद्भिरनुलोमविलोमका Nṛtyā. 1126.

अनुलोमविलोमगा (anulomaviloma-gā) *adj.* (*f.*) (*cārī*) which has movements in forward and backward directions चारी त्रिकोणचारी चेदनुमलोमविलोमगा। ... तदा निगदिता सद्भिरनुलोमविलोमका Nṛtyā. 1126; त्रिकोणचारी या चारी त्वनुलोमविलोमगा NṛtyaK. ii. 3. 19.

अनुलोमविलोमज (anulomaviloma-ja) *adj.* born of a mother who is inferior in caste to the father and born of a mother who is superior in caste to the father आचण्डालं तु संकीर्णा अनुलोमविलोमजाः KalpaK. 202. 2.

अनुलोमविलोमतस् (anulomaviloma-tas) *adv.* **1A** in the regular and contrary (i.e. vertical and horizontal) directions कोणेषु अनुलोमविलोमतः। पातयेत्तेषु सूत्राणि चतुरस्रप्रसिद्धये MaliniT. 9. 5; **1B** in the regular, i.e. forward and backward directions अशीतिगुडसंमिश्रमेकस्मिन् योजयेद् घटे। करेण भ्रामयेत्सम्यगनुलोमविलोमतः KulārT. 5. 19; **2** in the order wherein mother is inferior in caste to the father and mother is superior in caste to the father पृथग्वर्णाः ...। पर्यायेण समुत्पन्नाः ह्यनुलोमविलोमतः SkandP. v (iii). 122. 7.

अनुलोमविलोमम् (anulomavilomam) *adv.* in successive and in reverse orders समाधिं स समापद्य ...। अनुलोमविलोमं च प्रतीत्योत्पादमीक्षते AbhisaAlaṅ. 5. 23.

अनुलोमविलोममार्ग (anulomaviloma-mārga) *m.* [Inst.] in the method of (working in) regular and reverse orders गुणयेद्गुणेन गुण्यं कवाटसंधिक्रमेण संस्थाप्य। राश्यर्धखण्डतत्स्थैरनुलोमविलोममार्गाभ्याम् GaṇiSāSaṁ. 1. 1.

अनुलोमविलोमरीति (anulomaviloma-rīti) *f.* [Inst.] in the method of regular and reverse orders वर्णाः ... पञ्चाशच्छक्तिभिः ... अनुलोमविलोमरीत्या शतसंख्याभिस्ताभिर्दशवारं दलेषु स्थिताभिः परिवृताः Lalitā Sa Bh. 120. 23 (*on* 160)

अनुलोमविलोमविवर (anulomaviloma-vivara) *m.* distance or intermediate space between (two planets moving in) the regular and opposite directions भुक्त्यन्तरयुतिभाजितमनुलोमविलोमविवरमाप्तदिनैः Khaṇḍ Khā. 8. 3.

अनुलोमविलोमसंकरस्त्री (anulomavilomasaṅkara-strī) *f.* woman of mixed caste born either of a mother who is inferior in caste to the father or born of a mother who is superior in caste to the father ब्राह्मणादिति अनुलोमविलोमसंकरस्त्रीपुत्तमवर्णजनितमेतत्कुलम् ManvaVi. 1288. 2 (*on* 10. 15)

अनुलोमविलोमा (anulomavilomā) *f.* a type of *cārī* which has forward and backward movements त्रिकोणचारी या चारी त्वनुलोमविलोमगा। स्वस्थाने स्थापितपदा ... सानुलोमविलोमाख्या चारीयं परिकीर्तिता NṛtyaK. ii. 3. 19.

अनुलोमविलोमाकृति (anulomavilomākṛti) *f.* form produced in regular and reverse orders अष्टोत्तरशतानुलोमविलोमकृतिक्रमेण देवतां व्यापयेत् ṢoU. 472. 16.

अनुलोमविलोमिका (anulomavilom-ikā) *adj.* (*f.*) having regular and reverse orders वर्णमाला समाख्याता अनुलोमविलोमिका TantrSā. (K.) 19. 11.

अनुलोमविवर (anuloma-vivara) *m.* intermediate space between the planets moving in the regular direction भक्ते विलोमविवरे गतियोगेनानुलोमविवरे द्वे। ... द्वियोगकालावतीतैष्यौ Āryabh. 2. 31 (46)

अनुलोमविवाह (anuloma-vivāha) *m.* marriage with a woman inferior in caste to a man, marriage in regular gradation येऽनुलोमविवाहोत्पन्नाः क्षत्रादयो मूर्धावसिक्तादयस्तेषाम् ... आशौचं विभक्तानां मातृजातीयम् BālamBha. iii. 72. 9 (*on* 3. 22)

अनुलोमविषय (anuloma-viṣaya) *adj.* referring to one born of a mother inferior in caste to the father राजसूयस्य त्रैवर्णिककर्तृकत्वेन ब्राह्मणादेः प्राप्तत्वाच्च। ... ब्राह्मणादिकर्तृकत्वे निमित्ते मध्ये ...°पञ्चहविष्कैकेष्टिप्रयोगो राजसूयान्तर्गतो विधीयते प्रत्येकप्रयोगाश्च पश्चानुलोमविषया इति बोध्यम् Bhāṭṭ Dī. i. 144. 10 (*on* ii. 3. 2)

अनुलोमव्यवाय (anuloma-vyavāya) *m.* sexual intercourse with a woman inferior in caste (प्रायश्चित्तम्) अनुलोमव्यवाये गर्भे द्विगुणं यदि सा अतिदूषिता न प्रतिलोमगा भवति तदैव Mitā. 463. 4 (*on* 3. 265)

अनुलोमव्यावृत्ति (anuloma-vyāvṛtti) *f.* exclusion (of qualifications) in the successive order अभिव्यक्तिप्रागभावस्य विषयावरणत्वं प्रकाशविरोधित्वम्, न तु प्रतिबन्धकत्वम्। इत्यनुलोमव्यावृत्तिः ŚrutaPra. iB. 11. 15 (*on* i. 1. 1)

अनुलोमशकुन्त (anuloma-śakunta) *adj.* having the birds in the regular direction संभृतलोमशकुन्ता राक्षसघाताय तेऽनुलोमशकुन्ताः (युधिष्ठिराद्याः)। प्रययुर्जायान्तः Yudhi Vi. 5. 2.

अनुलोमशवस्पृष्टि (anulomaśava-spṛṣṭi) *f.* touching of the dead body of one born of a mother inferior in caste to the father अनुलोमशवस्पृष्टौ सम्प्रोक्षणमथाचरेत् Pāra S. 19. 400.

अनुलोमशस् (anulomaśas) *adv.* in the proper order पूज्यो नृपश्रेष्ठ: प्रथमं वाचको बुधैः। ... हेमन्ते लोमशा देयाश्छत्रं प्रावृषि सत्तम। उपानहौ काल्योग्ये काले चैवानुलोमशः BhaviP. 315 A. 26 (i. 216. 153)

अनुलोमशुक्र (anuloma-śukra) *adj.* having auspicious or propitious Venus व्यूहः कृतपृष्ठदिवाकरः। तथानुलोमशुक्रो वा दिक्पालबुधमारुता योधानुत्तेजयेत्सर्वान् Viṣṇu DhaP. ii. 177. 50.

अनुलोमषट् (anuloma-ṣaṭka) *n.* group of six (types of) mixed castes (born of mothers inferior in caste to the fathers) असवर्णोत्पन्नाश्च द्वादशभेदाः। अनुलोमषट्कप्रतिलोमषट्कभेदात् BālamBha. i. 280. 3 (*on* 1. 90)

अनुलोमषट्कर्मन् (anuloma-ṣaṭkarman) *n.* six types of duties of (six) mixed castes (born of mothers inferior in caste to the fathers) वस्तुतस्तान्यपि जात्यन्तराणीति ...। अनेनैव प्रकारेणोत्पन्नानां स्त्रीणामनुलोमजानामिमान्येव नामानि षट्कर्माणि च यथा मूर्धावसिक्तानाम् ...। इत्यनुलोमषट्कर्माणि Bālam Bha. i. 286. 25 (*on* 1. 94)

अनुलोमसंकर (anuloma-saṅkara) *m.* mixed caste of one born of a mother inferior in caste to the father ब्राह्मणादुग्रकन्यायामाभीरः। नृपाच्छूद्रायामुत्पन्नोग्रजातिकन्या। अत्रानुलोमसंकराणां मातृजातिवृत्तित्वात् LaŚabdeŚe. i. 369. 7.

अनुलोमसंनिविष्ट (anuloma-sanniviṣṭa) *adj.* entered or penetrated in the normal, i.e. reverse direction (as of piercing) (शल्यानि) शुद्धदेहानामनुलोमसंनिविष्टान्युपरुह्यन्ते AṣṭāSaṁ. i. 181. 8 (1. 37)

अनुलोमसमीरण (anuloma-samīraṇa) *adj.* having favourable wind (विशांपतिः) ऐक्षिष्ट ... अनुलोमसमीरणम (च्विं) प्रतिलोमप्रभञ्जनम् ... अरातिसैन्यम् AvantiKa. 100. 17.

अनुलोमसंभाषा (anuloma-sambhāṣā) *f.* favourable, i.e. friendly discussion or conversation ज्ञानविज्ञानवचनप्रतिवचनशक्तिसंपन्नेन ... संधायसंभाषा... स्यात्। इत्यनुलोमसंभाषाविधिः CaraS. iii. 8. 17 (1941 Ed.)

अनुलोमसुख (anuloma -sukha) *adj.* favourably pleasant अनुलोमः सुखो(v.l. अनुलोमसुखो) वायुरनुसारयतीव माम् Rāmā. iii. 1357* (4)

अनुलोमस्त्रीगमन (anulomastrī-gamana) *n.* sexual intercourse with a woman inferior in caste पञ्चशतमात्रानुकर्षं तु वैश्यक्षत्रियायोः प्रतिलोमानुलोमस्त्रीगमने नैय्यायिकं दण्डवैषम्यमुक्तं न स्यात् DaṇḍaVi. 168. 15.

अनुलोमा (anu-lomā) *f.* **1** woman of lower caste than that of a man with whom she is connected समानवर्णासु पुत्राः सवर्णा भवन्ति। अनुलोमासु मातृसवर्णाः Viṣṇu Sm. 16. 2; सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः YājñaSm. 2. 288; इच्छन्तीष्वनुलोमासु अभिगमनार्थं हरणे न दोषः DīpKa. 72. 29 (*on* 2. 288); असवर्णानुलोमासु जातानां सुतरामसंस्कार्यत्वमुक्तं भवति VīraMi. (Saṁskāra.) 397. 16; **2** (anulomā) name of a goddess ख काली क कुलाम्बी अनुलोमा द पिण्डिनी AgniP. 146. 10 [particular (magical) charm, spell, pw.]

अनुलोमाक्षेप (anulomākṣepa) *m.* abusing or defaming of a lower caste (by an upper caste) अनुलोमाक्षेपे दण्डमाह मनुः Dīp Ka. 65. 13 (*on* 2. 207)

अनुलोमागुप्तदास्यादि (anulomāguptadāsy-ādi) *adj.* mixed caste and unprotected maid-servant etc. (पारदारिकचौरौ च मुञ्चतो दण्ड उत्तमः) अनुलोमागुप्तदास्यादिगामी च पारदारिकस्त्वप्यन्ते Daṇḍa Vi. 336. 5.

अनुलोमाङ्गीकृति (anulomāṅgīkṛti) *f.* following of the descending order(of castes) कुर्वीत ... छत्रोपमं मस्तकम् ... विप्रादिवर्णक्रमात्। भेदाः सर्वसमांशकप्रभृतयो नाहप्रभेदान्वितास्तेऽप्येतत्क्रमतः स्युरेतदनुलोमाङ्गीकृतिश्चेष्यते ŚilpaRa. ii. 2. 113.

अनुलोमादि (anulomādi) *adj.* **1** person born of a mother inferior in caste to the father or person of mixed caste and so on वर्णेतरा अन्तरप्रभवा अनुलोमादयः BālaKrī. i. 6. 13(*on* 1. 1); स्त्रियं वाप्यनुलोमादीन् स्पृष्ट्वा वा भूमिमाशुचीन्। आचरेत् स्नानम् ĪśānŚi Pa. i. 9. 61; ii. 3. 97; **2** (the word) *anuloma* etc. अनुलोमादिशब्दा अनुकूलादौ रूढाः BālamBha. i. 276. 2 (*on* 1. 90)

अनुवच् (anu-vac-) II. P. [Jaine Vyā. 111. 35 (*on* ii. 2. 90); ŚākaṭāVyā. i. 4. 81; KāśiVṛ. *on* iii. 2. 109] **1** to utter or to recite (a formulae etc., sometimes for invoking the deity to the sacrificial ceremony) (pass.) to be recited (*caus.*) to cause to recite **2A** to recite after (the teacher), to learn or study (pass.) to be recited after (the teacher), to be learnt or studied (*caus.*) to cause (one) to recite after (the teacher), to make (one) learn or study (the Veda) **B** to recite for (a student), to teach (pass.) to be taught **C** to restate, to reiterate (what is already known) **D** to repeat (*caus.*) to cause to repeat **3A** to speak favourably for **B** to narrate, to describe **C** to state (pass.) to be stated (*caus.*) to cause to state or read (loudly) **4** to shout at **5A** to speak with, to converse, **B** to speak after, to reply **6A** to propound, i.e. to proclaim **B** to command **1** to utter or to recite (a formulae etc., sometimes for invoking the deity to the sacrificial ceremony) दुध्रन्वे वा यदीमनु वोचद्ब्रह्माणि ṚV. ii. 5. 3; श्रेष्ठतामश्नुते स किल्बिषं भवति तस्मादाहुर्मानुवोचः AitBr. 3. 2 (56); उदगासीन्म इत्युद्गात्रेऽन्ववोचत् AitBr. 25. 9 (673); यत्र तिष्ठन् प्रथमामन्ववोचत् तत् स्थित्वा ... यथावसथमभ्युपेयात् KauṣīBr. 9. 4 (43. 2); ŚāṅkhāŚS. v. 13. 11; न मयाभागयानुवक्ष्यथेति वागब्रवीत् TaiBr. III. iii. 8. 6; अथैनं शृण्वन्त्यसावन्ववोचतेति तद्धै स जायते ṢaḍviBr. i. 3. 16; यदाहुतिमनुविषे ṢaḍviBr. i. 6. 16; ताभ्यां ह श्रध्दाय तेनाश्वस्य शीर्ष्णानूवाच JaimiBr. 3. 126; क इदमनुवक्ष्यति स इदमनुवक्ष्यति समाप्य सामिधेनीरन्वाह ĀśvaŚS. I. i. 2. 1; अभयं नो अस्तु प्राजापत्यमनुवक्ष्यामि ŚāṅkhāŚS. i. 4. 5; BaudhŚS. i. 99. 2; ĀpaŚS. xxiv. 11. 2; यत्र चासीनः प्रथमामन्ववोचत्तत् स्थित्वोत्सृज्यते ŚāṅkhāŚS. iii. 14. 14; पराङेवर्ग्मियः होतानूवाच BaudhŚS. ii. 406. 5; (ब्राह्मणः) त्र्यहं युष्माभिर्न प्रत्याख्येयो यः कश्च सावित्रीं अनूच इति VādhūŚS. iii. 92. 3; यदेकैकस्यै पुरोऽनुवाक्यया अन्ववोचः VādhūŚS. iv. 6. 3; यत्रैनमामन्त्रयते ब्रह्मन् सामिधेनीरनुवक्ष्यामि इति तत् प्रस्तौति हिं प्रजापतेऽनुब्रूहि यज्ञम् BhārŚS. iii. 17. 1; HirŚS. ii. 8. 16 (258. 19); xxi. 1. 8 (676. 9); उपप्रेष्य होतर्हव्या देवेभ्य इति संप्रेष्यत्यध्रिगुं होतानुवक्ति VaikhāŚS. 10. 12; (pass.) to be recited पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम् TaiS. II. v. 2. 5; II. v. 8. 4; अथात्राग्नेयी प्रथमानूच्यते MaiS. iii. 10. 1 (iii. 130. 9); एतद्धि संवत्सरस्य संक्रमणतरं यत्पञ्चदश सामिधेनीरनूच्यन्ते KāṭhS. 9. 1 (i. 104. 8); KapiKaS. 8. 4 (83. 4); स एतत्सूक्तमपश्यत्तेनैनानशमयद्यदेतदनूच्यते शान्त्यै KāṭhS. 10. 11 (i. 139. 15); 12. 4 (i. 166. 11); तस्मादेतेषु कर्मस्वष्टा-वष्टावनूच्यन्ते AitBr. 3. 1 (52); 30. 9 (794); तस्मात्सप्त चतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्ते TaiBr. I. v. 9. 8; सोऽएषा मीमांसैव न त्वेवैता अनूच्यन्ते ŚatBr. I. iii. 5. 12; ŚatBr. (K.) II. iii. 3. 8; दीक्षायै तपसेऽग्नये स्वाहेति। अन्वेवैतदुच्यते नेत्तु हूयते ŚatBr. III. i. 4. 8; सधिष्टवाप्सु मे सोमो अब्रवीदित्यनूच्येत VaikhāŚS. 16. 25; प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमम् BhāgP. vii. 5. 22; (*caus.*) to cause to recite ब्रह्मानुवाचयति ŚāṅkhāŚS. xvi. 13. 15; अथ यजमानमेवानुवाचयति VādhūŚS. vi. 11. 4; वाजिभ्योऽनुवाचयति KātyŚS. iv. 4. 15; **2A** to recite after (the teacher), to learn or study अनन्ता वै वेदाः। एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः TaiBr. III. x. 11. 4; अथैनं शृण्वन्त्यसावन्ववोचतेति तद्धै स जायते ṢaḍviBr. i. 3. 16; न न्वै वयमग्निहोत्र इतिं च गतिं चानूचिमहे JaimiBr. 1. 25; तस्माद् उ ह यस्माद् एवानुब्रु (ब्र)वीत, तं ब्रूयाद् - अमुष्माद् अन्ववोच इति JaimiBr. 3. 77; ते हेमे बहु जप्यस्य चान्यस्य चानूचिरे प्राचीनशालिश्च जाबाली च JaimiUBr. iii. 7. 3; आर्या ब्रह्मानूचुर्नाम गृणन्ति ये ते BhāgP. iii. 33. 7; (pass.) to be recited after (the teacher), to be learnt or studied सर्वेभ्यो वै वेदेभ्यो सावित्र्यनूच्यत इति हि ब्राह्मणम् HirŚS. xxvi. 1. 10 (4. 12); ĀpaDS. i (1). 1. 9; (*caus.*) to cause (one) to recite after (the teacher), to make (one) learn or study (the Veda) प्रत्यङ् आसीनाय अनुवाचयति गायत्रीम् MānGS. i. 22. 13; व्रतं प्रदायादितो द्वावनुवाकावनुवाचयेत् MānGS. i. 23. 3; i. 23. 15; VārāGS. 7. 3; सावित्रीमनुवाचयेत् DrāhyGS. iii. 2. 17; वाससाच्छादनं कृत्वा गायत्रीमनुवाचयेत् LaghvāśvaSm. 10. 31; **2B** to recite for (a student), to teach आरुणये ब्रह्मवर्चसकामाय तक्षानूवाचाग्निर्वर्चः ŚatBr. II. iii. 1. 31; (सार्ञ्जयम्) एतं च यज्ञमनूचे ŚatBr. II. iv. 4. 4; अथाश्वस्य शिर आहृत्य तत्ते प्रतिधास्यावस्तेन नावनुवक्ष्यसि ŚatBr. XIV. i. 1. 23; BṛĀraU. ii. 5. 16; तद् यद् दध्यङ् आथर्वणोऽन्वपश्यत् तं तद् गच्छतम्। स वां तद् अनुवक्ष्यति JaimiBr. 3. 126; यत्तिसृणां प्रातरन्वाह यद् द्वयोः यदेकस्याः संवत्सरे द्वादशाहे षडहे त्र्यहे वा तस्मात्सद्योऽनूच्येति श्रुतिः MānGS. i. 22. 15; अन्ववोचन्नामिष्यन्तः कृपया दीनवत्सलाः BhāgP. i. 5. 30; आचार्यः यस्मै माणवकाय अन्वाह अनुवक्ति BṛĀraUBh. 730. 15 (*on* v. 14. 6); ज्योतिर्ज्ञानस्य बीजानि सोऽन्ववोचद्विदांवरः (सन्मतिः) MahāP. 3. 87; शब्दोऽहमिति दोषाय नात्मन्येष तथैव तत्। इति वा भरतः कस्य दोषस्याभावमन्ववक् SiddhāSi. iii. 175. 10; (pass.) to be taught सोऽयं परोऽवरं यज्ञोऽनूच्यते पितेव पुत्राय ŚatBr. I. vi. 2. 4; ŚatBr. (K.) II. v. 4. 5; येषां द्विजानां सावित्री नानूच्येत यथाविधि ManuSm. 11. 190; ViṣṇuSm. 54. 26; गर्भाष्टमात्प्रभृति यावत्षोडशवर्षं ब्राह्मणस्य सावित्री नानूच्येत (त्रीन् कृच्छ्रांश्चारयितव्यः) ManuBh. ii. 431. 15 (*on* 11. 191); **2C** to restate, to reiterate (what is already known) यत्स्रुवमभिपूरयति स्रुचं तदभिपूरयति तां पूर्णां जुहोत्यन्वेवैतदुच्यते सर्वास्त्वेव हूयन्ते ŚatBr. III. i. 4. 22; (श्रुतिः) विधत्ते नु वक्तीति (? विधत्तेऽनुवक्तीति) चैतद्विरुद्धम् SaṁkṣeŚā. 1. 533 (i. 381. 23) (comm. ज्ञातमर्थं बोधयति); कस्ते जगत्कम्पकरस्य कम्प। इत्यादिकं राक्षसचारणानां चाटूदितं कर्णपथं निनाय (रावणः)। नीचैरनूचुः सचिवास्तदैव गर्भीकृतारिप्रणतिप्रकाराः RāmC. 23. 22; मन्त्रब्राह्मणयोर्यद्वा कलहो विनियोजने। न मन्त्रलिङ्गासिद्धार्थमनुवक्तीतरद्यतः NyāyMāVi. 27. 3 (*on* i. 2. 4); **2D** to repeat अनुवक्ति निषेधवाक्यं द्वैतोपमर्दम् SaṁkṣeŚā. 1. 257 (i. 197. 17); (*caus.*) to cause to repeat पुण्याहं स्वस्त्यृद्धयन्तं प्रत्येकं त्रिधा त्रिधा यथाविभक्तिवाचितमनुवाचयेयुः VaikhāGS. 1. 7; **3A** to speak favourably for स प्रजापतिर्मनसऽएवानुवाच ŚatBr. I. iv. 5. 11; **3B** to narrate, to describe (श्वेतकेतुः) स किल तथैवास यथा म एनमनूचुः JaimiBr. 2. 329; यथावदनुवक्ष्यामि शृणुध्वमृषिसत्तमाः MatsyaP. 274. 16; तेऽन्ववक्ष्ये प्रसंख्याय योजनैस्तन्निबोधत BrahmāṇḍP. i. 21. 80; **3C** to state यन्मया इत्थमवेदिष्याम हस्ती नः सान्नाय्यं पातेति, अन्वस्य प्रायश्चित्तिमवक्ष्यामहि VādhūŚS. ii. 13. 4; स तथेयुषेनाशुष आश्वदत्त द्रविणान्यनूचानकुलाय वीरः। न यथाभ्यगाद्याचितुमन्ववग्वा न यथा यया नाश तदन्यगेहे DvyāśraKā. 12. 2; (pass.) to be stated अन्तर्मुख एव मौनयुक्तेन प्राप्यते संभाष्यानूच्यते BaudhDS. ii. 10. 57; (*caus.*) to cause to state or read (loudly) (शम्बरः) कार्यलेखम् ... अनुवाचयति तावत् ... सुग्रीवपरिवारकम् ... गोचरीकृत्य तिरोभवता मया वञ्चितोऽयं जरद्भल्लूकः AdbhuDa. 2. 0 (4); **4** to shout at, cf. **अनुवाच्यमान**; **5A** to speak with, to converse, cf. **अनुवचन 3A**; **5B** to speak after, to reply, cf. **अनुवचन 3B**; **6A** to propound, i.e. to proclaim, cf. **अनुवचन 4A**; **6B** to command, cf. **अनुवचन 4B** [to concede the point, to assent to, to yield, to name, to call (*caus.*) to read to oneself (before reading aloud), APTE]

अनुवचन (anu-vácana) *n.* [Alt Gr. II. 2. 194; enumerated in the *anupravacanādi gaṇa*, GaṇPā. 7. 8; JaineVyā. 233. 7 (*on* ii. 4. 104); KāśiVṛ. *on* v. 1. 111; also enumerated in the *utthāpanādi gaṇa*, CāndraVyā. iv. 1. 132; GaṇRa. 6. 366 (397)] **1A** recitation (of formulae etc.) **B** subsequent expression (i.e. Vedic knowledge) **C** recitation of texts in conformity with injunction or call (*praiṣa*) **D** subsequent recitation **2A** recitation after (the teacher), study, learning **B** teaching, expounding, lecture **C** restatement or reiteration **D** repetition **3A** speaking with, conversation, communication **B** speaking after, i.e. replying **4A** propounding, i.e. proclaiming (right course of conduct) **B** royal command **5** (the word) *anuvacana* **1A** recitation

(of formulae etc.) शुद्ध एव प्रणवः स्याच्छस्त्रानुवचनयोर्मध्ये KauṣīBr. 11. 5 (50. 23); GopBr. ii. 3. 11 (198.9); ŚāṅkhāŚS. vi. 1. 40; न ह वा ऋक्छस्त्रेण यातयामा भवति नानुवचनेन KauṣīBr. 22. 1 (97. 4); अथ कश्चिच्छस्त्रेऽनुवचने वा प्रमत्त उपहन्यात् ... इति मीमांसन्ते KauṣīBr. 26. 3 (121. 3); 26. 5 (122.8); त्रिरेव प्रथमां त्रिरुत्तमामन्वाहानुब्रूयात्। ... एतमेवास्मिन्नेतत् संततमव्यवच्छिन्नं दधात्येतदनुवचनम् ŚatBr. I. iii. 5. 13; त्रेधा विहित उ वा अयं प्राणः प्राणमेवास्मिन्संततमव्यवच्छिन्नं दधात्येतदेवानुवचनम् ŚatBr. (K.) II. iii. 3. 9; त्रिरनुवचनेनार्धर्चसंतानो विद्यत एकर्पित्यात् ĀpaŚS. xxiv. 11. 14; आसीनो यूपायाज्यमानाय प्रेषितोऽञ्जन्ति त्वामिति तृतीयस्यानुवचनस्यार्धर्चे काङ्क्षेत् MānŚS. 132. 7; अपि वानुवचनेऽनुवचनेऽपानितुत्तमेऽनुवचनेऽग्न आयाहि वीतय इत्येतस्या अर्धर्चेऽपानित्येवमितरासु पूर्वस्याश्चोत्तरमुत्तरस्याश्च पूर्वमर्धर्चौ संदधाति HirŚS. xxi. 1. 12 (679. 18); व्याहृतीः सावित्रीं चानुब्रूयात्। एवं काण्डानुवचनेषु VārāGS. 5. 25; संततमुत्तरमर्धर्चमालभेतेत्युत्तमेनानुवचनेन आनन्तर्यात् संतानम् SaṅkarKā. (AOR. Ed.) iv. 1. 7; अनुवचनानां च क्रियात्मकत्वात् ... प्रकरणग्राह्यत्वेन तद्विरोधोदाहरणत्वम् TantrVā. 854. 12 (on iii. 3. 14); सामिधेन्योस्त्रिर्वचनात्पौनरुक्त्यम्, सकृदनुवचनेन तत्प्रयोजनसंपत्तेः अनर्थकं त्रिर्वचनम् NyāyMañ. i. 249. 31; द्यावापृथिव्योर्हविर्धानत्वात्तदीयस्य तृचस्यानुवचनं युक्तम् Sāy. on AitBr. 5. 3 (125); PūrvottaVāNaMā. 196. 3; MīmāKau. ii. 202. 2 (on iii. 1. 21); अर्थप्रतिपत्तिलक्षणकार्यार्थमनुवचनं त्रिरभ्यासोऽपि तदर्थः MayūMāli. 590. 3 (on ix. 1. 10); 712. 19 (on x. 4. 21); 713. 2 (on x. 4. 22); **1 B** subsequent expression (i.e. Vedic knowledge) इति त्रिशङ्कोर्वेदानुवचनम् TaiĀ. vii. 10. 1 (732. 4); TaiU. 1. 10; अक्षितोऽक्षीणरूपत्वाद् वेदानुवचनं त्विदम् TaiUBhāVā. 34. 21 (1); **1C** recitation of texts in conformity with injunction or call (*praiṣa*) अनुवचनप्रैषयाज्यासु नित्योऽध्वर्युतः संप्रैषः ĀśvaŚS. I. v. 5. 13; ŚāṅkhāŚS. v. 16. 3.; प्रैषानुवचनं मैत्रावरुणस्योपदेशात् MīmāSū. iii. 7. 43; किं सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्यादुत यत्रानुवचने प्रैष इति ŚabaBh. 1106. 17 (on ii. 7. 43); प्रैषेषु ह्यसावध्वर्युविकारः। अनुवचनेषु होतुः ŚabaBh. 2032. 3 (on x. 7. 19); वेदा[न] (read नु)वचनेन यथा EI. xii. 324. 22; प्रकरणात्तदर्थं प्राप्तं प्रैषानुवचनयोर्निर्दिश्यते ṬupṬ. 26. 5 (on iv. 2. 18); 141. 17 (on vi. 5. 20); आद्योऽस्तु वचनात्मैवं साहित्योक्त्युपलम्भनात्। प्रैषानुवचने यत्र सहिते तत्र बाधनम् NyāyMāVi. 202. 15 (on iii. 7. 21); एवं चाश्वरशनाग्रहणातैषानुवचनशंय्विडान्ताङ्गकलापादिकमपरं च राशिं कृत्वा ... अभिधातव्यम् VidhiRa. 20 (114. 5); (सन्ति च) केवलान्यनुवचनानि BhāṭṭDī. ii. 57. 4 (on iii. 7. 22); i. 326. 17 (on iii. 4. 9); अनुवचने समानकालीनत्वसंबन्धेनान्वयात् LaCandr. 445. 27; **1D** subsequent recitation, cf. अनुवचनत्व A; **2A** recitation after (the teacher), study, learning तमेतं वेदानुवचनेन विविदिषन्ति ŚatBr. XIV. vii. 2. 25; BṛĀraU. iv. 4. 22; ŚāṅkhāĀ. 13. 1 (47. 1); वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः। ... ज्ञानहेतवः YājñaSm. 3. 190; वेदानुवचनं वेदाध्ययनं गुरुवचनमनु पश्चाद्वचनम् Aparā. 1018. 19 (on 3. 190); अनुवाक्यमनुवचनं तद्विहीना अननुवाक्या ज्ञानरहिता इत्यर्थः Smṛti Can. ii. 412. 11; वेदस्यानुवचनमध्ययनम् VīraMi. 898. 19 (on 3. 190); BālamBha. iii. 112. 29 (on 3. 190); **2B** teaching, expounding, lecture एतानि वै पञ्चाग्नीयानि पुरा सावित्र्यनुवचनादाचार्यो ब्रह्मचारिणि निदधाति Kāṭhakasaṅkalana 50. 8; अथ त्रिरात्रसंवत्सरयोः सावित्र्यनुवचनस्य विधानं वक्ष्यते KauṣīGS. ii. 4. 1; वेदानुवचनाद्य GautDS. i. 1. 11 (comm. अध्यापनम्); ब्रह्मानुवचने चाद्यन्तयोः GautDS. i. 2. 54; अनुवचनमध्यापनं कृत्स्नाङ्गस्य वेदस्य ManuBh. i. 154. 20 (on 2. 154); अनुवचनेनैतेऽपि गुणा लक्ष्यन्ते यतोऽननुवक्तृर्यथाभावादेवावासः सिद्धः ManuBh. i. 196. 20 (on 2. 242); ब्रह्म वेदः अनुवचनमध्यापनम् Aparā. 55. 6 (on 1. 26); वेदस्यानुवचनं कृतवान् अनूचानः SiddhāKau. 509 B. 6 (on iii. 2. 109); **2C** restatement or reiteration विधिविहितस्य अनुवचनम् अनुवादः NyāySū. ii. 1. 66; **2D** repetition, cf. अनुवचनमात्र 1; **3A** speaking with, conversation, communication संबोधनमनुवचनाय ŚabaBh. 1654. 3 (on ix. 1. 9); **3B** speaking after, i.e. replying अत्रान्तरे समागतेन दुर्वाससा लक्ष्मणस्य वचनानुवचनम् MahāN. 9. 139 (1); **4A** propounding, i.e. proclaiming (right course of conduct) आदाने विसर्गे ... अनुवचने ... सदा युक्तस्तेनाष्टंगतिको नृपः। ... इत्यौशनसौ श्लोकौ। ... असत्प्रवृत्तिनिषेधश्च 'अनुवचनम्' ManuBh. ii. 45. 8 (on 7. 154); **4B** royal command प्रचेता आह आदाने च विसर्गे च ... अनुवचने ... युक्तः ... राजा VīraMi. (Rājanīti.) 159. 20; अनुवचनं कार्यसंदेहे राजाज्ञा Vīrami. (Rājanīti.) 160. 2; 317. 21; **5** (the word) *anuvacana* अनुवचनशब्दाभिधेयस्य जपकार्यस्यैकत्वाद्विकल्पः NyāyMāVi. 695. 22 (on xii. 4. 1) [reading, a chapter, a section, MW.]

अनुवचनकरण (anuvacana-karaṇa) *n.* act of recitation of texts in conformity with injunction or call (*praiṣa*) अतोऽध्वर्युहोतृसंस्कारार्थत्वाद् भक्षस्य मैत्रावरुणे प्रैषकरणादध्वर्युकार्यमनुवचनकरणाच्च होतृकार्यं कुर्वाणेऽस्ति प्राप्तिः ŚāstrDī. 760. 2 (on x. 7. 6)

अनुवचनकर्तृ (anuvacana-kartṛ) *adj.* who performs the recitation of texts in conformity with injunction or call (*praiṣa*) अनुपात्तस्यानुवचनकर्तृः स्थानादिद्वारस्त्वमिति भावः MayūMāli. 198. 3 (on iii. 1. 10)

अनुवचनकर्मकभावना (anuvacanakarmaka- bhāvanā) *f.* activity or volition which has recitation of texts as its object विशेषणत्वाखीकारे तु अनुवचनकर्मकभावनायां साधनतयान्वितस्य दण्डस्य विशेष्यीभूतभावनान्वयिन्यनुवचने समानकालीनत्वसंबन्धेनान्वयात् LaCandr. 444. 43.

अनुवचनकार्य (anuvacana- kārya) *n.* act of recitation of texts in conformity with injunction or call (*praiṣa*) प्रैषकार्येणाध्वर्यावन्तर्भावः। अनुवचनकार्येण च होतरि NyāyMāVi. 588. 4 (on x. 7. 6)

अनुवचनकाल (anuvacana-kāla) *m.* [Loc.] at the time of recitation of texts in conformity with injunction or call (*praiṣa*) अनुवचनकाले दण्डस्यासंबन्धेऽवलम्बनरूपदृष्टद्वारानुवचनसाधनत्वं तस्य न स्यात् GuruCandr. ii. 17. 14.

अनुवचनकालीनदण्ड (anuvacanakālīna- daṇḍa) *m.* stick present at the time of recitation of the texts in conformity with injunction or call (*praiṣa*) दण्डस्य ... अनुवचने समानकालीनत्वसंबन्धेनान्वयादनुवचनकालीनदण्डस्य साधनतालाभः LaCandr. 445. 27.

अनुवचनक्रिया (anuvacana- kriyā) *f.* action of recitation 'लक्षणहेत्वोः क्रियायाः' इत्यनेनानुवचनक्रियायाम् ... जृम्भणस्य भाव्यत्वादिना लक्षणत्वायोगात् जृम्भायां निमित्तेऽनुवचनम् ... आरादुपकारकम् BhāṭṭDī. i. 326. 15 (on iii. 4. 9)

अनुवचनजनकता (anuvacanajanaka-tā) *f.* the state of being what produces the recitation गुणत्वमपि च तासाम् ... अनुवचनजनकतयैव लायवात् MīmāKau. ii. 203. 8 (on iii. 1. 21); गुणत्वमपि च ऋचां नानुवचनफलप्रकाशकतयैव, अपि त्वनुवचनजनकतया BhāṭṭDī. i. 202.9 (on iii. 1. 11)

अनुवचनत्व (anuvacana-tva) *n.* **A** the state of being the subsequent recitation तद्यदि पृथक् प्रयोगः स्यात्ततः सामिधेन्यङ्गमात्रग्रहणादितरेण निराकृतं विनानुवचनत्वं विहन्येत TantrVā. 753. 7 (on iii. 1. 21); **B** the state of being the recitation of texts in conformity with injunction or call (*praiṣa*) प्रैषान्तानुवचनेषु तु प्रैषत्वेनाध्वर्युकर्तृकत्वस्यानुवचनत्वेन च होतृकर्तृकत्वस्य प्राप्तेः BhāṭṭDī. ii. 57. 21 (on iii. 7. 22)

अनुवचनधर्म (anuvacana-dharma) *m.* [Inst.] in accordance with the procedure or practice of recitation प्रागुदीच्यां दिशि पुण्ये देशे उदित आदित्येऽनुवचनधर्मेण वाग्यतायोष्णीषिणेऽन्वाह KauṣīGS. ii. 7. 24.

अनुवचनफल (anuvacana-phala) n. result or effect of recitation यद्यपि च तासामनुवचनं (ऋचाम्) प्रति गुणत्वं स्यात् तथाप्यनुवचनफलाभिसमिन्धनप्रकाशकत्वेनैव तत्सामर्थ्यात् स्यात् MīmāKau. ii. 202. 12 (on iii. 1. 21); ii. 203. 8 (on iii. i. 21); गुणत्वमपि च ऋचां नानुवचनफलप्रकाशकतया BhāṭṭDī. i. 202. 9 (on iii. 1. 11)

अनुवचनम् (anuvacanam) *adv.* at each (time of) study or learning सावित्रीं चानुवचनम् GautDS. i. 1. 56; (comm. प्रत्यध्ययनं पठनीया)

अनुवचनमात्र (anuvacana-mātra) *n.* **1** mere repetition (in study) अनुवचनमात्रेणैव ... शास्त्रार्थसमाप्तेः NyāyRaMā. 21. 12; तस्मात्स्वर्गार्थत्वादध्ययनस्यानुवचनमात्रेण शास्त्रार्थसमाप्तेः TantrRaha. 66. 25; **2A** mere recitation यद्वा तिष्ठन्नन्वाहान्तरानूच्यामित्यादिष्वनुवचनमात्रं श्रूयते तत्र यदि सामिधेन्यनुवचनं प्रकृतं स्यात्ततस्तदेवावगम्येत ŚāstrDī. 202. 2 (on iii. 1. 11); अनूच्येत्यनुवचनमात्रस्यैव विधानम् MayūMāli. 877. 2 (on xii. 4. 1); **2B** mere recitation of texts in conformity with injunction or call (*praiṣa*) किं प्रैषमात्रेऽनुवचनमात्रे च मैत्रावरुणोपदेशेन हौत्रादिसमाख्याबाधः ŚāstrDī. 330. 8 (on iii. 7. 21)

अनुवचनमात्रोत्तरत्व (anuvacanamātrottara-tva) *n.* the state of being what follows mere recitation प्रकृतविध्योरनुवचनमात्रोत्तरत्वविधानात् BhāṭṭCan. 101. 20 (on xvi. 1. 5)

अनुवचनमात्रोद्देश (anuvacanamātroddeśa) *m.* [Inst.] with the intention of mere recitation अनुवचनमात्रोद्देशेन गुणविधायिनां विशिष्य सामिधेन्युपस्थापकत्वेन MīmāKau. ii. 200. 17 (on iii. 1. 21)

अनुवचनविकृतित्व (anuvacanavikṛti-tva) *n.* the state of being modification of the recitation (of the Sāmidhenī verse) यस्य लिङ्गम् ... सामिधेन्यनुवचनविकृतित्वमिति भावः MayūMāli. 201. 25 (on iii. 1. 11)

अनुवचनविधान (anuvacana-vidhāna) *n*. prescription of recitation (of Sāvitrī) सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वां यथाशक्तितो वाचयीतेत्याश्वलायनादिभिरनुवचनविधानात् VīraMi. (Saṁskāra.) 341. 22.

अनुवचनविशेष (anuvacana-viśeṣa) *m*. particular recitation of texts in conformity with injunction or call (*praiṣa*) न च ... मैत्रावरुणविधिरावर्जनीय इति वाच्यम्।... चशब्दसहिताख्यातद्वयेनाप्यनुवचनविशेषस्यैव लक्षणीयतया उभयात्मकेष्वेव तद्विधानात् MayūMāli. 330. 14 (*on* iii. 7. 21)

अनुवचनसमर्थ (anuvacana-samartha) *adj*. competent in teaching अनूचानः अनुवचनसमर्थः वक्ता वाग्मी BṛĀraUBh. 217. 17 (*on* ii. 1.1)

अनुवचनसंबन्ध (anuvacana- sambandha) *m*. connection with teaching अनूचानग्रहणं तु ब्राह्मणस्यानुवचनसंबन्धात् क्षत्रियवैश्यनिवृत्त्यर्थं भविष्यति TantrVā. 902. 17 (*on* iii. 3. 33)

अनुवचनसाधन (anuvacana-sādhana) *n*. 1 means of accomplishing the teaching सावित्रीशब्देन तदनुवचनसाधनमुपनयनाख्यं कर्म लक्ष्यते ManuBh. i.95.10 (*on* 2.38); 2 means conducive to the recitation of texts in confomity with injunction or call (*praiṣa*), cf. **अनुवचनसाधनत्व**.

अनुवचनसाधनत्व (anuvacanasādhana-tva) n. the state of being the means conducive to the recitation of certain text in conformity with injunction or call (*praiṣa*) अनुवचनकाले दण्डस्यासंबन्धेऽवलम्बनरूपदृष्टद्वारानुवचनसाधनत्वं तस्य न स्यात् GuruCandr. ii. 17. 15.

अनुवचनसामान्य (anuvacana-sāmānya) *n*. recitation in general अनुवचनसामान्यं पुरोवाक्यानुवचनातिप्रसक्तमिति संख्या युक्तेत्युक्तम् MayūMāli. 201. 9 (*on* iii. 1. 11)

अनुवचनसामान्योद्देश (anuvacanasāmānyoddeśa) *m*. [Inst.] with reference to recitation in general न 'अन्तरानूच्यम्' इत्यादीनां सामिधेनीमात्रोद्देशेन विधानं प्रमाणाभावात्। अपि तु अनुवचनसामान्योद्देशेन BhāṭṭDī. i. 201. 17 (*on* iii. 1. 11)

अनुवचनस्वरूपार्थत्व (anuvacanasvarūpārtha-tva) *n*. the state of being what is meant for the recitation in its own form अविहितस्यानुवचनस्य ... अनुवचनस्वरूपार्थत्वे आनर्थक्यात् ... अदृष्टार्थं गुणविशिष्टानुवचनं विधीयते MayūMāli. 712. 20 (*on* x. 4. 21)

अनुवचनांश (anuvacanāṁśa) *m*. [Inst.] by the portion of the recitation of texts in conformity with injunction or call (*praiṣa*) यानि तु प्रैषान्तान्यनुवचनानि तेषु प्रैषांशेनाध्वर्योरनुवचनांशेन होतुः प्राप्तेरेकमन्त्रत्वेन नानाकर्तृसमावेशासंभवाद्धोतुरध्वर्योश्च ... मैत्रावरुणविधानमपेक्षितार्थं भवति ŚāstrDī. 330. 13 (*on* iii. 7. 22)

अनुवचनाङ्गत्व (anuvacanāṅga - tva) *n*. the state of being what is ancillary to the recitation of texts in conformity with injunction or call (*praiṣa*) दण्डी प्रैषानन्वाहेति दण्डविशिष्टेऽनुवचनाङ्गत्वेन चोद्यमाने विशेष्यस्य पूर्वमेव क्लृप्तत्वाद्विशेषणभूतस्य दण्डस्यानुवचनाङ्गत्वप्रतिपादनपरम् ... वचनं संभवति NyāyRaMā. 128. 12.

अनुवचनादि (anuvacanādi) *adj*. A study or learning etc. अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधीयमानत्वात् BrahmSūBh. (Śaṅ.) 313. 12 (*on* ii. 1. 14); Mitā. 397. 12 (*on* 3. 190); B recitation etc. यः ... ग्रन्थार्थरूपतया जपानुवचनादिना वेदमभ्यस्यन् परित्यक्ताग्निहोत्राद्यनुष्ठानः भैक्षेणैव वर्तते BālaKrī. ii. 72. 8 (*on* 3. 205); C recitation of texts in conformity with injunction or call (*praiṣa*) etc. दण्डी प्रैषानन्वाह, दण्डी गच्छति इत्यादौ ... दण्डसंबधा(?न्धा)नुवचनाद्योरेककालीनत्वलाभः GuruCandr. ii. 19. 11.

अनुवचनानुज्ञापनरूप (anuvacanānujñāpana - rūpa) *adj*. of the form of seeking of permission for recitation न च ... स्वफलार्थमनुवचनानुज्ञापनरूपस्याङ्गस्य विकृतावूहेन प्रयोगोपपत्तेः बहिः प्रयोगेऽप्याक्षेपसंभवादिति वाच्यम् MīmāKau. ii. 203. 23 (*on* iii. 1. 21)

अनुवचनानुवाद (anuvacanānuvāda) *m*. [Inst.] by the reiteration with reference to the recitation न ह्यनुवचनानुवादेनात्र गुणविधिस्संभवति BhāṭṭDī. iii. 302. 13 (*on* x. 4. 21); अनुवचनानुवादेन तु मनोर्क्रग्विधानात् BhāṭṭDī. iv. 66. 5 (*on* x 6. 18)

अनुवचनान्त (anuvacanānta) *m*. [Loc.] at the end of the recitation (of the Sāmidhenī verses) अनुवचनान्ते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्याहाग्निमग्नीत्संमृड्ढीति KātyŚS. iii. 1. 12.

अनुवचनान्तर (anuvacanāntara) *n*. another recitation (of the Sāmidhenī verses) न त्वेवं सत्येतान्यनुवचनान्तराणि दर्शपूर्णमासाभ्यामगृहीतत्वात् पृथगेव प्रयोक्तव्यानि TantrVā. 752. 22 (*on* iii. 1. 21); अनुवचनान्तराणि संख्याविशिष्टानि फले विधीयन्ते ŚāstrDī. 201. 10 (*on* iii. 1. 11); आश्रयालाभेन तत्रानुवचनान्तरस्यैव ... गुणात् भिन्नस्य फलं विध्यङ्गीकारात् MīmāKau. ii. 201. 19 (*on* iii. 1. 21); ii. 203. 10 (*on* iii. 1. 21); अनुवचनान्तरस्यैव फलोद्देशेन विहितत्वात् ... नाधर्मकत्वम् BhāṭṭDī. i. 201. 23 (*on* iii. 1. 11)

अनुवचनान्तरविधि (anuvacanāntara-vidhi) *m*. injunction regarding another recitation (of the Sāmidhenī verses) अनुवचनान्तरविधौ तेषां क्रतुमध्यप्रयोगं समर्थयति MayūMāli. 201. 27 (*on* iii. 1. 11)

अनुवचनाभ्यासविधि (anuvacanābhyāsa - vidhi) *m*. injunction of recitation and repetition अनुवचनाभ्यासविधौ अनुवचनस्यैवोद्देश्यत्वासंभवात् प्राथम्यस्य क्रियाविशेषणत्वे स्त्रीलिङ्गायोगाच्च तदुभयानुरोधेनाभ्युपगतम् PūrvottaVāNaMā. 196. 3; MīmāKau. ii. 202. 2 (*on* iii. 1. 21)

अनुवचनीय (anu-vacanīya) *adj*. [P.v. 1. 111] which has recitation as its purpose (छः) अनोः प्रवचेर्वचेः। ... उत्थापनम् वा प्रयोजनमस्य। ... अनुवचनीयम् GaṇRa. 6. 366 (397)

अनुवञ्चत् (anu-vāñcat) *adj*. [P. vi. 1. 186; vi. 2. 139] (deified horse) which moves along वञ्चते स्वाहा ... अनुवञ्चते स्वाहा TaiS. VII. iv. 22. 1 (Sāy. वञ्चतादिशब्दपञ्चकेन गमनप्रकारविशेषाः); KāṭhS. v. 5. 1 (iii. 166. 13)

अनुवञ्चित (anu-vañcita) *adj*. which is avoided subsequently सुप्तस्य सर्पसंपर्के दैवमायुषि कारणम्। दृष्ट्वानुवञ्चिते सर्पे पौरुषं तत्र कारणम् YaśasCam. i. 383. 2.

अनुवत्सर (anu-vatsarā) *m*. [P. vi. 2. 189; AltGr. II. 1. 258] A name of the fourth year in the cycle of five years (i. e. Saṁvatsara, Parivatsara, Idāvatsara, Anuvatsara and Vatsara) अयेदस्मिन्नन्तः ... शतम् अनुवत्सराः AV. (P.) xvii. 29. 15; अनुवत्सराय ... कृणुता बृहन्नमः KāṭhS. 13. 15 (i. 198. 3); MānŚS. 39. 16; सीदानुवत्सरे KāṭhS. 39. 6 (iii. 124. 1); अग्निः संवत्सरः सूर्यः परिवत्सरश्चन्द्रमा इदावत्सरो वायुरनुवत्सरः ... आप्नोति ... वायुमनुवत्सरꣳ शुनासीर्येण PañcBr. xvii. 13. 17; वायुरनुवत्सरः TaiBr. I. iv. 10. 1; BrahmāṇḍP. i. 13. 119; संवत्सरादयः पञ्च ... युगमित्यभिधीयते। ... चतुर्थश्चानुवत्सरः ViṣṇuP. ii. 8. 72; VāyuP. i. 31. 27; i. 50. 183; BrahmāṇḍP. i. 13. 115; i. 21. 132; सोम इद्वत्सरः प्रोक्तो वायुश्चैवानुवत्सरः प्रजापतिश्चाप्यनुवत्सरः स्यात् BṛSaṁ. 8. 24; अनुवत्सरो वत्सरश्च विदुरेवं प्रभाष्यते BhāgP. iii. 11. 14; v. 22. 7; वर्षाः पञ्चविधाः ...। अनुवत्सरो वत्सरोऽयमिति BrahmVaiP. iv. 96. 58; आहुः पञ्चभेदं च वत्सरम् ... चतुर्थश्चानुवत्सरः SkandP. i (2). 31. 52; ViṣṇuDhaP. i. 82. 54; BhaviP. 186 B. 20 (i. 125. 33); इदापूर्वं इत्यादि इदावत्सरः अनुवत्सरः इद्वत्सरः इति CaturCin. i. 890. 9; iii (3). 18. 5; B name of the fifth year in the cycle of five years विशेषार्चनस्य कालं वक्ष्यामः। ... संवत्सर इद्वत्सर इलावत्सरः परिवत्सरोऽनुवत्सरः PārāSū. 65. 9; साक्षात्कारकाल अनुवत्सरो ब्रह्मणः PārāSū. 86. 14; C name of the fifth year of five cycles of 12 years in the Bṛhaspati cycle संवत्सर° ... °अनुवत्सरशब्दानां प्रभवप्रमाथिसरशोभनराक्षसादिद्वादशद्वादशवर्षविशेषवाचित्वेऽपि LalitāSaBh. 204. 27 (*on* 245) [KośaKaTa. 1. 1121 gives *induvatsara* as the synonym of *anuvatsara*] [a year, MW., APTE]

अनुवत्सर (anuvatsara) *n*. name of the fourth year in the cycle of five years (i.e. Saṁvatsara, Parivatsara, Idāvatsara, Anuvatsara and Vatsara) अनुवत्सरमिद्वत्सरमिति पञ्चममीरितम्। ... कालवित्तमैः DevīBhāP. viii. 16.16.

अनुवत्सरम् (anuvatsaram) *adv*. [P. ii. 1. 6] every year, year after year अथ काल उपावृत्ते देवकी सर्वदेवता। पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् BhāgP. x. 1. 50; प्रजाः। त्वन्महोदयमहीतयाधुनाप्युत्सवं विदधतेऽनुवत्सरम् ŚrīVīraSt. 4 [yearly, MW.]

अनुवत्सरीणा (anuvatsár-īṇā) *adj*. (*f*.) [P.v. 1. 92] lasting for the year Anuvatsara (fourth year in the five- year cycle) शुनासीरीयेण यजमानः। अनुवत्सरीणाꣳ स्वस्तिमाशांस्माशास्त इत्याशांसीत् TaiBr. I. iv. 10. 3; BaudhŚS. ii. 203. 8; i. 155. 7; ĀpaŚS. viii. 21. 1; VaikhāŚS. 9. 12; अनुवत्सरीणाꣳ स्वस्तिमाशासे इतीडाया आशीःषु यजमानो जपति BhārŚS. vii. 24. 8; viii. 24. 10 [referring to the *anuvatsara*, MW.]

अनुवत्सरीया (anuvatsar- īyā) *adj*. (*f*.) [P. v. 1. 91] lasting for the year Anuvatsara (fourth year in the five -year cycle) इयꣳ स्वस्ति ... अनुवत्सरीयोद्वत्सरीयै स्वस्तिमाशास इत्याह KāṭhS. 13. 15 (i. 198. 6); अनुवत्सरीयोद्वत्सरीयै स्वस्तिमाशास इत्याह द्वत्सरीया KāṭhS. 13. 15 (i. 198. 6); इयँ स्वस्तिः सँवत्सरीया परिवत्सरीयेदावत्सरीयानुवत्सरीयोद्वत्सरीया यजमानः MānŚS. 49. 16; MānŚS. 39. 18 [referring to the *anuvatsara*, MW.]

अनुवत्सल (anu-vatsala) *adj*. loving तौ तु भूमिगतौ बालौ लुण्ठतः प्रानुवत्सलौ GaṇeP. ii. 84. 50.

¹अनुवद् (anu-vad-) I. U. [*but* Ā. in intransitive usage, P. i. 3. 49; KāśiVṛ. *on* i. 3. 49; KātanVṛ. *on* iii. 2. 42; MugdhaBo. 23. 40 (139. 8); SiddhāKau. 458B. 34 (*on* i. 3. 49)] **1Ai** to recite along with, i.e. to accompany with formula **ii** to make sound along with **Bi** to call after **ii** to address, to invoke **C** to utter after, to recite in conformity with **D** to recite after **2Ai** to repeat (pass.) to be repeated **ii** to repeat, to reproduce (pass.) to be repeated, to be reproduced **Bi** to express, to refer to, to mention (pass.) to be expressed, to be referred to, to be mentioned **ii** to refer to, i.e. to imply **C** to restate, to reiterate (for elaboration or explanation) (pass.) to be restated, to be reiterated (for elaboration or explanation) *(caus.)* to cause to restate or reiterate (for explanation etc.) **D** to state in addition (pass.) to be stated in addition **E** (pass.) to be laid down, i. e. to be enjoined or prescribed **Fi** to narrate, to describe (pass.) to be narrated, to be described **ii** to say in the context of, i. e. to treat as the subject **3Ai** to speak in favour of, i.e. to glorify **ii** to speak in conformity or in accordance with **iii** to speak in favour of, i.e. to approve of **B** to speak for, i. e. to suggest **Ci** to speak afterwards or subsequently **ii** to speak subsequently, i.e. to reply **D** to imitate in speaking **4Ai** to resound, to resonate (pass.) to be resounded, to be resonated (*caus.*) to cause to resound, to cause to resonate **ii** to imitate in sound **iii** to sound in conformity with (main note) **Bi** to echo as if for approval **ii** to echo in reflection **C** (*fig.*) to imitate, to resemble **1Ai** to recite along with, i.e. to accompany with formula अन्वेकों वदति यद्दांति ṚV. ii. 13. 3; यानेवाध्वर्युः प्रादेशानभिमिमीते तानेवैताभिरनुवदति KauṣīBr. 8. 4 (36. 23); 8. 5 (37. 12); 9. 3 (42. 5); 10. 2 (45. 20); **1Aii** to make sound along with श्वसंन्तु गर्गरा अपां वरुण। अव नीचीरुपः सृज वदन्तु पृश्निबाहवो मण्डूका इरिणानु AV. iv. 15. 12; AV. (P.) v. 7. 11 (better अनु *adn.*); **1Bi** to call after तेषामश्विनौ प्रथमावधावतां तावन्ववदन् सहनोऽस्त्विति PañcBr. ix. 1. 36; **1Bii** to address, to invoke (सुरस्वती) सैतां दशहविषमिष्टिमपश्यत्। आग्नेयमष्टाकपालं पुरोडाशं सौम्यं चरुम् ... तानेतयानुवाक्ययान्ववदत् ŚatBr. XI. iv. 3. 6; **1C** to utter after, to recite in conformity with यदा मैत्रावरुणः स्थित्वा प्रैषाननुवदति तदानीमवलम्बनाय दण्डोऽपेक्षितः NyāyMāVi. 236. 16 (*on* iv. 2. 6); **1D** to recite after, cf. अनुवदत् 1A; **2Ai** to repeat पूर्वमेवं यंजुरुदितंमनुवदति MaiS. i. 11. 6 (i. 168. 6); CāndraVṛ. *on* i. 4. 94.; KāśiVṛ. *on* i. 3. 49; PrakriKau. ii. 415. 3; पूर्वमेवोदितमनुवदति KāṭhS. 14. 6 (i. 206. 4); 19. 3 (ii. 3. 12); KapiKaS. 30. 1 (138. 15); तमु त्वा पाथ्यो वृषेति पूर्वमेवोदितमनुवदति KāṭhS. 19. 4 (ii. 4. 18); KapiKaS. 30. 2 (140. 2); प्रतिवचनं यत्पुण्यं स्वस्ति ऋध्यास्मेति पूर्वोक्तामितरेऽनुवदन्ति VaikhāGS. 1.7; (अनोर्धेः) धेरिति किम्। पूर्वमुक्तमनुवदति JaineVyā. 129. 2 (*on* i. 2. 45); अनुवदति इति पुनर्वदति इत्यर्थः Nyās. i. 236. 6 (*on* i.3.49); उक्तानुवादात् उक्तं ह्यनुवदति नो न वेदेति वेद चेति KenUVāBh. 80. 5 (*on* 2. 2); किमयमनुवदति GopāKeCan. 65. 36; विमतौ च अनुवदन्ति शिष्याः PrakriKau. ii. 415. 5; अकर्मकात्किम्। उक्तमनुवदति SiddhāKau. 459A. 1 (*on* i. 3. 49); जनकसंनिधौ... विप्रबटुरयमनुवदति JānaPa. 1. 46 (3); इदं वादकथायाः पक्षतापरामर्षसंगमप्रतिज्ञावचनम् ... अनुवदन्ति व्योमचराणि भूतानि AmṛUda. 1. 30 (2); (pass.) to be repeated सौधेषु गीतं रामाणां यत्रालिभिरनूद्यते PṛthvīVi. 5. 181 (comm. पश्चादुद्यते गीयते); **2Aii** to repeat, to reproduce (words etc.) तदेतदेवेषा दैवी वागनुवदति स्तनयित्नुर्ददद इति ŚatBr. XIV. viii. 2. 4; BṛĀraU. v. 2. 3 (*but* Śaṅ. अनुकृतिः); स्तोत्रियानुरूपयोर्ह खलु वै तद् रूपं, यस्माद् यां श्रेष्ठीं वाचं वदति पापीयान् अनुवदति JaimiBr. 3. 21; (pass.) to be repeated, to be reproduced अविज्ञाततत्त्वा लभ्यते एवेति किमर्थं स्वकण्ठेन पुनरनूद्यते NyāyMañ. ii. 145. 7; लोकत्वस्य विधेयत्वाद्यञ्जुहोतीत्यनूद्यते BṛĀraUBhVā. i. 4. 1796; उक्तमिदमुत्तरार्थमनूद्यते ManuBh. i. 341. 24 (*on* 4. 29); यदनूद्यते तस्यादावुपादानमनुपपन्नम् Kāvyānu. (He.) 206. 20; त्वयाधीत्य यावज्ज्ञानं संपादितं तावत्सर्वमनूद्यताम् VedāntRaMañ. 2. 6 (78. 4); **2Bi** to express, to refer to, to mention तत्सखाय इति सर्वनैवानुवदति KauṣīBr. 21. 4 (94. 19); श्रुतिः ... यथावर्णितं संसाररूपमनुवदति BrahmSūBh. (Śaṅ.) 20. 3 (*on* i. 1. 4); 179. 8 (*on* i. 3. 19); अस्ति च वेदे वचनं सिद्धामनुवदति यद् ध्रुवां वाचम् NyāyMañ. i. 200. 1; इदमपि यागे सामर्थ्यं (सिद्ध)मेव देवताव्यादेशमनुवदतीति SaṅkarKāBh. 92. 14 (*on* ii. 3. 7); अनुक्तं भूतानामुत्पत्तिक्रमम् ... भूतसृष्टिं च हिरण्यगर्भस्यापि परमार्थत्वात्तत्कर्तृतामनुवदति ManvaMu. 22. 27 (*on* 1. 74); पुरुषकामनामेव खल्वनुवदन्ति... कमिश्रुतयः ŚivārkaMaDī. ii. 417. 9 (*on* iii. 4. 50); जुहोतिधातुः नानाप्रकरणपठितानानारभ्याधीतांश्च सर्वानपि होमान् ... अनुवदति PūrvottaVāNaMā. 4. 5; (pass.) to be expressed, to be referred to, to be mentioned वृत्तान्तेन प्रदोषलक्ष्मीरियमनूद्यते AnargharRā. 2. 83 (3); यः सर्वोपनिषदर्थो ब्रह्म स एषः अनेन मन्त्रेण अनूद्यते BṛĀraUBh. 687. 6 (*on* v. 1. 1); यद् दृश्यं सन्नोपलभ्यते इत्यनेन दृश्यानुपलम्भोऽनूद्यते NyāyBiṬ. 154. 5 (*on* 3. 7); किंचिदनूद्य किंचिदाख्यायते। यत् प्रसिद्धं तद् अनूद्यते Nyās. i. 323. 17 (*on* i. 4. 97); स्वशब्देन सा केवलमनूद्यते Dhvanyā. 81. 2 (*on* 1.4); Kāvyānu. (He.) 132. 11; प्रसिद्धवज्जन्मादिकारणनिर्देशेन यथाप्रसिद्धि जन्मादिकारणमनूद्यते BrahmSūBh. (Rā.) 134. 3 (*on* i. 1. 2); 643. 14 (*on* iii. 3. 32); विमळचन्द्रमुनीन्द्रगुरोर्गुरुः प्रशमिताखिळवादिमदं पदम् । यदि यथावदवैष्यत पण्डितैर्न्नु तदा[न्व]विदिष्यत वाग्विभोः चूर्णि तथा हि EI. iii. 192. 67; ज्ञानं तु अर्थसिद्धमनूद्यते PrakaVi. 2. 15; प्रथमनिर्दिष्टाग्न्युद्देशेन पुरुषत्ववेदनं स एषोऽग्निरिति वाक्यस्यार्थत्वेनानूद्यते VedāntKa. 146. 19 (*on* i. 2. 24); वेदस्य च धर्मे प्रामाण्यं यथानुभवकरणत्वस्य न्यायसिद्धम्। स्मृत्यादीनामपि तन्मूलत्वेनैव प्रमाणमनूद्यते ManvaMu. 34. 3 (*on* 2. 6); 43. 2 (*on* 2. 45); पुरुषस्य परिणामरूपं जगदुपादानत्वम् ... अनूद्यते SāṁkhyPraBh. 37. 37 (*on* 1. 69); भूतविभक्त्या कार्यान्तरार्थमनूद्यते Prasā. i. 230. 17; न हिंस्यादिति निषेधवाक्ये पुरुषार्थैव हिंसा धातुनानूद्यते न क्रत्वर्था ŚivārkaMaDī. ii. 219. 29 (*on* iii. 1. 25); स्त्रीशूद्रयोस्तदुभयं सकृदिति विधानं पूर्वार्धेनानूद्यते VīraMi. (Āhnika.) 89. 16; यागो विधीयताम् उत्पत्तिवाक्यसिद्धो वानूद्यताम् MīmāNyāPra. 201. 27; 257. 11; फलान्येव सकलपदेनानूद्यन्ते SetuBa. 101. 11; क्रियागतं गर्ह्यत्वम् ...। तदेव धिगित्यादिनानूद्यते LaŚabdeŚe. i. 475. 22; **2Bii** to refer to, i.e. to imply, cf. अनूद्य **3C**; **2C** to restate, to reiterate (idea, theory etc. for elaboration or explanation) तदाहुर्नौधसमेवैतस्याह्नो ब्रह्मसाम कार्यमिति। तद्ध तत्पक्षमनुवदति JaimiBr. 2. 21; लिङ्गं चैव भवति, वाचा विरूपनित्यया इति। अन्यपरं हीदं वाक्यं वाचो नित्यतामनुवदति ŚābaBh. 91. 8 (*on* i. 1. 23); 463. 1 (*on* ii. 2. 1); अपरेऽप्यनुवदन्तीति निर्दयाक्रान्तभुवनं धिग् व्यापकं तमः PramāVāSvopVṛ. 80. 16; यस्य ... प्रबलवृत्तयः। ... अर्थान् स्मानुवदन्तीव MahāP. 1. 50; भूतानुग्रहं वागादीनां ध्रुवंस्तत्सद्भावमनुवदति BrahmSūBh. (Bhā.) 145. 20 (*on* ii. 4. 4); सम्यगिति वैधतामाचमनपदार्थस्यानुवदति ManuBh. i. 103. 8 (*on* 2. 53); ii. 118. 26 (*on* 8. 104); ii. 274. 27 (*on* 9. 114); ii. 323. 15 (*on* 9. 314); ii. 334. 28 (*on* 10. 7); इमं चार्थमनुवदति भगवद्गीता Bhām. 46. 21 (*on* i. 1. 1); संप्रति आदिवाक्यम् आक्षेप्तुमनुवदति। प्रमाणत इति TātpaṬ. (Vā.) 11. 3 (*on* i. 1. 1); सूत्रद्वयमेतदधिकरणसिद्धमनुवदति। ... असदिति चेन्न प्रतिषेधमात्रत्वात् इति च पूर्वाधिकरणस्थमनुवदति BrahmSūBh. (Rā.) 466. 4 (*on* ii. 1. 23); सर्वेषां हृदयानां श्रपणे तन्त्रं हृदयशूलमिति स्थितमेव न्यायमनुवदति इयं श्रुतिः SaṅkarKāBh. 73. 10 (*on* ii. 2. 2); विप्रावदन्त नामात्या अन्ये विप्रावदन्न वा । मिथोऽनुवदमानास्तु सेनान्योऽन्ववदन्वचः DvyāśraKā. 7. 50; अध्यासासंभवात् ... अनुवदति तस्मादिति VedāntKa. 19. 20 (*on* i. 1. 1); 99. 8 (*on* i. 1. 4); ईदृश एव विधिशब्दार्थो वेदान्तिभिः स्वीकृत इति परेऽपि केचिदन्ववादिषुः NyāyPari. 402. 21; सूत्रमर्थतोऽनुवदति NyāySu. (Ja.) 354B. 10 (*on* ii. 2. 6); 413 B. 4 (*on* ii. 2. 10); 416A. 3 (*on* ii. 2. 10); 'नेह नाना' इत्यादिश्रुतिनिषेध्यसमर्पकतयानुवदति विश्वसत्यतावाक्यमिति चेन्न Vādā. 60. 7; एतन्न्यायसिद्धमेवार्थं सौकर्यायानुवदति Subodhi. 12. 17 (*on* 2. 23); भगवतः स्वरूपं पूर्वमेवोक्तमनुवदति AṇuBh. 99. 8 (*on* i. 3. 42); 249. 14 (*on* iii. 3. 42); चत्वार एवाश्रमा नियता इति दर्शयितुमुक्तानाश्रमाननुवदति ManvaMu. 245. 7 (*on* 6. 87); अभिमानाभावे सर्वानर्थनिवृत्तिमनुवदन्ति SiddhāBi. 72. 2; तृतीयपूर्वपक्षमनुवदति उभयपरत्व इति (भाष्यकारः) ŚivārkaMaDī. i. 183. 9 (*on* i. 1. 4); i. 191. 25 (*on* i. 1. 5); i. 246. 8 (*on* i. 1. 21); (कश्चित्त्वाह). तन्मतानुसारिणः कस्यचिदुत्पादनमनुवदन्ति कश्चिदिति MayūMāli. 12. 10 (*on* i. 2. 2); संज्ञपनकरणकभावनायाः सेतिकर्तव्यताकाया एवालम्भविधिनोत्कर्षाद् उत्सृजतिरुत्तरव्यापारोपरममनुवदतीति क्त्वाप्रत्ययोक्तमव्यवहितपूर्वत्वं न बाधनीयम् BhāṭṭCan. 3. 6 (*on* xiii. 1. 4); पक्षद्वयमध्यात् प्रथमं पक्षमनुवदति Bhāsk. i. 49. 17 (*on* i. 1. 1); ii. 203. 22 (*on* ii. 4. 20); तत्फलितमनुवदति LaŚabdeŚe. ii. 69. 11; एवं द्विजशूद्रविषये मूलकृतानुकल्पं प्रकरणशुद्धये च कंचिद्विशेषं कथयितुमनुवदति BālamBha. iii. 84. 2 (*on* 3. 35); (pass.) to be restated, to be reiterated (for explanation or elaboration) आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः। तच्चैतदुत्तरसूत्रेणानूद्यते NyāyBh. 2. 17 (*on* i. 1. 1); सर्वः प्रमाता प्रमाणेनार्थमवधार्य प्रवर्तमानः फलमुपलभते इति लोकवृत्तं तद्वाक्येनानूद्यते NyāyVār. 4. 11 (*on* i. 1. 1); अधिकरणभावो नान्तरीयकत्वादनूद्यते ṬupṬ. 11. 7 (*on* iv. 1. 23); कर्तव्यत्वासंभवात् अनात्मविदपि कर्ता पक्षे प्राप्तः अनूद्यत एव GītāBh. (Śaṅ.) 152. 11 (*on* 5. 1); इन्द्रादीनामर्थैतेषां लक्ष्यं किंचिदनूद्यते MahāP. 22. 22; प्रणयः साधनत्वं च प्राप्तं तस्मादनूद्यते TaiUBhāVā. 183. 9 (2); फलं त्वन्यतः सिद्धमनूद्यते BrahmSūBh. (Bhā.) 25. 12 (*on* i. 1. 12); 58. 12 (*on* i. 3. 20); वाच्यः प्रसिद्धः ...। केवलमनूद्यते पुनर्यथोपयोगम् Dhvanyā. 47. 5 (*on* 1. 3); प्रसिद्धमप्येतदनूद्यते ManuBh. i. 29.

17 (*on* 1. 47); त्र्यहम्। पूर्वश्लोकार्थत्र्यहशेषतयानूद्यते Manu... 7 (*on* 3. 62); न त्वस्य पूर्वकालमात्रतानूद्यते Nyāy Ka. 2. 8; यदनूद्यते तद् व्याप्यं यद् विधीयते तद् व्यापकम् Dharmo Pra. 155. 20; अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते Bhām. 99. 13 (*on* i. 1. 4); वैश्वानरस्य हि पुरुषत्ववेदन-मत्रानूद्यते Bhām. 190. 22 (*on* i. 2. 26); प्रमाणविपर्ययविकल्पस्मृतीनां वृत्तित्वं प्रति परीक्षकाणामविप्रतिपत्तेः। अतस्तदनूद्यते विशेषविधानाय TattvVai. 15. 27 (*on* 1. 10); तदिदं लोकवृत्तमाक्षेप्तारं बोधयितुमनेन भाष्येणानूद्यते TātpaṬ. (Vā.) 15. 13 (*on* i. 1. 1); अभावो नेदं रजतमिति स्वातन्त्र्येणानूद्यते PramāMā. 11. 23; नात्रिवर्षस्येत्यनेन पूर्वश्लोकोक्त एवोदकक्रियाभावोऽनूद्यते HārLa. 122. 14; 'स्नात्वा भुञ्जीत' ... तत्र भोजनं चान्यतः प्राप्तमनूद्यते ŚrutaPra. i A. 21. 10 (*on* i. 1.1); श्रुतिप्रसिद्धमेव लक्षणमनूद्यते NyāyKu. 190. 9; प्रत्यक्षं प्राश्निकानां तन्मध्येभूपसभं भृशम्। अनूद्यतां यथा प्रज्ञाप्रामाण्यं लभ्यते ध्रुवम् PrabhāC. 78. 27; सेश्वरमीमांसापक्षोऽपि नातीव विच्छिन्नः, परैरनूद्यते Śat Dū. 56. 3; ते च पुण्यपापे पश्चात्तापं जनयतः। स च तापः श्रुत्यानूद्यते JīvanVi. 65. 13; सर्वासु विद्यासु प्राप्त एवार्चिरादिमार्गोऽनूद्यते VedāntKau. 325. 12 (*on* iii. 3. 31); चशब्दो दुःखान्तरसमुच्चयार्थः तदेवोत्तरसूत्रेऽनूद्यते TattvPrakā. 143A. 3 (*on* iii. 1. 13); त्वयापि सामान्यतस्सिद्धोऽर्थो विशेषज्ञानायानूद्यते इति वक्तव्यम् Vādā. 33. 1; कर्म कर्मसाध्यं न विद्यते इति सूत्रेण कर्मणां कर्मजनकत्वं प्रतिषिद्धमेव तदिहानूद्यते Upask. 41. 3 (*on* i. 1. 24); तत्र प्राजापत्यः क्षत्रियादीनामप्राप्तो विधीयते। ब्राह्मणस्य विहितत्वादनूद्यते ManvaMu. 91. 12 (*on* 3. 25); न हि परचित्तस्थमज्ञानं त्वयापि बुभुक्षापिपासादिप्रातिस्विकरूपेणानूद्यते Nyāyāmṛ. 361B. 1; अयमेवार्थो मन्दबुद्धिप्रत्ययार्थं नञ्पूर्वाणामपीत्यनेनानूद्यते Prasā. i. 332. 20; जीवेश्वरविभागादिकल्पनास्तु पुरुषबुद्धि-मात्रप्रभवा अपि शास्त्रेणानूद्यन्ते SiddhāBi. 52. 1; चरुमुपदधातीति ... चरोरुपधानसंस्कार्यत्वं द्वितीयया अनूद्यते ŚivārkaMaDī. i. 48. 6 (*on* i. 1. 1); सिद्धक्रत्वादिस्वकार्यसंबन्धम् ... केवलमन्यत्रानूद्यते ŚivārkaMaDī. i. 254. 10 (*on* i. 1. 21); i. 313. 13 (*on* i. 2. 1); न च ... उपसदाम् ... अग्निहोत्रहोमस्य ... क्रमः 'उपसद्भिश्चरित्वा' इत्यनेन अनूद्यते PūrvottaVā NaMā. 14. 14; कर्मत्यागो योगारूढस्य न्यायप्राप्तोऽनूद्यत एव ज्ञानस्य मुख्यतो मोक्षहेतुत्वं व्यवस्थापयितुम् SāṁkhyaPra Bh. 26. 28 (*on* 1. 56); न चोक्तश्रुत्या सदेवेत्यादिश्रुत्यर्थस्याभावधीरे-वानूद्यते GuruCandr. i. 47. 6; (*caus.*) to cause to restate or reiterate (for explanation etc.) ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यादिस्मृतेरियं श्रुतिर्मूलम्। श्रुतिस्त्वेतादृशी तुल्यत्वे नैतामनुवादयति Vedānt Ka. 32. 11 (*on* i. 1. 1); एकेन तत्प्रायश्चित्तस्वरूपमनुवादयेत् Bālam Bha. iii. 205. 20 (*on* 3.327); **2D** to state in addition संध्ययोरेतत्त्रयं जपेदित्येतावान्विधिः। वेदवित्पदमनुवदिष्यते Manu Bh. i. 117. 8 (*on* 2. 78); (pass.) to be stated in addition लोकत्वस्य विधेयत्वाद्यज्ञुहोतीत्यनूद्यते BṛĀraUBhVā. i. 4. 1796; Manu Bh. i. 166. 8 (*on* 2. 175); **2E** (pass.) to be laid down, i.e. to be enjoined or prescribed देशार्थावभृथश्रुतिरिति देशसंबन्धादन्योऽपि देशो विपरिवर्तमानश्चिन्त्यते। किमनूद्यते नियम्यत इति ... गुणसंस्कारयोरपि नियम एव ṬupṬ. 25. 10 (*on* iv. 2. 16); उल्काहस्तादौ ...एवोपायविधानार्थं परीक्षणमनूद्यते SmṛtiCan. iii. 221. 5; पूर्ववार्त्तिकं तु अनुबन्धासञ्जनार्थं तत्र क्विबनूद्यते Siddhā Kau. 447 B. 3 (*on* iii. 1.11); **2Fi** to narrate, to describe किं पश्यसि किं वा दृष्टमनुवदसि CaitaCa. 52. 16(2); प्रत्यगात्मैक्यानुभवरूपोऽसंप्रज्ञातसमाधिराविर्भूतो वत्सस्य। यत एवमनुभूत-मर्थमनुवदति Jīvān. 473. 4; (pass.) to be narrated, to be described प्रमात्रन्तरधीर्भ्रान्तिरूपा यस्मिन्ननूद्यते Alaṅkā Ra. 37. 8; तदिन्द्रजालरूपोऽयं भवोऽस्मा-भिरनूद्यते TriṣaŚaPuC. ii. 6. 379; भ्रान्तिः ... यस्मिन्वाक्संदर्भेऽनूद्यते स भ्रान्तिमान् RasGaṅ. 353. 8; **2Fii** to say in the context of, i.e. to treat as the subject, cf. अनूय **2A**; **3Ai** to speak in favour of, i.e. to glorify एतत्कुत्सः सामापश्यत्तेनैनम् (इन्द्रम्) अन्ववदत् PañcBr. ix. 2. 22 (Sāy. स्तुतवान्); सोममेवैतत् प्रत्यक्षमनुवदति JaimiBr. 3. 58; 3. 89; 3. 242; **3Aii** to speak in conformity or in accordance with पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वं रूपमपरेणानुवदति तदनुरूपस्यानुरूपत्वम् PañcBr. xi. 6. 4; xii. 1. 5; xii. 7. 7; (सोमक्रयणीम्) अथोपनिष्क्रम्याभिमन्त्रयते। चिदसि मनोऽसीति चित्तं वाऽइदं मनो वागनुवदति ŚatBr. III. ii. 4. 16; स्तोत्रियानुरूपयोर्ह खलु वै तद् रूपं, यस्माद् यां श्रेष्ठी वाचं वदति तां पापीयान् अनुवदति यस्मात् कर्ता च करणश्च सदृशौ सन्तौ विज्ञायेते JaimiBr. 3. 21; 3. 136; 3. 139; **3Aiii** to speak in favour of, i.e. to approve of, cf. अनुवदत् 4; **3B** to speak for, i.e. to suggest तदाहुर्न वा आर्त्यार्तिरनूद्यार्त्या वा एष आर्तिमनुवदति यः कलशे दीर्णे द्रद्राणवतीषु करोतीति PañcBr. ix. 6. 5; **3Ci** to speak afterwards or subsequently तं (भृगुं) वागन्ववदत् GopBr. i. 1. 4 (3. 9); वाचं वदन्तीं सर्वे प्राणा अनुवदन्ति Śāṅkhā Ā. 5. 2 (19. 14); KauṣīU. 3. 2; सर्वार्थं धर्मं प्रथमम्। उपवादाननुवदेत् VārāŚS. I. i. 1. 3; यावद्यामीति वाणीं निगदति रमणीं प्राणनाथः प्रयाणे तावत्तत्प्राणमित्रैर्व्यरचि तु पुरतः ... दृष्ट्वा तन्वी प्रजामीत्यनुवदति PadyaVe. 353; **3Cii** to speak subsequently, i.e. to reply राजा ... पप्रच्छ।... कच्चित्कुशली कुमार इति स तमन्ववादीत्। अद्य कुशली HarṣaC. 289. 9; इत्युक्तो लेखहारेण चक्रेशोऽन्ववददमुम् RājTa. (Prā.) 275; **3D** to imitate in speaking अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते RaghuVa. 5. 74; अनुवदते कठः कलापस्य CāndraVṛ. *on* i. 4. 94; Kāśi Vṛ. *on* i. 3. 49; Prakri Kau. ii. 415. 2-5; SiddhāKau. 458 B. 34 (*on* i. 3. 49); अनुवदते मौद्गः पैप्पलादस्य KāśiVṛ. *on* i. 3. 49; समितिषु वदते गुणान् जनोऽसावनुवदते प्रमदाजनोऽप्यमुष्य Rāvaṇā. 2. 37; अनोर् अठात्। अनुवदते MugdhaBo. 23. 40 (139. 8); **4Ai** to resound, to resonate अनुपूर्वाद् वदतेर्घोषो भवति। अनुवदते जिनदत्तो देवदत्तस्य ... व्यक्तवाक्समुक्तावित्येव। अनुवदन्ति वीणाः JaineVyā. 29. 9 (*on* i. 2. 45); KāśiVṛ. *on* i. 3. 49; Prakri Kau. ii. 415. 4; Siddhā Kau. 459 A. 2 (*on* i. 3. 49); (pass.) to be resounded, to be resonated मधुमर्दनगीतगर्भया तद्विशदं नारदवीणयान्ववादि Yādavā. 15. 86; (*caus.*) to cause to resound, to cause to resonate धृतराष्ट्रश्च राजर्षिः सर्वाः प्रकृतयस्तथा। ततोऽनुवादयामासुः पणवानकदुन्दुभीः MahāBhā. xii. 40. 16; (असुराः) तन्त्रीस्वरगुणैर्विद्धमातोद्यानन्ववादयन् Hari Vaṁ. App. I. 29F (275); **4Aii** to imitate in sound जल्पितोत्क्रुष्टसंगीतप्रनृत्तस्मितवल्गितैः। घोषस्यान्ववदिष्टेव लङ्का पूतक्रतोः पुरः Bhaṭṭi. 8. 29 (comm. अनुचकारेव); **4 Aiii** to sound in conformity with (main note), cf. अनुवदन 1; **4Bi** to echo as if for approval संरम्भिणो वाणीर्बलस्यालेख्यदेवताः। सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ŚiśuVa. 2. 67; गम्भीरया गिरा भर्तुर्विदधानस्य देशनाम्। अनूवादेव स गिरिर्गह्वरोत्थैः प्रतिस्वनैः TriṣaŚaPuC. i. 6. 418; **4Bii** to echo in reflection (रामेण) आश्रुतः ... सुन्दप्रियावधः। तमेवान्ववदत्तस्य चापः शिञ्जारवच्छलात् RāmāCam. 1. 40; शौरिगुणानुबन्धम्। गुहाविशेषैर्ध्रुवमन्ववादीद् गोवर्धनः Yādavā. 7. 72; तद्वाचं कुहरशतप्रतिप्रणादव्याजेन स्वयमपि सोऽद्रिरन्ववादीत् Rāgh. 12. 34; **4C** (*fig.*) to imitate, to resemble परिम्लानच्छायामनुवदति दृष्टिः कमलिनीम्।... इत्येवमादिषु लक्षणार्थो निरूप्यते KāvyālaṅSū. iv. 3. 8; KāvyMī. 19. 1; SaraKaṇṭhā. 63. 8; अस्याः ... दन्तच्छेदच्छविमनुवदत्यच्छता गण्डभित्तेः TilaMañ. 256. 1; भ्रूविभ्रान्तिर्मदनधनुषो विभ्रमानन्ववादीत् SaraKaṇṭhā. 182. 1; AlaṅkāŚe. 7.2 (21); Kuval. 140 (11); कुचकलशविसारिस्फारलावण्यधारामनुवदति यदङ्गासंगिनी हारवल्लिः Vāgbhaṭā. 3. 6 [to insist upon, MW.; to mock, to abuse or rail at, Apte.]

²**अनुवद्** (anu-vad-) X. Ā. [DhātuPā. 10. 297] to recite again तदद्य निजशक्त्याहमपि पुण्यमुपार्जये। तपःपूजादिकं श्रेष्ठिपृष्ठलग्नोऽनुवादये Kumā - DeC. (So.) 32. 16.

अनुवदत् (anu-vadat) *adj.* [*f.* -ntī] **1A** (used as noun) one who is reciting after, i.e. following in (speech) for study शंसति वाग्वै शर्म तस्माद्वा-चानुवदन्तमाह Ait Br. 10. 8 (280); **1B** repeating (विटः) आकाशभाषितरूप-परवचनमपि स्वयमेवानुवदन् उत्तरप्रत्युत्तरे कुर्यात् SāhiDa. 355. 9; **1C** imitating in speaking कान्ते ... प्रथितं मृगाक्ष्या चातुर्यम् ...। तत्कूजितान्यनुवदद्भिरनेकवारं शिष्यायितं गृहकपोतशतैः Śṛṅgā Ti. (Ru.) 1. 62; Sadukti Ka. 152. 7; Sāhi-Da. 110. 9; अनुवादतो (? अनुवदति) गृहशुके प्रकाशयत्यनुरागवद्रहसि मोहजल्पितम् Acyutarā. 9. 35; विष्वक् तथानुवदतो जगतो विनोदात् प्रीत्यै कटूक्तिमुखराप्यभवन्महत्यै Acyutarā. 10. 34; **2** narrating, describing, recounting निजमनोरथमनुवदन्त्या बालचन्द्रिकया संतुष्टान्तरङ्गा .... राजकन्या ... पूजाम् तस्मै कारयामास Daś-KuC. 27. 7 (*but* Apte repeating, telling, saying in general); **3A** expressing, referring to, mentioning श्वेताश्वतरीयः कृष्णानुयायित्वं हिशब्देन धर्मस्यानुवदंस्तद्वानेव देशो धर्म्य इति दर्शयति BālaKrī. i. 9. 2 (*on* 1. 2); अनध्यापने दोषमनुवदन्ती श्रुतिरेवावश्यकर्तव्यतां ज्ञापयति ManuBh. i. 134. 18 (*on* 2. 113); पश्चात् प्राची पत्न्यन्वास्ते इति वाक्यशेषे पश्चात्प्राङ्मुखत्वमनुवदन् कर्तुर्मुखवादं दर्शयति Saṅkar-KāBh. 66. 4 (*on* ii. 1. 39); एताः (ऋचः) क्रियमाणमनुवदन्त्यो होत्रा पठ्यन्ते NyāyMā Vi. 695. 2 (*on* xii. 3. 18); **3B** restating, reiterating (idea etc.) सिद्धं हि शब्देनानुवदन् वसन्ते ब्राह्मणोपनयनं वसन्तादिसंबन्धं च ब्राह्मणादीनामन्यतः कार्यमिति दर्शयति BālaKrī. i. 33. 23 (*on* 1. 14); अनुवददिदमेव वाक्यमर्यादुपनयति SaṁkṣeŚā. 1. 534 (i. 382. 11); न च ब्रह्मनिर्मितं मायारूपमनुवदच्छास्त्रमशास्त्रं भवति Bhām. 142. 19 (*on* i. 1. 20); युक्तिनिराकृतमनुवदन्तीं श्रुतिमुदाहरति Bhām. 351. 18 (*on* ii. 1. 14); आशङ्कानिवारणार्थं भाष्यमनुवदन्नेव व्याचष्टे TātpaṬ. (Vā.) 29. 21 (*on* i. 1. 1); योऽर्थ इति (?ती) यतानुवदन्परेणाप्येतत्तावदभ्युपगतमिति दर्शयति तस्येत्यादिना Loc. 13. 17 (*on* 1. 2); नन्वनुमितमप्यर्थं पश्चादनुवदद्वाक्यं वाचकं शक्तं स्यात् NyāyRaMā. 92. 8; प्रकरणादिलभ्यतया प्रागनुक्तस्य विशेषणस्य भ्रान्तपरदूषितस्य प्रकरणलभ्यविशेषणवत्तयानुवदतोऽपि सद्वादे प्रसङ्गः KhaṇḍanKhā. 972. 11; निमित्तमात्रमनुवदतः शास्त्रस्यानुमानसापेक्षत्वात् Śruta Pra. iB. 127. 16 (*on* i. 1. 3); श्रुतेन यजिना विदितमनुवदन्तो विश्वमेतद्यथावत् विदधति निगमान्ताः ŚatDū. 129. 7;

... संनिहितयागाननुवदता ... प्रसिद्धार्थनामपरतन्त्रत्वम् आख्यातस्य अङ्गीकृतम् PūrvottaVāNaMā. 11. 8; 4 speaking in favour of, approving of अथैनां द्रौपदीवाचमिष्टामनुवदंस्तदा। भीमोऽभ्यधत्त PāṇḍaC. 8. 171; अनुवदति विभीषणे तदुक्तीः ... परुषमभाषत रोषणो दशास्यः Rāgh. 14. 46; 5 laying down, prescribing स्वशाखाविहितस्य मन्त्रस्य विकल्पमनुवदन् कर्मैकत्वं दर्शयति Mīmā-Kau. ii. 130. 13 (*on* ii. 4. 31)

अनुवदन (anu-vadana) *n.* [enumaerated in the *anupravacanādigaṇa*, Debru. 209] 1 (music) act of sounding in conformity with main note, i.e. act of being in harmony or assonance with (a characteristic of assonant note or *anuvādin*) स्वराः ...।वादी चैवाथ संवादी विवादी चानुवाद्यपि। ... तत्र वदनाद्वादी संवदनात्संवादी, विवदनाद्विवादी अनुवदनादनुवादीति NāṭyaŚā. 28. 23 (9); cf. अनुवादिन्; 2 restatement, reiteration ऊर्ध्वोच्छ्वासी, यत्र ऊर्ध्वोच्छ्वासित्वमस्य (शारीरस्य आत्मनः) भवतीत्यर्थः। दृश्यमानस्याप्यनुवदनं वैराग्यहेतोः BṛĀraUBh. 596.1 (*on* iv. 3. 35); अनुवददिदमेव वाक्यमर्थादुपनयती-दृशकारणं प्रसिद्धम्। अनुवदनमशक्यमन्यथा स्यादवगतगोचरमेव हीदमिष्टम् Saṁkṣe Śā. 1.534 (i.382. 13); तत्रेधा तण्डुलानित्यनुवदनमतस्तत्र नाव्याप्तिरस्ति VidhiRa. 40 (199. 5); 3 kind of kiss (in which sound is produced by tounge) प्रणयपरिगृहीतं चुम्बनं संपुटं स्यादनुवदनमिदं तत्केलिजिह्वारणेन RatiRaha. 7. 6 (comm. क्रीडया ...। सूत्कृतमिति यावत्। तेनानुवदनं प्रतिवदनं चेत् स्यादनुवदनाख्यं चुम्बनं भवति)

अनुवदनपुरःसर (anuvadana-purassara) *adj.* preceded by restatement अनुवदनपुरस्सरं प्रजल्पं भवति कथं तदृते हि वादमुद्रा PrabhāC. 68. 30.

अनुवदमान (anu-vadamāna) *adj.* 1 repeating, reproducing प्रचोदितः शुक इति तेन दशाननेन राक्षसः ...। प्रभोर्गिरामनुवदमानमुत्प्लुताः। शुकं यथा निजगृहुरम्बराच्छुकम्। ... वलीमुखाः स दूत इति ... मेचितः Rāgh. 16. 16; 2 imitating, Rāgh. 16. 16; 3A speaking in conformity with मिथोऽनुवदमानास्तु सेनान्योऽन्यवदन्वचः DvyāśraKā. 7. 50 (comm. एकसांमत्येन यथैके वदन्ति तथापरे वदन्तः); 3B speaking afterwards, DvyāśraKā. 7. 50 (comm. एकैः पूर्वमुक्तमपरे पश्चाद्वदन्तो वा)

अनुवदितव्य (anu-vaditavya) *adj.* 1 to be narrated, to be described यत्रानूद्यमान एवावश्यं गुणोऽप्यनुवदितव्यस्तत्र नैरपेक्ष्यदर्शनादाकाङ्क्षाधीन-संबन्धगुणान्तरविधानानुपपत्तिः Tantr Vā. 292. 2 (*on* i. 4. 3); 2 to be restated, to be reiterated अवश्यं चानेकार्थविध्यनुपपत्तेः सुगादीन्यनुवदितव्यानि TantrVā. 392. 10 (*on* ii. 1. 12); न हि अवश्यं यदेव सर्वत्र प्राप्तं तदेवानुवदितव्यम् Tantr-Vā. 1051. 21 (*on* iii. 5. 31)

अनुवदितुम् (anu-vaditum) *inf.* 1 to refer to, to express ऐन्द्रशब्देनेन्द्रो महेन्द्रश्च न शक्योऽनुवदितुम् ŚābaBh. 1449. 11 (*on* vi. 4. 29); एकदेशनिष्कर्षे च सामर्थ्याभावादशक्यमेवानुवदितुं यो वषट्कर्तुर्भक्ष इति TantrVā. 1052. 18 (*on* iii.5.31); न ह्यफलं विधायान्यत्सफलमनुवदितुं युक्तम् Ṣat Dū. 61. 18; अष्टाचुपभृतीयनेन चतुर्गृहीतं जुहोति ... चतुर्गृहीतद्वयस्य वाचकशब्देनानुवदितुमुचितत्वेऽप्यष्टसंख्यया लक्षणया तदनुवादः MayūMāli. 425. 7 (*on* v. 2. 7); 2 to restate, to reiterate अप्राप्तत्वात् भक्षोऽप्यनुवदितुं न शक्यते TantrVā. 1051. 16 (*on* iii. 5. 31); समासार्थो विधीयते भक्षः ... न हातुमनुवदितुं वा शक्यते TantrVā. 1053. 25 (*on* iii. 5. 31); न तद् विधातुम् अनुवदितुं वा शक्यम् Kāśi. i. 209. 11 (*on* 4. 16); पूर्वपक्षे तु सप्यादीनां दशानामेकयागसाधनत्वात्तन्निष्पन्नानां चतुरवत्ता-नामप्राप्तमेकत्वं नानुवदितुं शक्यते TantrRa. 50. 11; न ह्यप्राप्तं गुणपुपासनमनुवदितुं शक्यम् ŚrutaPra. ii. 38. 27 (*on* i. 3. 13); न चानुवदितुं शक्यः पूर्वमन्यैरबोधितः SarvaDaSaṁ. 3. 81; न वास्यां वचनव्यक्तावर्थशब्दो विधातुं शक्यते वाक्यभेदप्रसङ्गात्। नाप्यनुवदितुं, प्राप्त्यभावात् Yukti Sneha. 32. 20 (*on* i. 1. 2); ईश्वरो हि दुर्ज्ञेय इति निरीश्वरत्वमपि लोकव्यवहारसिद्धमैश्वर्यवैराग्यायानुवदितुं शक्यते SāṁkhyaPraBh. 2. 30 (*on* 1. 10); अन्यप्रमसिद्धस्याप्यन्येनानुवदितुं युक्तत्वात् ŚivārkaMaDī. i. 325. 25 (*on* i. 2. 5); धुभ्वाद्यायतनत्वं प्रत्यक्षमात्रापेक्षानुमानप्रापितमेवानुवदितुं युक्तम् ŚivārkaMaDī. i. 403. 23 (*on* i. 3. 3); याग एकेन वाक्येन गुणतया उपादातुं विधातुं प्रधानतया उद्देष्टुमनुवदितुं च न शक्यते MayūMāli. 71. 11 (*on* i. 4. 6); पौर्णमासीपदम् ... यत्र कालसंबन्धोऽवगतस्तदेवानुवदितुं शक्नोति MayūMāli. 790. 16 (*on* x. 8. 17)

अनुवदितृ (anu-vaditṛ) *adj.* which restates or reiterates (दर्शपूर्णमास-योरिज्याः प्रधानान्यविशेषात्) प्रकृतानामाग्नेयादीनां षण्णामनुवदितारौ नापूर्वयोः कर्मणोर्विधातारौ TantrRa. 223. 13; पौर्णमास्यमावास्यापदाभ्यां विशेष्यमाणा-वनुवदितारावुतापूर्वयोः कर्मणोः विधातारौ (यागौ) ŚāstrDī. 125. 9 (*on* ii. 2. 3); किमैन्द्रवायवादिवाक्ये विहितानां सोमरसानां यागानां च यथाक्रमं सोमेन यजेतेति सोमयागशब्दावनुवदितारौ उत द्रव्ययुक्तस्य कर्मणो विधातारौ VedāntKa. 85. 20 (*on.* i. 1. 4); किमेमौ यजतिकर्मणोरपूर्वयोर्विधातारावुत प्रकृताग्नेयादियागानां समुदायस्यानुवदितारौ Vedānt- Ka. 88. 4 (*on* i. 1. 4); समुदायस्य चानुवदितारौ समुदायवचनावेतौ (पौर्णमास्यमावास्याशब्दौ) MīmāKau. iii(2). 163. 11 (*on* ii. 2. 3)

अनुवदिष्यमाणत्व (anuvadiṣyamāṇa-tva) *n.* the state of being what is going to be expressed or referred to आकाशशब्दस्य आकाशशरीरकपरात्मपरतया निर्वाहोऽप्यभिमतः ... आकाशादिशब्दानां तत्तच्छरीरकपरमात्मवाचित्वस्यानन्तरपादेऽ-नुवदिष्यमाणत्वात् ŚrutaPra. iB. 252. 31 (*on* i. 1. 23)

अनुवद्या (anuvadyā) *f.* name of an Apsaras (born of Prāvā) अनवद्या (v.l. अनुवद्या) मनुवशामनूनामरुणां प्रियाम्। ... इति प्रावा व्यजायत MahāBhā. i. 59. 44.

अनुवध्य (anuvadh-ya) *ger.* having restrained, i.e. having checked रतिमनुवध्य गृहेभ्यः कर्षति राधां वनाय या निपुणा। सा जयति निसृष्टार्था तव वरवंशजकाकली दूती StavMā. 127. 15 (comm. भावं निर्बन्धेनापाद्य) (*better* अनुबध्य)

[1]**अनुवनम्** (ánuvanam) *adv.* [DhātuPā. 8. 8] after longing अग्न आ भर महां दासाय रांध्यः। अंनुवनं सुंवनमुंद्वनं वंनम्। घंर्मस्य पश्य रूपाणि तेंन बध्नामि ते मंनः ṚV. (Khila.) iii. 15. 10.

[2]**अनुवनम्** (anuvanam) *adv.* [P. ii. 1. 16; JaineVyā. i. 3. 12; CāndraVyā. ii. 2. 9] 1A in each and every forest, from forest to forest क्षिपति योऽनुवनं विततां बृहद्बृहतिकामिव रौचनिकीं रुचम्। अयमनेकहिरण्मयकन्दरस्तव पितुर्दयितो जगतीधरः Kirātā. 5. 45; स्फुरति चानुवनं चमरीचयः ŚiśuVa. 4. 60 (comm. वने वने); SaraKaṇṭhā. 206. 9; अनुवनं वनराजिवधूमुखे बहलरागजपाधरचारुणि। विकचबाणदलावलयोऽधिकं रुरुचिरे रुचिरेक्षणविभ्रमाः ŚiśuVa. 6. 46; कथयतीत्यमिवात्र मधुव्रतम् ...। मधुकरी मकरन्दरसासवप्रमुदितानुवनं रचितस्थितिः HarVi. 5. 83; गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनम् ... कोसलेन्द्रोऽवतारः BhāgP. ix. 10. 4; महामुनिमाहात्म्यवशंवदा इव ... अनुवनमपवैरमत्र वासं दधतितमामृतवोऽपि तुल्यकालम् Hammī Ma Ma. 5. 9; अनुवनं वनकन्दलकैतवाद्धिशदलिङ्गतयाविरभूत् ... खगावलिरहोऽलिरहो धनुषा रुषा VasaViKā. 6. 13; 6. 53; अनुवनमलिकोकिलामयूरैः ... मुखरितम् ... उत्पश्यमानो गिरिम् ... श्रीवस्तुपालो जगदेकवीरः VasaVi-Kā. 12. 4; शुकचञ्चुसन्निभपलाशदलत्कुसुमानि रेजुरभितोऽनुवनम् HammīMaKā. 5. 12; अनुवनमनुकुञ्जवीक्षमाणे रुदति विभावनुरक्तिमुक्तकण्ठम्। रुरुदुरिव लताश्च शाखिनश्च CaitaCa. 224. 8; स्नेहादृतेन मनसा जनितानि तस्याः संजल्पितान्यनुवनं च विचेष्टितानि JānaPa. 6. 41; अनुवनं मधुरध्वनिकोकिलाकलकले सति कर्णपथातिथौ। न पथिकः प्रमदां कतमस्तदा स्मरति NemiNir. 6. 39; 1B towards or in the direction of a wood अनुवनमसितभ्रुवः सखीभिः सह पदवीमपरः पुरोगतायाः। उरसि सरसरागपादलेखाप्रतिमतयानुययावसंशयानः ŚiśuVa. 7. 22 (comm. वनं प्रति); अनुवनमनुयान्तम् ... आलोक्य रामम्। दिनमपि रविरोचिस्तापमन्तः प्रपेदे PadyaVe. 793; 2 near the forest अनुवनमिह ... भीता माण्डूकायनी DvyāśraKā. 4. 79 [along side of a wood, MW.]

अनुवनमध्यम् (anuvanamadhyam) *adv.* 1 in the middle of waters विन्ध्यवासिनि अस्याद्रेरनुवनमध्यमम्बुजातैर्वेतण्डव्रजकरदण्डपातभीतैः। सारङ्गैरपि चकितैर्वनेचरेभ्यः सर्वस्वं निहितमिव स्वकं त्वदक्ष्णोः Yātrā Pra. 8. 75; 2 in the middle of the forest, Yātrā Pra. 8. 75.

अनुवनलताकुञ्जम् (anuvanalatākuñjam) *adv.* on each and every bower of creepers in the forest अनुवनलताकुञ्जं गुञ्जन्नुपैति निवर्तते विरचयति न स्वादौ पुष्पासवेऽपि कुतूहलम्। ... इन्दिन्दिरः UnmaRā. (Vi.) 56.

अनुवनान्तम् (anuvanāntam) *adv.* [P. ii. 1. 15] A near the border of forest जातप्रीतिर्या मधुरेणानुवनान्तं कामे कान्ते सारसिकाकाकुरुतेन। तत्संपर्कं प्राप्य पुरा मोहनलीलां कामेकान्ते सा रसिका का कुरुते न ŚiśuVa. 6. 76; B upto the border of the forest चतसृभिराभिः (राजकन्याभिः) साकमेत-त्पितुस्तन्निकटमनुवनान्तं शक्तिदेवो जगाम KathāSaSāg. v. 3. 279; C along the border of the forest अविरलपरागसैकतमकरन्दतरङ्गिणीमनुवनान्तम्। पिकयुवतिजानुदघ्नीं गाहन्ते मधुपयोषितस्तृषिताः SaduktiKa. 170. 17.

अनुवन्द् (anu-vand-) i. Ā. A to praise subsequently बोधा मे अस्य वंचसो यविष्ठ मंहिष्ठस्य प्रंभृतस्य स्वधावः। निन्दति त्वो अंनु त्वो ववन्द वन्दांरु ते तन्वं वन्दे अग्ने MaiS. ii. 7. 10 (ii. 88. 16); B to give respect to, to adore afterwards यान् लिङ्गिनोऽनुवन्दन्ते संविग्ना अपि साधवः। तदर्चा चर्च्यते कस्माद्धार्मिकैर्भवभीरुभिः PrabaCin. 101. 14; C to salute in return, cf. अनुवन्दना; D to pay homage, cf. अनुवन्द्य 2; E (*caus.*) (used in primitive sense) to honour अशुचिस्पर्शाद्दूपान्तरपरिणमन्निर्माल्यं यात्यवन्द्यताम् ... अवन्द्यतां गतं [illegible] स पाप्मा भवति PārāSū. 56. 30.

अनुवन्दना (anu-vandanā) *f.* saluting after, i.e. saluting in return सूराचार्योऽपि तत्रागाच्छुश्रूषाहेतवे प्रभोः। ददे कृतककोपात् तैर्वन्दने नानुवन्दना Prabhā C. 153. 26.

अनुवन्दिन् (anuvandin) [w.r. for अनुवर्तिन्] Kathā Sa Sāg. ii. 3. 52 [PW.; pw.]

अनुवन्द्य (anuvand-ya) *ger.* 1 having praised subsequently यज्ञदानप्रशंसास्मै ब्राह्मणेष्वनुवर्ण्यताम् (v.l. अनुवन्द्य तान्) Mahā Bhā. xii. 106. 17; 2 having paid homage नरपतिरावश्यकशौचावसाने नर्मदाम्भोऽभिषेकपूततनुरनुवन्द्य (v.l. अनुवन्द्य) सांध्यविधिम् ... श्लोकमपठत् Nala Cam. 6. 2 (7)

अनुवप् (anu-vap-) I. U. A to scatter, i.e. to trample, to crush ते देवेभ्य आ वृश्चन्ते पापं जीवन्ति सर्वदा। क्रव्याद्यानग्निरन्तिकादश्वं इवानुवपते नडम् AV. xii. 2. 50; B to sow or scatter one after another पर्जन्यो वायुरादित्यः ... अनूपा अनुवपन्ति लोकान्स्वेन स्वेन कर्मणा Nir. 2. 22 (55. 4) (*but* MW. to scatter over); (pass.) to be sown or scattered तस्मिन्ना वेशया गिरो एकश्चर्षणीनाम्। अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ṚV. i. 176. 2 (*but* MW. to be scattered as dust); Nir. 2. 22 (55. 5); यद् व्रीहयो यद् यवा निरुप्यन्ते अंशव एव तेऽनूप्यन्ते AV. (P.) xvi. 111. 14.

अनुवपुस् (anuvapus) *adv.* A from behind the body अनुवपुरपरेण बाहुमूलप्रहितभुजाकलितस्तनेन निन्ये।... अन्या Śiśu Va. 7. 21 (comm. वपुषः पश्चादनुवपुः); B around the body भामण्डलं विभोः परितः। आविर्भवत्यनुवपुः प्रकाशयत् सर्वतोऽपि दिशः YogŚā. 11. 31.

अनुवप्रम् (anuvapram) *adv.* along the bank उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः। मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् Kirātā. 6. 4.

अनुवर (anu-vara) *adj.* (used as noun) one who accompanies the bridegroom, best man बहुरक्षोऽनुवरोऽसौ प्रकृष्टः पटुकः Dvyāśra Kā. 19. 67 (comm. वरमनुगतो नरः); 19. 68; कन्दुकं मोदकधिया ज्यायस्कानुवरेप्ससि Dvyāśra Kā. 19. 69; आजन्मादृष्टपूर्वी किं वटकान् रोरबालवत्। श्रद्धत्तेऽत्तुमनुवरो मनसा केन नन्वसौ TriṣaŚaPuC. i. 2. 857; i. 2. 858.

अनुवरक (anuvara-ka) *m.* one who accompanies the bridegroom, best man ज्वरीवाब्धिं शोषयितुं मोदकान् परिखादितुम्। श्रद्धालुरनुवरको मनसा केन नन्वसौ TriṣaŚaPuC. i. 2. 855.

अनुवरीभूय (anuvarībhū-ya) *ger.* having become one who accompanies the bridegroom or best man करीन्द्रमधिरूढवान्। आवृतोऽनुवरीभूय सवयोभिर्नृपात्मजैः। ययौ त्रिपृष्ठः TriṣaŚaPuC. iv. 1. 483.

अनुवर्ग (anu-varga) *m.* 1 some part or accessory of a city gate छिन्नं वर्णानामनुवर्गा अभूत्सुः सुवर्णस्य च रूप्यस्य च MaVastuAva. i. 195. 12 [DBHS.]; 2 follower, servant गत्वा गत्वावृत्तिमुदन्वान्भजतेऽयं न प्रत्येति स्वाम्यनुवर्गं प्रतिकूलम् Rāgh Pān. (Dha.) 8. 14 (comm. अनुचरम्)

अनुवर्ण् (anu-varṇ-) X. P. 1 to explain, to interprete तत्र स्म केचिन्मतिनिश्चयज्ञास्तांस्तानुपायाननुवर्णयन्ति MahāBhā. iii. 99. 18; शकुननिमित्तग्रहलग्नबललक्षणदर्शनेन नायकस्य भविष्यन्तमर्थसंयोगं कल्याणमनुवर्णयेत् KāmSū. 192. 21 (3.1); 2A to describe, to narrate अप्रियं चाहितं यत्स्यात्तदस्मै नानुवर्णयेत् MahāBhā. iv. 4. 19; सद्वृत्तिम् ...। तदिच्छाम्यनुवर्णितम् (v.l. तामिहाद्यानुवर्णय) MahāBhā. xii. 234. 2; दूती निवेदयेत्काममर्थांश्चैवानुवर्णयेत् NātyaŚā. 23. 14; मनोरथांश्च पूर्वकालिकाननुवर्णयेत् KāmSū. 205. 7 (3. 2); JayaMa. 205. 21 (*on* 3. 2); चतुराननः ...। सत्यव्रतस्य क्षेत्रस्य वैभवं चान्ववर्णयत् JayāS. 1. 78 + 22; केचनैतज्ज्योतिरनीकम् ... भगवतो वासुदेवस्य योगधारणावामनुवर्णयन्ति BhāgP. v. 23. 4; याः ... सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः BhāgP. v. 26. 3; व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम्। काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् BhāgP. x. 21. 3; तन्मन्त्राणां माहात्म्यम् ...। तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय SkandP. iii (3). 1. 4; रमणः ...। अनुवर्णयेन्मनोरथवृत्तीः पूर्वं समुत्पन्नाः KandaCū. iii. 2. 41; (pass.) to be described कथं चास्य सुतो जातः ...। एतदिच्छाम्यहं श्रोतुं विस्तरेण प्रकीर्तय (v.l. निखिलेनानुवर्ण्यताम्) MahāBhā. i. 1334 *(4); यज्ञदानप्रशंसास्मै ब्राह्मणेष्वनुवर्ण्यताम् MahāBhā. xii. 106. 17 (*but* pw. to praise); यथोक्ता एव देवताः पञ्चधेहोपदिश्यन्ते तदेतदनुवर्ण्यते BṛĀraUBhVā. iii. 9. 67; अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः BhāgP. xii. 5. 1; अत्रानुवर्ण्यते सद्भिरितिहासः SkandP. iii (3). 1. 28; नदीनां पर्वतानां च प्रादुर्भावोऽनुवर्ण्यते PadmP. v. 2. 11; धारणाः ...। योगिनामनुवर्ण्यन्ते तथा योगप्रसिद्धये MāliniT. 16. 18; न चेदाधारभावेऽपि मिथ्यात्वमनुवर्ण्यताम् ŚatDū. 128. 23; अवयवार्थोऽनुवर्ण्यते SiddhāSi. i. 30. 3; मनोज्ञवर्णनीयांशे वर्णनीयोऽनुवर्ण्यते ParamāKā. 10. 7; 2B to be praised हंसरूपेणानुवर्णयति AṇuBh. 35. 25 (*on* i. 1. 14); 3A (pass.) to be proclaimed or expressed एतत् स्त्रीभिरसामर्थ्यं मन्त्रिणामनुवर्ण्यते PratiYau. 1. 15; 3B to express, i.e. to inquire, cf. अनुवर्ण्य 2; 3C to prescribe, cf. अनुवर्णित 2A; 4 to consider, i. e. to approve or to admit, cf. अनुवर्णित 3 [to praise, MW.]

[1]अनुवर्ण (an-uvarṇa) *adj.* not having the letter *u* व्यञ्जनान्यनुवर्णानि यान्युवर्णान्यान् हितानि च। विद्यादिद्वः करणमेतेषामथौकारउकारयोः LomŚi. 4. 7.

[2]अनुवर्ण (anu-varṇa) *adj.* which is in conformity with letters अर्पणं नाम लीलायमानमधुरवल्गुना (v.l. लीलायमानानुवर्णेन) स्वरेण पूरयतेव रङ्गं यत्पठ्यते NātyaŚā. 17. 130 (397. 1)

अनुवर्ण (anu-varṇa) *m.* 1 (Alch.) a type of chemical process wherein more than proportionate material is added द्रव्ययोर्मर्दनाद् ध्मानाद् द्वन्द्वानं परिकीर्तितम्। भागाद् द्रव्याधिकक्षेपमनुवर्णसुवर्णके Ras Ra Sa. 8. 45; 2A class (like Brahmin etc.) in successive order, cf. अनुवर्णघ्न 1; 2B every class, cf. अनुवर्णयोग्या; 3 colour in due order, cf. अनुवर्णघ्न 2.

अनुवर्णघ्न (anuvarṇa-ghna) *adj.* 1 who destroys the (four) classes (such as Brahmin etc.) in successive order एको दुर्भिक्षकरो द्वयायाः स्युर्नरपतेर्विनाशाय। सितरक्तपीतकृष्णैर्विद्धोऽर्कोऽनुवर्णघ्नः BṛSaṁ. 3. 19; अनुक्रमेण वर्णान् ब्राह्मणादीन् हन्तीत्यनुवर्णघ्नः AdbhuSāg. 21. 5; 2 who destroys the colours (of the sun during the eclipse) in due order, BṛSaṁ. 3. 19.

अनुवर्णम् (anuvarṇam) *adv.* [P. ii. 1. 6] in the successive order of (four) classes (such as Brahmin etc.) कुशयुक्ता शरबहुला दूर्वाकाशावृता क्रमेण मही। ह्यनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका BṛSaṁ. 53. 97.

अनुवर्णयत् (anu-varṇayat) *adj.* 1 explaining or interpreting तत्र स्म केचिन्मतिनिश्चयज्ञास्तांस्तानुपायाननुवर्णयन्ति (v.l. °यन्तः) MahāBhā. iii. 99. 18; 2 describing प्रीतोऽहम् यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् BhāgP. iii. 9. 39.

अनुवर्णयितव्य (anu-varṇayitavya) *adj.* fit to be explained तस्मात् सविंशमध्यायशतमनुपदपादश्लोकमनुवर्णयितव्यमनुश्रोतव्यं च SuśruS. i. 4. 5 (comm. व्याख्यातव्यम्)

अनुवर्णयितुम् (anu-varṇayitum) *inf.* to describe, to narrate मनः ... परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद् गुरोऽर्हस्यनुवर्णयितुम् BhāgP. v. 16. 3.

अनुवर्णयोग्या (anuvarṇa-yogyā) *adj. (f.)* fit for all (four) classes आच्छाय नीतेऽत्र मुहूर्तमात्रे यस्योज्ज्वलेद् वर्तिरमुष्य सा भूः। दीप्तासु सर्वास्वनुवर्णयोग्या TantrSa. 1. 38 (comm. सर्ववर्णं प्रति योग्या)

अनुवर्णान्त (an-uvarṇānta) *adj.* not ending with the letter *u* यद् वृद्धमनुवर्णान्तं वाहीकग्रामः स ठञ्ञिठयोरवकाशः MahāBh. ii. 297. 14 (*on* iv. 2. 104)

अनुवर्णित (anu-varṇita) *adj.* [f.-ā] 1 described, narrated यत्र धर्मस्थैर्वार्यः कामश्चैवानुवर्णितः MahāBhā. xii. 59. 29; xii. 59. 72; अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः MahāBhā. xii. 59. 43; (सद्वृत्त्या) यया सन्तः प्रवर्तन्ते तदिच्छाम्यनुवर्णितम् MahāBhā. xii. 234. 2; नृपाणाम् ...। वंशानुचरितं चैव यथावदनुवर्णितम् Viṣṇu P. v. 1. 1; VākyaPa. 3 (14). 358; एतदीश्वरसंधानं नाम योगोऽनुवर्णितः LakṣmīT. 49. 127; न तथा वासुदेवस्य महिमा ह्यनुवर्णितः Bhāg P. i. 5. 9; अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते BhāgP. ii. 10. 35; गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन BhāgP. vii. 9. 12; सांख्यानां तु परं तत्त्वं यथावदनुवर्णितम् BrahmP. 243. 47; देवयानश्च ... iv. 31. 26; वक्ष्ये यथावदनुवर्णिताः Bhavi P. 363B.6 (ii (2). 10. 18); ततः सुन्दरसेनेन स्ववृत्तान्तेऽनुवर्णिते। चित्रीयमाणचेतास्तं शबरेन्द्रो जगाद सः KathāSaSāg. xii. 34. 323; व्यवसायकथावाक्यैर्यावत्तत्रानुवर्णितम्। न विश्राम्यति ते तावद्बुद्धि YogVā. iii. 11. 29; SāmkhyaPraBh. 87. 32 (*on* 2. 47); हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते। ... स स्वभावोऽनुवर्णितः Pramā Vār. 1. 8; 2A prescribed शूद्राणामिह शुश्रूषा नित्यमेवानुवर्णिता MahāBhā. xiii. App. I. 10(1); 2B proclaimed, expressed मनुना स्वमतमनुवर्णितम् ManvaMu. 97. 23 (*on* 3. 53); 3 considered, i.e. approved or admitted देयं पुत्रकृतं तत् स्याद्यद्यस्यादनुवर्णितम् KātySm. 579; अनुवर्णितास्तु सिद्धिं प्राप्नुवन्तीत्याह सः (कात्यायनः) SmṛtiCan. iii. 307. 14; नानुवर्णिताः स्वतन्त्रेण पित्रादिना नानुमताः ViraMi. (Vyavahāra.) 94. 24; 4 explained, cf. अनुवर्णितरहस्.

अनुवर्णितरहस् (anuvarṇita-rahas) *adj.* who has explained the secret or mystery यर्ह्येव कर्णविवरेण गुहां गतो नः पित्रानुवर्णितरहा भवदुद्भवेन। तं त्वा विदाम BhāgP. iii. 15. 46.

अनुवर्णितशास्त्रसमाकर्णन (anuvarṇitaśāstra-samākarṇana) *n.* hearing, i.e. knowing of doctrines that are explained तदनु तदनुवर्णितशास्त्रसमाकर्णनादिव विरक्तभावमापाद्यमानः कमपि श्रमप्रकर्षमुपदर्शयन्नत्यन्तस्थितरतार वन्यगिरिशिखरम् YatraPra. 4. 54 (1)

अनुवर्णितुम् (anu-varṇitum) *inf.* (ṇic.) to describe, to narrate (सद्वृत्त्या) यथा सन्तः प्रवर्तन्ते तदिच्छाम्यनुवर्णितम् (v. l. तुम्) MahāBhā. xiii. 234. 2; तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् BhāgP. i. 1. 13; न तस्य महिमा केनचिदपि शक्योऽनुवर्णितुम् BrahmP. 161. 4.

अनुवर्ण्य (anuvarṇ-ya) *ger.* 1 having described or narrated यज्ञदानप्रसारं ब्राह्मणेष्वनुवर्णिताम् (v. l. ब्राह्मणान् ... अनुवर्ण्य तान्) MahāBhā. xii. 106.17; (देवीऽपि) सौमनस्यमुपाविश्यैश्वर्यमनुवर्ण्य ... अन्यदुक्त्वा DaśKuC. 40. 6; तथा गन्धर्वदलानामः पुर एवानुवर्ण्य तान्। मानुषीमनुसर्पेम Br KathāŚloSam. 19. 48; लोकज्ञात्मनुगुणमेवाचारं काञ्चिदनुवर्ण्य BrahmSūBh. (Bhā.) 12. 27 (on ii. 1. 4); 2 having expressed, i.e. having inquired नित्यमोहारोषु ब्राह्मणेषुत्तमस्तत्समोधिकृतोर्मिनः कुशलमनुवर्ण्यानुबोध्य (च) नि EI. xx. 61. 3 वङ्गीयकाग्रामे ब्राह्मणोत्तमान् संव्यवहारादिकुटुम्बिनः कुशलमनुवर्ण्य बोधयन्ति(ति) EI. xxiii. 58. 2; स्थान् राजस्थानीयोपरिक ... भट्टादीनन्यांश्चकोरिणश्च कुशलमनुवर्ण्य समनुदर्शयति EI. x. 74. 3.

अनुवर्ण्यमान (anu-varṇyamāna) *adj.* which is being described उपलभ्यमाननानाविद्यरतमनुवर्ण्यमानदास्यकारम् ... अरण्यग्रामगण्डलं तदभवत् AvantiKa. 121. 11.

अनुवर्तक (anu-vartaka) *adj.* (also used as noun) 1Ai conforming to, imitating तथागतेन धर्मचक्रं प्रवर्तितं यस्य प्रवर्तनात्तथागत इत्युच्यते। ... लोकानुवर्तक इत्युच्यते LaliVi. 26. 51 (46); समन्तभद्रकायेन हीनानां चानुवर्तकः LaliVi. 26. 72; Aii following, cleaving to a suspended (monk) अरण्यगोचरस्ता: प्रभंकरा: तेष त्वं चर पथेऽनुवर्तकः Rāṣṭrapālaparipṛcchā 39. 4; प्रवर्तकम्। अनुवर्तकम् MahāVyu. 245. 838 [DBHS]; 1B who acts accordingly or conformingly देवी भुजमुपायुः पृथक्करणतः सर्वानुयोगस्यानुवर्तकाः PrabhāC. 18. 8; 84.22; समजनि कश्चित्तस्य प्रवणः शिष्योऽनुवर्तकश्चित्तस्य। काश्मीरनामालोके भट्टमनसो वासुदेवनामा लोके YudhiVi. 1. 9; 2 one of the four types of *upāyas* (*lit.* functioning to continue) उपायोऽनुग्रहकरो ग्राहकोऽथ प्रवर्तकः। तथानुवर्तको ज्ञेयश्चतुःसंग्रहवस्तुनः MaYānaSū. 16. 73 (116. 11); तस्मात् समान(ना?)र्थता बोधिसत्त्वस्य चतुर्थोऽनुवर्तक उपायः BodhiBhū. 79. 23; 3A second move (one of the two causes or aspects) समुत्थानं द्विधा हेतुतत्क्षणोत्थानसंज्ञितम्। प्रवर्तकं तयोराद्यं द्वितीयानुवर्तकम् AbhidhK. 4. 10; पश्चकं त्वनुवर्तकम् AbhidhK. 4. 11 (Bh.पञ्च विज्ञानकाया अनुवर्तका एव); प्रवर्तके शुभादौ हि स्यात् त्रिधाप्यनुवर्तकम् AbhidhK. 4. 12 (Bh. कुशले प्रवर्तके कुशलाकुशलाव्याकृतमनुवर्तकं स्यात्); 3B necessary consequence अन्वयव्यतिरेकाभ्यां यस्य दृष्टोऽनुवर्तकः। स्वभावस्तस्य तद्धेतुरतो भिन्नान्न संभवः PramāVār. 1. 39 [NānārthāSam. iii. 86. 694 gives *anuvartaka* as the meaning of *harṣayitṛ*]

अनुवर्तत् (anu-vartat) *adj.* [*f.* -ī, ntī] 1A going after, following अश्रुबिन्दूद्भवा तस्याः प्रावर्तत महानदी। अनुवर्तती सृतिं तस्या भृगोः पत्न्या यशस्विनः MahāBhā. i. 6. 6; अनुवर्तती तु भर्तारं जगाम मृदुगामिनी। (सावित्री) ... तं च कालमवेक्षती MahāBhā. iii. 280. 33; अस्मात् प्रवृत्ता पुण्योदा नदी त्वाकाशगामिनी। ... सा ज्योतींष्यनुवर्तन्ती ज्योतिर्गणनिषेविता LiṅgaP. i.52.5; एनामनुवर्तता स्मर्तव्या वयम् ViddhaŚā. 1.42 (15); 1B following, i.e. obeying नृपनन्दना: ...। प्रजाविसर्गं आदिष्टा: पित्रा मामनुवर्तता। तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् BhāgP. iv. 30. 15; 2A behaving एवंविधा: काला: क्षमाया: परिकीर्तिता:। अतोऽन्यथानुवर्तत्सु तेजस: काल उच्यते MahāBhā. iii. 29. 32; 2B observing or practising वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्तताम्। गान्धर्वं शूद्रजातीनां परिचर्यानुवर्तताम् MārkP. 49.78; KūrmaP. 29. 3 (1. 2); BhaviP. 318 B. 9 (ii (1). 1. 35)

अनुवर्तन (anu-vartana) *n.* 1 continuance or supplying (of word or sense from previous context) 2Ai act of complying with, act of doing accordingly ii conformity, accordance iii imitation B act of adapting or acquiring of other properties, assimilation 3A practice or observance B proper activity C act of carrying out, i.e. act of expressing (emotions, feelings etc.) D conduct or behaviour Ei paying attention ii attendance, service F act of leading to, guiding 4A act of going after, following Bi following, i.e. accepting ii act of following (in action) C following, i. e. obeying D following or adhering to 5Ai continued presence or existence, persistence ii repeated existence, recurrence B existence, position or condition 6 name of a dramatic embellishment (*nāṭyālaṅkāra*) 1 continuance or supplying (of word or sense from previous context) अनुवर्तन्ते च नाम विधयो न चानुवर्तनादेव भवन्ति MahāBh. i. 44. 13 (on i. 3. 3); i. 457. 14 (on ii. 3. 32); एकयोगनिर्दिष्टानामेकदेशानुवर्तनं VyāḍiPari. 23; 'अस्य' इति प्रत्ययार्थस्यानुवर्तनात्तत्पुरुषः परिमाणी प्रत्ययार्थेनार्थीयते Pradī. iv. 273A. 34 (on v. 1. 59); समासे गुणभूतस्यापि 'नार्थ'शब्दस्य बुद्ध्या विभज्योपयत्रापयनुवर्तनं कार्यम् Mitā. 6. 19 (on 1. 14); 'नञ्च-' इत्यतोऽनुवर्तमानस्य विग्रहणस्य 'धर्मादिभ्यो-' इत्यत्र उपात्तस्यानुवर्तनात् PāṇiTaVā. NaMā. 84. 15; इयं च परिभाषा दरिद्यनुवर्तनान्न सर्वविज्ञान्यत्रपङ्ग PāṇiTaVā. NaMā. 115. 22; 'प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे प्रत्ययग्रहणस्यानुवर्तनादेव प्रत्ययलक्षणमित्येव सिद्धे पुनः प्रत्ययग्रहणेन ज्ञाप्यते PariVṛ. (Ni.) 6. 1; यस्मात्प्रत्ययविधिस्तदादीत्यस्यात्रानुवर्तनात् LaŚabdeŚe. ii. 438. 5; हकारादीन् पूर्वोक्तस्थानान्यनुवर्तनेनानूद्य ... हकारमात्रस्य विपन्नस्थानेषु समस्थानवीतलं मं(हा)भून्यस्थानविधि: SetuBa. 339. 16; ढो च इत्यत्र हस्वग्रहणेऽनुवर्तमाने पुनर्चकारेण तस्यानुवर्तनम् PariVṛ. (Si.) 11. 23; 2Ai act of complying with, act of doing accordingly न चानुवर्तनं तन्मे रुचितं यत्र नार्जवम् BuddhaC. 4. 93; संयुक्ता नायकेन तदङ्गनार्थैकचारित्रैर्वृत्तमनुविदध्यात्। ... तदिष्टरसभावशीलानुवर्तनम् KāmSū. 320. 3 (6. 2); आनुलोम्यमनुकूलता, आराध्यचित्तानुवर्तनम् Kāśi Vṛ. on v. 4. 63; स्वाम्यादयः। तेषामभिमतकरणेन ... यच्चित्तस्यानुवर्तनमाराधनमानुलोम्यम् Nyās. ii. 164. 15 (on v. 4. 63); कविनामिन्तु छन्दोऽनुवर्तनेन रञ्जयेत् KāvyMī. 52. 6; रचनाविशेषस्यार्पण वर्तना। प्रसिद्धं नानुरुन्धन्ति श्रोतृचित्तानुवर्तनम् RājTa. (Ka.) 3. 95; PāñcaRāRa. 91. 19; सतीव्रतमेतद् यत्तु पत्युरनुवर्तनमेव Rāgh. 5. 82; 2Aii conformity, accordance पतिव्रतामयं ज्योतिर्ज्योतिषान्येन शोध्यते। इदमाश्चर्यमथवा लोकस्थित्यनुवर्तनम् MahāvīC. 7. 4; लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम्। ... स्वाध्यायापनयं कुरु AkṣU. 43; Adhyā U. 3; 2Aiii imitation, cf. अनुवर्तनवश; 2B act of adapting or acquiring of other properties, assimilation सर्पिस्तैलं वसा मज्जा सर्वस्नेहोत्तमा मताः। एष्वेवोत्तमं सर्पि: संस्कारस्यानुवर्तनात् CaraS. i. 13. 13 (comm. अनुविधानं स्वीकरणमिति यावत्); तत्रापि चोत्तमं सर्पि: संस्कारस्यानुवर्तनात् AṣṭāSaṁ. i. 128. 5 (1. 25); 3A practice or observance सद्वृत्तस्यानुवर्तनम् ...। प्राज्ञः प्रागेव तत्कुर्याद्धितं विद्याद्यदात्मनः CaraS. i. 7. 53; AṣṭāSaṁ. i. 20. 13 (1. 6); AṣṭāHṛ. i. 4. 33; यथासंभाषितस्य च निबन्धनस्यानुवर्तनं रक्षणं च ArthŚā. ii. 272. 9 (7. 6); भवानामेवमष्टानामन्तः कृत्यानुवर्तनम्। रत्नत्रयस्य निर्ग्रन्थो भूत्वा सिद्धिं समश्नुते PadmP. (Ra.) 14. 204; शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यायापनयं कुरु AkṣU.43; Adhyā U. 3; मनुष्याणां धर्मस्तदनुवर्तनम्। कुर्वन्बलवता संधिं हीनैर्युद्धं करोत्यसौ BrahmP. 195. 16; तथानुवर्तनं यथाधिकारं साक्षात् परंपरया वा सद्ब्रह्मवासुदेवाख्यपरमपुरुषार्थप्राप्तिसाधनमिति सिद्धम् PāñcRāRa. 43. 17; यथा खलु दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकस्य क्रतोः सर्वयागेष्वनुवर्तन एव साफल्यात् TattvPrakā. 183A. 9 (on iii. 3. 59); 3B proper activity बुद्धीन्द्रियमनःशुद्धिर्मारुतस्यानुलोमता। सम्यग्विरिक्तलिङ्गानि कायाग्नेश्चानुवर्तनम् CaraS. i. 16. 6; 3C act of carrying out, i.e. act of expressing (emotions, feelings etc.) परस्परप्रीतिकरैरात्मभावानुवर्तनैः प्रीतिः ... रतिं जनयते पराम् KāmSū. 181. 1 (2. 10) (JayaMa. आत्माभिप्रायेण यान्यनुवर्तनान्यालिङ्गनादीनि); 3D conduct or behaviour उत्कृष्टशरीरसंस्कारात्सुभगवेषतया लोकसंभावनीयतया परं सुहृत्प्रियत्वम्। ... दाक्षिण्यानुवर्तनम् DaśKuC. 136. 6; धर्मज्ञेष्वनुवर्तनं बहुविधं मानं जने गर्विते ... नरस्य कथिताः पर्याप्तमेते गुणाः SūktiRa. 163. 162; प्रश्रयादनुवर्तनम्। अनुवृत्ति: SāhiDa. 349. 7; 3Ei paying attention कथास्वनुवृत्तिस्तेन कथ्यमानास्वनुवर्तनम् JayaMa. 318. 18 (on 6. 2); 178. 16 (on 2. 10); SthānṬ. 236A.11; 3Eii attendance, service, cf. अनुवर्तनजीविन्; 3F act of leading to, guiding राम त्वम् ... भक्तानामनुवर्तनाय सकलां कुर्वन् क्रियासंहतिम् ... भासि AdhyāRā. vii. 4. 12; 4A act of going after, following देवीमुत्सुकप्रिय (जा?जना)नुवर्तनमुहूर्तलम्बितपरिजनाङ्गनासंभ्रमानुयातां पुरस्कृत्य ... विन्ध्यगिरिमभ्यवर्तन्त मन्त्रिणः AvantiKa. 52. 8; 110. 13; 4Bi following, i.e. accepting समुच्चयो निमित्तं चेत् स्यान्निमित्तानुवर्तनम् VākyaPa. 3 (14). 201; सर्वमेतद्विजानन्तो न सर्वस्य प्रबोधनात्। व्यक्तिभूता भविष्यन्ति व्यक्तस्यैवानुवर्तनात् BrahmP. 242. 89; 4Bii act of following (in action) अकार्यात् प्रतिषेधश्च कार्ये चैवानुवर्तनम्। संक्षेपादिति सद्वृत्तं बन्धुमित्रानुजीविनाम् NītiSā. 5. 51 (comm. स्वामिनः ... धर्म्यार्थ्यविधिषु प्रवर्तनं प्रवर्तमानस्यानुवर्तनम्); 4C following, i. e. obeying जिनदत्तोऽपि ... समाचरितामरानुवर्तनसमयस्तां विद्यां प्रतिपद्य ... धरसेनाय ... प्रादात् YaśasCam. ... सुरूपोऽयं मातृत: पितृतस्तथा। अनुवर्तनमेतेषां मनोवाक्कायकर्मभिः

KūrmaP. 522.10 (2.12); PadmP. i. 51.33; BallāC. 81.8; ... Hitopa. 2.153 (1); **4D** following or adhering to, cf. **अनुवर्तनद्वार**; **5Ai** continued presence or existence, persistence इच्छेदेकेषु [उच्छेदकेषु] बहुलं संस्कारस्यानुवर्ण[र्त]नम्। परपक्षेषु कल्प्या [कल्प्यं] हि भूयिष्ठानीति दृश्यते VibhraVi. 19; बोद्धृत्वपरिणामित्वधर्मयोरनुवर्तनम्। मलस्य साधिकारस्य निवृत्तेस्तत्परिच्युतौ MrgendraT. i. 7.22; तादवस्थ्ये तु रूपस्य नान्येनाभिभवो भवेत्। प्राक्तनानभिभूतस्य स्वरूपस्यानुवर्तनात् TattvSam. 570; 688; मनसः अन्तःकरणस्य ... उपाधेरनुवर्तनात् ĪśopBh. 10.2 (on 4); रसः ...। आलम्बनगुणस्थैर्यात्संस्कारस्यानुवर्तनात्। योऽनुयाति विलीनो यः स सूक्ष्म इति कथ्यते BhāvPra. (Śā.) 132.7 (6); AkṣiU. 4.39; Adhyā U. 3; अनुयायिनि प्रयोगत्रयेऽप्यहमोऽनुवर्तनादित्यर्थः Bhāsk. i. 89.19 (on i. 2. 2); i. 368.13 (on i. 7.6); तत्किं कृत्स्नस्य ब्रह्मधर्मस्य अनुवर्तनमभिप्रैपि GoviBh. 92.6 (on ii. 1.7); केचित् स्वप्नवदत्राहुः समसत्ताकतत्क्रियाम्। स्वप्नोत्थभयकम्पादेर्जागरेऽप्यनुवर्तनात्। अद्वैतविद्याचार्याणां समता नात्र संमता VedāntSiSūMañ. 2.51 [AmaK. 2532; ŚabdaRa. (Vā.) 4397]; **5Aii** repeated existence, recurrence असत आत्मलाभः सतः सत्तावियोगो द्रव्यरूपतयानुवर्तनं च खलूत्पादादीनां परस्परमसंकीर्णानि लक्षणानि सकललोकसाक्षिकाण्येव SyādvāMañ. 21 (55); **5B** existence, position or condition अन्येषामपि द्वीपानां श्रूयतामनुवर्तनम् PañcaRā. (Nā.) ii. 2.75; **6** name of a dramatic embellishment (*nāṭyālaṅkāra*) अथ नाट्यालंकाराः- प्रोत्साहनं च साहाय्यमभिमानोऽनुवर्तनम् SāhiDa. 344.13 [Kośas give *anuvartana* as the synonym of the following : *anurodha*, AmaK. 1492; KośaKaTa. 1.5891; *anuvṛtti*, KośaKaTa. 1.5891; NānārthaSam. i. 17.81 gives *anuvartana* as the meaning of *yāñcā*: KalpaK. 239.43 (v.l.) gives *vṛtta* in the sense of *anuvartana*] [gratifying, obliging, result, consequence MW., APTE]

अनुवर्तनकारिणी (anuvartana-kāriṇī) *adj.* (*f.*) who practises compliance, complying छायेव साभवत्पत्यावनुवर्तनकारिणी PadmP. (Ra.) 7.170.

अनुवर्तनजीविन् (anuvartana-jīvin) *adj.* who sustains on attendance or service तस्यानुजीविभिः क्रूरैरनुवर्तनजीविभिः। वसुहीना वसुमती कृता प्रकटतस्करैः NarmaMā. 1.33.

अनुवर्तनता (anuvartana-tā) (=anuvartanā) *f.* conformity to, imitation of यावद्य लोकि अनुवर्तनतां करोति ... तावत्प्रसन्नमनसो अनुबन्धयामः LaliVi. 5.43; किं तू जनस्य अनुवर्तनतां करोति लिपिशालमागतु सुशिक्षितु शिष्यणार्थम् LaliVi. 10.2; आपत्तिष्वचोदनता संरक्षनीयधर्मेष्वनुवर्तनता ŚikṣāSa. 183.17; चत्वार इमे राष्ट्रपाल बोधिसत्त्वानामननुतापकरणा धर्माः ... चतुर्णामार्यवंशानामनुवर्तनता Rāṣṭrapālaparipṛcchā 13.18 [DBHS.]

अनुवर्तनद्वार (anuvartana-dvāra) *n.* [Inst.] by means of following or adhering to वर्णविन्यासवक्रता ... प्रतिनियतगुणविशिष्टानां मार्गाणामनुवर्तनद्वारेण यथा स्वरूपानुप्रवेशं विदधाति तथा विधातव्या VakroJī. 85.14.

अनुवर्तनवश (anuvartana-vaśa) *m.* [Abl.] on account of imitation भगवतः श्वासानिलाः पान्तु वः। यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनाम्भसो यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति Subhāṣi. 36.

अनुवर्तनसामर्थ्य (anuvartana-sāmarthya) *n.* [Abl.] by the force of continuation or supplying (of word etc. from the previous context) उदात्त इत्यनुवर्तनसामर्थ्याद्यस्याप्राप्तः स्वरस्तस्य भवति MahāBh. ii. 154.4 (on iii. 3. 107); ii. 209.21 (on iv. 1.17); iii. 210.12 (on vi. 4.82); सर्वेषामवयवानाम्, अनुवर्तनसामर्थ्यात् कार्ययोग. इति भावः Pradī. vii. 200.17 (on viii. 3.78)

अनुवर्तना (anu-vartanā) *f.* conformity to, imitation of worldly actions लोकानुवर्तनां बुद्धा अनुवर्तन्ति लौकिकीम्। प्रज्ञप्तिमनुवर्तन्ति यथा लोकोत्तरामपि MaVastuAva. i. 168.8; पादां च नाम धोवन्ति न चैषां सज्जते रजः। पादाः कमलपत्राभा एषा लोकानुवर्तना MaVastuAva. i. 168.15; बोधिसत्त्वः ... काषायानि वस्त्राणि गृहीत्वा स्वयमेव प्रव्रज्यां लोकानुवर्तनामुपादाय सत्त्वानुकम्पायै सत्त्वपरिपाचनार्थम् LaliVi. 16.0 (4); 25.0 (2); बोधिसत्त्वस्य धर्मानुधर्मप्रतिपत्तिः। ... पञ्चविधा ...। तेषामेव [यथा] पर्येषितानां यथोद्गृहीतानां धर्माणां कायेन वाचा मनसा चानुवर्तना सम्यक्चिन्तना भावना च BodhiBhū. 76.3; 76.6 [DBHS.]

अनुवर्तनादि (anuvartanādi) *adj.* carrying out, i.e. expressing etc. (सविस्रम्भकथायोगे रतिं जनयते पराम्। परस्परप्रीतिकरैरात्मभावानुवर्तनैः ... रागो विवर्धते) एतेऽनुवर्तनादयो विस्रम्भयोगाः JayaMa. 181.24 (on 2.10)

अनुवर्तनी (anu-vartanī) *adj.* (*f.*) which continues to remain (स्नेहस्य) मात्रा ...। हस्वा परीहारसुखाविकारा वृष्याथ बल्याप्यनुवर्तनी च KāśyaS. 19B. 4.

अनुवर्तनीय (anu-vartanīya) *adj.* [*f.* -ā] **1** to be gone through, i.e. to be experienced **2** to be practised or observed continuously **3** to be attended, to be served **4A** to be followed, i.e. to be admitted or conceded **B** to be followed, i.e. to be obeyed **C** to be gone after, to be followed **5** to be continued or supplied (from the previous context) **6A** to be favoured, to be obliged **B** to be turned, to be pursuaded **7** to be employed again **8** to be adhered to continuously **1** to be gone through, i.e. to be experienced दिष्टस्य ग्रन्थिरनिवर्तनीयः (v.l. °अनुवर्तनीयः) स्वकर्मणा विहितं नेह किंचित् MahāBhā. i. 190.2; **2** to be practised or observed continuously निःसंशयं कार्यमवेक्षितव्यं क्रियाविशेषो ह्यनुवर्तितव्यः (v.l. अनुवर्तनीयः GORR. Ed.) Rāmā. iv. 29.20; लोकसंव्यवहारोऽनुवर्तनीयः एव Kād. 367.8; तथापि लोकयात्रानुवर्तनीया MahāvīC. 7.33 (1); प्रवर्तितं चक्रं सर्वेणानुवर्तनीयम् GītāBh. (Śaṅ.) 92.12 (on 3.17); आगमशीलनं च आकलान्मात्रया अनुवर्तनीयम् NyāyPari. 482.2; 512.6; तत्तद्गुणविशेषविशिष्टस्याहरहरनुवर्तनीयस्य साङ्गस्य ... तथाविधविशिष्टानुष्ठानस्य रागप्राप्तत्वं न संभवति ŚatDū. 59.15; कृत्स्नं पञ्चरात्रम् ... यथाधिकारं व्यवस्थितानुष्ठानतया सिद्धान्तादिसंकरपरिहारेणैव सर्वदानुवर्तनीयम् PāñcRaRa. 43.17; 90.9; किं च मदीयाचारे धर्मद्वयमेवानुवर्तनीयम् ŚaṅkaVi. (Ā.) 115.10; प्रवृत्तस्याप्रायणमहरहरनुवर्तनीयायामुत्तरोत्तरं विशदीकरणीयायां च तस्याम् (विधायाम्) ŚivārkaMaDī. i. 45.15 (on i. 1.1); i. 82.25 (on i. 1.1); पशौ पुरोडाशे च वाग्यमस्य समानतन्त्रता स्यात् पाशुको वाग्यमः पौरोडाशिकाह्वानपर्यन्तमनुवर्तनीय इति यावत् MayūMāli. 822.13 (on xi. 3.8); **3** to be attended, to be served यावदयं संसारस्तावत्प्रसिद्धैवेयं लोकयात्रा यत् पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीयाः VeṇīSam. 3.214; मुहूर्तं स्थित्वा भूपतिरादिदेश। ... भवद्भ्यां कुमारावनुवर्तनीयावहर्निशम् HarṣaC. 198.12; **4A** to be followed, i.e. to be admitted or conceded यथोदाहृत एव मार्गः प्रमाणतयामनुवर्तनीयः NyāyMañ. i. 230.29; अन्वयं यावत्पदस्य सामर्थ्यमनुवर्तनीयम् TattvBi. 152.4; (प्रधानम्) व्यावर्त्यमनुवर्तनीयं च व्यवस्थाप्य PratyabhiVi. ii. 197.1 (on iii. 4.18) (Bhāsk. सिद्धतया ग्राह्यम्); एकवाक्यस्वारस्यमङ्गेनानेकवाक्यस्वारस्यं ह्यनुवर्तनीयम् ŚrutaPra. iB. 233.20 (on i. 1.17); एतावन्मात्रमयस्या अभ्यर्थितमनुवर्तनीयमेव। अन्यथा ह्यदाक्षिण्यमापत्स्यते RasSa. 129 (5); **4B** to be followed, i.e. to be obeyed यदि वा न कोऽपि परमार्थतः प्रेयाननुवर्तनीयः ... नरपतीनाम् TilaMañ. 299.12; यथाविधि मौनानुष्ठानस्यैव भगवत्सेवारूपत्वात् प्रवृत्तिविषया निवृत्तिविषया वा भगवदाज्ञैव सर्वदानुवर्तनीया इत्यच्छिद्रानुष्ठानसिद्धिः PāñcRaRa. 151.14; **4C** to be gone after, to be followed अनुवर्तनीया तिलकमञ्जरी TilaMañ. 366.4; **5** to be continued or supplied (from the previous context) शब्दादी ... परमाणावग्निसंयोगेन विनाशात् तदर्थं प्रत्यक्षत्वे सतीत्यनुवर्तनीयम् NyāyKa. 60.7; तदेवानुवर्तनीयमिति तु कुत इत्याह Bhām. 177.15 (on 1.2.15); सामीप्यादित्यत्राप्यतिरनुवर्तनीयः यथा लोचनस्थमञ्जनमतिसामीप्यान्न दृश्यते SāṁkhyaTaKau. 213.6 (on 7); प्रत्यक्षद्वयजनिते संस्कारे निर्णये चानुमानत्वप्रसङ्गस्तदवस्थ एव, तस्मात्तन्निवृत्यर्थं प्रमाणपदं न कृतं चेदवश्यमनुवर्तनीयमित्यर्थः TārkiRa. NyāyVārPari. 565.7; सामान्यलक्षणसूत्रात् प्रत्यवस्थानपदमनुवर्तनीयम् TārkiRa. 254.3; 'तत्राहुर्नाम तद्वतामित्युत्तरेष्वप्यनुवर्तनीयम् KāvyKaVṛ. 29.21 (2.1); सर्वोत्कृष्टब्रह्मचिन्तनाद्धेतोरियदा(नन्दा)दिकं सर्वत्रानुवर्तनीयम् VedāntPāSau. 328. 20 (on iii. 3.34); कुमारी शेते इत्यादावकः सवर्णे दीर्घत्वाभावार्थमचीत्यनुवर्तनीयं न भवति PariVṛ. (Sī.) 36.1; सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र PrakriKau. i. 18.1; 'राज्ञाम् एकादश' इत्यत्र गुणभूतोऽपि गर्भशब्दोऽनुवर्तनीयः आकाङ्क्षावलात् VīraMi. 31.9 (on 1.14); चतुर्विधमुक्तिफलकं प्रयोगम् ... यावज्जीवार्थकं प्रतिमासपदं रात्रिपदं चानुवर्तनीयम् LalitāSaBh. 221.14 (on 291); **6A** to be favoured, to be obliged (न च गम्यैः परिभूयेत तान् सहायान् कुर्यात्) सहायाः प्रियहिताभ्यामनुवर्तनीयाः JayaMa. 307.18 (on 6.1); **6B** to be turned, to be pursuaded नक्तंदिवमपि पतिपार्श्ववर्तिनी सा कथमनुवर्तनीया तत्रभवतेति तरलं भवति मे चेतः Mukundā. 81 (1); **7** to be employed again प्रवोवाजीया यदि कस्यांचिदिष्टौ मध्ये अन्त्ये वा स्यात्, तदानीम् अन्या काचित् (ऋक्) प्रथममनुवर्तनीया भवेत् PūrvottaVāNaMā. 195.15; **8** to be adhered to continuously, cf. **अनुवर्तनीयत्व 2.**

अनुवर्तनीयता (anuvartanīya-tā) *f.* the state of being what is to be observed or practised continuously श्रवणमननोपासनाकालेष्वपि तत्कालसंभावितचित्तमालिन्यपरिहारार्थं चित्तशुद्ध्यर्थकर्मणामनुवर्तनीयता ब्रह्मविचारे ब्रह्मजिज्ञासायां वा तदानन्तर्योक्त्ययोगात् ŚivārkaMaDī. i. 82.12 (on i. 1.1)

अनुवर्तनीयत्व (anuvartanīya-tva) *n.* **1** the state of being what is to be observed or practised continuously जातिवर्णाश्रमाद्युपाधिकानां विधिनिषेधानां ब्रह्मविदोऽप्यनुवर्तनीयत्वस्य ... नियतस्य तु संन्यासः कर्मणो नोपपद्यते ŚatDū.

138. 3; 2 the state of being what is to be adhered to continuously ज्ञानस्याप्रयाणादनुवर्तनीयत्वस्य प्रतिपादितत्वात् ŚatDū. 234. 21; आमोक्षात्तज्ज्ञानस्याप्रयाणादनुवर्तनीयत्वस्य प्रतिपादितत्वात् दुपायभूतज्ञानावार्ययोरनुवर्तनीयत्वमेवोक्तम् ŚatDū. 236. 26.

अनुवर्तमान (anu-vartamāna) *adj.* [*f.* -ā] **1Ai** going or moving along **ii** moving around **B** going after, following **C** occurring subsequently **Di** accompanying, i.e. harmonizing **ii** accompanying, i.e. going together **E** accepting **F** obeying **2A** practising, observing **B** attending upon, serving **3** continuing or supplying (from the previous context) **4A** existing continuously or persisting **B** continuing, present **Ci** recurring **ii** coming into being again and again **5** sticking to, adhering to **6A** complying with **B** imitating **7** using, i.e. enjoying **1Ai** going or moving along एष उ एवास्य त्रिवृद् वज्रोऽहरहरिमान् लोकाननुवर्तमानस्सर्वं पाप्मानमपघ्नन् पल्ययते य एवं वेद Jaimi Br. 1. 247; 1.248; राजवाहनः ... क्षुत्पिपासादिक्लेशनाशनं मणिम् ... मातङ्गालब्ध्वा कंचनाध्वानमनुवर्तमानं तं विसृज्य बिलपथेन तेन निर्ययौ DaśKuC. 15. 12; (वत्साः) स्वक्षुण्णपदपद्धतिमनुवर्तमानाः कथं निवर्तनीयाः GopāKeCan. 47. 30; **1Aii** moving around गिरिवरमभितोऽनुवर्तमानो हय इव मण्डलमाशु यः करोति। तमिह शरणमभ्युपेहि देवि दिवसकरम् Rāmā. vi. 24. 36; **1B** going after, following इन्द्र दैवीर्विशो मरुतोऽनुवर्तमान (better °वर्त्मान) इति हुत्वोपतिष्ठते HirŚS. xii. 5. 31 (102. 21); मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः KumāSaṁ. 3. 36; SaraKanthā. 629. 6; रुमण्वान् ... प्रहारव्रणितहास्तिकप्रायमशेषसैन्यमनुवर्तमानः शनैः शनैरागच्छति Ratnā. 4. 6 (5); सखि छायावन्मामनुवर्तमानस्य पुष्पोद्भवस्य वल्लभा त्वम् DaśKuC. 30. 15; गिरिराजकुमारिकामपि स्वं विपिनेष्वद्रिषु चानुवर्तमानाम्। ... अनुरोद्धुं स्वयमध्यास्त शिवः कदम्बमूलम् Śiv Lī. 3. 79; अमराश्च (चित्रशिखण्डिनम्) तमनुवर्तमानाः ... तपोलोकसमीपमापेदिरे NīlaVi. 36. 9; पार्श्वस्थितां प्रणयिनीमनुवर्तमानः। ... परभृतोऽयम् ... कुरुते विहारम् JānaPa. 1. 7; **1C** occurring subsequently सिद्धम् ... श्रीचन्द्रगुप्तस्य ... [गुप्त]कालानुवर्तमानसंवत्सरे एकपष्ठे ... [प्र]थमे शुक्लदिवसे पञ्चम्याम् EI. xxi. 8. 3; **1Di** accompanying, i.e. harmonizing वन्दी सूचीबाणस्तारमधुरेण गीतिध्वनिमनुवर्तमानः स्वरेणेदमार्यायुगलमगायत् HarṣaC. 132. 3; **1Dii** accompanying, i.e. going together राजपुत्रो निरभिमानमनुकूलाभिः संकथाभिर्मामनुवर्तमानो मुहूर्तमास्त DaśKuC. 106. 11; किं गतमेतैरतिक्षुद्रैः किंचित्तु वयमनुवर्तमानाः क्षणमपहरिष्यामः NīlaVi. 119. 14; **1E** accepting अहं तु तन्महर्षेर्मतमनुवर्तमानः कावेरीतटमुपावर्ते AvantiKa. 199. 8; एतन्मतमेव तावदनुवर्तमानः प्रयागं तावद् गत्वा तत्रैव देवीसेहस्य यथोचितमाचरिष्यामि TāpaVa. 5.8(86); वैयासिकं तु मतमनुवर्तमानाः ... परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम् Bhām. 74.13 (*on* i. 1.3); VedāntKa. 57. 20 (*on* i. 1.3); ईप्सादिस्वातन्त्र्येण ... तद्यरितमनुवर्तमानो वार्तिककृदुपलक्षणान्तरं कृत्वोत्तरकालभाव्याह TātpaṬ. (Vā.) 31.6 (*on* i. 1.1); अमी अभ्यर्थनां मम किमप्यनुवर्तमाना गृह्णन्ति कानिचिदहानि नरेन्द्रपूजाम् PrasaRā. 3. 40; प्रायेण सर्वप्राणिनः ...। अर्थकामावेव पुरुषार्थौ मन्यमानाः, चार्वाकमतमनुवर्तमाना एवानुभूयन्ते SarvaDaSaṁ. 1. 21; 15.1; **1F** obeying भैरवाचार्योऽपि प्रीत्यानतिक्रमणीयं नृपवचनमनुवर्तमानः पूर्ववत्तदेव व्याघ्राजिनमभजत् HarṣaC. 158. 11; वादिनस्तस्य वचनमनुवर्तमानो मेदिनीपतिर्विहस्य किंचित्सोपहासमवदत् TilaMañ. 50. 4; आज्ञां त्वदी[यामनुवर्तमानः] शरीरभाजां प्रसवप्रसङ्गे PṛthvīVi. 6.45; **2A** practising, observing यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति। तदनुवर्तमानो नरकाय राध्यति HirŚS. xxvi. 4. 13 (56. 27); ĀpaDS. i (4). 12. 13; ब्रह्मभूतो ब्राह्मणः शास्त्रमनुवर्तमानो ब्रह्मलोकमभिजयति BaudhDS. ii. 4. 24; यथोक्तमनुवर्तमानः प्राणानुपालनाद्दीर्घमायुरवाप्नोति CaraS. i. 11. 4; भूपतिरनुवर्तमानो लौकिकमाचारमाचार्यवचनं चोत्थाय ... सह स्वस्रा तामेव भूमिमयासीत् HarṣaC. 331. 12; काकतीयनरेन्द्रवृद्धोचितमाचारमनुवर्तमानस्य देवस्य ... विषादहर्षयोः सीमानं स्पृशत्यस्माकं मनः PratāYaBhū. 154. 13; व्याख्यानुमार्गमनुवर्तमानानां च कथं न जायते लज्जा NyāySu. (Ja.) 116A. 10 (*on* i. 1.5); अदुष्टानां यथाशास्त्रमनुवर्तमानानां भोजनात् तृप्तानामाशीर्दानात् तत्फलम् Upask. 261. 3 (*on* vi. 1. 6); नन्वेतामेव तावत्प्रभातवेलां पतिव्रताधर्ममनु-वर्तमानां दिनकरकुलवधूं पश्यतु भवती KaṁVa. 1. 9 (2); आदिष्टाः ... असुरवराः स्वयमनतिक्रामन्तो धर्ममौशनसम् ... अनुवर्तमाना हिरण्याक्षदर्शितां सरणिम् NīlaVi. 30. 16; **2B** attending upon, serving (इन्द्रसेना) तपसाराधयन्तदा। ... अनुवर्तमाना त्वादित्यं तथा पञ्चतपाभवत् MahāBhā. i. App. I. 100 (84); यस्तां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसङ्गः BhāgP. iii. 16. 21; यथा यथा स्वप्नेषु संकल्पदशास्वार्यपुत्रभ्रातृवचनादिभिर्व्यापारैर्मामनुवर्तमान आसीत्, तथा तथेदानीं प्रत्यक्षमनुवर्तते इत्याश्चर्यम् JānaPa. 5. 17 (2); **3** continuing or supplying (from the previous context) नार्थः क्विद्ग्रहणेनानुवर्तमानेन MahāBh. ii. 241. 15;

iii. 1. 13); नवम इत्यनुवर्तमानेऽपि पुनर्नवमग्रहणमुपचित्रप्रतिप्रसवार्थम् MrtaSaṁ. 83. 24 (*on* 4. 45); पूर्वपक्षाश्च सुदूरमपि सिद्धान्तसारूप्यादनुवर्तमानाः प्रमाणबुद्धिहितबुद्धिभिः यत्नतोऽनुसरणीयाः SaṅkarKāBh. 198. 3 (*on* iv. 2. 33); 'हेतुप्रयोगे' इत्यतोऽनुवर्तमानमपि प्रयोगग्रहणमनङ्गीकृत्य PariVr. (Sī.) 5. 21; ह्रस्वग्रहणेऽनुवर्तमाने पुनर्ह्रस्वग्रहणमुच्चारणकारणं तस्यानुवर्तनम् PariVr. (Sī.) 11. 23; 24. 15; सुपि स्थः इत्यतोऽनुवर्तमानं सुब्ग्रहणम् ... ज्ञापितम् Prasā. i. 6. 2; तद्ध्यमानग्रहणम् 'झलो झलि' इत्यतोऽनुवर्तमानेन झलि इत्यनेन संबद्धम् Prasā. i. 87. 15; i. 218. 6; प्रत्ययग्रहणेऽनुवर्तमानेऽपि पुनः प्रत्ययग्रहणं कृत्स्नप्रत्ययलोपे यथा स्यात् Prasā. i. 159. 18; i. 453. 18; i. 698. 17; कर्मधारयपक्षे 'अन्त' इत्यनुवर्तमाने ... अन्तोदात्तत्वे विहिते ... पूर्वेषां चतुर्णामपि अचामनुदात्तः स्यात् MīmāKau. i. 117. 1 (*on* i. 3. 24); अग्निचिद्व्रतम् ... कर्तव्यमाहिताग्निव्रतवदिति प्राप्ते क्तिभूत इति चानुवर्तमाने ... चिनोतेः क्विप्प्रत्ययविधानात् BhāṭṭDī. ii. 199. 19 (*on* v. 3. 10); अनुबन्धानामेकान्तत्वे तु 'लोपो यि' इत्यतो लोपग्रहणेऽनुवर्तमाने पुनर्लोपग्रहणात् सर्वदिशत्वं बोध्यम् LaŚabdeŚe. i. 22. 17; i. 60. 4; झलीत्यनुवर्तमाने झलादि-प्रत्ययपरम् ... तदर्थकतयार्थाधिकारात् LaŚabdeŚe. i. 323. 3; i. 336. 25; GoviBh. 146. 5 (*on* ii. 3. 9); **4A** existing continuously or persisting ते च विकाराः परस्परमनुवर्तमानाः कदाचिदनुबध्नन्ति कामादयो ज्वरादयश्च CaraS. iii. 6. 8 (comm. यदेव ज्वरादयः कामादयो वा बलवत्त्वेन चिरकालमनुवर्तन्ते); अनुवर्तमानव्यावर्तमानयोः स्वभावोऽन्यो वक्तव्यः HetuBiṬ. 103. 9; सर्वथा दूरस्थे विशेषणमालायामनुवर्तमानायां प्रथमोपलक्षणस्याभेदात् संबन्धदर्शनमुपपत्स्यते TantrVā. 693. 17 (*on* iii. 1. 12); अस्ति कश्चित्पार्थिवत्वादिस्वभावः पुरुषादीनां केशखादिष्वनुवर्तमानो गोमयादीनां च वृश्चिकादिषु BrahmSūBh. (Śaṅ.) 294. 18 (*on* ii. 1. 6); 541. 8 (*on* iii. 1. 8); सर्वास्ववस्थास्वपि व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा। स्वात्मानं प्रकटीकरोति DakṣiMūA. 7; क्षुत्पिपासोपजनिते शश्वदनुवर्तमाने जाठराग्निकृतविकारेऽन्नपाननिष्पन्दे वा न रोगबुद्धिर्जनस्य PañcPā. 32. 8 (*on* i. 1. 1); एकस्मिन्नपि द्रव्ये द्रव्यान्तराद् व्यावर्तमाने अनुवर्तमानयोर्जातिगुणभेदावगमादिति जातिनिर्णये निर्णीतम् PrakaPañ. 141. 7; न हीन्द्रियसंप्रयोगसमनन्तरं केषुचिदेव देहविशेषेषु अनुवर्तमानमन्यतो व्यावर्तमानं नरत्वातिरेकिणं ग्राह्यत्वं न जातिविशेषमपरोक्षयामः ĀgaPrā. 7. 8; न च ज्ञानात्मकत्वमेव ग्राह्यत्वं सुषुप्तावस्थायां ज्ञानात्मभूतस्य ज्ञानसंतानवदनुवर्तमानस्यपि ग्रहणाभावात् NyāyKa. 128. 3; ... जगत् ... कर्मविशेषमुपभुञ्जानः कुलालव्यापारविगमे चक्रभ्रान्तिवत् संस्कारवशादनुवर्तमानस्य देहपातमुदीक्षमाणः NyāyKa. 284. 18; आज्ञादिभेदेऽप्यनुवर्तमानप्रवृत्त्यभावस्य विरोधिमात्रे। लिङ्गादिशब्दस्य स वेत्ति शक्तिम् SaṁkṣeŚā. 1. 136 (i. 114. 18); बालादिशरीरेषु व्यावर्तमानेष्वपि परस्परमहंकारास्पदमनुवर्तमानं तेभ्यो भिद्यते Bhām. 2. 19 (*on* i. 1. 1); निश्चितेऽपि तत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तमानो दृश्यते Bhām. 43. 5 (*on* i. 1. 1); 57. 20 (*on* i. 1. 1); 88. 18 (*on* i. 1. 4); यस्मिन्ननुवर्तमाने यद् व्यावर्तते तत्तस्माद्भिद्यते यथा सुवर्णावयवेष्वनुवर्तमानेषु कटकमुकुटादयः। अनुवर्तमानेषु तु वर्णेषु व्यावर्तन्ते पदभेदाः TātpaṬ. (Vā.) 470. 13 (*on* ii. 2. 57); क्षीरावसेकादाम्लत्वं परिहृत्य माधुर्यमुपाददानानुवर्तमानामलकी कालान्तरेऽपि फले माधुर्यमुन्मीलयति ĀtmaTaVi. 794. 9; अपवर्गपर्यन्तमेकमेव चित्तं धर्मितयानुवर्तमानं न निह्नोतुं पार्यते RājMār. 70. 24; दुःष्यन्तेन ... यदवगतं तत्तदनन्तरेऽप्यनुवर्तमानं प्रेमप्रकर्षाय भवति SaraKaṇṭhā. 657. 2; प्रैषादिष्वपि कार्यमेवानुवर्तमानं प्रवृत्तिहेतुतां भजते NyāyMa. 186. 10; 204. 4; सन्मात्रं सर्वासु प्रतिपत्तिष्वनुवर्तमानं दृश्यते BrahmSūBh. (Rā.) 25. 8 (*on* i. 1. 1); 696. 11 (*on* iii. 4. 26); कूटस्थो देवाद्यवस्थास्वनुवर्तमानः सर्वसाधारणज्ञानैकाकारात्मनि स्थितः GītāBh. (Rā.) 328. 1 (*on* 6. 8); सर्वभावानाम् ... ऐहिकामुष्मिकसर्वार्थसिद्धिः स्यात्।... संस्कारादेरपि कस्यचित्स्थिरस्यानुवर्तमानस्यानभ्युपगमात् VedāntDī. 109. 6 (*on* ii. 2. 27); इदं रजतमित्यनुवर्तमानस्वेदस्वाभासोऽक्षमूलः NītiMā. 19. 24; नियतक्रमस्य तस्य संस्काररूपेणानुवर्तमानस्य स्मारणेन व्यक्तीकारः VedāntKa. 230. 10 (*on* ii. 1. 2); भाष्ये भेदबुद्धावनुवर्तमानायामन्यतरबुद्धिरध्यास इत्यध्यासलक्षणमुक्तम् Vedānt Ka. 406. 2 (*on* iii. 3. 9); न हि तस्मिन्ननुवर्तमाने द्रव्यान्तरं समस्तीति प्रत्येति NyāyKu. 147. 8; 6.5; कुलाभिमानिभिः पुरुषैस्तादृग्विधाभिः स्त्रीभिश्च रक्ष्यमाणानि कुलान्युपप्लुतान्येवानुवर्तमानानि दृश्यन्ते CaturCin. iii (1). 344. 2; मोक्षहेतुः असकृदावृत्त आ प्रयाणादन्वहमनुवर्तमानो ज्ञानविशेषः NyāySiA. 216. 15; उत्तरोत्तरदिवसेष्वपि ... निर्वेदविषयतयानुवर्तमानानाम् ... दोषविशेषाणां निःशेषनिवृत्तिलक्षणवैशिष्ट्यलाभार्थम् ... मनोरथानुवर्तनं कार्यम् PāñcRāRa. 91. 15; भूधातोस्सत्तार्थकत्वात्सर्वत्रानुवर्तमानं सद्रूपं ब्रह्मेति विज्ञायते BrahmSūBh. (Śrī.) i. 125. 5 (*on* i. 1. 2); ii. 465. 15 (*on* iv. 2. 18); अनुवर्तमानेन संस्कारेण उत्तरोत्तरः कर्मसंतानो जायते Upask. 232. 12 (*on* v. i. 17); 373. 13 (*on* ix. 1. 1); प्रकृत्यन्तरालादवैकार्यं चित्तसत्त्वेनानुवर्तमानात् BhaktiSā. (Śā.) ii. 1. 11; मीमांसाशास्त्रे गुरुशिष्यपरंपरामविच्छेदेनानुवर्तमानामाहुः संप्रदायविदः SivarkaMaDī. i. 33. 25 (*on* i. 1. 1); i. 209. 17 (*on* i. 1. 13); असत्कार्यवादिनः

बौद्धानां नानुवर्तमानस्य द्रव्यस्यावस्थान्तरप्राप्तिर्विनाशः ŚivārkaMaDī. ii. 85. 7 (*on* ii. 2. 21); घटव्यक्त्यत्ययानन्तरमपि अनुवर्तमानाया नीलत्वजातिस्तदाश्रितत्व-नियमाभावात् PūrvottaVāNaMā. 75. 3; प्रस्तरे यजमानभेदग्राहिणो यावद्ब्रह्मज्ञान-मर्थक्रियासंवादेनानुवर्तमानस्य प्रत्यक्षस्य प्रातिभासिकविषयत्वाभ्युपगमेनोपपादनायोगात् SiddhāLeSaṁ. 249. 8; **4B** continuing, present गम्यस्याप्यनुवर्तमानस्य वेश्यास्वरूपप्रतिपत्त्यर्थमाह JayaMa. 323. 1 (*on* 6. 2); प्राचीनकालपर्यन्तमुपरवाहित्येन प्रतिपक्षतार्हपुरुषसमक्षमनुवर्तमानं साधयेत् SmṛtiCan. iii. 165. 13; **4Ci** recurring श्रीवर्धमानाभिधमात्मरूपम् इति विधेयमनुवर्तमानं बुद्धौ संप्रधार्य विज्ञेयम् Syādvā-Mañ. 1 (137); **4Cii** coming into being again and again ऋतुलिङ्ग्यायेन वा प्रतियुगमनुवर्तमाना बबरादयः प्रवाहनित्यतया न वेदस्यानित्यत्वमापादयन्ति YuktiSneha. 163. 11 (*on* i. 1. 8); **5** sticking to, adhering to लज्जां गुणौघजननीम् … अनुवर्तमानाः। तेजस्विनः सुखमसूनपि संत्यजन्ति … न पुनः प्रतिज्ञाम् ŚatTrayī. 2. 318; KumāPraPra. 56. 20; (भागुरायणः) कृतज्ञतामनुवर्तमानेनात्मनोऽनन्तर-ममात्यपदं ग्राहितः MudrāRā. 3. 24 (34); राज्यवर्धनहर्षौ … प्रणयिनीमिव … कुलपुत्रतामनुवर्तमानम् … माधवगुप्तं ददृशतुः HarṣaC. 197. 13; **6A** complying with (पृषा) मन्दं मन्दम् अप्रियप्रश्नार्थमिव च स्थितिमनुवर्तमानो लौकिकीमवातरद्दिवः HarṣaC. 234. 4; असौ संनिहितधनिकचित्तमनुवर्तमानः तदनुगुणं वक्तुं शक्नोति ManuBh. ii. 103. 8 (*on* 8. 64); चित्तमनुवर्तमानानि मधुकरराजमिव मक्षिकाः सर्वाणीन्द्रियाणि प्रतीयन्ते RājMār. 41. 17; नरसिंहदेवस्य चित्तमनुवर्तमानेन विद्याधरेण कविना बाढमभ्यन्तरीकृतोऽसि RasāSu. 206. 4(2. 263 ½); **6B** imitating तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम BhāgP. iii. 31. 16; प्रवृत्ति-विशेषे नियतो रूपकनाथ(म)को भविष्यति तादृक्प्रवृत्तिसमुचितवेषभाषाचारा-भिनयादिकमनुवर्तमानैः सूत्रधारादिभिः स्थापकान्तैः AbhinBhā. i. 251. 8 (*on* 5. 173); **7** using, i.e. enjoying (राजसुतः) अनुवर्तमान आगात्तारुण्यो-दीर्णविषयचरितानि KuṭṭaMa. 738 (comm. सेवमानः)

अनुवर्तमानता (anuvartamāna-tā) *f.* **1** the state of being what exists continually or persists संस्कारो नामानुभवस्य कालान्तरेऽपि अनुवर्तमानता PratyabhiVi. i. 337. 1 (*on* i. 6. 9); अनाद्यविद्यादोषस्यानुवर्तमानतया भ्रमत्व-स्यैवौत्सर्गिकत्वात् SāṁkhyaPraBh. 65. 36 (*on* 1. 147); तेषाम् परमेश्वरधर्माणाम् … उपसंहारपर्यन्तमनुवर्तमानतया भूयस्त्वं सौत्रेण … सूचितम् ŚivārkaMaDī. i. 287. 20 (*on* i. 1. 31); **2** the state of being what is continued or supplied (from the previous context) 'ध्रुवमपायेऽपादान'मिति सूत्रादवधिपरस्य पदस्या-नुवर्तमानतया … अस्य वैयर्थ्यप्रसङ्गात् ŚivārkaMaDī. i. 563. 17 (*on* i. 4. 25)

अनुवर्तमानत्व (anuvartamāna-tva) *n.* the state of being what exists continuously अहंकारग्रन्थेर्मनुष्याभिमानपर्यन्तस्याविकलमनुवर्तमानत्वात् PañcPā. 40. 2 (*on* i. 1. 0); व्यक्त्यन्तरे जातिप्रत्यभिज्ञाया जातेरनुवर्तमानत्वम् … प्रतीयते NītiMā. 29. 3; सांख्यादिसमयाः प्रमाणभूताः … सर्वदानुवर्तमानत्वात् NyāySu. (Ja.) 315A. 13 (*on* ii. 2. 1)

अनुवर्तमानत्वरूप (anuvartamānatva-rūpa) *adj.* which is of the nature of the state of being what exists continuously प्रकर्षश्च … निरन्तरमनु-वर्तमानत्वरूप इह … विवक्षितः ŚivārkaMaDī. ii. 410. 32 (*on* iii. 4. 46)

अनुवर्तमानत्वसंग्रह (anuvartamānatva-saṅgraha) *m.* grasping or comprehension of the state of being what exists continuously (ब्रह्म धर्मिसत्ता-समानसत्ताकधर्मवत्) सत्ताकत्वादेरित्यादिना यावद्ब्रह्मस्वरूपमनुवर्तमानत्वसंग्रहः LaCandr. 718. 29.

अनुवर्तमानदेह (anuvartamāna-deha) *m.* body which continues to exist or persist न हि तत्त्वमस्यादिवाक्यश्रवणसमनन्तरमप्यनुवर्तमानदेहेन्द्रिया-दिभिर्दुःखादिकं न जायते ŚatDū. 137. 19.

अनुवर्तमानद्वितीयान्त (anuvartamāna-dvitīyānta) *adj.* (used as noun) what ends in accusative which is being continued (from the previous context) तदित्यनुवर्तमानद्वितीयान्ताबाधायाह तृन्नन्तमिति LaŚabdeŚe. ii. 292. 9.

अनुवर्तमानधर्मवत् (anuvartamānadharma-va(n)t) *adj.* possessed of characteristic which exists continuously ब्रह्म … यावत्स्वरूपमनुवर्तमान-धर्मवद्धा …। धर्मैर्भावरूपधर्मैर्वा हीनं नावतिष्ठते, पदार्थत्वात् भावत्वात् Nyāyāmṛ. 489A. 7; AdvaiSi. 718. 2.

अनुवर्तमानप्रतियोग्यधिकरण (anuvartamāna-pratiyogyadhikaraṇa) *n.* locus of the counter positive which exists continuously न ततः पश्चाद-नुवर्तमानप्रतियोग्यधिकरणाश्रिताभावरूपध्वंससिद्धिः SiddhāLeSaṁ. 438. 10.

अनुवर्तमानबोधरूपता (anuvartamānabodharūpa-tā) *f.* the state of being what is of the nature of knowledge which exists continuously नीलज्ञानं पीतज्ञानं शुक्लज्ञानमिति नीलपीताद्युपजनापायेऽप्यनुवर्तमानबोधरूपता … अवधार्यते NyāyMañ. ii. 107. 11.

अनुवर्तमानाभावरूप (anuvartamānabhāva-rūpa) *adj.* of the form of continuous existence आत्मा … यावत्स्वरूपमनुवर्तमानभावरूपानात्मवान् … पदार्थत्वात् भावत्वाद्वा घटवत् Nyāyāmṛ. 153A. 5; AdvaiSi. 408. 8.

अनुवर्तमानभ्रम (anuvartamāna-bhrama) *m.* erroneous cognition which exists continuously रजतशुक्त्योरभेदग्रहेऽप्यनुवर्तमानभ्रमस्तु रजतभेदाज्ञानकार्यत्वात् तद्भेदज्ञानान्निवर्तते GuruCandr. i. 378. 15.

अनुवर्तमानविपर्यय (anuvartamāna-viparyaya) *m.* erroneous cognition or knowledge which exists continuously निरुपद्रवपरमार्थस्वभावस्य … अनुवर्तमानविपर्ययैर्न बाधः VedāntKa. 21. 12 (*on* i. 1. 1)

अनुवर्तमानव्यावर्तमानाकारता (anuvartamānavyāvartamānākāra-tā) *f.* the state of having the forms existing and not existing जातिव्यक्त्योरेकत्वं चानुपपन्नम्, अनुवर्तमानव्यावर्तमानाकारतया तयोर्विरुद्धस्वभावत्वात् NītiMā. 28. 18.

अनुवर्तमानसाक्षात्कार (anuvartamāna-sākṣātkāra) *m.* direct knowledge (i.e. realisation) which exists continuously सततमनुवर्तमानसाक्षात्कारेण तस्याप्यविद्यालेशस्य निवृत्तिरिति कल्प्यते VedāntKa. 525. 25 (*on* iv. 1. 15)

अनुवर्तमानस्थिराकार (anuvartamāna-sthirākāra) *m.* the permanent form which exists continuously निरन्वयविनाशिनां ज्ञानानामनुवर्तमानस्थिराकार-विरहाद्वासना च दुरुपपादा BrahmSūBh. (Rā.) 494. 12 (*on* ii. 2. 27)

अनुवर्तमानस्नेहातिशय (anuvartamāna-snehātiśaya) *adj.* having excessive affection which exists continuously or persists मित्रस्य नैरन्तर्येण चिरकालमत्यन्तमनुवर्तमानस्नेहातिशयस्य … यावदशौचं तस्मादपरदिने तदेव प्रकृतश्राद्धं कार्यम् HārLa. 180. 15.

अनुवर्तमानस्वत्व (anuvartamāna-svatva) *n.* ownership or proprietary right which exists continuously यस्मिन् वादे नास्तिकस्यानुवर्तमानस्वत्वसाधक-प्रमाणाभावाः … तस्मिन्वादे … राजा विनिर्णयं कुर्यात् SmṛtiCan. iv. 506. 12.

अनुवर्तमानानात्मवत् (anuvartamānānātma-va(n)t) *adj.* possessed of non-self (i.e. body etc.) which exists continuously or persists आत्मा यावत्स्वरूपमनुवर्तमानानात्मवान् Nyāyāmṛ. 153 A. 5; AdvaiSi. 408. 7.

अनुवर्तयत् (anu-vartáyat) *adj.* [P. vi. 1. 186; vi. 2. 139] **1Ai** causing to go after or follow क्रव्यादानुवर्तयन्मृत्युना च पुरोहितम् AV. xi. 10.18; **1Aii** following, i.e. adhering to हृदयमनुकूलयामीति पृष्टो नृपेण चित्रशिखः स्वामिनोऽनुवर्तयन्नाशयं जगाद UdaySuKa. 40. 25; **1B** being in conformity with वसुंधरासंपादितशुद्धिमनुवर्तयन्ति बहुविधान्येतानि प्रादुर्भवन्ति KundaMā. 6. 34(2); **2** repeating or reciting together पच्छोऽर्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन् PāraGS. ii. 3. 5; **3** favouring, i.e. providing तत् (सर्वथा) प्रजा न्यायेन मन्त्रसुखमनुवर्तयन् राजा राज्यसुखमनुभवति PañcT. 3. 121 (1) (369.15); **4A** causing to proceed properly नातिमहता व्यायामेन वेगानुदीरयन्नाप्रवृत्तान् प्रवर्तयन् प्रवृत्तांश्चानुवर्तयन् … कण्ठमनभिस्पृशन् वमेत् AṣṭāSaṁ. i. 139. 23 (1. 27); **4B** causing to continue विमर्शः … स हि … आत्मानमभिमत-प्रसिद्धार्थक्रियाप्राप्तिपर्यन्तमनुबन्धयन् (v.l. अनुवर्तयन्) अनुस्मृतिवृत्तिः PratyabhiVi. ii. 78.2 (*on* ii. 3. 2.); ii. 246.9 (*on* iii. 2. 2); अश्रौत्रैरपि तैः (ध्वनिभिः) यथाबोध-मनुवर्तयद्भिर्वृत्तिभेदासिद्धिः NyāyRa. 787. 18 (*on* 6. 227); **4C** continuing to hold श्रद्धां जनयन् भूयः कुर्वीतैवानुकारमेतस्य। अनुवर्तयंश्च गोष्ठीरनुरञ्जन-माचरेत्सृङ्गे Kanda Cū. i. 4. 56; **5** being favourable यो वा एतमेवंविदम् अन्वेव अनुवर्तयन्नेव आत्मीयान्पर्यान्बुभूर्षति BṛĀraUBh. 62.7(*on* i. 3. 18); **6A** leading to एष धर्ममूर्तां श्रेष्ठो लोके धर्मेऽनुवर्तयन् BhāgP. iv. 16. 4; **6B** practising, observing अनुवर्तयन्त्रतमृगार्गधारयाप्यवसीदति स्म विघ्नः स सर्वथा ŚivLī. 18. 29.

अनुवर्तयितव्य (anu-vartayitavya) *adj.* [*f.*-ā] **1** to be caused to be repeated or to be recited over वैष्णवीमृचमनुवर्तयति। … पृषदाज्य एवैषानुवर्तयितव्या भवतीति शालीकिः BaudhŚS. iii. 156. 10; iii. 282. 1; **2A** to be continued किंचिद्रूपं परिवर्ज्य त्यक्त्वा व्यावर्त्यमनुवर्तनीयम् (v.l. अनुवर्तयितव्यम्) च व्यवस्थाप्य PratyabhiVi. ii. 197.1 (*on* ii.4.18); **2B** to be continued or supplied (from previous context) अयं च छन् छन्दस्या(?स्य)मित्येव इष्यत इति 'शौनकादिभ्यश्छन्दसि' इत्यत्रानुवर्तयितव्यमाहुः Prasā. i. 780. 7; सूत्रेऽपि अनुवादपमनु-वर्तयितव्यमिति भाष्यकारः BhaṭṭCin. ii. 120. 5 (*on* vi. 3. 15); **3** to be practised or observed चिरमनुवर्तयितव्या काकतीयनरेश्वरपरिपालनपरिपाटी महाराजेन PratāYa Bhū. 216. 15.

अनुवर्तयितुम् (anu-vartayitum) *inf.* to carry out वत्स लक्ष्मण इदमपि तावदात्माभिप्रायमनुवर्तयितुमिच्छसि Prati. 4. 12 (2)

अनुवर्तयित्वा (anu-vartayitvā) *ger.* (irr.) having caused to repeat, i.e. having made to recite एकमिषे विष्णुस्त्वान्वेतु … सप्त सप्तभ्यो होत्राभ्यो

विष्णुस्त्वान्वेत्विति निष्क्रम्यमाणेषु यजमानोऽनुवर्तयित्वा ĀpaŚS. x. 22. 12.

अनुवर्तव्या (anu-vartavyā) *adj. (f.)* to be observed or practised इयं परिभाषा प्रथमापराधविषयेऽनुवर्तव्या Smṛti Can. iii. 299. 14.

अनुवाक (anu-vākā́) *m.* [Vār. 1 *on* P. ii. 4. 29; JaineVyā. i. 4. 105; CāndraVyā. ii. 2. 81; Liṅgānu. (He.) 14. 12; AltGr. II. 1. 39; for velarisation P. vii. 3. 52] **1Ai** chapter, i. e. subdivision or section of the Vedas (recited during a ritual) **ii** (morning) litany (beginning of *prātassavana*) **Bi** chapter, i. e. subdivision or section of the scriptures **ii** chapter, i. e. subdivision or section of the Vedas (recited during teaching and study) **iii** section in the Brāhmaṇas illustrating the formulae (*mantra*) **iv** chapter or section of text (in general) **2A** favourable speech, i. e. favour **B** favourable speech, i. e. praise **3** the word *anuvāka* **4** name of a tree, *Barringtonia acutangula* (*nicula*) or *calamus rotang* **5** Pariśiṣṭa of Yajurveda **6** recitation **1Ai** chapter, i. e. subdivision or section of the Vedas (recited during a ritual) आङ्गिरसानामाद्यैः पञ्चानुवाकैः स्वाहा AV. xix. 22. 1; चतुर्दशैताननुवाकाञ्जुहोत्यनन्तरित्यै TaiBr. III. ix. 11. 2; योऽसौ प्रथमोऽनुवाकस्तदन्तरिक्ष स आत्मा ŚatBr. IX. i. 1. 15; य एष प्रथमोऽनुवाकस्तेनैनमप्रीणंस्तथैवास्माऽअयमेतं पुरस्तादुद्धारमुद्धरति ŚatBr. IX. i. 1. 15; योऽसौ प्रथमोऽनुवाकोऽथास्माऽ एतमुपरिष्टादुद्धारमुदहरन् ŚatBr. IX. i. 1. 25; यजुषामनुवाकं व्याचक्षाण इवानुद्रवेदेवमेवाध्वर्युः संप्रेष्यति ŚatBr. XIII. iv. 3.6; प्राणाय स्वाहापानाय स्वाहेति द्वादशभिरनुवाकैः ŚatBr. XIII. v. 1. 4; औदुम्बरीभिः समिद्भिरग्निं परिचरेत्। पुनर्मामैत्विन्द्रियमित्येतेनानुवाकेन TaiĀ. i. 32. 1 (189.2); द्वितीयेऽहनि ... यजुर्वेदो वेदः सोऽयमित्यनुवाकं निगदेत् ĀśvaŚS. II. iv. 7. 2; अवकाशानामनुवाकेन महावीरमुपस्थायोपस्पृश्योपविशति ŚāṅkhāŚS. v. 9. 27; तमन्तर्वेद्यासन्नमभिमन्त्रयते प्रजापतेर्भागोऽसि ... इत्यान्तादनुवाकस्य BaudhŚS. i. 91. 6; दशाष्टादशिनोऽनुवाकास्तेषां पूर्वा एव नवतो दक्षिणेषु यूपेषूपस्थापयन्ति BaudhŚS. ii. 227.4; ममाग्ने वर्चो विहवेष्वस्त्वित्यनुवाकेन सर्वाणि हवींष्यासन्नान्यभिमृशेदष्टाभिर्वा ĀpaŚS. iv. 8. 6; उपस्थायोत्तरेणानुवाकेनाहवनीयम् ĀpaŚS. vi. 21. 1; यजमानो जपति। ब्राह्मण एकहोतेति चानुवाकम् ĀpaŚS. viii. 4. 3; अग्निर्यजुर्भिः सविता स्तोमैरित्येषोऽनुवाक आम्नातः ĀpaŚS. x. 3.6; त्रिभिरनुवाकैरविज्ञातप्रायश्चित्ते सोमे त्रयस्त्रिंशत्तमाहुतीर्जुहोति ĀpaŚS. xiv. 17. 1; पवमानः सुवर्जन इत्येतेनानुवाकेनाभिषिञ्चेत् ĀpaŚS. xiv. 30. 1; प्रथमेनानुवाकेन शान्तिं कृत्वा ĀpaŚS. xv. 5.4; BhārGS. 3.6 (73.7); प्राणाय स्वाहा पूष्णे स्वाहेत्येतावनुवाकौ घर्मप्रायश्चित्तानि ĀpaŚS. xv. 17.4; उदस्य शुष्माद् भानुर्नात इत्यनुवाकेन कुलायिनीम् ĀpaŚS. xv. 17.5; सर्वेषामनुवाकानां प्रभृतीरभिव्याहारयति। प्रथमोत्तमयोर्वा ĀpaŚS. xv. 20. 4; संपदसि संपदे त्वा संपद्भ्यस्त्वा संपत्सु सीदेत्येताभ्यामनुवाकाभ्यां प्रतिमन्त्रमृषीष्टकाः सादनप्रवादैश्च पर्यायैः ĀpaŚS. xvi. 31. 1; ममाग्ने वर्चो विहवेष्वस्त्वित्यनुवाकेन प्रतिमन्त्रमिष्टकाभिर्धिष्णियांश्चिनोति ĀpaŚS. xvii. 21. 1; लोकोऽसि स्वर्गोऽसीत्यनुवाकेन प्रतिमन्त्रम् ĀpaŚS. xix. 14. 3; अवधानकालेऽग्रेणोत्तरनाभिं यच्चामृतं यच्च मर्त्यमित्येतैस्त्रिभिरनुवाकैरभिदक्षिणमग्निं परिचिनोति ĀpaŚS. xix. 15. 3; यदक्रन्दः प्रथमं जायमान इत्यश्वस्तोमीयं हुत्वैकस्मै स्वाहेत्येताननुवाकान्पुनःपुनरभ्यासं रात्रिशेषं हुत्वोषसे स्वाहेत्युषसि ĀpaŚS. xx. 12. 10; या ओषधयः प्रथमजा इत्यनुवाकेन चत्वारो ब्राह्मणाः ... दीक्षितमभिषिञ्चेयुः MānŚS. 104. 13; वशानाँ सप्तमोऽनुवाकः MānŚS. 135. 2; तस्याः पूर्वां घर्मेष्टकामरण्येऽधीतेनानुवाकेन MānŚS. 150.4; अग्निरेकाक्षरेणेत्यनुवाकं द्वादशवत्कृत्वा नैवारस्विष्टकृदिडं करोति KātyŚS. xiv. 5. 28; xv. 8. 17; xvi. 5. 22; xx. 2. 3; xx. 7. 6; xx. 8. 6; xxi. 1. 11; रुचितो घर्म इत्युक्तेऽनुवाकेन तिष्ठन्तोऽवेक्षेरन् यमध्वर्युर्ब्रूयात् LāṭyāŚS. v. 7. 2; DrāhyŚS. xiv. 3. 3; रश्मिरसीत्यनुवाकस्तोमभागाः ... द्वादशाग्निष्टोमे पञ्चदशोक्थ्ये KāṭhŚSSaṅkalana 23. 22; आद्योत्तमे कामं सूक्ते वानुब्रूयादृषेः। अनुवाकस्य वा ŚāṅkhāGS. ii. 7. 24; KauṣīGS. ii. 4. 20; आ सूक्तादनुवाकाद्वा ब्रह्मयज्ञो विधीयते KauṣīGS. iii. 10. 35; आज्याहुतीरुपजुहोति 'धाता ददातु नो रयिं प्राचीम्' इत्यन्तादनुवाकस्य BaudhGS. i. 10.5; ii. 1. 14; ii. 4. 4; 'पवमानस्सुवर्जनः' इत्येतेनानुवाकेन मार्जयित्वा BaudhGS. i. 11. 6; त्रिनादितोऽनुवाकानधीयीरन् BaudhGS. iii. 1. 9; KāṭhGS. i. 9. 4; ĀpaGS. iv. ii. 79; गाथा वाचयति ... सरस्वति प्रेमवेत्यनुवाकम् KāṭhGS. iii. 1. 23; अनुवाकेन यथोक्तमक्रत्वज्यानिम् KāṭhGS. iv. 4. 4; MānGS. i. 16. 1; प्रतिनाम प्रतिद्रव्यं प्रत्यनुवाकमिति ... नमस्ते रुद्र मन्यव इति षड्भिरनुवाकैरुपतिष्ठते KāṭhGS. iv. 12. 7; (पत्न्याः) स्वधितिं मूर्ध्नि धारयन् हिरण्यं चोदकुम्भेनावसिञ्चति पवमानः सुवर्जन इत्येतेनानुवाकेनावसिच्य यथार्थं वहन्ति BhārGS. 1. 18 (18.9); 2. 19 (52.7); ĀpaGS. iii. 9. 9; VārāGS. 14. 6; ĀgniveGS. i. 5. 1 (25.18); JaimiGS. 2.4 (30. 2); यास्ते अग्ने घोरास्तनुवः स्निक्च स्नीहितिश्चेत्येताभ्यामनुवाकाभ्यामुपस्थाय ... पूर्णाहुतिं जुहोति BhārGS. 3. 1 (69. 6); PāraGS. iii. 8. 13; सर्वेषामनुवाकानां प्रभृतीरभिव्याहारयति BhārGS. 3.6 (73. 12); खण्डिलस्यादितस्त्रिभिरनुवाकैरेकैकेन स्वाहाकारान्ताभिरादधाति MānGS. i. 6. 3; i. 8. 10; i. 23. 3; चतुर्भिरनुवाकैरपोऽभिमन्त्र्य स्नानमाचरेत् MānGS. i. 23. 18; ii. 6. 5; हुत्वा व्रतं प्रदायादितो द्वावनुवाकावनुवाचयेत् VārāGS. 7. 3; अथ एनं उपतिष्ठते। विभुरसि प्रवाहणः। इति एतेन अनुवाकेन HirGS. i. 16. 21; अनुवाकेनोत्तरं संपातवन्तं करोति KauśiSū. 63. 21; ब्राह्मणान्स्वस्तिवाच्याथ प्राङ्मुखः संविशेत्ततः। रक्षोहणमित्यनुवाकं जपेत्कर्ताथ ऋत्विजः AVPari. 33(7). 3; इष्टकोपधानं देवानामष्टकानुवाकमन्त्रास्तुरवानाम् Cārāyaṇīyamantrārṣānukramaṇikā 39. 10; युञ्जते मन इत्यनुवाकेनावाहनं कृत्वा ... नमस्कारं कुर्यात् ViṣṇuSm. 65. 2; SmṛtiCan. ii. 492. 16; यो ह्युच्यते त्रिरनुवाकः पठ्यतामिति स आदित आरभ्य परिसमाप्य पुनरादित आरभ्यते। तस्माद्दण्डकलितवदावृत्तिः ŚābaBh. 1321. 11 (*on* v.3.3); जेतुं जैत्रानथ खलु जपन् सूक्तसामानुवाकान् ... वामदेवो वृणोतु MahāvīC. 3. 23; नैव प्रयोगः ... सकृदेवानुवाकमध्यायं वा पठित्वानुष्ठीयते TantrVā. 53.8 (*on* i.2.31); वैष्णवैरनुवाकैश्च जुहुयात्सर्पिषा तथा VṛHārīSm. 3.9; सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेदपः LaghvāśvaSm. 1.36; 1.48; उपयुञ्जत इत्येतदनुवाकं तथान्नदम् AgniP. 259. 15; बलिमुत्तमम्। जीमूतस्येत्यनुवाकान् चतुरो दिक्षु निक्षिपेत् VasiS. 34. 19; रुद्रैकादशिनी रुद्रसंज्ञकानामेकादशानामनुवाकानां समाहारो जप्यमानः सर्वपापक्षयकरो वेदितव्यः Aparā. 1214. 10 (*on* 3.308); चतुरयमनुवाकः पठ्यतामित्युक्ते सकलस्यानुवाकस्य चतुरुच्चारणं गम्यते SaṅkarKāBh. 212. 21 (*on* iv. 3. 27); ब्रह्ममेधसंस्कारेऽप्यस्यानुवाकस्य ... विनियोगः ŚivārkaMaDī. i. 576. 10 (*on* i. 4.29); (पूजयेत्) स्वर्णघर्मानुवाकेन ...। स्वर्णघर्मानुवाकः सुवर्णं घर्मं परिवेदवेनमित्यनुवाकः VīraMi. (Pūjā.) 119. 7; अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वानुवाकाभ्याम् VīraMi. (Saṁskāra.) 1000. 11; **1Aii** (morning) litany (beginning of *prātassavana*) यत्प्रातरनुवाकस्तस्मिन्सर्वे कामा अवरुध्यन्ते AitBr. 7. 7 (209); पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवः सामाभिगायति ChāndoU. ii. 24. 3; प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति ChāndoU. iv. 16. 2; सर्वाण्येवावर्तयद् यद्याज्या यदनुवाक्या यत् प्रातरनुवाकः ChāgU. 2. 4; **1Bi** chapter, i. e. subdivision or section of the scriptures एतेऽनुवाका मुहूर्तानां नामधेयानि TaiBr. III. x. 10.3; III. x. 10. 2; एतेऽनुवाका यज्ञक्रतुनां चर्तूनां च संवत्सरस्य च नामधेयानि TaiBr. III. x. 10. 4; उध्दृतेष्वनुवाकेषु याजुषेष्वार्चिकेषु च। एकविंशः शतः शिष्टमुभयः Maitrāyaṇīyāchandonukramaṇikā 28; अन्त्यानुवाके सप्तैकरुद्रस्तुतिः यत्र दृश्यते Śuklayajussarvānukramasūtra 2. 263; लिङ्गसमाख्यानाभ्यां भक्षार्थतानुवाकस्य MīmāSū. iii. 2. 25; एकवाक्यत्वम् ... द्वयोरप्यनुवाकयोः TaiUBhāVā. 26. 9 (1); उत्तरे चानुवाके ... आनन्दमयस्यैव प्रतिपादनमिति विज्ञायते BrahmSūBh. (Rā.) 209. 17 (*on* i.1. 20); पूर्वानुवाकप्रतिपादितानवधिकातिशयानन्द-योगिनः ... ब्रह्मण एव जगदुत्पत्तिस्थितिलया निर्दिश्यन्ते BrahmSūBh. (Rā.) 237. 11 (*on* i. 2.1); पुरुषस्याणोरणीयान्नित्यस्मिन्ननुवाके ... महेश्वरत्वं प्रतिपाद्य ... आकाशान्तर्वर्तितयोपास्यत्वमुक्तम् VedāSaṁ. 135. 7; 136. 8; अनुवाकः ऋग्यजुःसमूहात्मकं वचनम् Liṅgānu. (He.) 14. 12; पूर्वस्मिन्ननुवाके ... ब्रह्मविद्यामुपन्यस्य ... पुरुषविद्यायां तच्छब्देन ब्रह्मवित्परामर्शात् ... गम्यते VedāntKau. 316. 8 (*on* iii. 3. 24); योऽनुवाकः कठश्रुतौ पठ्यमानः नचिकेतोनाम्नो मुनिपुत्रस्य प्रश्नत्रयविषये प्रोच्यते इति व्युत्पत्त्या त्रिणाचिकेतः ManvaVi. 391. 14 (*on* 3. 185); पुंसूक्तम् ... यत्परत्वैकतानं तस्यैव श्रीपतित्वं विशदमभिदधे ह्युत्तरत्रानुवाके TattvMu. 3. 8; सृष्टिशब्दोपेताश्चोपधानमन्त्राः 'एकया स्तुवत' इत्यस्मिन्ननुवाके समाम्नाताः NyāyMāVi. 57. 23 (*on* i. 4. 17); उत्तरस्मिन्ननुवाके ... प्रतिपादितमेव वस्तु ब्रह्मत्वेनोपदिशति NyāySu. (Ja.) 132A. 4 (*on* i. 1. 6); तैत्तिरीयाः स्वशाखायां नारायणस्यान्तिमेनानुवाकेन विदुषोऽपि महिमानमामनन्ति ... तैत्तिरीयाणामुपक्रमोपसंहारलिङ्गेन तात्पर्यनिर्णयस्योदाहरणं JīvanVi. 133. 17;

'मणोरणीया'नित्यनुवाके वक्तव्यम् ŚivārkaMaDī. i. 182. 12 (*on* i. 1. 4); न 'न्वद्भ्यस्संभूत' इत्यनुवाको विष्णुपर: ŚivārkaMaDī. i. 232. 11 (*on* i. 1. 17); अथर्ववेदे हि तृतीयकाण्डे पञ्चमानुवाके समाम्नायते मन्त्र: ŚivārkaMaDī. ii. 287. 12 (*on* iii. 3. 3); इत्यस्मिन्ननुवाके स्पष्टीकृतम् VīraMi. (Saṁskāra.) 141. 16; अनयोरनुवाकयोश्च दिवसरात्रिनामत्वमित्यपि तत्रैवाम्नातम् (तैत्तिरीयशाखायाम्) LalitāSaBh. 77. 2 (*on* 113); यथा सृष्टं ब्रह्मणा यानि सृष्टानीत्यस्मिन्ननुवाके कीर्तितानि तान्यनतिक्रम्य MayūMāli. 89. 5 (*on* i. 4. 17) [KośaKaTa. 1. 1337]; **1Bii** chapter, i. e. subdivision or section of the Vedas (recited during teaching and study) एकैकमृषिमनुवाकं वानुब्रूयात्। क्षुद्रसूक्तेष्वनुवाकम् ŚāṅkhāGS. ii. 7. 20-21; KauṣīGS. ii. 4. 17; द्विपदैकपदान्यप्यनुवाके (संक्रम्यन्ते) VājaPrāti. 4. 169; रक्षांसीत्यनुवाकेषु ह्यप्येतीकारवान् भवेत् BhārŚi. 8; काण्डप्रश्नानुवाकानां समाप्तौ काल इष्यते। दशाष्टपञ्चमात्रास्तु: KauhaŚi. 75; अध्यगायि भवतानुवाक: MahāBh. i. 169. 8 (*on* i. 1. 63); अनुवाकं मे भवानुद्दिशतु MahāBh. i. 260. 5 (*on* i. 3. 2); मासमधीतोऽनुवाको न चानेन गृहीत: MahāBh. i. 446. 6 (*on* ii. 3. 6); मासेन अनुवाको योजनेन वा अधीत: Rūpāva. 1. 151 (*on* ii. 3. 6); अह्ना क्रोशेन वानुवाकोऽधीत: PrakriKau. i. 408. 3; SiddhāKau. 142A. 9 (*on* ii. 3. 6); दशकृत्वोऽधीतोऽनुवाको विंशतिकृत्वोऽधीत इति NyāyBh. 138. 15 (*on* ii. 2. 29); Upask. 133. 14 (*on* ii. 2. 33); VākyaPa. 1. 83; अनामन्त्रितेन न गुरु: खेदयितव्य 'उपदिशानुवाकमिति' ManuBh. i. 114. 2 (*on* 2.73); सावित्रीमप्यधीयीत। यदि बहुसूक्तानुवाकाध्यायादि कयाचित्कार्यातिपत्त्या न शक्यते ManuBh. i. 130. 9 (*on* 2. 104); यस्तु ब्रह्मयज्ञ: एकेनापि सूक्ते साम्नानुवाकेन खण्डेन कण्डिकया वैकयैव यावज्जीवमधीतया सिध्यति ManuBh. ii. 328. 9 (*on* 10.1); साक्षात्पठितेऽनुवाके तेन गृहीतस्यावृत्त्या पुन: पुनर्ग्रहणलक्षणोऽभ्यास: संस्कारकारणम् NyāyKa. 257. 5; वाको वा अनुवाको वाकं वाकं संजुषमाण: देवस्य स्वं स्वगुप्तये स्वयं जेनातिषे ज्योतिषे स्वाहा PāramāU. 4. 1; त्रिरनवानमेकमेकमनुवाकमनुब्रूहि SaṅkarKāBh. 178. 14 (*on* iv. 1. 8); एतमध्यायमेतमनुवाकं वा यदि त्वमस्खलितं पठसि तदा त एतावद्ददामीत्युक्त्वा तथा कृते यद्दीयते तत् प्रश्नपूर्वकम् CaturCin. i. 101. 20; मैत्रेणाहमनुवाकमध्यापित: TattvCin. i. 626. 5; अनूच्यते अनुवाक: Prasā. i. 550. 13; **1Biii** section in the Brāhmaṇas illustrating the formulae (*mantra*) भीष्म: ... तुष्टाव मधुसूदनम्। ... यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च। गृणन्ति ... तस्मै सूर्यात्मने नम: MahāBhā. xii. 47. 16 (BhārBhāDī. मन्त्रार्थविवरणभूतेषु ब्राह्मणवाक्येषु); यं वाकेष्वनुवाकेषु ...। गृणन्ति सत्यकर्माणम् ... हरिं नारायणं प्रभुम् ViṣṇuDhaP. i. 52. 19; **1Biv** chapter or section of text (in general) अनुवाकस्तु कण्डिका NānārthāSaṁ. ii. 74. 321; **2A** favourable speech, i.e. favour रुद्रो वा ईशाते द्विपदां चतुष्पदां तयोर्वयमगुवाके (better अनुवाके Viśva.) स्याम AV. (P.) ii. 20. 3; **2B** favourable speech, i.e. praise शास्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च ये क्वचित्। ... विष्णोर्महात्मन:। ... सन्ति ... तानि सर्वाणि तद्वपु: ViṣṇuP. i. 22. 84; बद्धाञ्जल्योऽनुवाकैर्विरिञ्चिमुख्या उपतस्थुरीशम् BhāgP. iii. 13. 33; **3** the word *anuvāka* अध्यायानुवाकयोर्लुक् P. v. 2. 60 (Vār. अध्यायानुवाकाभ्यां वा लुक्); अध्यायानुवाकाभ्यां वा लुग्वक्तव्य: MahāBh. ii. 386. 17 (*on* v. 2. 60); प्रातरध्येयोऽनुवाक इति MahāBh. i. 391. 11 (*on* ii. 1. 43); कुटिलाय क्रामत्यनुवाकाय MahāBh. ii. 25. 8 (*on* iii. 1. 14); JaineVyā. iv. 1. 64 (Vṛ. अध्यायानुवाकयोरभिधेययोर्मृदश्छो भवति); देवदत्तस्य विषयोऽनुवाक: CāndraVr. *on* iii. 1. 61; KāśiVṛ. *on* iv. 2. 52; Prasā. i. 752. 18; SiddhāKau. 244B. 20 (*on* iv. 2. 52); श्लुग्वाध्यायानुवाके ŚākaṭāVyā. iii. 3. 176 [Vaija. 85. 32]; **4** name of a tree, Barringtonia acutangula (*nicula*) or Calamus rotang निचुले तु नदीकान्तोऽम्बुजो हिज्जुल इज्जल:। गन्धपुष्पो गुच्छफलोऽनुवाक: कच्छकोल्यपि NighŚe. 2017; **5** Pariśiṣṭa of Yajurveda, cf. अनुवाकसंख्या; **6** recitation, cf. अनुवाकहता.

अनुवाकक (anuvāka-ka) *m*. A chapter, i.e. section of text (in general) प्रश्नवाकानुवाकका:। ... भाषाश्च विविधास्तास्ता व्यक्ताव्यक्तगिर: स्मृता: LakṣmīT. 18. 40; **B** chapter, i. e. section of the Veda (in particular) भवेद् वाशिष्ठकोऽध्याय: ...। स्याद्दीर्घजीवतो दीर्घजीवतीयोऽनुवाच(?को)क: KośaKaTa. I. 1359.

अनुवाकग्रहण (anuvāka-grahaṇa) *n*. understanding (the meaning of) the chapter of the Veda यथानुवाकग्रहणे संस्थाभ्यसनकल्पित:। स्थिर: करोति संस्कार: पाठस्मृत्यादिपाटवम् NyāyMañ. i. 97. 30.

अनुवाकचतुष्टय (anuvāka-catuṣṭaya) *n*. group of four chapters of the Veda 'जनिष्ठ उग्र:' इत्यनुवाकचतुष्टयं ब्रह्मण: Cārāyaṇīyamantrārṣādhyāya 4.6; अनुवाक्च (? °कच°) तुष्टयं जपित्वा (श्राद्धविधि:) तदङ्गतिलोदकं यवोदकं च करिष्ये BālamBha. i. 551. 17 (*on* 1. 249)

अनुवाकतस् (anuvāka-tas) *adv*. with (the recitation of) chapter, i.e. section of the scripture ध्यायेत्तु मनसा देवीं मन्त्रमुच्चारयेच्छनै:। ... दशवारमशक्तो वा नातो न्यूनं कदाचन। तत उद्वासयेद्देवीमुत्तमेत्यनुवाकत: DevīBhāP. xi. 17. 17.

अनुवाकत्रय (anuvāka-traya) *n*. triad of chapters of the Veda (सूक्तानि) सर्ववेदपवित्राणि ...। येषां जपैश्च होमैश्च पूयते ... कूश्माण्ड्यो यद्देवा देवहेळनमित्यनुवाकत्रयम् SmṛtiCan. ii. 499.1; अन्यान्यपि ... पवित्राणि जप्यानि अयं वा वय: पवत इत्यनुवाकत्रयम् CaturCin. iii(1). 1075. 19; त्रिसुपर्ण: तैत्तिरीयशाखापठितस्य ... अनुवाकत्रयस्यार्थतो ग्रन्थतश्चाध्येता ManvaVi. 391. 18 (*on* 3. 185); ŚivārkaMaDī. i. 259. 14 (*on* i. 1. 22); अथर्वशिरस्त्रिसुपर्णं ब्रह्मे- (? मे)तुमित्याद्यनुवाकत्रयं तैत्तिरीयाणां प्रसिद्धम् VīraMi. (Āhnika.) 320. 2.

अनुवाकद्वय (anuvāka-dvaya) *n*. pair of the chapters of the Veda 'गोषदसि' इत्यनुवाकद्वयं सवितु:श्यावाश्वस्य Cārāyaṇīyamantrārṣādhyāya 1. 2; 14. 3; 39. 18; अपरासु तथानुष्टुप् अनुवाकद्वयं स्मृतम् BṛParāSm. 11. 188; (पवित्राणि जप्यानि) वरुणप्रघासैर्वरुणपाशादमुञ्चतेत्यनुवाकद्वयम् CaturCin. iii(1). 1075. 19; अनुवाकद्वयगतप्रत्यक्षमन्त्रपाठादेवाद्यानाम् ... प्रथमानूयाजाभ्यासत्वम् MayūMāli. 429. 28 (*on* v. 3. 2)

अनुवाकविहित (anuvāka-vihita) *adj*. prescribed in the chapter of the scriptures पूर्वानुवाकविहितब्रह्मविद्यावत उत्तरायणमृतस्यादित्यप्राप्तिमुक्त्वा दक्षिणायनमृतस्य चन्द्रप्राप्तिरुक्ता ŚivārkaMaDī. ii. 466. 18 (*on* iv. 2. 20)

अनुवाकशस् (anuvāka-śas) *adv*. by the (order of) the chapters of the Veda त्रिंशन्निमित्ता: षडर्चेषु कार्यास्तिस्रो दशाष्टौ च दशपंचर्चा चतुर्दशांत्या अनुवाकशश्च संख्यां विद्यादधिकां निमित्तात् Atharvavedīyapañcapaṭalikā 4. 6 [Viśva.]

अनुवाकशेष (anuvāka-śeṣa) *m*. **i** remaining portion of the chapter, i. e. section of the Veda (to be recited during the ritual) अनुवाकशेषं तु प्रतिप्रस्थाता परिश्रिते पत्नीं वाचयति BhārŚS. xi. 8.21; ĀpaŚS. xv. 8. 17; अनुवाकशेषं जपेद् ब्राह्मणान्भोजयित्वाशिषो वाचयति BhārGS. 3. 16 (85. 10); [Inst.] with the remaining portion of the chapter of the Veda (to be recited during the ritual) अथैनाꣳ (वेदिं) स्फ्येन, प्रतीचीं योयुप्यते ... अनुवाकशेषेण BhārŚS. ii. 3. 10; iii. 9. 12; iv. 16. 3; v. 11. 5; vi. 2. 3; x. 17. 19; (अग्निम्) अनुवाकशेषेणोपस्थाय ĀpaŚS. vi. 16. 12; अनुवाकशेषेणोपस्थायो-पर्याहवनीये धार्यमाणं प्रतिप्रस्थाता शृतदध्नाभिपूरयति ĀpaŚS. xv. 10. 12; देवस्य त्वा सवितु: प्रसव इत्यनुवाकशेषेण खनति MānŚS. 142. 15; 150. 10; 156. 21; अनुवाकशेषेण यजमानमवरोहयति VārāŚS. III. i. 2. 35; पञ्चगृहीतं जुहोत्यग्निस्तिग्मेनेत्यृचा षोडशगृहीतार्धमनुवाकशेषेण KātyŚS. xviii. 3. 12; सन्नाननुवाकशेषेणाध्वर्युर्यजमानश्चोपतिष्ठते HirŚS. xxiii. 1. 27 (801. 14); xxiv. 4. 10 (877. 11); इन्धानास्त्वा शतꣳ हि मा इत्युपसमिन्द्धे सं त्वमग्न इत्यनुवाकशेषेणाहवनीयमुपतिष्ठते VaikhāŚS. 2.7; नमो दिवे नम: पृथिव्या इत्यनुवाकशेषेण ... महावीरं यजमान उपतिष्ठते VaikhāŚS. 13. 12; नभ्यस्थेऽनुमन्त्रयते 'मयोभूरिति' अनुवाकशेषेण ŚāṅkhāGS. i. 11. 15; प्रत्येत्याभिरमन्तु भवन्त इत्युक्त्वा देवाश्च पितरश्चेत्यनुवाक-शेषेणोपतिष्ठते KāṭhGS. v. 9. 20; (रथस्य) चक्रे संमार्ष्टि ... अनुवाकशेषेण BhārGS. 2. 29 (62. 10); यमो दधारेत्यनुवाकशेषेण हविरुद्धरन्ति HirPiMe. ii. 6.6; **ii** remaining portion of the chapter, i.e. section in the Brāhmaṇas illustrating the formula (ब्रह्मण:) तदानन्त्याद्युपपादनार्थं मन्त्रव्याख्यानरूपोऽनुवाकशेष: ŚivārkaMaDī. i. 219. 13 (*on* i. 1. 16)

अनुवाकसंख्या (anuvāka-saṅkhyā) *f*. fourth of the eighteen Pariśiṣṭas of the Yajurveda तत्र परिशिष्टानि भवन्ति यूपलक्षणं छागलक्षणं प्रतिज्ञानुवाकसंख्या चरणव्यूह: ... अष्टादशपरिशिष्टानि भवन्ति Caraṇavyūha in IndSt. III. 269. 18 [title of a text, pw.]

अनुवाकसमुदाय (anuvāka-samudāya) *m*. group of chapters, i. e. sections of the Veda न चाध्यायदृष्टान्तो युक्त:। अनुवाकसमुदायस्यैवाध्यायत्वात् NyāyMāVi. 287. 9 (*on* v. 3. 2)

अनुवाकहतबुद्धि (anuvākahata-buddhi) *adj*. perplexed or confounded by the (mere) recitation (of the Vedas) पश्यत श्रोत्रियस्यानुवाकहतबुद्धेरुक्तिकौशलम् Loc. 19. 1 (*on* 1.4)

अनुवाकहता (anuvāka-hatā) *adj*. (*f*.) marred by (mere) recitation of the Veda श्रोत्रियस्येव ते राजन् मन्दकस्याविपश्चित:। अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी MahāBhā. iii. 133 * (2); v. 130. 6; xii. 10. 1; 'अनुवाकहते ति तर्ककृतामप्युपपत्तिमाह केवलत्वादसत्तया ManuBh. ii. 485. 24 (*on* 12. 106); नानुवाकहता बुद्धिर्व्यवहारक्षमा भवति। अनुवाकहता या तु न सा सर्वत्रगामिनी ŚukraNī. 2. 284.

अनुवाकादि (anuvākādi) *m.* the beginning, i.e. the first ... of the chapter, i.e. subdivision of the Veda व्रतं निवेद्य व्रातपतीभिः समिधोऽभ्यादध्यात् ... अनुवाकादिभिरनुवाकोत्तमैः (मन्त्रैः) AVPari. 46 (2). 4.

अनुवाकाद्य (anuvākādya) *adj.* [*f.* - ā] beginning with the chapter, i.e. subdivision of the Veda अक्षसूक्तानां धानानां च ... प्रत्यृचं वेदेन जुहुयादिति हैक आहुः। सूक्तानुवाकाद्याभिरिति (ऋग्भिः) वा ŚāṅkhāGS. iv. 5. 4; KauṣīGS. iii. 7. 6; (used as noun) the beginning of the chapter, i.e. subdivision of the Veda सावित्र्युभयतः कुर्यात् ...। हिरण्यवर्णाः सूक्तं च अनुवाकाद्यमेव च AVPari. 5(2). 4.

अनुवाकाध्ययन (anuvākādhyayana) *n.* study (by recitation) of the chapters of the Veda अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः HirŚS. xxvi. 3. 70 (50. 25); ĀpaDS. i(3). 11. 20.

अनुवाकानुक्रमणी (anuvākānukramaṇī) *f.* name of a work of index of the chapters (in the Ṛgveda) (by Śaunaka) ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।... इत्यनुवाकानुक्रमण्यां श्रीशौनकेन महर्षिणोक्तसंख्याका द्रष्टव्याः PrakaVi. 290. 22.

अनुवाकानुक्रमणीरूप (anuvākānukramaṇī - rūpa) *n.* form of the work of index of chapters (in the Ṛgveda) बह्वृचानां जनानां तु शौनकस्य प्रसादतः। अनुवाकानुक्रमणीरूपं किंचित् प्रवर्ण्यते SarvaAnu. 3. 2 (47. 4)

अनुवाकानुनयविवरण (anuvākānunayavivaraṇa) *n.* name of a literary work, PW., pw.

अनुवाकान्त (anuvākānta) *m.* A [Loc.] after the completion or the end of the recitation (of the Veda) त्र्यनुवाकान्ते स्वाहाकारो जानुमात्रे KātyŚS. xviii. 1. 2; (पश्चान्ते) पश्चानुवाकान्ते comm. *on* KātyŚS. xviii. 1. 3; **B** end of the section of the Veda, cf. **अनुवाकान्ततस्.**

अनुवाकान्ततस् (anuvākānta - tas) *adv.* upto or till the end of the chapter, i.e. section of the Veda (to be recited during the ritual) नैर्ऋत्यां नवकेनाथ वायव्यां नवकेन तु। हिरण्यशृङ्गमित्याद्येनानुवाकान्ततः क्रमात्। ... अभिषिच्य ĪśānŚiPa. ii. 50. 183; स्नपयेत् ...। जातवेदः पवित्राद्यैरनुवाकान्ततः क्रमात् ĪśānŚiPa. ii. 50. 332.

अनुवाकीय (anuvāk - īya) *adj.* regarding or about *anuvāka*, PW.

अनुवाकैकदेश (anuvākaikadeśa) *m.* part or portion of the chapter of the Veda स्थानानि नव मन्त्राणाम् ... षट् षष्टिरनुवाकानां समाहार्याः ... अनुवाकैकदेशांश्च MaiAnu. 9 [VIŚVA.]

अनुवाकोक्त (anuvākokta) *adj.* stated in the chapter, i.e. section of the Veda (to be recited during the ritual) रौद्रं गवीत्यनुवाकोक्तावस्थहविस्कन्ने सर्वास्वग्निहोत्रे हविरार्तिषु तमतन्वाग्निं जुहुयादित्यपरम् VaikhāŚS. 20. 10.

अनुवाकोत्तम (anuvākottama) *m.* the last verse in the chapter or subdivision of the Veda (to be recited during the ritual) व्रतं निवेद्य व्रातपतीभिः समिधोऽभ्यादध्यात् ... अनुवाकादिभिरनुवाकोत्तमैः (मन्त्रैः) AVPari. 46 (2). 4.

अनुवाकोपसंहार (anuvākopasaṁhāra) *m.* [Loc.] at the end of the section of the scriptures अनुवाकोपसंहारे च 'यतो वाचो निवर्तन्ते ...' इति वाङ्मनसनिवृत्त्यभिधानान्निर्गुणत्वं फलितम् ŚrutaPra. iA. 197. 12 (*on* i. 1. 1)

अनुवाक्य (anu-vākyà) *adj.* [*f.* -ā] [Alt Gr. II. 1. 191, 211; DEBRU. 793] **1** to be recited (for study) यौऽरण्येऽनुवाक्यौ गणः। तं मध्यत उपदधाति TaiBr. I. vii. 7. 3; व्याख्याता घोरास्तन्वोऽरण्येऽनुवाक्यो गण उत्तरौ चानुवाकौ ĀpaŚS. xv. 19. 1; यथाकालमरण्येऽनुवाक्यो गणः MānŚS. 113. 2; **2** to be repeated after आचान्तोदकाः खाण्डिकेभ्योऽनुवाक्या अनुगेयाः कारयेत् GobhiGS. iii. 3. 8; **3** who is to be told or taught श्वोभूते प्राधीयीरन् शिष्येभ्यः। अनुवाक्याः कुर्युः ऋगादिभिः प्रस्तावैश्च DrāhyGS. iii. 2. 21 (comm. यथानुवचनीयाः शिष्यास्तथा कुर्युराचार्याः)

अनुवाक्य (anuvākya) *n.* **1A** index of the chapter (of the *kāṇḍa*) यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत HirŚS. xxvi. 3. 63 (49. 20); ĀpaDS. i (3). 11. 6; **1B** chapter or subdivision of the Veda 'अद्भ्यः संभृतः पृथिव्यै रसाच्चे'त्यनुवाक्यस्य ... अस्मिन्सूक्तेऽन्तर्भावकथनेन तदेकवाक्यतापादितेति Śivārka MaDī. i. 232. 9 (*on* i. 1. 17); **2A** subsequent or following statement त्वं वाक्येष्वनुवाक्येषु निषत्सूपनिषत्सु च। ब्राह्मणा ब्रह्मयोनिं त्वां स्तुवन्ति त्वत्परायणाः SaurP. 61. 7; पित्र्यमानिधनादित्यनुवाक्येन तावत् पित्र्यामात्रे प्राचीनावीतं विधीयते CaturCin. iii (1). 1114. 8; अथ मूलमनाहार्यमित्याद्युक्तम्, अनुवाक्यं तु विक्रेतुर्विदेशे विद्यमानत्वे सतीत्यविरोधः VīraMi. 648. 2 (*on* C. 168, 171); **2B** recitation or learning, i.e. study अनुवाक्यमनुवचनं तद्विहीना अननुवाक्या ... रहिता इत्यर्थः SmṛtiCan. ii. 412. 11; **2C** word or utterance, cf. अनुवाक्यलावण्य; **3** invitatory verse or formulae, cf. **अनुवाक्यवत्.**

अनुवाक्यत्वलाभार्थम् (anuvākyatvalābhārtham) *adv.* for the sake of the attainment of the state of being what is to be recited, i. e. studied मन्त्रयोर्विद्यासंनिध्याम्नानं तु विद्याभागवदरण्येऽनुवाक्यत्वलाभार्थं भविष्यति ŚivārkaMaDī. ii. 326. 11 (*on* iii. 3. 25)

अनुवाक्यम् (anuvākyam) *adv.* with the recitation or utterance गोत्रनामानुवाक्यं ते तर्पयामीत्यनन्तरम्। दक्षिणाग्रान् कुशान् कृत्वा सतिलं पिण्डदानवत् GobhiSm. 3. 37.

अनुवाक्यलावण्य (anuvākya - lāvaṇya) *n.* beauty (which is fashioned) according to the word or utterance लक्ष्मीः ...। सृष्टानुवाक्यलावण्यमाज्ञामवितथां तथा। मुखसंस्था कवित्वं च यच्छत्युदधिसंभवा MārkP. 18. 52.

अनुवाक्यवत् (anuvākyà - va(n)t) (*but* ŚatBr. (K.) anuvākyá-va(n)t) *adj.* [*f.* - ī], DEBRU. 888] furnished or accompanied with the invitatory verse or formula for offering (recited by Hotṛ) (ग्रहं) तं मन्त्रेण जुहोत्येतेनो हास्यैषोऽनुवाक्यवान् भवति ŚatBr. IV. i. 1. 26; एता आहुतयोऽनुवाक्यवत्यो भवन्ति ŚatBr. XI. ii. 1. 6; सा वा आहुतिः समृद्धा यानुवाक्यवती ... एवमस्यैताः ... याज्या अनुवाक्यवत्यः (भवन्ति) ŚatBr. (K.) III. ii. 4. 3; एषोऽनुवाक्यवाꣳश्च याज्यवाꣳश्च यदेनं मन्त्रेण जुहोति ŚatBr. (K.) V. i. 1. 21.

अनुवाक्या (anu-vākyā) *f.* [for velarisation KāśiVṛ. *on* vi. 2. 37; Prasā. ii. 765. 3; DEBRU. 888; AltGr. II. 1. 157 (*yājyānuvākyā*); II. 1. 159; AltGr. II. 1. 51; II. 1. 191 (*puro'nuvākyā*)] **1** invitatory verse or formulae to be recited (by the Hotṛ or Maitrāvaruṇa priest at the instruction of the Adhvaryu in which the deity is invoked to partake of the offering intended for it) एषं वै प्रजापतिः सप्तदशो यज्ञोऽन्वायत्तो यद्यनुवाक्याया एति यदि याज्यायाः MaiS. i. 4. 11 (i. 60. 2); प्रियंवती याज्यानुवाक्ये भवतः MaiS. ii. 1. 8 (ii. 9. 20); ii. 2. 9 (ii. 22. 5); ii. 3. 7 (ii. 35. 10); iii. 7.2 (iii. 77. 3); याः सायमनुवा३क्यास्ताः प्रातर्याज्याः स्युर्याः प्रातरनुवा३क्यास्ताः सायँ याज्याः स्युः MaiS. iii. 8. 1 (iii. 93. 7); अग्निनाग्निस्साध्यत इत्युत्तरयोर्हविषोरनुवाक्यां कुर्यात् KāṭhS. 8. 10 (i. 93. 14); (यः) द्वे अनुवाक्ये कुर्यात् KāṭhS. 10. 1 (i. 125. 71); 12.5 (i. 167. 13); एतच्चतुर्गृहीतं प्रायच्छन्ननुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतेन जुहोति KāṭhS. 18. 19 (i. 279. 9); द्वे वै देवानां याज्यानुवाक्ये ... अत्र तिस्रः कार्या व्यावृत्त्यै द्वे अनुवाक्ये एका याज्या KāṭhS. 36. 13 (iii. 79. 16); अग्निर्मुखं प्रथमो देवतानामग्निश्च विष्णो तप उत्तमं मह इत्याग्नावैष्णवस्य हविषो याज्यानुवाक्ये भवतः AitBr. 1. 4 (24); 2.5 (48); 4. 8 (107); स वै तिष्ठन्नन्वाह। अन्वाह ह्येतदसौ ह्यनुवाक्या ŚatBr. I. iv. 2. 18; I. vi. 3. 27; I. vii. 2. 11; I. vii. 2. 17; III. iv. 4. 2; IV. i. 1. 26; IV. iii. 1. 8; V. i. 3. 14; XI. ii. 1. 6; XIV. ii. 2. 15; ŚatBr. (K.) II. vi. 4. 15; III. ii. 7.3; V. iii. 2.8; अग्निर्वृत्राणि जङ्घनदिति पूर्वस्याज्यभागस्यानुवाक्या। त्वं सोमासि सत्पतिरित्युत्तरस्य आत्रेयः ... सर्वाण्येवावर्तयद् यद्याज्या यदनुवाक्याः यत्प्रातरनुवाकः ChāgU. 2. 4; 4. 2; ĀśvaŚS. I. i. 5. 29; I. i. 5. 36; I. ii. 14. 18; दक्षिण आग्नीध्र उत्तरोऽध्वर्युः। द्वे द्वे अनुवाक्ये अध्यर्धामनवानम् ĀśvaŚS. I. ii. 19. 17; I. iii. 1. 21; I. iii. 7. 3; I. iii. 13. 18; इज्यानुवाक्ये अन्त्येष्वहःसु ĀśvaŚS. I. vi. 11. 10; अनुवाक्यायाश्चत्वार्यक्षराणि याज्यां गमयेत् ĀpaŚS. xix. 22. 14; अनुवाक्याया: प्रणवेन संस्तुत्याश्रावयति MānŚS. 20. 24; युवँ सुराममिति ग्रहाणामनुवाक्या MānŚS. 129. 17; 95. 5; यद्यनुवाक्याया एति यदि याज्याया अतश्चेदेव नैति। नास्य यज्ञो व्यथते VārāŚS. III. ii. 2. 25; KātyŚS. xxv. 5. 9; ऐडिक्या चित्याभिमृशत्यारण्येऽनुवाक्या भवन्ति HirŚS. xii. 3. 3 (90. 25); xxii. 4. 15 (776. 24); अनुवाक्याः कुर्युः ऋगादिभिः प्रस्तावैश्च पुरोऽनुवाक्यामनूच्य BaudhGS. ii. 1. 13; याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात् MīmāSū. DrāhyGS. iii. 2. 21; याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात् MīmāSū. xii. 4. 3; देवतोपलक्षणार्थानुवाक्या प्रदानार्था याज्या ŚābaBh. 1290. 14 (*on* v. 1.2); अनुवाक्यायामेकत्वश्रवणम् ŚābaBh. 1600. 22 (*on* viii. 1. 31); वाक्यलक्षणविदोऽनुवाक्यया। याज्यया यजनकर्मिणोऽत्यजन् द्रव्यजातमपदिश्य देवताम् ŚiśuVa. 14. 20; आज्यभागयोः क्रमे चतस्रोऽनुवाक्याः पठ्यन्ते TantrVā. 461. 13 (*on* ii. 2. 3); 756. 2 (*on* iii. 1. 23); TupṬ. 54. 1 (*on* v. 1. 14); राजादिगुणभेदात् याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव देवतापृथक्त्वात् प्रदानपृथक्त्वं भवति BrahmSūBh. (Śaṅ.) 690. 8 (*on* iii. 3. 43); अनुब्रूहीति प्रैषे याः शस्यन्ते ता अनुवाक्याः PrakaVi. 895. 14; अनुब्रूहीति प्रैषानन्तरं प्रयुज्यमानानुवाक्या- VedāntKa. 459. 1 (*on* iii. 3. 43); 61.5 (*on* i. 1. 4); (द्वादशाध्यायस्य) चतुर्थे(पादे) ... याज्यानुवाक्ययोः समुच्चयः NyāyMāVi. 9. 10 (*on* i. 1. 0); मन्त्रकाण्डे याज्यानुवाक्याः क्रमेणाम्नाताः NyāyMāVi. 127. 17 (*on* iii. 2. 7); 545. 9 (*on* x. 4. 22); संभवति ... द्रव्यस्य प्राप्तिः VidhiRa. ... देवतायाः ... अनुवाक्यायुगलेन च ...

5(20.16); मन्त्राणाम् ... याज्यानुवाक्यानामिव केवलं कालयोरेव व्यवस्थापनस्यापेक्षितत्वेन VidhiRa. 29 (162. 21); अनयोरेवैका अनुवाक्या, एका याज्या MīmāKau. iii (2). 159. 20 (*on* ii. 2. 3); याज्यानुवाक्ययोस्तु ... शुद्धाभिधानस्यैवातिदेशात् BhāṭṭDī. iii. 299. 17 (*on* x. 4. 18); अनुवाक्यायामपि ... पूर्ववदेव आवृत्तिः BhāṭṭDī. iv. 215. 3 (*on* xi. 4. 20); **2** the word *anuvākyā* इह च न प्राप्नोति ... त्रिवतीर्याज्यानुवाक्या भवन्ति MahāBh. iii. 396. 19 (*on* viii. 2. 15); ... याज्याप्रवर्ग्योलूखलान्यनुवाक्योपसदमुसलैः SaraKaṇṭhā. (Gr.) iii. 3. 26; (न दधिपय-आदीनि नैकवत् स्युः) याज्यानुवाक्ये Prasā. i. 635. 9; द्विःपाठः पक्षे समासान्तोदात्तत्वाय। ... जरामृत्यू याज्यानुवाक्ये LaŚabdeŚe. ii. 1032. 17.

अनुवाक्याकल्पन (anuvākyā-kalpana) *n.* assumption of invitatory verse or formulae आज्यभागयोश्चाश्रुतानुवाक्याकल्पनं नाश्रितं भवति MīmāKau. ii. 212. 18 (*on* iii. 1. 23)

अनुवाक्याक्रम (anuvākyā-krama) *m.* order of the invitatory verse(s) अनेन याज्यानुवाक्याक्रमेण मुख्ययोर्द्वयोर्यागयोर्मध्ये स्त्रीयागस्य प्राथम्यमवगम्यते NyāyMāVi. 269. 11(*on* v. 1. 7)

अनुवाक्यागम (anuvākyāgama) *m.* coming in, i.e. obtainment of the invitatory verse याज्याप्राप्तिश्चाबाधितैवानुवाक्यागमश्च दाशतयीभ्यः कर्तव्यः TantrVā. 462. 3 (*on* ii. 2. 3)

अनुवाक्याचतुष्टय (anuvākyā-catuṣṭaya) *n.* group of four invitatory verses (two Vārtraghnīs and two Vṛdhanvatīs respectively) गुणानां च परार्थत्वादित्यनेनापि हेतुना। संबद्धं नाज्यभागाभ्यामनुवाक्याचतुष्टयम् TantrVā. 756. 5 (*on* iii. 1. 23); दर्शपूर्णमासयोराग्नेयः सौम्यश्च द्वावाज्यभागौ विहितौ तयोः क्रमेणानुवाक्याचतुष्टयमाम्नातम् ... तत्र प्रथमद्वितीये वार्त्रघ्न्यौ तृतीया चतुर्थी च वृधन्वत्यौ ŚāstrDī. 206. 14 (*on* iii. 1. 13)

अनुवाक्यातस् (anuvākyā-tas) *adv.* as compared to (the recitation of) invitatory verse पुरोऽनूच्यं यज्ञस्य सन्तत्या इति श्रुतौ पुरोऽनुवाक्यातः पूर्वं वाग्व्यवहारो यज्ञसंततिफलको नियम्यते BhāṭṭCan. 117. 11 (*on* xvi. 3. 9)

अनुवाक्यात्व (anuvākyā-tva) *n.* the state of being an invitatory verse समाख्यया मनोता ऋचां सोमारौद्रियेषु याज्यानुवाक्यात्वेन प्राप्तानां सोमरुद्रलिङ्गाभिर्याज्यानुवाक्याभिर्बाधः TantrVā. 859. 9 (*on* iii. 3. 14); तिसृणामेवर्चां याज्यात्वमनुवाक्यात्वं च संगच्छते BhāṭṭCan. 52. 9 (*on* xiv. 2. 15)

अनुवाक्यादि (anuvākyādi) *adj.* invitatory verse etc. अनुवाक्यादिभिभक्तिवादेनावयवशः संकीर्तयन्नुपस्तरणादीनि दर्शयति ŚābaBh. 2080. 18 (*on* x. 8. 32)

अनुवाक्यादिक (anuvākyādi-ka) *adj.* invitatory verse etc. आर्त्विजिकमेव याज्यानुवाक्यादिकं कृत्स्नमाध्वर्यवे संगृहीतम् BālamBha. i. 248. 5 (*on* 1. 89)

अनुवाक्यादिमात्र (anuvākyādi-mātra) *n.* only the invitatory verse etc. द्रव्यदेवतारहितं कर्ममात्रं प्रस्तुत्य स्तोत्र(?त्र)शस्त्रयाज्यानुवाक्यादिमात्रं विधीयते TantrVā. 639. 3 (*on* ii. 4. 8)

अनुवाक्यादिवत् (anuvākyādi-vat) *adv.* like the invitatory verse etc. अनुवाक्यादिवत् 'अग्नये समिध्यमानायानुब्रूही'ति प्रैषानन्तर्यस्यैवानुशब्दार्थत्वावसायात् ... अनुवचनान्तरस्यापि क्रतुमध्ये प्रयोगोपपत्तिः MīmāKau. ii. 203. 19 (*on* iii. 1. 21)

अनुवाक्यादिशेष (anuvākyādi-śeṣa) *m.* remaining portion of invitatory verse etc. स्तोत्रशस्त्रानुवाक्यादिशेषस्तु सवनस्य यः। षष्ठ्यभावान्न तस्यैते युक्ता मन्द्रादयः स्वराः TantrVā. 825. 23 (*on* iii. 3. 9)

अनुवाक्यादिसाधारण (anuvākyādi-sādhāraṇa) *adj.* common to invitatory verse etc. अनुवचनमात्रमनुवाक्यादिसाधारणमिति न सामिधेन्यनुवृत्तिरवधार्यते ŚāstrDī. 202. 3 (*on* iii. 1. 11)

अनुवाक्याद्यनुवचन (anuvākyādy-anuvacana) *n.* recitation of the invitatory verse etc. अन्तरानूच्यमित्यादौ ... अनुवाक्याद्यनुवचनसाधारण्येन सर्वप्रकृताङ्गानुवचनमात्रोद्देशेन गुणविधानात् न तैस्सामिधेनीप्रकरणानुवृत्तिशङ्कापि MīmāKau. ii. 201. 13 (*on* iii. 1. 21)

अनुवाक्याद्वय (anuvākyā-dvaya) *n.* pair of invitatory verses (Vārtraghnī and Vṛdhanvatī) अनुवाक्याद्वयस्य तुल्यार्थतया विकल्प्यमानस्यानुरूपा याज्यापि कल्पयितव्या TantrVā. 461. 19 (*on*. ii. 2. 3); एकस्मिन् कर्मणि अनुवाक्याद्वयानुपपत्तेः MīmāKau. ii. 212. 13 (*on* iii. 1. 23)

अनुवाक्याद्वित्व (anuvākyā-dvitva) *n.* duality of the invitatory verses (Vārtraghnī and Vṛdhanvatī) किमनुवाक्याद्वित्वस्य प्रधाने निवेशः। उताज्यभागयोरिति ŚābaBh. 738. 6 (*on* iii. 1. 23)

अनुवाक्यान्त (anuvākyānta) *m.* [Loc.] at the end of the invitatory verse अनुवाक्यान्ते प्रणवं दधाति होता VārāŚS. I. i. 1. 48.

अनुवाक्यान्तर (anuvākyāntara) *n.* another invitatory verse प्रधानक्रमाम्नातानाम् अनुवाक्यान्तराणां बाधः MīmāKau. ii. 212. 17 (*on* iii. 1. 23)

अनुवाक्यान्तिमाक्षर (anuvākyāntimākṣara) *n.* last syllable of the invitatory verse अनुवाक्यान्तिमाक्षरचतुष्टयस्य याज्यायामध्यूहनविधेर्थवादमात्रम् BhāṭṭCan. 124. 9 (*on* xvi. 4. 4)

अनुवाक्यापाठ (anuvākyā-pāṭha) *m.* repetition, i.e. prescription (in the scriptures) of the invitatory verse याज्यानुवाक्यापाठेन स्त्रीप्राथम्यं हि मुख्ययोः। मुख्यार्थत्वेन धर्माणां स्यान्मुख्यक्रमतः क्रमः NyāyMāVi. 269. 1 (*on* v. 1. 7)

अनुवाक्याप्रैष (anuvākyā-praiṣa) *m.* summoning or call for the (recitation of) invitatory verse इडामग्न इति व्यक्तस्यानुवाक्याप्रैषः MānŚS. 133. 5.

अनुवाक्यामनोतामन्त्र (anuvākyāmanotā-mantra) *m.* (du.) invitatory verse and verse (containing the word) *manotā* कृष्णग्रीवयोः पश्वोरनुवाक्यामनोतामन्त्रौ NyāyMāVi. 664. 19 (*on* xi. 4. 21)

अनुवाक्यामन्त्र (anuvākyā-mantra) *m.* formulae called as invitatory verse मन्त्रकाण्डे तत्तल्लिङ्गा एव काम्ययाज्यानुवाक्याकाण्डमित्येवं समाख्याता याज्यानुवाक्यामन्त्रास्समाम्नाताः BhāṭṭDī. i. 220. 17 (*on* iii. 2. 7)

अनुवाक्याम्नान (anuvākyāmnāna) *n.* mention of the invitatory verse क्वचिदस्त्येव याज्यानुवाक्याम्नानं होत्ररूपेण TantrVā. 488. 12 (*on* ii. 2. 10)

अनुवाक्यायुगलद्वय (anuvākyāyugala-dvaya) *n.* two pairs of invitatory verses क्रमावगताज्यभागाङ्गभावस्यानुवाक्यायुगलद्वयस्य पौर्णमास्यमावास्याकालयोर्विभागेन प्रयोगव्यवस्थापकत्वात् VedāntKa. 88. 14 (*on* i. 1. 1); दुर्बलेनापि संनिधिनाज्यभागाङ्गत्वमङ्गीकृत्य वचनमनुवाक्यायुगलद्वयस्य व्यवस्थार्थमिति वक्ष्यते MayūMāli. 126. 10 (*on* ii. 2. 3)

अनुवाक्यायुगलपाठक्रम (anuvākyāyugala-pāṭhakrama) *m.* [Inst.] according to the order of the recitation of a pair of invitatory verses मुख्ययागक्रमेणैव निर्वापः कार्यः। तयोस्तु याज्यानुवाक्यायुगलपाठक्रमेणानुष्ठानक्रमः BālamBha. ii. 212 . 10 (*on* 2. 135-136)

अनुवाक्यारूप (anuvākyā-rūpa) *adj.* of the form of invitatory verse क्रमादिविनियुक्तो मन्त्रः, यथा उपांशुयाजादौ याज्यानुवाक्यारूपः MīmāKau. iii (1). 94. 21 (*on* i. 2. 45)

अनुवाक्यार्थत्व (anuvākyārtha-tva) *n.* the state of being meant for the invitatory verse याज्यानुवाक्यार्थत्वेन चतसृणामेवापेक्षितत्वेऽप्यवशिष्टानां विकल्पेन विनियोगः BhāṭṭCan. 123. 19 (*on* xvi. 4. 3)

अनुवाक्यालिङ्गविशेष (anuvākyā-liṅgaviśeṣa) *m.* particular characteristic feature of the invitatory verse अनुवाक्यालिङ्गविशेषान्नामधेयान्यत्वम् ĀśvaŚS. I. i. 5. 33.

अनुवाक्यावत् (anuvākyā-vat) *adv.* like the invitatory verse शंयुवाकाय संप्रेषितस्तच्छंयोरावृणीमह इत्याहानुवाक्यावदप्रणवाम् ĀśvaŚS. I. i. 10. 1.

अनुवाक्यावती (anuvākyā-vatī) *adj.* (*f.*) furnished or accompanied with an invitatory verse सर्वाश्चानुवाक्यावत्योऽप्रैषा अन्या अन्वायात्याभ्यः ĀśvaŚS. I. i. 5. 30.

अनुवाक्यासमाख्यातत्व (anuvākyāsamākhyāta-tva) *n.* the state of being what is designated as invitatory verse (वार्त्रघ्नीवृधन्वत्योः ऋचोः) एतयोश्चानुवाक्यासमाख्यातत्वेऽपि न देवतालक्षणा MīmāKau. iii (2). 159. 12 (*on* ii. 2. 3)

अनुवाक्यासमाख्याबाध (anuvākyāsamākhyā-bādha) *m.* contradiction to the designation as invitatory verse यद्येका याज्या एका वानुवाक्या भविष्यतीति न तदनुवाक्यासमाख्याबाधात् TantrVā. 467. 17 (*on* ii. 2. 3); यत्तु वार्त्तिके अनयोः (वार्त्रघ्नीवृधन्वत्योः ऋचोः) एवैका अनुवाक्या, एका याज्या ... उभयत्र लक्षकत्वमङ्गीकृत्य कल्पनीयेत्युक्तम्, तत् अनुवाक्यासमाख्याबाधापत्तेः ... अपेक्षितम् MīmāKau. iii (2). 159. 22 (*on* ii. 2. 3)

अनुवाक्योत्तर (anuvākyottara) *adj.* coming after or following the invitatory verse ग्रहाणामनुवाक्योत्तरः (?क्योत्तरा) प्रैषा उत्तरा याज्योत्तराः VārāŚS. III. ii. 8. 14 (KASHIKAR Ed.)

अनुवाच् (anu-vác) (= anuvākyā, PW., MW.) *f.* [P. vi. 2 139; Vār. *on* iii. 2. 178] **A** recitation (of invitatory verse for a deity) दे॒वेभ्यः॑ प्रातर्या॒वभ्यो॑ऽनुब्रूहि। इति॒ छन्दां॑सि वै दे॒वाः प्रा॑तर्या॒वाण॒श्छन्दो॑भ्यो वा॒ ए॒तद॑नुवा॒चं आ॑ह MaiS. iv. 5. 3 (iv. 66. 12); ŚatBr. (K.) IV. ix. 3. 6; अ॒थ म॒नोता॑यै ह॒विषो॑ऽनुवा॒च आ॑ह ... स॒र्वासां दे॒वतानां पशौ म॒नाँस्यो॒तानि भवन्ति ŚatBr. III. viii. 3. 14; ŚatBr. (K.) IV. viii. 3. 9; ŚatBr. IV. v. 2. 8; स॒ ए॒ष वृत्र ए॒वोद्य॑म्यते य॒दिन्द्राय म॒रुत्व॒तेऽनुवा॒च आ॑ह त॒स्माद॒तो न॒ दद्यात् ŚatBr. (K.) V. iv. 1. 19; **B** [Inst.] by order of recitation तदाहुर्यदग्नये मध्यमानायानुवाचाहाथ कस्मात्सावित्रीमन्वाहेति AitBr. 3. 5 (66) (*but* Sāy. यस्मात्कारणादध्वर्युरग्नये

मथ्यमानायेत्यग्नयेऽनुकूलया वाचा मन्त्रमाह); हविर्धानाभ्यां प्रोह्यमाणाभ्यामनुब्रूहीत्या... तदाहुर्यद्धविर्धानाभ्यां प्रोह्यमाणाभ्यामनुवाचाहाथ कस्मात्तृचं द्यावापृथिवीयमन्वाहेति AitBr.5.3 (124) [the verse to be recited by the Hotṛ or Maitrāvaruṇa priest, in which the god is invoked to partake of the offering intended for him, MW.; repetion, Apte].

अनुवाच् (anu-vāc) *m.* lecture, Apte

अनुवाचक (anu-vācaka) *m.* chapter, i.e. section of the Veda भवेद् वाशिष्ठकोऽध्यायः। ... अनुवाच (?क)कः KośakaTa. 1. 1359; [better अनुवाकक)

अनुवाचक (anu-vācaka) *adj.* reiterative (कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्) अत्र यत्नादिति विधीयते। ... तथा च सति कर्मणेतिपदमनुवाचकत्वाद् वाङ्मनःशब्दसाहचर्याच्च लक्षणया शरीरे वर्तते Aparā. 232.7 (*on* 1. 156)

अनुवाचन (anu-vācana) *n.* [enumerated in *anupravacanādigaṇa*, GaṇPā. 7. 9; JaineVyā 233. 7 (*on* iii. 4. 104); Prasā. i. 855. 11] **1A** act of causing (the Hotṛ priest) to recite invitatory verse (by the Adhvaryu priest) (देवताः) समस्यानुवाचनम् KātyŚS. v. 12. 13; xv. 10. 14; आग्नीध्राद-नुगच्छति सुन्वन् ... प्रागनुवाचनाद्य KātyŚS. x. 2. 16; xix. 3. 4; **1B** recitation of invitatory verse in accordance with injunction of the Adhvaryu priest यथासवनमनुवाचनप्रैषौ KātyŚS. ix. 9. 8; xii. 6. 10; xix. 7. 9; **1C** act of causing (the student) to recite (after oneself), i.e. act of teaching or instructing अथानुवाचनस्य। ... प्राङ्मुख आचार्यः ... इतरं वाचयति ŚāṅkhāGS. ii. 7. 1; **2** after- recitation अनु पश्चाद्वाचनम् अनुवाचनमिति वामनः GaṇRa. 6. 366 (397) [reading to oneself, Apte]

अनुवाचनतस् (anuvācana-tas) *adv.* after the causing of recitation of the invitatory verse स ह स्माह बौधायन आदित एव होता मरुत आवाहयेदनुवाचनतोऽध्वर्युरिति BaudhŚS. iii. 151. 16.

अनुवाचनधर्म (anuvācana-dharma) *m.* [Inst.] in accordance with the procedure of causing (the student) to recite (after oneself), i.e. procedure of teaching प्रागुदीचीं दिशमुपनिष्क्रम्य शुचौ देशे प्राङ्मुख आचार्य उपविशति। उदित आदित्येऽनुवाचनधर्मेण वाग्यतायोष्णीषिणेऽन्वाह ŚāṅkhāGS. ii. 12. 12.

अनुवाचनप्रभृति (anuvācana-prabhṛti) *adj.* act of causing (the Maitrāvaruṇa priest) to recite (the invitatory verse) etc. (करोति) उन्नीय-मानेभ्यश्चानुवाचनप्रभृत्या चमसनिधानात् KātyŚS. x. 1. 28.

अनुवाचनप्रैष (anuvācana-praiṣa) *m.* call for the recitation (of invitatory verse) अनुवाचनप्रैषो यथादेवतममुष्माऽअनुब्रूहीति KātyŚS. i. 9. 13.

अनुवाचनीय (anu-vācanīya) *adj.* [P. v. 1. 111] what is intended for the recitation, PW.; pw.

अनुवाचयत् (anu-vācayat) *adj.* reading successively रणे हतानां रजनीचराणामुद्देशपत्राण्यनुवाचयन्तम्। संभावयन्नध्वनि चित्रगुप्तं तत्राव्रजन्नैक्ष्यत धर्मराजः Rāgh. 20. 6.

अनुवाचा (anu-vācā) *f.* type of *dūtī* (*lit.* speaking favourably) प्राक्प्रस्तुतार्पणार्थं स्वजनाग्राह्यार्थकं तु या वाक्यम्। आ(औ)दास्ये श्रावयति स्याद्दूती सानुवाचै(तै)व KandaCū. v. 4. 49.

अनुवाचित (anu-vācita) *adj.* **A** which is read again अशोकः ... नानुवाचितमेव हि। तं लेखं मुद्रयाम... PariPar. 9. 22; **B** which is read सोऽथ भीमभटस्तस्मिंल्लेखे तत्रानुवाचिते। मुक्ताट्टहासो दायादप्रतिदूतं तमभ्यधात् KathāSaSāg. xii. 7. 273.

अनुवाच्य (anuvāc-ya) *ger.* **Ai** having caused to recite (invitatory verse) अवदाय ग्रहँ वा गृहीत्वा ... संप्रेष्यति अमुष्मा अनुब्रूहीति ...। अनुवाच्य वाग्यतो भवत्याश्रावणात् VārāŚS. I. i. 1. 47; **Aii** having recited आदाय तन्मन्त्रपुस्तिकामनुवाच्य च। तत्र भस्मनि चिक्षेप स धूलिमभिमन्त्रिताम् KathāSaSāg. xii. 9. 22; **B** having read स (लेखकः) विमुच्यानुवाच्यैनम् (लेखम्) ... अवाचयदुद्यगीः PadmP. (Ra.) 37. 4.

अनुवाच्य (anu-vācya) *adj.* **A** to be spoken to न तु वाच्यो (v. l. नानुवाच्यो) मृदु वचो धार्तराष्ट्रः कथंचन। न हि मार्दवसाध्योऽसौ MahāBhā. v. 4. 4; **B** to be told यद्यामिलषितं ब्रह्मन् विद्यते भृगुनन्दन। प्रपत्स्यसे तु तत्सर्वं नानुवाच्यं तु कस्यचित् MatsyaP. 47. 125.

अनुवाच्यमान (anu-vācyamāna) *adj.* being shouted at अहो वराका हरिणाः शशाश्च वृका वराहा रुरवः कुरङ्गाः। ... क्रव्यादवर्गैरनुवाच्यमानाः केचित्प्रधावन्त्यनवेक्ष्य शावान् VarāṅgaC. 6. 24.

अनुवात् (anu-vāt) *adj.* blowing along or towards (the teacher) ... चार्यमुपासीत ...। अनुवाति वीतः HirŚS. xxvi. 2. 38 (30. 11) (comm. ... विपर्ययेण इत उपासीत); अनुवाति वाते वीतः ĀpaDS. i(2). 6. 15.

अनुवात (anu-vāta) *m.* wind which blows along or towards (the teacher), wind which blows in the same direction, windward direction यः शिष्यदेशाद् गुरुदेशमागच्छति सोऽनुवातः ManvaMu. 75. 19 (*on* 2. 203); स्वदेशाद्यत्र वायुर्गच्छति सोऽनुवातः VīraMi. (Saṁskāra.) 462. 24; [Loc.] with the wind blowing along or towards, in the same direction as that of the wind or in the windward direction शतकर्दमोच्चिदिङ्गकरवीरकटुतुम्बीमत्स्यधूमः ... प्रवातानुवाते प्रणीतो यावच्चरति तावन्मारयति ArthŚā. iii. 215. 1 (14. 1); प्रतिवातेऽनुवाते च नासीत गुरुणा सह ManuSm. 2. 203 (ManvaVi. तत्पृष्ठभागगतवातवहनस्थाने); VīraMi. (Saṁskāra.) 461. 24; प्रतिवातानुवातयोश्च विशेषापत्तेर्नेन्द्रियं प्राप्तस्योपलम्भकम् PrakaPañ. 359. 20; शीक्षाकारोक्ते वायवीयशब्दे अनुवाते दूरे धीर्युक्तैव NayaVi. 239. 3 (*on.* i. 1. 8); प्रतिवातेऽनुवाते वा न तिष्ठेद् गुरुणा सह ŚivU. 7. 15; शब्दाश्रयः स्पर्शवान्। अनुवातप्रतिवातयोर्विप्रकृष्टनिकटशरीरिणोपलभ्यमानानुपलभ्य-मानेन्द्रियार्थत्वात् SyādvāMañ. 14 (140); [Inst.] in the windward direction अनुवातेन श्रोत्रस्य वृत्तेर्वा प्रेरणं न स्यात् NyāyRa. 760. 16 (*on* 6. 118)

अनुवात (anu-vāta) *n.* wind which blows in the same direction, windward direction यस्यां दिशि गुरुर्व्यवस्थितस्ततो देशाद्यदा वायुः शिष्यदेशमागच्छति शिष्यदेशाच्च गुरुदेशं ते प्रतिवातानुवाते। एकं 'प्रतिवातम्' अपरम् 'अनुवातं' तदपेक्षया गुरुणा सह नासीत ManuBh. i. 182. 18 (*on* 2. 203)

अनुवातगति (anuvāta-gati) *f.* movement in the same direction as (that) of the wind or in the windward direction शब्दस्य ... । न च दिङ्नियमे हेतुरनुवातगतेस्तथा ŚlokaVār. 6. 93 (754. 3)

अनुवातत्व (anuvāta-tva) *n.* the state of being what blows in the same direction श्रोत्रस्य विक्रियायाम् ... । तद्गतं (वृत्तिगतं) ह्यनुवातत्वं स्यात्र शब्दगतं तदा ŚlokaVār. 6. 119 (760. 7)

अनुवातभू (anuvāta-bhū) *f.* region in the windward direction धत्ते धियं पवनकम्पितपुण्डरीकषण्डोऽनुवातभुवि दूरगतेऽपि गन्धे NyāyMañ. i. 60. 8.

अनुवातम् (anuvātam) *adv.* **A** in the same direction as that of the wind, in the windward direction क्षेत्रस्यानुवातं क्षेत्रस्य पतिना वयमिति प्रत्यृचं जुहुयाज्ञपेद्वा ĀśvaGS. ii. 10. 4 (*but* Viśva. *adj.* cf. comm. क्षेत्रस्यानुवातं देशं गत्वा तत्र); तस्य खलु सर्वपरिफुल्लस्य योजनशतमनुवातं गन्धो वाति AbhidhKoBh. 168. 14 (*on* 3. 68); अनुवातं दूरादुपलभ्यते शब्दः ŚābaBh. 80. 3 (*on* i. 1. 13); PrakaPañ. 359. 7; Tantr Raha. 24. 9; (वृत्तिः) अनुवातं विहन्येत प्रतिवातं च सा व्रजेत् ŚlokaVār. 6. 118 (760. 6); या चानुवातं दूरादुपलब्धिः (शब्दस्य) तत्रापि न कश्चिद्धेतुरस्ति NyāyRa. 754. 16 (*on* 6. 93); **B** in the direction facing the wind अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते PāraGS. iii. 8. 13 (Harihara वातमनु लक्षीकृत्य वाताभिमुखम्); VīraMi. (Saṁskāra.) 1000. 10; 1009. 10; नासमिद्धमुपासीत हुताशं नैव चाशुचिः। नानुवातं न विवृतः AṣṭāSaṁ. i. 12. 13 (1. 3)

अनुवाता (anuvātā) *f.* a type of *dūtī*, alternative designation for *vātadūtī* (who acts favourably like the wind) प्राक्प्रस्तुतार्पणार्थं स्वजनाग्राह्यार्थकं तु या वाक्यम्। आ(औ)दास्ये श्रावयति स्याद्दूती सानुवाचै(तै)व KandaCū. v. 4. 49 (comm. अनुवाता दूती वातदूती। अनुगतो वातशब्दो यस्य तथाभूतो दूतीशब्दः संज्ञात्वेन यस्याः प्रयुज्यते सा वातदूतीत्यर्थः)

अनुवातादि (anuvātādi) *adj.* wind (blowing) in the same direction etc., i.e. favourable wind etc. नानुवातादिभिस्तस्य (शब्दस्य) वृत्तेश्च प्रेरणं भवेत् ŚlokaVār. 6. 118 (760. 5). cf. अनुवात.

अनुवातानुपयोग (anuvātānupayoga) *m.* [Abl.] due to the uselessness of the windward direction योगोक्तविधापि क्रमेण धिया तुल्यनयादभिमता भाष्ये तद्ग्रहान्निरस्ता 'अनुवाते दूरेऽपि शब्दधीः' इति। अनेन योगोक्तबौद्धोक्त्योर्निरासः, शब्दपरंपरायामप्राप्त्याग्रहे अनुवातानुपयोगात् NayaVi. 239. 2 (*on* i. 1. 8)

अनुवातृ (anu-vātṛ) *adj.* (used as noun) what blows in the same direction or favourably यश्चायं पवते लोकान् ...। अनुवाता च लोकस्य स वायुरनुवत्सरः BrahmāṇḍP. i. 13. 119.

अनुवाद (anu-vāda) *m.* **1Ai** reiteration, restatement (of what is already stated or known), secondary reference **ii** a type of Brāhmaṇa passage (explaining a rule propounded earlier) **B** restatement, reordering, appeal **C** tautology **2** repetition **3** announcement **4** blame, blot, censure **5** agreement, concord, acceptance **6** subject (which is already known), counter-part of predicate **7** the word *anuvāda* **8A** one of the six types of *vādas* **B** one of the four types of congnition **1Ai** reiteration, restatement (of what is already stated or known), secondary reference हविष्कृतं (साम)

अनुवादिन् (anu-vādin) *adj.* [*f.* -ī] [CāndraVr. *on* i. 2. 96; KātanVr. *on* iv. 4. 26] **1A** who repeats, a repeater पुरा वाचः प्रवदितोरनूच्यः। यद् वाचि प्रोदितायामनुब्रूयात् अन्यस्यैवैनमुदितानुवादिनं कुर्यात् AitBr. 7. 5 (202); **1B** who repeats, i.e. who reproduces अङ्गनानां सहस्रेण भूषितेन विभूषणैः। रूपसंलापशीलेन युक्तगीतार्थभाषिणा (v.l. युक्तगीतानुवादिना)। .. ददर्श हरियूथपः Rāmā. v. 9. 6 (*but* APTE conformable to, in harmony with, like); **2A** which expresses, mentions or refers to इन्द्रस्य नु वीर्याणि प्रवोचमिति निष्केवल्यं तस्य तदेवान्तरूपं यद्भूतानुवादि KauṣīBr. 20. 4 (92. 3); 21. 4 (94. 24); भूतानुवादिनीरेत एत इति वै पूर्वाण्यतोऽनुदिशन्ति JaimiBr. 3. 35; असृक्षत प्र वाजिन इत्यनुरूपो भवति भूतानुवादिनीः JaimiBr. 3. 136; दर्शपूर्णमासज्योतिष्टोमादिषु यदाहवनीयसाध्यं तत्रानुवाद्येवात्मनेपदम् ṬupṬ. 108. 3 (*on* vi. 2. 8); (प्रत्ययाः) तथैव स्वार्थिकाः केचित्संघातान्तरवृत्तयः। अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः VākyaPa. 2. 193; **2B** which restates or reiterates (what is already known) मनो न त्रिष्टुप् सोमस्तुतिरधियज्ञानुवादिनी Śuklayajuḥsarvānukramaṇikā 1. 424. (9); ŚābaBh. 2268. 15 (*on* xii. 3. 37); क्रियमाणानुवादिनश्चाध्वर्युणा क्रियमाणमर्थमनुवदन्ति ŚābaBh. 2268. 19 (*on* xii. 3. 37); आरम्भश्च साहसानुवादी DaśKuC. 80. 7; स्वत एव यतः पुंसां प्रवृत्तिः

स्वार्थसिद्धये। तत्रानुवादि शास्त्रं स्यात् निवृत्तावेव BrĀraUBhVā. i. 4. 407; न हि विध्यनपेक्षस्य प्रामाण्यमनुवादिनः TaiUBhāVā. 170. 9 (2); निसर्गसंसर्ग्यनुवादि ... । कथितम् ... क्षणदाचरैः ... तद्बलं बर्बरकाय स्वनेत्रे DvyāśraKā. 12. 33; न च यजेतेति प्रत्यक्षे यागे तदनुमा अतः प्राप्त्यभावान्न यजिरप्यनुवादी VedāntKa. 85. 25 (*on* i. 1. 4); भेदश्रुतिरनुवादिनीत्युक्तम्। यथा नानुवादिनी तथा वक्ष्यते NyāySu. (Ja.) 67A. 4 (*on* i. 1. 1); नेह नानेत्यादि श्रुतिरप्यनुवादिनी स्यात् Nyāyāmr. 160B. 7; 164B. 8; **2C** which is a Brāhmaṇa passage, cf. **अनुवादित्व 2B**; **3** who accords, consents or agrees with अयं स नो यो नुदवादी (*but* VIŚVA. यो ऽनुवादी) कील इव वृत्रं वि पुरो रुरोज ŚāṅkhāĀ. 12. 2 (44. 11); स्तोत्रानुवादी सुलभो भृत्यः प्रत्यक्षपेशलः RāmC. 9. 87; छन्दानुवर्तिनः पापाद् दुर्नयेष्वनुवादिनः। मन्त्रिणः शत्रवो राज्ञामाज्ञानसुहृदः RāmāMañ. 350. 11; अतिशयशुचि (? च)माप्य यद्वराका असदृशमप्यनुवादिनो भवन्तः कुवचनमपि नो मयात्र गण्यम् PrabhāC. 72. 31; **4** who utters or speaks प्रियवचनशतानुवादिनो हरितनयाः स च जाम्बवान्प्रभुः Rāmā. iv. 1278* (1); **5A** which follows in making sound, i.e. resembles or imitates (in sound quality) तव निःश्वसितानुकारि(v.l. 'वादि') भिर्बकुलैरर्धचितां समं मया। असमाप्य विलासमेखलां किमिदम् ... सुप्यते RaghuVa. 8. 64; त्वदीयगीतं शङ्खनादानुवादि न मधुरम् Pañcā. 271. 11; स एवायं प्रियतमायाः समालापः। ... ध्वनिरपि विपञ्चीपञ्चमस्यानुवादी PrasaRā. 6. 14; **5B** which resounds or echoes वेलासमासन्नशैलरन्ध्रानुनादिना(v.l. 'वादिना)स्वरेणोवाच भगवान् RaghuVa. 10. 35.

अनुवादिन् (anu-vādin) *m.* **1A** one of the four types of note (*svara*) in the gamut, assonant note (*lit.* which is in conformity with or in assonance with sounds) (स्वराः) चतुर्विधत्वमेतेषां विज्ञेयं गानयोक्तृभिः। वादी चैवाथ संवादी विवादी चानुवाद्यपि NāṭyaŚā. 28. 22; SaṃgīMa. i. 1. 26; अपिशब्देनानुवादिनः संवादिधर्मोपजीवनम्। अत एवास्य सर्वपश्चाद्युपादानम् ।... अनुवादिवादिसंवाद्यनुलपनं सहते, न च भूयस्तरोऽस्य प्रयोगः AbhinBhā. iv. 14. 23 (*on* 28. 22); चतुर्विधाः स्वरा वादी ... अनुवादी SaṃgīRa. i. 92. 2 (1. 48); स्याद् विदारी ... द्विधा ... महत्त्वयान्तरा चेति ... अनयोर्वस्तुत्रयासी जात्यंशोंऽऽशोऽल्पके पुनः। अंशे तदनुवादी वा संवादी वांश इष्यते SaṃgīRa. iii. 35. 2 (5. 74); स्वरः। सोऽनुवादीति विज्ञेयः सूक्ष्मदृष्ट्या विचक्षणैः। रक्तिवोल्बेहेतुत्वं यस्मिन् SaṃgīPā. 82; विवादिवादिसंवादिमित्राः स्युरनुवादिनः CaturDa. 3. 151; **1B** one who follows or supports अनुवादी च भृत्यवत् SaṃgīMa. i. 1. 27; SaṃgīRa. i. 95. 1 (1 (3). 5); CaturDa. 3. 155; अनुवादिनस्तु शेषा भृत्याः RāgVi. 1. 38; **2** one who repeats (to explain), i.e. a teacher अतिवीर्यं महाविनायकप्रवरणामनुवादिनां वर ... ते सदृशः ... नैव विद्यते GiMs. iii (1). 11. 9 [DBHS]; **3** the word *anuvādin* सदृक्सदृशसंवादिसजातीयानुवादिनः। ... शब्दाः सादृश्यसूचकाः Kāvyāda. 2. 58.

अनुवादिनी (anuvādinī) *f.* type of a lute (*vīṇā*) विपञ्ची वल्लकी वीणा घोषवत्यनुवादिनी Vaija. 145. 116.

अनुवादीकृ (anuvādī-kṛ-) VIII. P. to make (what is non-restating) as restating अथ मतम् - परिनिष्पन्नविषयाणि खलु प्रत्यक्षादीनि ... प्रमाणमनुवादीकुर्वन्ति Kāśi. i. 68. 2 (*on* 2. 21); (pass.) to be made (what is non-restating) as restating स्मृतेः ... तस्यास्तु मूलभूता श्रुतिरवश्यं कल्पनीया। तत्किमन्यां कांचित्कल्पयित्वा इयमनुवादीक्रियताम् TantrVā. 934. 24 (*on* iii. 4. 12)

अनुवादीभू (anuvādī-bhū-) I. P. to be or to become restating or reiterative श्रूयमाणोऽपि विधिरनुवादीभवति NyāyMañ. i. 267. 25.

अनुवादोपपत्ति (anuvādopapatti) *f.* **1** tenability of a restatement or reiteration अनुवादोपपत्तेश्च (न पुनरुक्तदोषः) NyāySū. ii. 1. 61; **2** tenability of a subject, i.e. counter-positive of a predicate धात्वर्थभावनयोरनुवादः ... प्रकृते विधेयान्तराभावेनानुवादापेक्षाभावात् सत्यपि प्रत्यभिज्ञाने नानुवादोपपत्तिः MīmāKau. iii (2). 147. 12 (*on* ii. 2. 2)

अनुवादोपस्थितस्थान (anuvādopasthita-sthāna) *n.* position (indicating order) obtained, i.e. known through the restatement or reiteration अत्र स्थानापेक्षाविरहेणानुवादोपस्थितस्थानस्य विधिना असंस्पर्शात्तानुवादेन स्थाननियम इति वैषम्यमिति भावः MayūMāli. 155. 22 (*on* ii. 2. 12)

अनुवाद्य (anu-vādya) *adj.* [*f.* -ā] [JaineVyā. 98. 24 (*on* ii. 1. 89); 108. 8 (*on* ii. 2. 59); KātanVr. *on* iv. 2. 20; Dhātu Pra. 1. 1017 (75. 11); SiddhāKau. 483A. 9 (*on* iii. 1. 106)] (also used as noun) **1Ai** what is to be referred to or mentioned अनुवाद्यवाचकयोर्व्यङ्ग्यव्यञ्जकयोश्च ... उभयाश्रिता शक्तिर्दृष्टा NyāyMañ. ii. 65. 22; व्यक्कार इति वाच्यम्। उद्धृतत्वमात्रं चानुवाद्यम् KāvyPra. 305. 1; **1Aii** what is to be uttered अशोकवनिकायोषमहत्त्वमिदमिति नानुवाद्यमपि विद्यते DharmoPra. 2. 7; **1Aiii** fit to be restated or reiterated

यच्च प्राप्तं तदनुवाद्यम् ŚāstrDī. 173.9 (*on* ii. 3. 11); उपादेयमपि कर्म ...। तद्रूपमेव प्रत्यभिज्ञायत इत्यनुवाद्यम् ŚāstrDī. 177.7 (*on* ii.3.13); अनुवाद्यानामर्थानां विधेयार्थपरत्वं तात्पर्यम् Ekāva. 2. 2 (1) (56. 5); न च श्रुतिरनुवादः ... विधानार्थानुवादे चानुवाद्यस्य तात्त्विकत्वनियमात् Nyāyāmṛ. 588A. 8; न गुणफलविधिष्वत्र चान्यत्र व्याप्तिः प्राक् किंचित्क्रत्वपूर्वान्वयमुपगतवानाश्रयोऽत्रानुवाद्यः VidhiRa. 36 (188. 7); परमत्वं व्योम्नि न ... परमेश्वराभिव्यक्तिस्थानत्वप्रयुक्तमिहानुवाद्यम् ŚivārkaMaDī. i. 225. 32 (*on* i. 1. 16); अनुवाद्यापि चास्मिन् वाक्ये यागोत्पत्तिरेव MīmāKau. iii (1). 190. 13 (*on* ii. 2. 12); (निषेधेऽनुपादेयगतत्वेन) अनुपेति। (आत्रेयी) अनुवाद्येत्यर्थः BālamBha. iii. 143. 10 (*on* 3. 251); विधानायानुवाद्यस्य ज्ञानमात्रमपेक्षितम् GuruCandr. i. 479. 11; LaCandr. 429. 35; **1B** fit to be continued or supplied (from the previous context) न हि तत्राग्निहोत्रे पयोदध्यादिविकल्पवत्क्रयानुवादेन वस्त्रादिद्रव्यविकल्पो विधीयते अनुवाद्यस्य क्रयमात्रस्याग्निहोत्रवदन्यत्राविधानात् NyāyMāVi. 113. 26 (*on* iii. 1. 7); **2** fit to be (treated as) subject, i.e. counter-positive of a predicate मिथ्यामहिमत्वं नानुवाद्यमपि तु विधेयम् KāvyPra. 286. 3; वपुर्विरूपाक्षमलक्ष्यजन्मता ... अत्रालक्षितत्वं नानुवाद्यम्, अपि तु विधेयमिति 'अलक्षिता जनिः' इति वाच्यम् Kāvyānu. (He.) 204. 11; विधेयानुवाद्यसमभिव्याहारेण विधेयार्थमनुवाद्यमुपादीयते Ekāva. 3. 1 (34) (89. 10); विधेयस्यार्थस्य प्राधान्यमनुवाद्यस्य पुनरप्राधान्यम् स चायं विधेयानुवाद्ययोः प्रधानोपसर्जनभावो वाक्यात्प्रतीयते न वृत्तेः Ekāva. 6. 1 (5) (152. 1); विरहिण उक्तौ तृतीयपादस्यार्थो नानुवाद्यः SāhiDa. 420. 5; अतिशयोक्तावभेदोऽनुवाद्य एव न विधेयः इति प्राचामुक्तिः संगच्छते RasGaṅ. 415. 7; संबोध्यतावच्छेदकरूपेण संबोध्यस्य सिद्धिं विना तत्त्वासंभवादनुवाद्ये एवैषा विभक्तिः LaŚabdeŚe. i. 432. 2; अनुवाद्यस्य विधेयसाकाङ्क्षत्वाद्विधेयस्य च क्रियारूपत्वात् क्रियान्वयोऽर्थायातः VaiyāBhū. 64. 20 (*on* 16); **3** what is to be referred to, i.e. suggested (as secondary), cf. **अनुवाद्यता 3.**

अनुवाद्य (anu-vādya) *n.* type of (concordant) music (produced by striking on *paṇava*) (*lit.* which is followed in playing) अतिवादितमनुवाद्यं समवादितमुच्यते पणववाद्यम् NāṭyaŚā. 34. 67; cf. **अनुवादित.**

अनुवाद्यगतत्व (anuvādyagata-tva) *n.* **1** the state of belonging to what is to be restated or reiterated 'च इष्ट्वे'ति वाक्येनावगतमपि तत्तद्विकृतिप्रयोगसाहित्यमनुवाद्यगतत्वादविवक्षितम् MīmāKau. iii (2). 171. 19 (*on* ii. 2. 3); यागत्वैकपक्षे तु श्रूयमाणस्याप्यग्नीषोमपदस्यानुवाद्यगतत्वेनाविवक्षितत्वात् MīmāKau. iii (2). 190. 5 (*on* ii. 2. 12); **2** the state of belonging to what is to be (treated as) subject, i.e. counter-positive of a predicate (यज्ञं तनिष्यन्तौ) इति तत्रत्यमेकवचनमप्यनुवाद्यगतत्वात् ... अविवक्षितम् BhāṭṭDī. iii. 59. 24 (*on* ix. 1. 7)

अनुवाद्यता (anuvādya-tā) *f.* **1A** the state of being what is to be restated or reiterated यच्छब्दयोगेनानुवाद्यतया प्रतीयमानस्यापि हिरण्यगर्भजनयितृत्वस्य 'नारायणाद् ब्रह्माजायत' इति न पुरोवादः ŚivārkaMaDī. i. 329. 21 (*on* i. 2. 8); **1B** the state of being what is to be referred to or expressed, cf. **अनुवाद्यताप्रतीति; 2** the state of being what is to be (treated or stated as) the subject, i.e. counter-positive of a predicate किंच (साम्यम्) वाच्यमित्यत्र विधेयतया वाच्यतोच्यते अनुवाद्यतया वा CitraMī. 12. 26; AlaṅkāKau. (Vi.) 20. 9; **3** the state of being what is to be referred to, i.e. suggested as secondary अनुवाद्यतया शशिकिशोरतादात्म्यम् ... (बकेषु) उत्प्रेक्ष्यते RasGaṅ. 379. 13.

अनुवाद्यताप्रतीति (anuvādyatā-pratīti) *f.* cognition of the state of being what is to be referred to or expressed परमत्वं व्योम्नि न परमेश्वराभिव्यक्तिस्थानत्वप्रयुक्तमिहानुवाद्यम् ... ततोऽन्यस्य व्योम्नि परमत्वस्य परमेश्वरस्यानार्हताप्रयोजकस्यानुवाद्यताप्रतीतेः ŚivārkaMaDī. i. 225. 33 (*on* i. 1. 16)

अनुवाद्यतावच्छेदकता (anuvādyatāvacchedaka-tā) *f.* the state of being the delimitor of what is to be (treated as) a subject, i.e. counter-positve of a predicate त्रपायाः ... न प्राधान्येन व्यङ्ग्यत्वम्। अनुवाद्यतावच्छेदकतया प्रतीतायां तस्यां मुख्यवाक्यार्थत्वायोगात् RasGaṅ. 13. 4.

अनुवाद्यतावच्छेदकत्व (anuvādyatāvacchedaka-tva) *n.* the state of being the delimitor of what is to be (treated as) a subject, i.e. counter-positive of a predicate न च दरमीलन्नयनत्वविशिष्टनिरीक्षणं विधेयमिति नानुवाद्यतावच्छेदकत्वं तस्याः (त्रपायाः) इति वाच्यम् RasGaṅ. 13. 5.

अनुवाद्यत्व (anuvādya-tva) *n.* **1A** the state of being what is fit to be restated or reiterated नानात्वस्य प्रमाणान्तरसिद्धतयानुवाद्यत्वात् Bhām. 557. 12 (*on* iii. 2. 11); अविवक्षाहेतोरनुवाद्यत्वस्याप्यभावात् AdvaiSi. 511. 7; जुहोतीति ... वाक्ये ... कृत्स्नस्यापि होमस्यानुवाद्यत्वात् ŚivārkaMaDī. ii. 423. 31 (*on* iv. 1. 1); नाविज्ञातविशेषणं अक्रीतराजकपदम्। निषेध्यस्य निषेधाधिकारेऽनुवाद्यत्वेन तद्विशेषणविवक्षायोगात् MīmāKau. i. 24. 16 (*on* i. 3. 4); विप्रतिपत्तौ परदाराभिशापादिविषयायाम् ... परेति विशेषणमविवक्षितम्। अभिशापस्यानुवाद्यत्वात् BālamBha. ii. 105. 1 (*on* 2. 96); **1B** the state of being what is fit to be repeated (for poetic purposes) कथितपदं क्वचिद् गुणः लाटानुप्रासे अर्थान्तरसंक्रमितवाच्ये ... विहितस्यानुवाद्यत्वे च KāvyPra. 429. 4; Kāvyānu. (He.) 172. 15; गुणः स्यात् ... कथितं च पदं पुनः। विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि ... लाटानुप्रासे SāhiDa. 433. 9; **2A** the state of being what is to be (treated as) the subject, i.e. counter-positive of a predicate (पुत्रिणी पुत्रवती) एकस्यैव विधेयत्वानुवाद्यत्वे ... युगपदेक एव स्याताम् CaturCin. iii (1). 98. 14; बहुवचनं विहितमिति। ततश्च तस्य विधेयविभक्तिनिर्दिष्टस्यापि प्राप्तत्वाद् अनुवाद्यत्वं न तु विधेयत्वमिति भावः PadMañ. *on* KāśiVṛ. *on* P. i. 4. 21 (525. 16); अमितं यशस्तव अत्रामितमिति ... निषेधः ... विधेयत्वेनाभिधित्सितः। मानं पुनरनुवाद्यत्वेन Ekāva. 6. 1 (40) (155. 1); एकत्रैव विधेयत्वमनुवाद्यत्वं चेति विरोधः ŚatDū. 59. 1; उद्देश्यत्वम्, अनुवाद्यत्वम्, मुख्यत्वं चेत्यपरं त्रिकम् NyāyMāVi. 48. 2 (*on* i. 4. 6); तत्र व्रीहीणामन्यार्थत्वसिद्धत्वज्ञातत्वलक्षणानि गुणत्वोद्देश्यत्वानुवाद्यत्वानि तावद्विद्यन्ते VivaPraSaṁ. 151. 13; अध्ययनेन स्वाध्यायं भावयेत् ... स्वाध्यायस्वाध्ययनं प्रत्युद्देश्यत्वानुवाद्यत्वप्रधानत्वानि स्युः YuktiSneha. 12. 8 (*on* i. 1. 1); यागस्याज्ञातज्ञाप्यत्वरूपे विधेयत्वानुवाद्यत्वे GuruCandr. i. 315. 24; विधेयत्वानुवाद्यत्वाभ्यां शब्देनानिवेदिताभ्यां विषयताभ्यां विशिष्टस्य धर्मस्य यदि नास्ति साधारण्यं मास्तु नाम RasGaṅ. 259. 6; सुन्दरत्वस्योपमानेऽनुवाद्यत्वे RasGaṅ. 259. 10; गुणत्वप्रधानत्वविधेयत्वानुवाद्यत्वोपादानत्वोद्देश्यत्वकृतमपि वैरूप्यं वारयितुं तदापत्तिः VaiyāBhū. 36. 17 (*on* 7); (प्रथमा) सेति विधेयसमर्पिकाया अनुवाद्यत्वाय स्पष्टार्थमित्याहुः LaŚabdeŚe. i. 337. 4; **2B** the state of being what is to be expressed or mentioned (सह सुपा) अनुवाद्यत्वादेकत्वविवक्षैव LaŚabdeŚe. i. 525. 27; **2C** the state of being what is to be repeated, i.e. subordinate नापि 'त्रासौत्सुक्ययोः ... संधिप्रधानम्, तस्य नायिकागतत्वेनानुवाद्यत्वात् RasGaṅ. 209. 12; दुःखस्योत्प्रेक्षणेऽपि न तदुत्प्रेक्षया व्यपदेशो न्याय्यः, तस्या अङ्गत्वेनानुवाद्यत्वात् RasGaṅ. 404. 7 [the state of requiring to be explained by an *anuvāda*, MW.]

अनुवाद्यत्वप्रतीतिकृत् (anuvādyatvapratīti-kṛt) *adj.* causing the knowledge of the state of being what is to be (treated as) the subject, i.e. counter-positive of a predicate स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः अत्र वृथात्वं विधेयम्, तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत् SāhiDa. 386. 1; आनन्दयति ते नेत्रे योऽसौ सुभ्रु समागतः। इत्यादिषु ... इदमेतददःशब्दा विधेया एव भवितुं युक्ताः। अत्र तु यच्छब्दनिकटस्थतया अनुवाद्यत्वप्रतीतिकृत् SāhiDa. 392. 3.

अनुवाद्यत्वविधेयत्वधर्म (anuvādyatvavidheyatva-dharma) *m.* property of being what is to be (treated as) the subject and that of being the predicate अनुवाद्यत्वविधेयत्वधर्मौ तु शब्दोपाधिकौ NyāyMāVi. 48. 7 (*on* i. 4. 6)

अनुवाद्यत्वानुपपत्ति (anuvādyatvānupapatti) *f.* untenability of the state of being what is to be restated or reiterated 'अस्मिन् ज्योतिर्मण्डले कश्चन्द्र' इति प्रश्नसमये प्रत्यक्षेणेव अन्यदापि प्रकारान्तरेणैव तस्य ज्ञातत्वात्, अन्यथा तस्यानुवाद्यत्वानुपपत्तेः AdvaiSi. 685. 10.

अनुवाद्यत्वायोग (anuvādyatvāyoga) *m.* untenability of the state of being what is to be restated or reiterated विधिविषयविशिष्टान्तर्गतस्य विधेयसंदष्टस्य दध्नः...अनुवाद्यत्वायोगात् VidhiRa. 40. (? 41) (206. 11)

अनुवाद्यत्वासंभव (anuvādyatvāsaṁbhava) *m.* impossibility of the state of being what is to be (treated as) the subject, i.e. counter-positive of a predicate एकस्मिन् उक्तवाक्ये एकहायन्या विधेयत्वेनानुवाद्यत्वासंभवात् LaCandr. 698. 15.

अनुवाद्यत्वोक्ति (anuvādyatvokti) *f.* statement of the state of being what is to be restated or reiterated पूर्ववाक्ये ... देशकालयोः कर्मणोऽनुवाद्यत्वोक्तिः कर्मस्वरूपाभिप्राया MayūMāli. 177. 21 (*on* ii. 3. 13)

अनुवाद्यनिर्देश (anuvādya-nirdeśa) *m.* indication of what is to be (treated as) the subject, i.e. counter-positive of a predicate व्युत्पत्तिवर्जिता रूढाः शब्दा आखण्डलादयः ... शब्दा इत्यनुवाद्यनिर्देशः, रूढा इति विधेयपदम् KāvyKaVṛ. 28. 29 (2. 1)

अनुवाद्यभाग (anuvādya-bhāga) *m.* part or portion of what is to be (treated as) the subject, i.e. counter-positive of a predicate अनुवाद्यभागस्य

विधान्तरेणाप्यर्थोत्प्रेक्षणसंभवेनाव्यवस्थितार्थत्वात् ŚivārkaMaDī. i. 330. 26 (*on* i. 2. 8)

अनुवाद्यमात्र (anuvādya-mātra) *n*. what is to be (treated as) the subject, i.e. counter-positive of the predicate only रोमाञ्चनकञ्चुकं तनोस्तनोति योऽसौ सुभगे तवागतः। अत्र योऽसाविति पदद्वयमनुवाद्यमात्रप्रतीतिकृत् KāvyPra. 307. 1(comm. उद्देश्यमात्रेत्यर्थः); योऽसाविति पदद्वयमनुवाद्यविधेयार्थतया विवक्षित-मनुवाद्यमात्रप्रतीतिकृत् इति यदः प्रयोगोऽनुपपन्नः Kāvyānu. (He.) 207. 8.

अनुवाद्ययागगत (anuvādyayāga-gata) *adj*. belonging to the sacrifice which is to be (treated as) the subject, i.e. counter-positive of a predicate फलवाक्ये फलसंबन्धोऽनुवाद्ययागगतसाहित्यविवक्षितत्वात् प्रत्येकमेव विज्ञायते BhāṭṭDī. iv. 131. 6 (*on* xi. 1. 1)

अनुवाद्यविधेयभाव (anuvādyavidheya-bhāva) *m*. [Inst.] by the relation of what is to being (treated as) the subject and predicate सः ... मुक्तोऽभूदिति वाक्यार्थकलापः ... अनुवाद्यविधेयभावेनैकवाक्यार्थीकृतः RasGaṅ. 77. 11.

अनुवाद्यविधेयसंसर्ग (anuvādyavidheya-saṁsarga) *m*. semantic relation between what is to be (treated as) the subject and the predicate अनुवाद्यस्यासत्त्वे ... अनुवाद्यविधेयसंसर्गरूपवाक्यार्थो बाधितः स्यात् Nyāyāmṛ. 163A. 1; AdvaiSi. 429. 9.

अनुवाद्यविधेयांश (anuvādyavidheyāṁśa) *m*. parts or aspects such as what is to be (treated as) the subject and the predicate अनुवाद्यविधेयांशावुक्तौ स्यातां विपर्ययेण यदा। अविमृष्टविधेयांशो भवति तदानीं तु वाक्यगतः Ekāva. 6. 2 (159. 8)

अनुवाद्यविधेयार्थता (anuvādyavidheyārtha-tā) *f*. the state of having a reference to what is to be (treated as) the subject and the predicate योऽसाविति पदद्वयमनुवाद्यविधेयार्थतया विवक्षितम् Kāvyānu. (He.) 207. 8.

अनुवाद्यविधेयार्थत्व (anuvādyavidheyārtha-tva) *n*. the state of having a reference to what is to be (treated as) the subject and the predicate यत्तदोरेकतरनिर्देशेनोपक्रमस्तत्र तत्प्रत्यवमर्शिना तदितरेणोपसंहारो न्याय्यः तयोरप्यनुवाद्यविधेयार्थत्वेनेष्टत्वात् VyaktiVi. 40. 2; (यत्तदोः) तयोरनुवाद्यविधेया-र्थत्वेनाभिधातुमभिमतयोः परस्परसव्यपेक्षत्वेन संबन्धस्य नित्यत्वात् Ekāva. 6. 2 (24) (161. 1)

अनुवाद्यविधेयोभयांश (anuvādyavidheyobhayāṁśa) *m*. both the parts or aspects such as what is to be (treated as) the subject and the predicate सामान्यार्थसमर्थकस्य विशेषवाक्यार्थस्य द्वयी गतिः। अनुवाद्यांशमात्रे विशेषत्वं विधेयांशस्तु सामान्यगत एवेत्येका। अनुवाद्यविधेयोभयांशेऽपि विशेषत्वमित्यपरा RasGaṅ. 636. 11.

अनुवाद्यविभेदता (anuvādyavibheda-tā) *f*. difference from what is to be referred to, i.e. implied व्यवहृतिविषयादसत्यभेदादियमनुवाद्यविभेदतोपपन्ना NayaMañ. I. iv. 6. 12.

अनुवाद्यविशेषणत्व (anuvādyaviśeṣaṇa-tva) *n*. **1** the state of being the qualifier of what is to be (treated as) the subject. i.e. counter-positive of a predicate वस्तुतस्तु पितामहपदमविवक्षितम्। अन्यथा प्रपितामहाद्युपात्ते सदृशस्वाम्याभावप्रसक्तेः। अनुवाद्यविशेषणत्वाच्च VyavaMa. 90. 4; **2** the state of being the qualifier of what is to be repeated, i.e. supplied अस्य स्यावित्यादावनुवाद्यविशेषणत्वान्न व्यक्तिर्विवक्ष्यते VaiyāBhū. 231. 3 (*on* 57)

अनुवाद्यविषयत्व (anuvādyaviṣaya-tva) *n*. the state of referring to what is to be (treated as) the subject, i.e. counter-positive of predicate संबोधनविभक्तेरनुवाद्यविषयत्वादनुवाद्यस्य विधेयसाकाङ्क्षत्वाद्विधेयस्य च क्रियारूपत्वात् क्रियान्वयोऽर्थायातः VaiyāBhū. 64. 19 (*on* 16)

अनुवाद्यसमर्पकता (anuvādyasamarpaka-tā) *f*. the state of being that which presents or furnishes what is to be (treated as) the subject, i.e. counter-positive of predicate यत्किंचेति वाक्यस्यानुवाद्यसमर्पकतया तेनोपांश्विति विध्येकवाक्यता MayūMāli. 146. 2 (*on* ii. 2. 9)

अनुवाद्यसमर्पकशास्त्र (anuvādyasamarpaka-śāstra) *n*. scripture which presents, i.e. furnishes what is to be (treated as) the subject, i.e. counter-positive of predicate अनुवाद्यसमर्पकशास्त्रप्रवृत्त्यनन्तरं विधेयसमर्पकशास्त्रप्रवृत्तिः इष्यते ŚivārkaMaDī. ii. 423. 30 (*on* iv. 1. 1)

अनुवाद्यस्वरूप (anuvādya-svarūpa) *adj*. whose form or nature is to be referred to, i.e. described कैलासशिखरभूषण...अथर्वशिखानुवाद्यस्वरूप...विजयी भव NīlaVi. 105. 15.

अनुवाद्यस्वार्थपरता (anuvādyasvārthapara-tā) *f*. the state of being what is meant to refer to one's own meaning which is to be restated or reiterated विद्वद्वाक्ये समुदायद्वित्वापादनरूपप्रयोजनवत्त्वेनानुवाद्यस्वार्थपरताया दृष्टत्वात् AdvaiSi. 428. 14.

अनुवाद्यस्वार्थपरत्व (anuvādyasvārthapara-tva) *n*. the state of being what is meant to refer to one's own meaning which is to be restated or reiterated विद्वद्वाक्यस्य ... अनुवाद्यस्वार्थपरत्वाद्वाक्यैकवाक्यतोक्ता Nyāyāmṛ. 162A. 7.

अनुवाद्यांश (anuvādyāṁśa) *m*. part or aspect of what is to be (treated as) the suject, i.e. counter-positive of a predicate अनुवाद्यांशे विशेषणतया यत्रानेकेषां विधानं तत्र तेषां विधेयता भिन्नैवेति वाक्यभेदः VyutpaVā. 149.14.

अनुवाद्यांशमात्र (anuvādyāṁśa-mātra) *n*. mere part or aspect of what is to be (treated as) the subject सामान्यार्थसमर्थकस्य विशेषवाक्यार्थस्य द्वयी गतिः। अनुवाद्यांशमात्रे विशेषत्वम्, विधेयांशस्तु सामान्यगत एवेत्येका RasGaṅ. 636. 11.

अनुवाद्यार्धधातुकविशेषण (anuvādyārdhadhātuka-viśeṣaṇa) *n*. qualifier of the *ārdhadhātuka*-affix that is to be (treated as) the subject आर्धधातुकस्येड् वलादेरित्यादावनुवाद्यार्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वात् VaiyāBhū. 229. 6 (*on* 55)

अनुवाद्यावच्छेदकत्व (anuvādyāvacchedaka-tva) *n*. the state of being what delimits that which is to be restated अधिकाराख्यप्रकरणस्यानुवाद्यावच्छेदक-त्वेऽपि ... स्वशाखागतत्वस्योद्देश्यतावच्छेदकत्वानुपपत्तेः MīmāKau. ii. 127. 4 (*on* ii. 4. 25)

अनुवाद्यासत्त्व (anuvādyāsattva) *n*. absence of what is to be (treated as) the subject, i.e. counter-positive of a predicate अनुवाद्यासत्त्वे तन्निष्ठो विधेयसंसर्गोऽप्यसन् स्यात् GuruCandr. i. 479. 18.

अनुवारक (anu-vāraka) *m*. [enumerated in *mahiṣyādigaṇa*] one who obstructs or prohibits महिष्यादय। ... अनुचारक (अनुवारक) GaṇPā. 179. 9, cf. **अनुचारक**.

अनुवारम् (anuvāram) *adv*. time and again, again and again, repeatedly, often त्वरितमुपैति न कथमभिसारम्। हरिरिति वदति सखीमनुवारम् GītGo. vi. 12.5; नालोकयमर्पितमुरुहारम्। प्रणमन्तं च दयितमनुवारम् StavMā. 278.19; अनुवारमवाप्तवारिकेलेरसिताया मुरशासनस्य मूर्तेः। ... किमु नीलिमातिरेकः YātrāPra. 7.44; विश्वेशः ... त्रिगुणसचिवतां योऽवलम्ब्यानुवारं विश्वध्रीचीनसृष्टि-स्थितिविलयमजः स्वेच्छया निर्मिमीते MahāN. 1. 1; सविनयमनुवारं वच्मि कृत्वा विचारम् ŚṛṅgāŚ. (Na.) 70.

अनुवार्त्तिक (anu-vārttika) *n*. secondary or supplementary rule निपात-नाद्योगविभागदर्शनाद् गुरूपदेशादनुवार्त्तिकादपि। ... प्रसाधयेल्लक्षणतश्च षड्विधम् ViṣṇuDhaP. iii. 5. 30.

अनुवार्धितटम् (anuvārdhitaṭam) *adv*. on or along the sea-shore अनुवार्धितटं कर्षन्नलक्ष्म्यां स्वामनीकिनीम्। आज्ञालतां नृपाद्रीणां मूर्ध्नि रोपयति स्म सः MahāP. 29. 10.

अनुवार्षिक (anu-vārṣika) *adj*. taking place each and every year, annual व्रतमेतद्विधेयं तु स्त्रीपुंसामनुवार्षिकम् BṛDharmaP. i. 23. 62.

अनुवाश् (anu-vāś-) I. Ā. to cry, to roar or shriek after in response शकुनसमयेऽथवान्ये हस्त्यश्वश्वादयोऽनुवाशन्ते BṛSaṁ. 53 .107; वामे वाशित्वादौ दक्षिणपार्श्वेऽनुवाशते यातुः (काकः) BṛSaṁ. 95. 26.

अनुवाशित (anu-vāśita) *adj*. cried, roared or shrieked after in response विदिक्स्थः शकुनो दीप्तो वामस्थेनानुवाशितः BṛSaṁ. 86. 70.

अनुवाश्यमान (anu-vāśyamāna) *adj*. being cried, roared or shrieked after in response ते (वन्यमृगाः) ग्राम्यसत्त्वैरनुवाश्यमाना भयाय रोधाय भवन्ति वन्यैः BṛSaṁ. 91. 2.

अनुवास् (anu-vās-) X. U. **1** to perfume, to scent सुगन्धवातो दशयोजनं समन्तादनुवासयति BhāgP. v. 16. 18; v. 16. 23; यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति BhāgP. v. 20. 24; **2** to fumigate, cf. **अनुवासित1**; **3** to permeate, cf. **अनुवासित 3** [to administer an oily enema, to treat by using such enema, Apte]

अनुवास (anu-vāsa) *m*. **1A** act of giving or administering of an oily enema तं भिषक् ...। बस्त्यभ्यङ्गानुवासैश्चोपचरेत् CaraS. vi. 13. 67 (1941 Ed.); अनुवाना(सा)त्र सिद्धेश्च(द्विश्चे)त्संशोध्यास्थापयेन्नरम् BhelaS. 248. 19 (8. 4); [illegible] अनुवासस्तु केवलः AśvaVai. 32. 18; अनुवासं निरूहं वा ...। प्रमाणमुपचारं वा ये न जानन्त्यबुद्धयः Hastyāyur. 39. 3 (1. 4)]

1B oily enema गुदामयं बस्तिरुजं शमनं बस्तिरूहकम्। आस्थापनानुवासं तु अगदं नाम एव च HārīS. i. 2. 16; पिष्ट्वा तैलं द्विगुणपयसा पाचितं चानुवासे चाभ्यङ्गे वा हितमपि गुदव्याधिनिर्णाशहेतोः HārīS. iii. 11. 66; बस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परम् ŚārṅgaS. iii. 5.1; BhāvPra. (Bhā.) 7. 82; यस्मादनुवसत्यत्र जीर्णे चापि निरस्यति। अनुवास इति ख्यातिं लभते Hastyāyur. 596. 5 (4. 5); अनुवासो निरूहस्तु तथैवोत्तरबस्तिकः। त्रिविधो वक्ष्यते बस्तिः Hastyāyur. 596. 11 (4. 5); अनुवासे च तत्सर्वं वर्गं समधु योजयेत् Hastyāyur. 605. 21 (4. 5); KośaKaTa. 1. 7427; **2** one of the four types of snuff अवपीडानुवासाश्च धूमाः प्रधमनानि च। चतुर्विधं नस्यमाहुः BhelaS. 244. 20 (8.2); **3** perfume, scent मुद्रां तु सुरभिं कृत्वा देवायैतन्निवेदयेत्। अनुवासं ततो दद्याद्दर्पणं च ततः परम् AhirbuS. 28. 68 [perfuming (especially the clothes), MW.; perfuming clothes by dipping the ends, Apte]

अनुवासन (anu-vāsana) *n.* [enumerated in the *anupravacanādigaṇa*, GaṇPā. 7. 7; JaineVyā. 233. 7 (*on* iii. 4. 104); KāśiVṛ. *on* v. 1. 111; also enumerated in *utthāpanādigaṇa*, CāndrVṛ. *on* iv. 1. 132; GaṇRa. 6. 366 (397); AltGr. 1. 59; Debru. 209] **1A** a type of oily enema उत्तमाश्चस्य ... स्नेहप्रस्थोऽनुवासनम् ArthŚā. i. 323. 3 (2. 30); संकल्प्यमनुवासनम्। मारुतघ्नम् CaraS. i. 2. 12 (1922 Ed.); i. 16. 24; अनुवासनं तं स्नेह एव CaraS. iii. 8. 150 (1941 Ed.); रूक्षबद्धपुरीषाय प्रदद्यादनुवासनम् CaraS. vi. 3. 173 (1941 Ed.); तीक्ष्णतरो बस्तिर्हितं चाप्यनुवासनम् SuśruS. iv. 36. 35; सर्पिर्मधुरकैः सिद्धं तैलं चाप्यनुवासनम् SuśruS. iv. 36. 41; iv. 37. 25; iv. 37. 90; vi. 26. 17; SiddhYo. 75. 37; (पित्तज्वरे) दापयेत्। ज्वरदाहार्हे तेषु सिद्धं चैवानुवासनम् SuśruS. vi. 39. 312; KāśyaS. 291A. 35; अनुवासनं यथार्होषधसिद्धः स्नेहनार्थे स्नेहः AṣṭāSaṁ. i. 145. 4 (1. 28); असावनुवसन्नपि न दूष्यत्यनुवासरमपि वा दीयत इत्यनुवासनम् AṣṭāSaṁ. i. 145. 10 (1. 28); शस्तश्च नवमे मासि स्निग्धो मांसरसौदनः। बहुस्नेहा यवागूर्वा पूर्वोक्तं चानुवासनम् AṣṭāHṛ. ii. 1. 67; iv. 1. 117; वायौ पित्तावृत्ते ... योजयेत् ...। कालेऽनुवासनम् ... तैलं मधुरौषधसाधितम् AṣṭāHṛ. iv. 22. 55; अनुवासनं प्रकटितं पुराणैः पुरा KalyāKā. 8. 46; 8. 61; HārīS. i. 3. 18; तैलम् ...। अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम् SiddhYo. 5. 65; (रास्नाद्यं घृतमाह) सिद्धं तद्दशभिः कल्कैर्नस्यपानानुवासनैः। सर्वेषु वातरोगेषु यथावस्थं प्रयोजयेत् SiddhYo. 11. 44; सुराकाञ्जिकगोमूत्रैः प्रयुञ्जीतानुवासनम् AśvaVai. 43. 11; 40. 28; 54. 2; बस्तिर्यः स्नेहैर्दीयते स स्यादनुवासननामकः ŚārṅgaS. iii. 5. 2; पडङ्गं प्रतिपाने च मेदकेष्वेतदेव च। एतदेव प्रमाणं तु नागानामनुवासने Hastyāyur. 24. 25 (1. 2); मरीचानां निर्यूहे ... तैलं विपाच्य विधिवदनुवासनं विदध्यात् Hastyāyur. 59. 26 (1. 9); 63. 16 (1. 9); बस्तिर्द्विधा ... । यः स्नेहो दीयते स स्यादनुवासननामकः BhāvPra. (Bhā.) 7. 82; 7. 84; **1B** act of giving or administering of oily enema लवणानि .... आलेपनार्थे युज्यन्ते स्नेहस्वेदविधौ तथा। अधोभागोर्ध्वभागेषु निरूहेष्वनुवासने CaraS. i. 1. 90; i. 15. 7; अभ्यङ्गोत्सादनैः स्नानैर्निरूहैः सानुवासनैः। तथा स लभते शर्म युज्यते चायुषा चिरम् CaraS. i. 16. 23; i. 18. 5 (1922 Ed.); i. 20. 15 (1922 Ed.); ii. 7. 8 (1941 Ed.); विमुक्तामप्रदोषस्य पुनः परिपक्वदोषस्य दीप्ते चाग्नावभ्यङ्गास्थापनानुवासनं विधिवत् CaraS. iii. 2. 13 (1941 Ed.); असाध्यता विकाराणां स्यात् ... अनुवासनात्। असाध्यत्वेऽपि भूयिष्ठं गात्राणां सदनं भवेत् SuśruS. iv. 35. 23; iv. 37. 40; प्रवाहिका भवेत्तीक्ष्णान्निरूहात्। सानुवासनात् SuśruS. iv. 36. 42; लङ्घनं वमनं चैव विरेकश्चानुवासनम्। निरूहो बस्तिकर्माणि परिणामे त्रिदोषजे HārīS. iii. 7. 60; स्नेहस्वेदवमनविरेचनास्थापनानुवासनैः क्रमश उपचरेन्मधुरौषधसिद्धाभ्यां क्षीरघृतपुष्टं पुरुषम् KāśyaS. 79A. 33; ViṣṇuDhaP. ii. 49. 18; पुनः पुनश्च स्नेहपाननिरूहानुवासनानि कफपित्तानुरक्षिणा प्रयोज्यानि AṣṭāSaṁ. ii. 90. 16 (4. 18); दीपनैः पाचनैः सिद्धाः स्नेहाश्चानेकयोनयः। विशेषान्मेध्यपिशितरसतैलानुवासनम् AṣṭāHṛ. i. 13.3; iv. 8. 89; iv. 9. 97; (अश्वगन्धादितैलम्) षण्ढानपि वृषान् कुर्यात् पानाभ्यङ्गानुवासनैः SiddhYo. 22. 118; 75. 11; 76. 14; आयत्तं कुञ्जरैश्चैव विजयं पृथिवीक्षिताम्। पाकलेषु च सर्वेषु कर्तव्यमनुवासनम् AgniP. 286. 6; विधिं क्षाराग्निशस्त्राणां शिरावेधविधिं तथा। निरूहे च विधिं चैवानुवासने (कथयामि) AśvaVai. 1. 8; (गजस्य) अस्याभ्यञ्जनं कुर्यान्नस्यकर्मानुवासनम् Hastyāyur. 246. 22 (2. 39); 265. 25 (2. 49); 386. 25 (3. 5); JñātāDhaT. 183B. 3; मूले निषिक्तो हि यथा द्रुमः स्यात् नालच्छदः कोमलपल्लवाग्रः। काले महत्पुष्पफलप्रदश्च तथा नरः स्यादनुवासनेन MadaPāNi. 83. 78; **1C** enema (in general) अनुवासनसंज्ञौ तु निरूहास्थापने स्मृतौ AśvaVai. 12. 75; विष्टब्धानिलविण्मूत्रः स्नेहहीनेऽनुवासने। दाहक्लमप्रवाहार्तिकरश्चात्यनुवासने SiddhYo. 75. 30; **2** fragrant incense or substance (देयम्) द्वादश्यां सुरभिर्धूपः परया मधुपर्ककः। प्राशनं तु चतुर्दश्यां पञ्चदश्यामनुवासनम् LakṣmīT. 36. 103; सकर्पूरं च ताम्बूलं प्रदेयमनुवासनम् LakṣmīT. 39. 31; **3** name of a chemical process (for the refinement of mercury) एतत् साधकान्यूनविंशतिकर्माणि भवन्ति। स्वेदन° ... °अनुवासन° ...°भक्षणानि RaseCin. 3. 2 (12. 22); अथ अनुवासनम्। दीपितं रसराजं तु जम्बीररससंयुतम्। दिनैकं धारयेत् घर्मे मृत्पात्रे वा शिलोद्भवे RaseCin. 3. 13 (17. 18); **4** artisans' workshop कारुणां कर्मशालानुवासनम् ŚabdaRa. (Su.) 4. 40 [Kośas give *anuvāsana* in the sense of following words- *snehana*, AnekāSaṁ. 5. 24; *snehakarman*, ViśvaPra. 102. 207; DharK. 1556; ViśvaLoK. 223. 228; *snehabasti*, MediK. 105. 231; ŚabdaRaSaK. 208. 2; ApūNā. 31A. 3; *ghṛtādibasti*, KośaKaTa. 2. 6747; *dhūpana*, AnekāSaṁ. 5. 24; ViśvaPra. 102. 207; DharK. 1556; MediK. 105. 231; ViśvaLoK. 223. 228; ŚabdaRaSaK. 208. 2; *sudhūpana* KośaKaTa. 2. 6747 and they give *anvāsana* as a synonym of following words : *anvāsana*, ŚabdaBhePra. (Ma.) 1. 82; KośaKaTa. 1. 7427; *anuāsa*, KośaKaTa. 1. 7427. [perfumingespecially the clothes, MW.; perfuming clothes by dipping the ends, Apte]

अनुवासन (anu-vāsana) *m.* oily enema अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः SuśruS. iv. 35. 18; iv. 36. 42; विरेचनात् सप्तरात्रे गते जातबलाय वै। कृतान्नायानुवास्याय सम्यग्देयोऽनुवासनः SuśruS. iv. 37. 3; SiddhYo. 73. 1; रूक्षस्य बहुवातस्य द्वौ त्रीनप्यनुवासनान्। दत्त्वा स्निग्धतनुं ज्ञात्वा ततः पश्चान्निरूहयेत् SuśruS. iv. 37. 44; SiddhYo. 75. 24; यस्यानुवासनो दत्तः सकृदन्वक्षमाव्रजेत् SuśruS. iv. 37. 64; SiddhYo. 75. 15; विष्टब्धानिलविण्मूत्रः स्नेहहीनेऽनुवासने। दाहक्लमप्रवाहार्तिकरश्चात्यनुवासनः SuśruS. iv. 37. 66 [the operation itself (of enema), a syringe, clyster-pipe, Apte]

अनुवासनकाल (anuvāsana-kāla) *m.* time for the treatment or administering of an oily enema अनुवासयेच्चैनमनुवासनकाले CaraS. iii. 7. 24 (1941 Ed.); (योनिम्) ततश्चैनामनुवासनकालेऽनुवासयेत् AṣṭāSaṁ. i. 211. 16 (2. 3)

अनुवासनतैल (anuvāsana-taila) *n.* oil for administering of enema नवमे तु तत एवानुवासनतैलात् पिचुं योनौ प्रणयेत् । गर्भमार्गाशययोः स्नेहनार्थम् AṣṭāSaṁ. i. 208. 21 (2. 3)

अनुवासनद्रव्य (anuvāsana-dravya) *n.* substance used in an oily enema अनुवासनद्रव्याण्यनुव्याख्यास्यामः CaraS. iii. 8. 150 (1941 Ed.); पिप्पल्यादिभिर्वानुवासनद्रव्यैः। एभिर्हि प्रदिग्धान्यर्शांसि ... प्रशाम्यन्ति AṣṭāSaṁ. ii. 57. 16 (4. 10)

अनुवासनभेद (anuvāsana-bheda) *m.* type of an oily enema अनुवासनभेदश्च मात्राबस्तिरुदीरितः ŚārṅgaS. iii. 5. 4; BhāvPra. (Bhā.) 75. 84.

अनुवासनमात्रा (anuvāsana-mātrā) *f.* measure or dosage of an oily enema आस्थापनं तु वक्ष्यामि ...। अनुवासनमात्राया द्विगुणा तस्य शस्यते Hastyāyur. 601. 2 (4. 5)

अनुवासनवत् (anuvāsana-vat) *adv.* like the treatment or administering of an oily enema वस्त्रस्य धावनमिव ...। आस्थापनं नृणां तद्वत् ...। अनुवासनवच्चास्य विधिः सर्वः प्रशस्यते KāśyaS. 149A. 11; उत्तरबस्तिरपि स्नेहेनेऽनुवासनवच्छोधने निरूहवदपि च केचिदाहुः AṣṭāSaṁ. i. 145. 11 (1. 28)

अनुवासनविधि (anuvāsana-vidhi) *m.* procedure or method of administering of an oily enema अथानुवासनविधिस्तथैवास्थापनस्य च। प्रवक्ष्यामि यथायोगं शास्त्रदृष्टेन वर्त्मना AśvaVai. 16. 1.

अनुवासनशतोपयोग (anuvāsanaśatopayoga) *m.* hundred uses or administerings or treatments of oily enema बलेन गजमश्वमाशुगमनेन बुद्ध्या गुरुं दिवाकरनिशाकरावपि च तेजसा कान्तितः। सुवर्णमिह सूक्ष्मदृष्टिपुणतोऽङ्गं रूपतो जयेदमलिनानुवासनशतोपयोगान्नरः KalyāKā. 8. 65.

अनुवासनसाध्य (anuvāsana-sādhya) *adj.* to be cured by the treatment or administering of an oily enema भगवन् देहिनां व्याधयः ... केऽनुवासनसाध्याः KāśyaS. 165B. 1.

अनुवासनस्कन्ध (anuvāsana-skandha) *m.* type of an oily enema द्वौ चानुवासनस्कन्धौ CaraS. viii. 9. 7 (1941 Ed.) (comm. अनुवासनं तु स्नेह एव, स द्विविधः स्थावरो जङ्गमश्च इत्यनेनोक्तौ द्वावनुवासनस्कन्धौ ज्ञेयौ)

¹अनुवासना (anu-vāsanā) *f.* subsequent mental impression (भावना धीस्था नात्मस्था) तस्यानुवासना धीस्था भावनेत्यभिधीयते BṛĀraUBhVā. iv. 3. 1257 (comm. फलभोगानन्तरं या वासना भावनाख्या सान्तःकरणस्थेत्युक्ते नात्मस्थेत्यर्थः)

²अनुवासना (anu-vāsanā) *f.* oily enema अनुवासनया मात्रा सा देया सर्वसेचने Hastyāyur. 25. 3 (1. 2)

अनुवासनानिबन्धन (anuvāsanā-nibandhana) *adj.* caused by the subsequent mental impression विज्ञानवैचित्र्यं न स्वतो निराकारत्यात्रानुवासनानिबन्धनं स्यात् BrahmSūBh. (Bhā.) 124. 30 (*on* ii. 2. 29)

अनुवासनार्थम् (anuvāsanārtham) *adv.* for the sake of an oily enema हितं घृतं चाप्यनुवासनार्थम् SuśruS. vi. 45. 39.

अनुवासनार्ह (anuvāsanārha) *adj.* fit for the treatment of an oily enema अनुवासनार्हं पूर्वमेवानुवासयेत् AṣṭāSaṁ. i. 147. 18 (1. 28); स्नेहोऽनुवासनार्हस्यानुवासनम् AṣṭāSaṁ. ii. 111. 22 (4. 21)

अनुवासनिक (anuvāsan-ika) *adj.* useful for an oily enema अनुवासनिकं स्नेहमेतं विद्याज्ज्वरापहम् CaraS. vi. 3. 251 (1941 Ed.); घृतमण्डसमं तैलमनुवासनिकं परम्। विषोपद्रवपथ्यं च वीक्ष्य युञ्ज्याद्यथायथम् AṣṭāSaṁ. ii. 341. 9 (6. 40)

अनुवासनीय (anuvāsan-īya) *adj.* [P. v. I. 111;] **A** useful for an oily enema एतद्गन्धर्वतैलमित्युच्यतेऽनुवासनीयम् KāśyaS. 157B. 2; **B** (person) fit for the treatment of an oily enema क्षारं न चेद् वैतरणं प्रदाय द्व्यहे त्र्यहे वाप्यनुवासनीयः SiddhYo. 75. 3 [to be scented or fumigated; requiring an enema, MW.]

अनुवासनोत्तरबस्ति (anuvāsanottara-basti) *m.* type of an enema (to be administered) after an oily enema अथातोऽनुवासनोत्तरबस्तिचिकित्सितं व्याख्यास्यामः SuśruS. iv. 37. 1.

अनुवासनोपग (anuvāsanopaga) *adj.* adjuvant of an oily enema पञ्चाशन्महाकषाया इति यदुक्तं तदनु व्याख्यास्यामः ... स्नेहोपगः ... अनुवासनोपगः शिरोविरेचनोपग इति सप्तकः कषायवर्गः CaraS. i. 4. 5 (1922 Ed.)

अनुवासनोपयोगिन् (anuvāsanopayogin) *adj.* useful for the treatment of an oily enema श्रेष्ठम् ... मदनफलं वमनास्थापनानुवासनोपयोगिनाम् CaraS. i. 25. 39 (1922 Ed.); AṣṭāSaṁ. i. 81. 22 (1. 13)

अनुवासन्ति (anuvāsanti) *adv.* close to what blossoms in spring, i.e. jasmine-creeper ग्राम्या अमी हैमनवाससस्त्वेक्षन्तेऽनुवासन्ति DvyāśraKā. 16. 63 (comm. वसन्ते पुष्प(ष्प्य?)न्ति वासन्त्यः कुन्दलतास्तासां समीपे वर्तमानाः)

अनुवासयत् (anu-vāsayat) *adj.* making to reside in, i.e. bearing शोकमात्मनि चिरमनुवासयंस्त्रिवर्गमनुशोषयति NītiVā. 26. 28 (comm. धारयन्)

अनुवासरम् (anuvāsaram) *adv.* **A** day by day इत्थं जनितरागासु प्रकृतिष्वनुवासरम्। अक्षोभ्यः स नवोऽप्यासीद् दृढमूल इव द्रुमः RaghuVa. 17.44; विरागमुपयात्यन्तर्वासनास्वनुवासरम् AkṣiU. 5; मदिरावत्या मम चैकनिवासतः। गूढ एव गतो वृद्धिमनुरागोऽनुवासरम् KathāSaSāg. xiii. 1. 52; **Bi** every-day, daily यदुपस्थापनं य(?दि)धात् सङ्ख्योष्णांभा(भो)नुवासर(न)म्। क्षारैः क्षारैघृ(र्घृ)तैश्चापि शूलघ्नैः समुपाचरेत् BhelaS. 253. 12 (8. 4); छायासंज्ञा त्वपत्येषु यथा स्वेष्वतिवत्सला। तथा न संज्ञा कन्यायां पुत्रयोश्चान्ववर्तत। नलिनाद्युपभोगेषु विशेषमनुवासरम् MārkP. 77. 26; SkandP. iii (2). 13. 29; ततः संवत्सरे पूर्णे घृतकुम्भात्क्रमेण ते। भित्त्वा भित्त्वा पुनर्जज्ञुः सहसैवानुवासरम् BrahmāṇḍP. ii. 51. 46; प्रतिमाभङ्गकारी च व्रणकायः प्रजायते। संवत्सरत्रयं सिञ्चेदश्वत्थं सोऽनुवासरम् ŚātāSm. 3. 21; स्नेहः ... अनुवासरमपि वा दीयत इत्यनुवासनम् AṣṭāSaṁ. i. 145.10 (1. 28); यः स्तोत्रमेतदनुवासरमीश्वरायाः ... पठति यदि वा शृणोति। तस्येप्सितं फलति DevīPañ. 2. 30; चोराणां समयाः सन्ति बहुशोऽथानुवासरम् ĀdiP. 24. 77; असौ ... समन्तादुपश्रुतिभिरनुवासरं विनोद्यमाना मया UdaySuKa. 102. 2; (सः अश्वम्) निन्ये पयः पाययितुं तं सरस्यनुवासरम् PāriPar. 3. 66; सा। ... स्वयंगलितपुष्पैस्तामर्चयन्त्यनुवासरम् PāṇḍaC. 6. 571; कृष्णः पातु स यस्य संसदि गवां वेणुप्रणादोर्मयो गोपीनामनुवासरं नवनवा पूर्णन्ति कर्णोदरे SaduktiKa. 42. 12; धन्योऽथ चारयांचक्रे महिषीरनुवासरम् MalliC. 6. 22; येनाभोज्यनुवासरं रसलसल्लेह्यादिभेदास्पदैः अन्नैः ...। विप्राणाम् ... सहस्रत्रयम् CaturCin. iii (1). 6. 15; चौरशेखरः सोऽनुवासरम्। निरीक्षितं विना भुङ्क्ते नैव ह्यभयमन्त्रिणम् RauhiC. 242.; स च क्रमेण .... निजद्वात्रिंशद्वरोधपुरन्ध्रीणामनुवासरं जात्यकर्पूरपूराभरणानि कारयन् PrabaCin. 113. 29; नृपैः। अवसराप्तिपरैरनुवासरं रुरुधिरे प्रतिहारभुवः प्रभोः MadhuVi. 5. 9; **Bii** daily, i.e. always वस्तुत्वं वस्तुपालस्य सैव वेत्ति सरस्वती। तदीयवदनाम्भोजे या वसत्यनुवासरम् KīrtiKau. 3. 29; मन्ये मनसि साधूनां यो वसत्यनुवासरम्। यदनुक्तोऽपि जानीते विधत्ते च तदीप्सितम् KīrtiKau. 3.34; उपासनमाचरेत्। भृत्यः स्वामिनि तस्याज्ञां पालयत्यनुवासरम् BṛBrahmaS. iv. 7. 91; अभ्यापतन्तीमनुवासरं याम् ... सिन्धुः। ... प्रत्युद्व्रजन्प्रीणयति किमन्तः SāLi. 2. 20.

अनुवासित (anu-vāsita) *adj.* **1** fumigated विद्युत्प्रदग्धः काष्ठैर्गृहीतश्चानुवासितः कृत्तिकासु भरणीषु वा रौद्रेण कर्मणाभिहुतोऽग्निः प्रणीतश्च निष्प्रतीकारो दहति ArthŚā. iii. 219. 3 (14. 1); विषं प्रदद्युस्ते पापाः ... भक्ष्यभोज्यान्नपानेषु .... माल्यधूपांश्च विविधान्विषदिग्धानुवासितान् Hastyāyur. 163. 13 (2. 6); **2** (person) to whom oily enema is administered निरूढं च विरिक्तं च सम्यक् चैवानुवासितम्। ... सर्पिरभ्यासयेत् पुनः CaraS. vi. 15. 81 (1941 Ed.); यः स्नेहपीतोऽप्यनुवासितो वा ...। पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दूष्यन्ति हि तद्वहानि SuśruS. ii. 7. 21; RugVi. 35. 23; विद्रधौ पाययेत् सिद्धं चित्रकोशीरहिङ्गुभिः। स्निग्धं वान्तं विरिक्तं च निरूढमनुवासितम् SuśruS. iii. 2. 10; iv. 37. 78; AṣṭāSaṁ. i. 152. 7 (1. 28); अनुवासितमास्थापयेत् SuśruS. iv. 38. 3; सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य वै। ऊषाचोषौ विना शीघ्रं स सम्यगनुवासितः SiddhYo. 75. 31; 76. 2; **3** permeated or influenced स खल्वयं वृश्चिकविषभीत इवाशीविषेण दष्टो यः सुखार्थी विषयानुवासितो महति दुःखपङ्के निमग्नः YogBh. 76. 2 (*on* 2. 15)[administered as an enema; treated by this operation, APTE.]

अनुवासिन् (anu-vāsin) *adj.* who resides, resident अधनस्त्वबान्धवो वा ... ग्रामैकरात्रवासी (v. l. रात्रानुवासी NSP. 1945 Ed.) मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत् SuśruS. iv. 11. 12 [one who dwells near, APTE]

अनुवासिनी (anuvāsinī) *f.* name of the creeper or tree Bignonia Suaveolens (*pāṭalā*) अनुवासिनी पाटलायाम् ApūNā. 31A. 3.

अनुवासोपपन्न (anuvāsopapanna) *adj.* who has been treated with an oily enema आस्थापनहृतो दोषः शुद्धकोष्ठस्य दन्तिनः। बस्तिमग्नो न भवति ...। अनुवासोपपन्नाय निरूहं यः प्रयच्छति। ततो विरूक्ष्यते Hastyāyur. 601. 26 (4. 5)

अनुवास्य (anu-vāsya) *adj.* (also used as noun) (one) fit for the treatment of an oily enema य एवास्थाप्यास्त एवानुवास्याः CaraS. viii. 2. 19 (1941 Ed.); AṣṭāSaṁ. i. 146. 8 (1. 28); उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः। अवश्यं स्थापनीयास्ते नानुवास्याः कथंचन SuśruS. iv. 35. 22; कृतान्नायानुवास्याय सम्यग्देयोऽनुवासनः SuśruS. iv. 37. 5; iv. 37. 78; मानवान् आस्थाप्याननुवास्यांश्च वातव्याधींश्च सर्वशः। विरूक्षयेदतिस्निग्धम् BhelaS. 34. 12 (1. 21); (बालः) चतुर्मास्योऽनुवास्य(स्तु) KāśyaS. 147A. 15; केवलं चानुवास्या ये ...। तत्र द्रव्यप्रमाणानि ...। कार्याकार्यकरं ज्ञानं तत्सर्वमुपदिश्यते Hastyāyur. 593. 27 (4. 5); 601. 21 (4. 5); अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली। नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी ŚārṅgaS. iii. 5. 5; BhāvPra. (Bhā.) 75. 85 [to be scented or fumigated; requiring an enema, MW.]

अनुवाह (anu-vāhá) *m.* [P. vi. 2. 144] one which carries along यद्वीनंमन्वाहरेयु रुद्रं भृतंमन्वाहरेयुर्यं घनुवाहः स्यात् पूर्वं तं प्रवहेयुरुप वोढरेयुः MaiS. i. 5. 13 (i. 82. 9)

अनुवाहिन् (anu-vāhin) *adj.* carried along by, *lit.* having ... as that which carries along, DBHS.

अनुवि (anu-vi) *adj.* left behind, i.e. neglected तौ मित्रावरुणौ प्राणापानौ पशुभ्योऽपाक्रामतामनुवी मन्यमानौ नावाभ्यामनुवीभ्यां पशवः प्राणिष्यन्तीति। ... तावब्रुतावाब्रूतां प्राणन्तु नौ युवाभ्यां पशव इति। नावाभ्यामनुवीभ्यामित्यब्रूताम् JaimiBr. 1. 109.

अनुविकस् (anu-vikas-) I P. to blow, expand as a flower, MW.

अनुविकसत् (anu-vikasat) *adj.* blowing or expanding as a flower अन्तर्जलेऽनुविकसन्मधुमाधवीनां गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः BhāgP. iii. 15. 17.

अनुविकारम् (anuvikāram) *adv.* along with the modification महदाद्यं विशेषान्तम् ... विकारलक्षणं तद्धि सोऽक्षरः क्षरमेति च। तमेवानुविकारं तु यस्माद्धि क्षरते पुनः। तस्माद्य कारणाद्येव क्षरमित्यभिधीयते BrahmāṇḍP. iii. 3. 91.

अनुविकाश् (anu-vikāś-) I. Ā. to penetrate with one's vision, AV. xiii. 3. 1; MW., (better *adn.* cf. अनु 1B)

अनुविकृ (anu-vikṛ-) VIII P. to act alike, i.e. to imitate युदग्निहोत्रं जुहोतीदमेवैतत् सर्वमुपतिष्ठमानोऽनुविकरोति ŚatBr. II. iii. 4. 8; ŚatBr. (K.) I. iv. 1. 6 [to shape after, MW.]

अनुविकृप् (anu-vikṛp-) I Ā. to get shattered after यद्यु मा मारयिष्यसि यज्ञं विकृपतं विकृप्स्यते ŚatBr. XI. viii. 4. 4; यद्यु ह मा (मारयिष्यति यज्ञं) विकृष्टमनुविक्रस्ये यद्यु वै मे वक्ष्यति समाप्स्यामीति VādhūŚS. iii. 46. 6.

अनुविकृ (anu-vikṝ-) VI. P. A to bestrew along with सिकताभिरनुविकिरति ŚatBr. III. v. 1. 36; लोकंपृणा उपदधाति। उत्तरया पुरीषेणानुविकिरति BhārPiMe. ii. 5. 7; HirPiMe. xxix. 5. 4; B to scatter separately or subsequently वेदं विस्रस्यानुविकिरति स्नावां रूपम् ĀpaŚS. xv. 15. 1.

अनुविक्रम् (anu-vikram-) I. Ā. A to stride or step after, to follow the footsteps of प्रजापतेर्वा एष विक्रमाननुविक्रमते य उपहरति AV. ix. 6. 29; य एवं विद्वान् दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनुविक्रमते TaiS. II. v. 6. 2 (better अनु adn.); विराजं एव विक्रान्तं यजमानोऽनुविक्रमते TaiBr. I. i. 5. 10 (better अनु adn.); VādhūŚS. iii. 13. 2; दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा तमहमनुव्यक्रंसि ŚāṅkhāŚS. iv. 12. 2; देव विष्णवुर्वद्येमं यज्ञं यजमानायानुविक्रमस्व ĀpaŚS. xxii. 19. 1; HirŚS. xvii. 7. 10 (456. 28); (caus.) to cause to stride after or follow the footsteps of विराज एवैनं विक्रान्तमनुविक्रमयति KāṭhS. 8. 7(i. 90. 9); B to stride or step along विष्णोः क्रमोऽस्यभिमातिहा गायत्रेण छन्दसा पृथिवीमनु विक्रमे TaiS. I. vi. 5. 2; विष्णोर्हृदयमस्येकमिषु विष्णुस्त्वानुविचक्रमे TaiS. III. ii. 6. 1; BaudhŚS. i. 112. 16 (better अनु adn.) विष्णोः क्रमोऽसि ... पृथिवीमनुविक्रमस्व TaiS. IV. ii. 1. 1; MaiS. ii. 7. 8 (ii. 85. 4); VājaS. 12. 5; VājaS. (K.) 13. 1; BaudhŚS. ii. 15. 4.

अनुविक्षेप (anu-vikṣepa) *m.* scattering, dispersal, i.e. gradual abandonment (?) (or gradual extension - merging in each other) यत्र समाधौ स्थित्वा सर्वसमाधीनामनुविक्षेपमेकाग्रतामुपलभते। अयमुच्यते समाधिसमता नाम समाधिः Śatasāhasrikāprajñāpāramitā 1425. 16 [DBHS.]

अनुविचक्ष् (anu-vicakṣ-) II. Ā. to inform to, to tell about यद्येनं शूद्रेण संवाद उपपद्येतैतेषामेवेकं ब्रूयात् इमं नु विचक्ष्व (v. l. इममनुविचक्ष्व) BhārŚS. x. 7. 18.

अनुविचर् (anu-vicar-) I. P. Ai to roam along or through धर्मेण लोकमनुविचरामि GaṇḍVyū. 127. 4; तत्प्रतिविशिष्टेनासंक्लेशेन समन्वागतः BodhiBhū. 116. 19; राजा ... तद्वनमनुविचचार JātaMā. 185. 24 (28. 29); [DBHS]; Aii to walk or pass through, ṚV. vi. 28. 4 MW. (better अनु adn. 1Diii); Aiii to walk upto, ṚV. viii. 32. 19 MW. (better अनु adn. 1Dii); B to move in due course (from one place to another) भगवान् ... आरामेणारामं विहारेण विहारम् ... अनुविचरति GiMs. iii (2). 128. 12; C to go or move about, cf. अनुविचरत् B.

अनुविचरण (anu-vicaraṇa) *n.* the roaming through अष्टमे पुरेऽच्युतगामिन्यभिज्ञाप्रतिलब्धानां सर्वलोकधात्वनुविचरणानाम् ... बोधिसत्त्वानां संनिपातमद्राक्षीत् GaṇḍVyū. 115. 5 [DBHS.]

अनुविचरत् (anu-vicarat) *adj.* [*f.* -ntī] A roaming along or through ऋषि आश्रमपदम् अनुचंक्रमन्तो अनुविचरन्तो तं देशमागतो यत्र MaVastuAva. i. 353. 12; सा ... सुदर्शना देवी ... आम्रवनम् अनुचंक्रमन्ती अनुविचरन्ती ... आम्रवनस्य मध्ये अनुप्राप्ता MaVastuAva. ii. 452. 3; ii. 454. 10; ii. 457. 15; सोऽनुपूर्वेण ग्रामनगरनिगमराष्ट्रराजधानीष्वनुविचरन्नन्यतमनगरमुपश्रित्य कस्मिंश्चिद्वनप्रस्थे निवसति स्म JātaMā. 106. 5 (18. 3); 130. 22 (22. 17); (निषादः) सः ... पाशस्थानान्यनुविचरंस्तौ हंसवर्यौ ददर्श JātaMā. 135. 1 (22. 38); 155. 23 (24. 1) [DBHS.]; B going or moving about आत्रेयः ... वनविचारमनुविचरन् शिष्यमग्निवेशमब्रवीत् CaraS. iii. 3. 3; (आवाम्) पुरमनुविचरन्तावशृणुव वरवधूगृहेषु कोलाहलम् DaśKuC. 51. 11; (अहम्) तद्गृहमनुविचरन्, गर्भगृहमविक्षम् DaśKuC. 65. 3.

अनुविचरित (anu-vicarita) *adj.* [*f.* -ā] which is roamed along or through वधकतस्करगणानुविचरितायां धरण्याम् ... देवरूपेण बोधिसत्त्वरूपेण सत्त्वानां त्राणभूता भवामि GaṇḍVyū. 173. 1; न चैव व्याडमृगानुविचरितमरण्यवनमवगाढेन यत्र क्वचिदुपसृज्य तुरगवरं विश्रम्यते मृगया वानुष्ठीयते JātaMā. 163. 17 (25. 3) [DBHS.]

अनुविचरित्वा (anu-vicaritvā) *ger.* having roamed along or through सापि दानि सुदर्शना ... अश्वशालायाम् अनुचंक्रमित्वा अनुविचरित्वा .. कुशेन राज्ञा .. पृष्ठिमेन आहता MaVastuAva. ii. 455. 16 [DBHS.]

अनुविचल् (anu-vical-) I. P. [MahāBh. i. 378. 9 (*on* ii. 1. 4); i. 417. 6 (*on* ii. 2. 18); KāśiVṛ. *on* ii. 1.4; Nyās. i. 339. 11 (*on* ii. 1. 4); SiddhāKau. 160A. 6 (*on* ii. 1. 4); VaiyāBhū 134. 6 (*on* 28)] A to move or proceed towards सः .. प्राचीं दिशमनु व्यचलत् AV. xv. 2. 1; स यत् प्राचीं दिशमनु व्यचलन्मारुतं शर्धो भूत्वानु व्यचलन्मनोऽन्नादं कृत्वा AV. xv. 14. 1 [to follow in changing place, MW.]; Bi to go after, to follow तम् ... यज्ञमानश्च पशवश्चानु व्यचलन् AV. xv. 2. 1; विशोऽनुव्यचलत् Av. xv. 9. 1; Bii to follow in agitation तव प्रजास्तवौषधयस्तवापो विचलितमनुविचलन्ति JaimiUBr. iii. 21. 4.

अनुविचारणा (anu-vicāraṇā) *f.* meditation (on) या च प्रतिदिवसं प्रतिक्षणं तदनुधर्ममेव बहुलमनुवितर्कणानुविचारणा BodhiBhū. 20. 21 [DBHS.]

अनुविचारय (anuvicāraya-) *denom.* to meditate on, to think on नैष्क्रम्यशब्दोऽनुविचारयन्ति LaliVi. 15. 66 [DBHS.]

अनुविचारयमाण (anu-vicārayamāṇa) *adj.* meditating on, thinking on अचिन्त्यं बुद्धगोचरमनुविचारयमाणाः Rāṣṭrapālaparipṛcchā 4. 12 [DBHS.]

अनुविचारित (anu-vicārita) *adj.* meditated on, thought on यदपि दृष्टश्रुतमतविज्ञातं प्राप्तं पर्येषितं मनसानुवितर्कितमनुविचारितम् BodhiBhū. 26.25; मनसानुवितर्कितेष्वनुविचारितेषु समासतः सर्वधर्मसंज्ञास्वागन्तुकसंज्ञा उत्पन्ना भविष्यति BodhiBhū. 273.11 [DBHS.]

अनुविचिन्त् (anu-vicint-) X. P. A to reflect on, to consider सर्वा इय लोकधातु ...। एकीभवित्वान विचिन्तयेयुः (v. l. °त्वानुविचिन्तयेयुः) SaddhaPuṇ. 22. 11; शारिपुत्र स पुरुषस्तं स्वकं निवेशनम् ... संप्रज्वलितं दृष्ट्वा ... उद्विग्नचित्तो भवेत् एवं चानुविचिन्तयेत् SaddhaPuṇ. 51. 25; तत्साधु लङ्काधिपते एतमेवार्थमनुविचिन्तयेः LaṅkāSū. 1. 43 (5. 25) [DBHS]; (*caus.*) to cause to reflect on or consider, cf. अनुविचिन्तयित; B to think of, cf. अनुविचिन्तयत् A; C to regard, i.e. to realise, cf. अनुविचिन्त्य C [to recall to mind, to meditate upon, MW.]

अनुविचिन्तयत् (anu-vicintayat) *adj.* A thinking of or about तं राममेवानुविचिन्तयन्तं समीक्ष्य देवी शयने नरेन्द्रम्। ... विललाप कृच्छ्रम् Rāmā. ii.37.28; B reflecting on, considering एवमनुविचिन्तयता तेन सर्वभावेष्वनित्यताम् Divyāva. 266. 13.

अनुविचिन्तयमान (anu-vicintayamāna) *adj.* reflecting on, considering न च तस्मात् किंचित् प्रार्थयेत् ...। तत्रैव च कटपलिकुञ्चिकायां वासं कल्पयेत्, तामेव दरिद्रचिन्तामनुविचिन्तयमानः SaddhaPuṇ. 74. 20.

अनुविचिन्तयान (anu-vicintayāna) *adj.* (irr.) thinking of or about तं राममेवानुविचिन्तयन्तम् (v.l. राममेवानुविचिन्तयानम्) समीक्ष्य देवी शयने नरेन्द्रम्। ... विललाप कृच्छ्रम् Rāmā. ii. 37. 28.

अनुविचिन्तयित (anu-vicintayita) *adj.* caused to reflect on or consider ततो वयं भगवता बहून् धर्मान् प्रत्यवरान् संकारधानसदृशाननुविचिन्तयिताः SaddhaPuṇ. 75. 5 [DBHS.]

अनुविचिन्तित (anu-vicintita) *adj.* reflected on, considered तथा हि भगवंस्तेन पुरुषेण पूर्वमेव एवमनुविचिन्तितम् ... अहमिमान् कुमारकान् ... परिमोचयिष्यामि SaddhaPuṇ. 53. 19.

अनुविचिन्त्य (anu-vicintya) *ger.* A having thought of or over यथार्थं पदमनुविचिन्त्य ... विषयी स्यात् GopBr. i. 1. 30 (22. 10); B having reflected on, having considered अथ खलु भिक्षवस्तथागत एवमनुविचिन्त्य ... प्रक्रामत् LaliVi. 26. 0 (36); एवं च चिन्तयित्वा अनुविचिन्त्य ... एवं वाचमभाषत SaddhaPuṇ. 137. 2; इत्यनुविचिन्त्य सर्वे जवेन प्रसृताः Divyāva. 59. 22; 68. 13 [DBHS]; C having regarded, i.e. having realised विधिविहितमशक्यमन्यथा हि कर्तुम् ... तदनुविचिन्त्य बभूव वीतमन्युः HariVaṁ. 118. 42.

अनुविच्छित्री (anu-vicchitrī) *adj.* (*f.*) going after, following दृष्ट्वा विच्छायितारं तं पणायितृपथे तदा। अनुविच्छत्र्यभूत्काचित्पणित्री नेष्टवस्तुनः DvyāśraKā. 7. 77 (comm. पश्चाद्यान्ती)

अनुविजयम् (anuvijayam) *adv.* in imitation of Vijaya, like Vijaya अवतस्थौ ययौ शिश्ये न्यषीदद् बुभुजे पपौ। द्विपृष्ठोऽप्यनुविजयं स्नेहकार्मणयन्त्रितः TriṣaŚaPuC. iv. 2. 213.

अनुविज्ञाय (anu-vijñāya) *ger.* having known subsequently जाता वै भुजगास्तात वीर्यवन्तो दुरासदाः। शापं तं त्वथ विज्ञाय (v. l. त्वनुविज्ञाय) कृतवन्तो नु किं परम् MahāBhā. i. 32. 1.

अनुविटपम् (anuviṭapam) *adv.* on each branch (of tree) गायन्त्यनुविटपं प्रीता मधुकरिकाः ChandaśCū. ii. 65. 3.

अनुवित (anuvita) *m.* name of one of the sons of Aṅkura (or Akrūra) अङ्कुरात् (? अक्रूरात्) ... अश्विन्यां त्रिचतुष्पुत्राः ...। अनुवितः PadmP. v. 13. 107.

अनुवितन् (anu-vitan-) VIII U. to spread over, to extend along तन्नाद्रियेतेमान्वा एष लोकाननुवितनुते ŚatBr. XII. iv. 1. 2; इमान् वा एष लोकान् अनुवितनुते योऽग्नीन् आधत्ते JaimiBr. 1.51; स एतान् अष्टावुक्थ्यान्पश्यत्पशून् दिशोऽन्ववितनुत JaimiBr. 3. 318.

अनुवितर्कणा (anu-vitarkaṇā) *f.* study, reflection (on) या च प्रतिदिवसं

प्रतिक्षणं तदनुधर्ममेव बहुलमनुवितर्कणानुविचारणा। इयमुच्यते वितर्कमुद्धिः BodhiBhū. 20. 21 [DBHS.]

अनुवितर्कय (anu-vitarkaya-) *denom.* to ponder, to reflect on, DBHS.

अनुवितर्कित (anu-vitarkita) *adj.* (also used as noun) pondered or reflected on यदपि दृष्टश्रुतमतविज्ञातं प्राप्तं पर्येषितं मनसानुवितर्कितमनुविचारितम् BodhiBhū. 26. 25; मनसानुवितर्कितेष्वनुविचारितेषु समासतः सर्वधर्मसंज्ञास्वागन्तुकसंज्ञा उत्पन्ना भविष्यति प्रतिलब्धा BodhiBhū. 273. 11; नामधेयमनुवितर्कितम् MahāVyu. 245. 281 [DBHS.]

अनुवितर्क्य (anu-vitarkya) *ger.* having pondered or thought of महादेवी ... अनुवितर्क्य निःसंचारतया शून्यतावन्ध्यमिव राजभवनमध्यम् ... प्रस्थितवती YaśasCam. ii. 40. 11.

[1]**अनुवित्त** (ánu-vitta) *adj.* [P. vii. 2. 56; DEBRU. 554] **Ai** obtained अयं पन्था अनुवित्तः पुराणः ṚV. iv. 18. 1 (Sāy. आनुपूर्व्येण ... लब्धः); अणुः पन्था वितरः पुराणः ... अनुवित्तो मयैव Śat Br. XIV. vii. 2. 11; **Aii** attained यस्यानुवित्तः प्रतिबुद्ध आत्मास्मिन्संदेहे गहने प्रविष्टः। स विश्वकृत् ŚatBr. XIV. vii. 2. 17; BṛĀraU. iv. 4. 13 (Śaṅ. अनुलब्धः); BrahmSūBh. (Ma.) 5A. 7 (*on* i. 1.7); यस्य जीवस्यानुवित्तः ... 'विदिर्लाभे' ŚrutaPra. ii. 363. 25 (*on* ii. 3. 22); आत्मशब्दो विष्णावेव न जीवेषु ... आत्मज्ञानान्मोक्षो यस्यानुवित्त इत्यादावुदाहृतः Tattv Prakā. 13B. 11 (*on* i. 1.7); **B** found, discovered बांधि वृम्रीभिरनुवित्तं गुहासु। श्रोत्रं ते उर्व्यवंधिरा भवामः TaiBr. I. ii. 1. 3; ĀpaŚS. v. 1. 7. [at hand, MW]; *n.* wealth, cf. **अनुवित्तापहतादि**.

[2]**अनुवित्त** (anu - vitta) *adj.* **A** known, realised अणुः पन्थाः ... मां स्पृष्टोऽनुवित्तो मयैव BṛĀraU. iv. 4. 8 (Śaṅ. अनुवित्तो मयैव अनुवेदनं नाम विद्यायाः परिपाकापेक्षया फलावसानतानिष्ठा प्राप्तिः); एष पन्था ब्रह्मणा हानुवित्तः BṛĀraU. iv. 4. 9; एष पन्था ब्रह्मणा हानुवित्तस्तेनैति संन्यासी ब्रह्मविदिति JābālaU. 5; YājñaU. 601. 26(1); एष पन्थाः ...। शास्त्राचार्योक्तितः पश्चादनुवित्तो मयैव च BṛĀraUBhVā. iv. 4. 550; iv. 4. 568; **B** meditated 'यस्यानुवित्तः'। यस्य जीवस्यानुवित्तः। विद ज्ञाने उपास्य इत्यर्थः ŚrutaPra. ii. 363. 24 (*on* ii. 3. 22); अनुवित्तः ... श्रवणमननाद्यनन्तरं प्राप्तः ŚivārkaMaDī. ii. 145. 30 (*on* ii. 3. 22)

अनुवित्तयज्ञ (anuvitta - yajña) *adj.* who has obtained the sacrifice अनुवित्तयज्ञो राध्नोति AitBr. 1. 2 (15); अथ यं आग्नावैष्णवं निरूप्य दीक्षयन्त्यनुवित्तयज्ञमु हैव तं दीक्षयन्ति VādhūŚS. iv. 22. 16.

अनुवित्ताग्नि (anuvittāgni) *adj.* who has obtained the (sacrificial) fire अथ यस्यैतस्यां हुतायामन्यत् कर्म कुर्वन्त्यनुवित्ताग्निमु हैव तं याजयन्ति VādhūŚS. iv. 75. 44.

अनुवित्तापहतादि (anuvittāpahṛtādi) *adj.* loss of wealth etc. स्वर्णानुवित्तापहतादि कन्यालाभो गजादेः श्वशुरादमाये (स्थाने) DaivaVa. 2. 15.

[1]**अनुवित्ति** (ánu - vitti) *f.* [P. vi. 2. 50] **1A** finding, discovery अग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत् प्राजापत्योऽश्वोऽश्वेन संभरत्यनुवित्त्यै TaiS. V. i. 2. 2; तेऽसुरा देवानां प्राणेषु वलगान्यखनंस्तान्बाहुमात्रेऽन्वविन्दंस्तस्माद् बाहुमात्राः खेयाः प्राणानामनुवित्त्या इदमहं तान्वलगानुद्वपामि KāṭhS. 25. 9 (ii. 116. 4); KapiKaS. 40. 2 (222. 18); KāṭhS. 25. 6 (ii. 109. 14); यत्सावित्र्यो भवन्त्यश्वस्यैवानुवित्त्यै ŚatBr. XIII. i. 4. 2; XIII. i. 9. 2; **1B** obtainment यदुदीचीनं प्राचीनं प्रवणं स्यात्तस्मिन्यजेत यज्ञकाम एवमेव हि स यज्ञोऽशयद्यस्यानुवित्त्यै KāṭhS. 25. 2 (ii. 104. 10); KapiKaS. 38. 5 (209. 21); पुरस्तांत्स्तम्बयजुषो वेदेन वेदिं ३ संमार्ष्ट्यनुवित्त्यै TaiBr. III. iii. 9. 10; तद् यत् पुनर्नितुन्नं छन्दो भवति रसमेवैतच्छन्दोमेषु दधति। रसस्येवैषानुवित्तिः JaimiBr. 3. 194; 3. 223; 3. 225; **2A** name of a deity (obtainment deified) तमनुवित्तिरब्रवीत् Tai Br. III. xii. 2. 9; ता वा एतास्सप्त स्वर्गस्य लोकस्य द्वारः। दिवश्श्येनयोऽनुवित्तयो नाम TaiBr. III. xii. 2. 10; ता वा एताः पञ्च ...। अपांग्रा अनुवित्तयो नाम TaiBr. III. xii. 4. 7; कामाय ब्रह्मणे यज्ञाय अद्भ्यः अग्नये बलिमते अनुवित्त्यै एता द्वितीयादिष्विष्टिषु यथाक्रमं द्वितीयाः प्रदिष्टाः Kāṭhakaśrautasūtrasaṅkalana 3. 5; अनुवित्त्यै चरुमिति विशेषः। पूर्वं देवा अपरेण प्राणापानावित्यनुवित्त्याः Kāṭhakaśrautasūtrasaṅkalana 5. 16; अनुवित्त्यै स्वाहा Kāṭhakaśrautasūtrasaṅkalana 5. 18; **2Bi** name of an *iṣṭi* सो ह वा एषानुवित्तिर्नामेष्टिर्यदाग्नावैष्णवः VādhūŚS. iv. 22. 13; **2Bii** name of an offering चतुर्गृहीतेन गार्हपत्यस्योद्धते दर्भस्तम्बे हिरण्यमुपास्यानुवित्तिं जुहुयात् VādhūŚS. iv. 75. 26; हिरण्यमुपास्यानुवित्तिं जुहवांचकार VādhūŚS. iv. 75. 37; सो ह वा एषा परिस्रावती नाम कुरुक्षेत्रेऽग्नेराहुतिः पुरस्ताद् अन्याधेयस्य हूयतेऽनुवित्तिर्ह्यनूक्ते प्रातरनुवाके ... पुरस्ताद् उखासंभरणस्य हूयते VādhūŚS. iv. 75. 41.

[2]**अनुवित्ति** (anu-vitti) *f.* clear understanding, knowledge यस्यानुवित्तिरिति नवभिर्ब्रह्मस्तुतिः। तद्विज्ञानं च AnuBh. 99. 19 (*on* i. 3. 42)

[1]**अनुविद्** (anu-vid-) VI. U. [DhātuPā. 6. 138] **1Ai** to find, to discover इन्द्र ...। अविन्द उस्रिया अनु ṚV. i. 6. 5=AV. xx. 70. 1; JaimiBr. 3. 38; स घां विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ṚV. i. 132. 3 (*but* Sāy. जानाति); यः शम्बरं पर्वतेषु क्षियन्तम् ... अन्वविन्दत् ṚV. ii. 12. 11; AV. xx. 34. 11; AV. (P.) xiii. 7. 11; ईळिषां सुमति स्त्रियः शश्वतीरति सश्चतः। अन्वीमविन्दन्निचिरासो अद्रुहोऽप्सु ṚV. iii. 9. 4; गुह्यमानं गवि देवासो घृतमन्वविन्दन् ṚV. iv. 58. 4; AV. (P.) viii. 13. 4; KāṭhS. 40. 7 (iii. 141. 1); VājaS. 17. 92; VājaS. (K.) 19. 6; TaiĀ. x. 10. 3 (814. 4); ĀpaŚS. xvii. 18. 1; MahānāU. 10. 2 त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दन् ṚV. v. 11. 6; SV. II. iii (1). 6. 2; TaiS. IV. iv. 4. 3; MaiS. ii. 13. 7 (ii. 156. 4); KāṭhS. 39. 14 (iii. 132. 1); VājaS. 15. 28; VājaS. (K.) 16. 5; ज्योतिः पितरो अन्वविन्दन् ṚV. vii. 76. 4; इन्द्र। गूळ्हे द्यावापृथिवी अन्वविन्दः ṚV. viii. 96. 16; SV. I. iv (1). 4. 4; AV. xx. 137. 10; यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम् ṚV. x. 71. 3; सुपर्णस्त्वान्वविन्दत् AV. ii. 27. 2; v. 14. 1; AV. (P.) ii. 16. 2; vii. 1. 1; उपहूतमनुबुद्धं निखातं वैरं त्सार्यन्वविदाम कर्त्रम् AV. x. 1. 19; AV. (P.) xvi. 36. 9; तामि संरब्धमन्वविन्दन्पड्उर्वीर्गातुं प्रपश्यन्निह राष्ट्रमाहाः AV. xiii. 1. 4; देवानां निहितं निधिं यमिन्द्रोऽन्वविन्दत् AV. xix. 27. 9; AV. (P.) x. 7. 9; तत उदद्रुत्य नडं प्राविशत्। तस्मान्नडो दग्धः क्रूर इव वर्वरः। तमश्वः श्वेतोऽवमृशन्नन्वविन्दत् KāṭhS. 25. 7 (ii. 111. 12); KapiKaS. 39. 5 (217. 10); तेऽसुरा देवानां प्राणेषु वलगान्यखनंस्तान्बाहुमात्रेऽन्वविन्दंस्तस्माद्बाहुमात्राः खेयाः प्राणानामनुवित्त्या इदमहं तान्वलगानुद्वपामि KāṭhS. 25. 9 (ii. 116. 3); KapiKaS. 40. 2 (222. 17); पृथिवीं प्राविशत्तं जानुदघ्नेऽन्वविन्दंस्तस्माज्जानुदघ्नं खेयमनुविद्यैवैतान्निवपति KāṭhS. 26. 1 (ii. 120. 4); KapiKaS. 40. 4 (226. 7); अयं वेदः पृथिवीमन्वविन्दद् गुहा हिता गह्वरेषु KāṭhS. 31. 14 (iii. 16. 12); TaiBr. III. vii. 6. 13; BhārŚS. ii. 11. 11; ĀpaŚS. ii. 11. 10; MānŚS. I. 15; VārāŚS. I. i. 2. 19; HirŚS. i. 8. 27 (178. 10); ते सोममन्वविन्दन् TaiBr. I. ii. 1. 2; देवेर्देवेभ्यो निलायत। तां चतुरङ्गुलेऽन्वविन्दन् TaiBr. III. ii. 9. 11; तं खनन्त इवान्वीयुस्तमन्वविन्दन् ŚatBr. I. ii. 3. 7; ŚatBr. (K.) II. ii. 1. 20; अग्निर्देवतानां हिरण्यस्तूप ऋषीणां बृहती छन्दसां तमग्निरनुविवेद ŚatBr. I. vi. 4. 2; ŚatBr. (K.) II. vi. 2. 2; इयं वै सविता यो ह्यऽस्यां निलयते योऽन्यत्रैतस्यां वाव तमनुविन्दन्ति ŚatBr. XIII. i. 4. 2; यथा ह वै पदेनानुविन्देदेवं कीर्तिं श्लोकं विन्दते य एवं वेद ŚatBr. XIV. iv. 2. 18; BṛĀraU. i. 4. 7; वनेवने ह्येतं शिश्रियाणमन्वविन्दन् JaimiBr. 3. 62; 3. 382; यद्वाचः ... क्रूरम् ... तद्विद्युया कवयो अन्वविन्दन् AitĀ. II. iii. 8. 7; ब्रह्मान्वविन्दद् दशहोतारमर्णे TaiĀ. iii. 11. 1 (303. 2); iii. 11. 6 (315. 1); iii. 11. 12 (325. 5); यथैतामन्वविन्दन्त विद्वांसर्पिगतां सतीम्। यथा च व्यभजन् यज्ञे तदवोक्तं तृतीयया BṛDe. 7. 112; यशोदा चिन्तार्णवे न प्लवमन्वविन्दत् Yādavā. 4. 67; प्राप्तं महाशङ्खमिहान्वविन्दम् Yādavā. 18. 109; **1Aii** to recover, to get back सूर्यं स्वर्भानुस्तमसाविध्यदासुरः। अत्रयस्तमन्वविन्दन् ṚV. v. 40. 9; KapiKaS. 44. 4 (260. 11); KauṣBr. 24. 4 (109. 8); तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ṚV. x. 109. 5; AV. v. 17. 5; AV. (P.) ix. 15. 5; प्रजापतिः पशूनसृजत ते सृष्टा अहोरात्रे प्राविशन् ताञ्छन्दोभिरन्वविन्दत् TaiS. I. v. 9. 7; अग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत् TaiS. V. i. 2. 2; यज्ञो वै देवेभ्य उदक्रामत् ... इष्टिभिः प्रैषमैच्छन् ... तमन्वविन्दन् AitBr. 1. 2 (15); यज्ञो वै देवेभ्य उदक्रान्तमिष्टिभिः ... अन्वविन्दन् AitBr. 1. 2 (15); सोऽस्येन्द्रियं वीर्यं निर्जघान तत्पशुष्वन्वविन्दत् ŚatBr. V. iv. 3. 2; मैत्रावरुणचमसेन यज्ञो वै देवेभ्योऽपचक्राम ... तमेवमन्वविन्दन् ... एवं एतं यज्ञस्य रसमनुविन्दति ŚatBr. (K.) IV. ix. 3. 20; VII. iv. 1. 2; यत्र यत्र वै देवाश्छन्दसां रसमन्वविन्दंस्तत् पुनर्नितुन्नमकुर्वन् JaimiBr. 1. 217; प्रजापतिर्नष्टस्यानुवेत्ता। स यो नष्टस्यानुवेत्ता तेनेमां स्वधामनुविन्दामेति JaimiBr. 2. 159; नैष्टस्यानुवेत्ता। स यो नष्टस्यानुवेत्ता तेनेमं ... यानि नो धनानि कुछो जिनासि मनुना। इन्द्रानुविद्धि 3. 96; 3. 194; 3. 223; यानि नो धनानि कुछो जिनासि मनुना। इन्द्रानुविद्धि AśvaŚS. I. ii. 10. 16; **1Aiii** to find, to discover, i.e. to take hold of नष्टानि अनेन हविषा पुनः AśvaŚS. I. ii. 10. 16; यं बिभृतं नानु पाप्मा विवेद AV. xix. 32. 9; उपांशुग्रहसदां न हैनं मृत्युः चराम। तद्या नोऽसुराः पाप्मा नानुवेत्स्यन्ति TaiBr. I. v. 9. 4; न हैनं मृत्युः पाप्मानुविन्दति यः एवं वेद JaimiBr. 1. 284; **1Bi** to attain येनं देवा अमृतमन्वविन्दन् AV. iv. 23. 6; xiii. 1. 7; AV. (P.) iv. 33. 6; vii. 6. 1; यमन्वविन्दन् तपसा श्रमेण AV. iv. 35. 2; न चातुर्मास्ययाजिनमनुविन्दन्ति परमेष्ठिनं स खलु स स्थानं परमां गतिं गच्छति ŚatBr. II. vi. 4. 9; ऋतेन हि ते तदमृतमन्वविन्दन् JaimiBr. 2. 160; कूश्माण्डानि ताञ्छ्लोकमन्वविन्दव्यवर्षा वा तपसा च TaiĀ. ii. 7. 1 (228. 3); iii. 11. 2 (308. 1); ब्रह्मचर्येण ह्येवात्मानमनुविन्दते ChāndoU. viii. 5. 1; ... श्रेयोऽसावनुविन्दते BhāgP. xi. 7. 20;

1Bii to reach सो अन्तरिक्षे रजसो विमानः। तेनं देवास्सुवरन्वविन्दन् TaiBr. II. v. 2. 4; तपुसर्ष यस्स्वरन्वविन्दन् TaiBr. III. xii. 3. 1; TaiĀ. x. 63. 1 (886. 2); MahānāU. 22. 1; तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकः ChāndoU. viii. 4. 3; **1Biii** to attain to, i.e. to feel, to experience स्थितः समाधौ वाप्येतौ शीतोष्णौ नानुविन्दति JayāS. 33. 67; किं वा संतापमनुविन्दसि BhāmiVi. App. 10. 13; RasGaṅ. 339. 17; **1C** to obtain, to get subsequently यः प्रथमोऽनुविन्दति तस्य प्रथमं प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन् TaiS. II. v. 3. 6; सोमो वै सहस्रमविन्दत्तमिन्द्रोऽन्वविन्दत्तौ यमो न्यागच्छत्तावब्रवीदस्तु मेऽत्रापीत्यस्तु ही ३ इत्यब्रूताम् TaiS. VII. i. 6. 1; उप्त्वाय केशान्वरुणस्य राज्ञः ... । तेभ्यो निधानं बहुधान्वविन्दन्नन्तरा द्यावापृथिवी अपस्सुवः ĀpaManPāṭha. ii. 1. 8; KāṭhGS. iii. 16. 15; VārāGS. 4. 21; तं यज्ञक्रतुभिर्नान्वविन्दन् TaiBr. III. ix. 13. 1; III. xii. 2. 1; III. xii. 2. 4; यद्यह सुर्वैरन्वेषिष्यामो यातयामा अनुपजीवनीया भविष्यन्ति यद्युऽअसर्वैरसर्वमनुवेत्स्यामः ŚatBr. VI. iii. 1. 23; ŚatBr. (K.) I. i. 1. 3; I. vi. 4. 9; देवा वै पृष्ठ्ये षडहे श्रियमैच्छन्। तामग्न इति प्रथमेऽहन् नान्वविन्दन् JaimiBr. 3. 332; BaudhŚS. iii. 187. 10; स कदाचिन्मृगाँल्लिप्सुर्नान्वविन्दत्प्रयत्नवान् MahāBhā. viii. 49. 36; स क्षिप्रं भ्रश्यते राज्यान्न च श्रेयोऽनुविन्दति MahāBhā. ix. 3. 44; भूतपिण्डं विना तासां (नानाचेष्टानाम्) न शान्तिमनुविन्दति PauṣkS. 27. 34; नभस्तुपारांशुमयूखयोगात् तमिस्रया मोक्षमिवेयिवे। अतृप्यततत्त्वविदो निशायामन्तर्मुखं चित्तमिवान्वविन्दत् Yādavā. 2. 87; शुचिस्मिताः ... । शरत्पयोदोदरसंश्रितानां क्षणद्युतीनां द्युतिमन्वविन्दन् Yādavā. 13. 67; अनयोः पटुवादमृधेऽन्तरं तटस्थाः श्रुतवन्तोऽपि न किंचनान्वविन्दन् ŚaṅkaDigVi. (Mā.) 15. 91; बालेन्दुचारुतिलकेन चिराय बाले चन्द्रोऽन्वविन्ददिव नन्दनजन्मशर्म Mukundā. 100; **2** to obtain (as a wife), i.e. to get married तेनं जायामन्वविन्दद् बृहस्पतिः सोमेन नीताम् ṚV. x. 109. 5; AV. v. 17. 5; AV. (P.) ix. 15. 5; शारद्वतीं ततो द्रोणः कृपीं भार्यामविन्दत (v.l.भार्यामन्वविन्दत्) MahāBhā. i. 121. 11 [to deem, MW.; to deem, consider APTE]

²**अनुविद्** (anu-vid-) II. P. [DhātuPā. 2. 55] **A** to know, to understand अवः परेण पितरं यो अस्यानुवेदं पर एनावरेण ṚV. i. 164. 18; AV. (P.) xvi. 69. 8; गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ṚV. iv. 27. 1; AitĀ. ii. 5. 12; AitU. 2. 5; त्रयो धर्मासं उपसं सचन्ते सर्वा इत्ताँ अनु विदुर्वसिष्ठाः ṚV. vii. 33. 7; JaimiBr. 2. 241; 2. 242; पूषेमा आशा अनु वेद सर्वाः ṚV. x. 17. 5; AV. vii. 9. 2; MaiS. iv. 14. 16 (iv. 243. 11); TaiBr. II. iv. 1. 5; TaiĀ. vi. 1. 1 (647. 3); ĀśvaŚS. I. iii. 7. 8; Āgnive GS. iii. 5. 4 (143. 6); BaudhPiMe. xxviii. 5. 1; य एवमेतानि यज्ञस्य रूपाण्यनुवेदर्ध्नोति KāṭhS. 29. 1 (ii. 167. 17); KapiKaS. 45. 2 (268. 12); द्यावापृथिवी वै सत्यस्य साधयित्र्यौ प्रतिष्ठा पृथिव्योश्चनासाम (v.l.?व) नुवेद KauṣīBr. 4. 14 (17. 18); स हि देवाननुवेद KauṣīBr. 10. 4 (47. 16); सहस्रं भो याज्ञवल्क्य दद्मो यस्मिन्वयं त्वयि मित्रविन्दामन्वविदाम ŚatBr. XI. iv. 3. 20; तां ह तद् इन्द्र उवाचान्नादीमरे ते सरमे प्रजां करोमि या नो गा अन्वविद इति JaimiBr. 2. 442 (but VIŚVA. अनुविद् VI. U); यानि नो धनानि क्रुद्धो जिनासि मन्युना। इन्द्रानुविद्धि नस्तानि ĀśvaŚS. I. ii. 10. 16; पृच्छामि त्वा चितयं देवसख यद्यत्त्वमत्र मनसानुवेत्थ LāṭyāŚS. ix. 10. 9; DrāhyŚS. xxvii. 3. 2; वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः। यद्यप्येकोऽनुवेत्त्येषां भावनां चैव संस्थितिम् YājñaSm. 3. 104; यः कश्चिदनुवेत्ति सोऽपि महान् Mitā. 379. 3 (on 3. 104); इच्छति वेदितुमर्थानीशनया तदनुवेत्ति भिन्नगतिः PratyabhiHṛ. 197. 11 (ALS. Ed.); **B** to meditate, cf. ²**अनुवित्तB; C** to realise or experience, cf. ²**अनुविद्य A; D** to think or consider, cf. ²**अनुविद्य C.**

³**अनुविद्** (anu-vid-) IV. Ā. [DhātuPā. 4. 62] to be, to exist यथा श्यामाकः प्रपतन्नपरं नानुविद्यते AV. xix. 50. 4; AV. (P.) xiv. 4. 14; आज्येन घृतेन जुहोमि किलासभेषजम्। वीरुधामग्नेसंकाशे किलासं नानु विद्यते AV. (P.) ix. 3. 5; त्रयोदशो मासो नानुविद्यते न वै सोमविक्रय्यनुविद्यते AitBr. 3. 1 (51) (but Sāy. शुभकर्मानुकूलो नास्ति। ... शिष्टाचारस्यानुकूलो नैव विद्यते)

⁴**अनुविद्** (anu-vid-) X. P. [DhātuPā. 10. 168] to tell, to inform म(मा)ध्याह्निकं स्नानं कृत्वा ... समाहूय ... द्विजान्। प्राणानायम्य संकल्प्य श्राद्धार्थमनुवेदयेत् LaghvāśvaSm. 23. 5.

अनुविदधत् (anu-vidadhat) *adj.* [*f.* -ī] **1** conforming to बुद्धिः खलु तदन्वयव्यतिरेकिणः पदार्थानाश्रित्योत्पद्यमाना विकल्पिका स्ववासनाप्रकृतिमनुविदधती ... तान् संसृजन्ती संदर्शयति PramāVāSvopVṛ. 24. 28; **2** following, adhering to नैयायिकादिप्रस्थानमनुविदधता प्रत्यक्षस्य लक्षणं प्रणीयते Kāśi. i. 204. 19 (*on* 4. 2)

अनुविदधान (anu-vidadhāna) *adj.* [*f.* -ā] **1Ai** practising or carrying out वार्तिकारम्भे शिष्टाचारमनुविदधानो मङ्गलं तावत् करोति Kāśi. i. 1. 3 (*on* 0. 1); **1Aii** following, admitting, accepting तद्वृतिमनुविदधानेन भाष्यकारेण सूत्रितेच्छा कथं निर्वर्त्येतेति द्वितीयेच्छा असूत्रितोक्ता Kāśi. i. 54. 21 (*on* 1. 117); अयमेव तु शब्दशक्तिपरामर्शो वार्तिककृता तार्किकप्रक्रियामनुविदधानेन ... उपदर्शितः Kāśi. iii. 214. 14 (*on* 5 (9). 2); गवादिविकल्पाः तेऽपि व्यवहारा विसंवादिनो व्यावहारिकं प्रमाणास्पदत्वमनुविदधानाः प्रामाण्यमश्नुवीरन् NyāyRa. 396. 14 (*on* 5 (4). 156); सूत्रकारशैलीमनुविदधानः शरीरस्य लक्षणत्रयमाह TārkiRa. 120. 6; श्रुतिशैलीमनुविदधानेषु कल्पसूत्रेषु ... अवधारणस्य ... दृष्टत्वात् ŚivārkaMaDī. i. 119. 17 (*on* i. 1. 2); **1Aiii** following, i.e. imitating तच्छीलमनुविदधानेन भाष्यकारेण ... उपवर्णिता Kāśi. i. 64. 13 (*on* 2. 16); **1B** following closely, i.e. depending on or conforming to पूर्वानुभवावच्छिन्नार्थगोचरा स्मृतिस्तद्धार्थादिकमनुविदधाना न स्वयं यथार्था NyāySu. (Ja.) 278 A. 3 (*on* ii. 1. 2); **2** bearing, i.e. possessing पञ्चसु चतुर्षु वा लिङ्गरूपेष्वन्यतमलिङ्गधर्मम् एकं द्वयं त्रयं वा अनुविदधानाः अहेतवो हेतुवदवभासन्त इति हेत्वाभासा उक्ताः TātpaṬ. (Vā.) 65. 1 (*on* i. 1. 1)

अनुविदित (anu-vidita) *adj.* experienced, who has come to thorough understanding, well-informed किंप्राप्तिनमाहु वेदको ति अनुविदितं किन्ति कथन्ति वीर्यवा ति MaVastuAva. iii. 397. 13; यो समानो रागमूले बंधनप्रमुक्तो अनुविदितो तायि प्रवुच्चति तथत्वा MaVastuAva. iii. 398. 4 [DBHS.]

अनुविदिश् (anu-vidiś) *f.* supplementary direction, semi-cardinal point तस्य तत्कक्खटत्वम् ... न पूर्वां दिशं गच्छति। न दक्षिणाम् ...। नोर्ध्वं नाधो न तु विदिशं (v.l. नानुविदिशं DBHS.) गच्छति ŚikṣāSa. 245. 18; तद्य कर्म ... न पूर्वां दिशं निश्रित्य तिष्ठति। ... नोर्ध्वं नाधो नानुविदिशं नेह न तिर्यक् ŚikṣāSa. 252. 15; तस्यैवं प्रतिपन्नस्य भिक्षोर्न पूर्वस्यां दिशि गतिं वदामि ... नोर्ध्वं नाधो नानुविदिक्षु नान्यत्र Sphuṭā. iii. 24. 2 (*on* 3. 12) [DBHS.]

अनुविदृश् (anu-vidṛś-) I. P. **A** to see clearly, i.e. to discern (देवाः) तेऽसुरान् रात्रिं तमः प्रविष्टान् नानुव्यपश्यन् PañcBr. ix. 1. 1; **B** to look at, to view असौ वाऽआदित्यः ... स्वर्गो वै लोको नाकस्तमेष उद्यन्नेवानुविपश्यति ŚatBr. VI. vii. 2. 4.

अनुविद्ध (anu-viddha) *adj.* [*f.* -ā] **1A** pervaded by, full of **B** fraught with, equipped with, involving **C** mixed or blended with **Di** presided over by **ii** associated or connected with, accompanied by **E** united with, becoming one with **2A** penetrated by, pierced through **B** chased, pursued **C** struck, wounded **D** pierced, i.e. clearly determined **3Ai** strung with, interwoven **ii** set, inlaid, studded with **B** set into motion, roused into activity **4** surrounded by **5** variegated, painted or coloured with **6** attached to **1A** pervaded by, full of वातप्रकोपो रजसानुविद्धा दिशश्च संध्या च घनानुयाता ... भयानि राज्ञः प्रतिवेदयन्ति AVPari. 70G (32). 8; देवो देशिकमूर्तिकः ... उपायेष्वनुविद्धासु (?द्धेषु) धृत्या शक्तिमरीचिभिः। तिष्ठति PauṣkS. 38. 17; 43. 77; 43. 101; तदेव (चित्तसत्त्वं) तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति YogBh. 5. 2 (*on* 1. 2); शेते जनः कामरसानुविद्धः ṚtuSaṁ. 4. 11 (comm. व्याप्तः); रत्नाङ्गुलीयप्रभयानुविद्धानुदीरयामास सलीलमक्षान् RaghuVa. 6. 18; चिच्छक्तेरनुविद्धं च अव्यक्तं तत्त्वविग्रहम् PāraS. 15. 36; 15. 816; नवरसमधुरस्तोत्रजातानुविद्धं गानं वीणामहर्षेः ... कर्णपूरायतां नः ŚivPāKeSt. 38; उडुरत्नराशयः ... प्रणेशुः। दिनकरकिरणैः समुन्मिषद्भिः सपदि कुवेकटिकैरिवानुविद्धाः HarVi. 28. 15; तेन सुखेनानुविद्धेत्याक्षिप्तसंस्कारेऽर्थप्रतीतिः JayaMa. 14. 1 (*on* 1. 2); अनुविद्धं रजोमात्रया। रजसः प्रवर्तकत्वादस्ति धर्मादिप्रवृत्तिरित्यर्थः TattvVai. 5. 27 (*on* 1. 2); मित्रमिदं शत्रुरयम् इत्यादिवर्णवैचित्र्यानुविद्धा तया विकल्पनक्रियया 'तदात्मन' ईश्वरस्वभावस्यैव पशोरसाधारणी सृष्टिः PratyabhiVi. ii. 297. 4 (*on* iv. 1. 10) (Bhāsk. व्याप्ता); **1B** fraught with, equipped with, involving न तत् सत्यं यच्छलेनानुविद्धम् MahāBhā. v. 35. 49; Rāmā. vii. (Baroda Ed.) App. I. 10 (70); SūktiRa. 163. 152; ŚārṅgaPa. 1344; सत्यं न तद् यत् कपटानुविद्धम् ŚatTrayī. 568; सत्यं न तद् यन्न हृदानुविद्धम् BṛParāSm. 8. 72; सत्यं न तद् यत् कृतकानुविद्धम् PrabaCin. 53. 21; **1C** mixed or blended with मेहति ... सरुजं सिकतानुविद्धं सिकतामेही SuśruS. ii. 6. 10 (comm. वालुकामिश्रम्); क्षौद्रकपित्थमरिचानुविद्धानि चास्मै पानभोजनान्युपहरेत् SuśruS. iv. 11. 11; तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने। काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः KumāSaṁ. 3. 35; अस्ति किंचिदिह यदुपलक्षयसि सौरभ्यानुविद्धं माल्यगन्धं वा Mṛcch. 1. 34 (5); ताः ... सलीलमुत्तालकरकमलतालिका° ... °मञ्जीरमञ्जुरसितानुविद्धमेखलाकलाप° ... °मुखरं परिवृत्य MālaMā. 1. 242; ददर्श स जलं तस्याः ...। मदगन्धानुविद्धं च वीचिविक्षोभितं महत् KathāSaSāg. xvii. 2. 146; **1Di** presided over by त्वया यत्समुदीरितम्। महात्मनोऽनुविद्धं च ...।

यद्यवतनं दिव्यम् PauṣkS. 36. 1; **1Dii** associated, connected with, accompanied by तयानुविद्धमनुषक्तमविनिर्भागेन वर्तमानं दुःखयोगाद् दुःखम् NyāyBh. 32. 9 (*on* i. 1. 21); सर्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनः सुखानुभव इति तत्रास्ति रागजः कर्माशयः YogBh. 74. 7 (*on* 2. 15); न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते VākyaPa. 1. 124; TarkBhā. (Mo.) 8. 10; प्रौढतानुविद्धा च दृष्टिः DaśKuC. 116. 2; बहुवद्धमपि भाषमाणम् .... तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतम् ... सः ... इदमाह BhāgP. v. 10. 8; असौ ...। कर्मोपायं प्रक्रमं तत्फलाप्तिं साधूदाख्यत्पौरुषेणानुविद्धम्। वस्तूदात्तम् RāghPāṇ. (Dha.) 11. 14; अहं गच्छामीति गौणेन लाक्षणिकेन वाहं शब्देनानुविद्धा देहधीः NayaVi. 220. 3 (*on* v. 3. 5); मुक्तः एव सः ... दृश्यानुविद्धहीनात्मा शब्दविद्धविवर्जितः। सदा समाधिशून्यात्मा आदिमध्यान्तवर्जितः TejoBiU. 4. 76; ध्यायेद् दृश्यानुविद्धोऽयं समाधिः सविकल्पकः SaraRaU. 3. 27; ये येन प्रत्येकमनुविद्धाः ते तत्र परिकल्पिताः PramāMā. 7. 10; अवतिष्ठन्ते। तैरनुविद्धाः संबद्धाश्च आत्मानः Kiraṇā. 92. 20; श्राद्धदेवप्रोक्षणमाशिषा सह समानरूपेणाभ्यर्थनेनानुविद्धमपि कर्मैकसंबन्धात् ... प्राचीनावीतिनानुष्ठेयम् CaturCin. iii (1). 1124. 6; अघहर भज तुष्टिं पश्य ... अभिदधति निलीनाम् ... सौभाग्यरेखावितितिभिरनुविद्धाः सुष्ठु राधापदाङ्काः UjjvaNī. 81. 5 (comm. युक्ताः); **1E** united with, becoming one with अन्योन्यालोकनाभ्यां तावनुविद्धावनुस्मरेत् LakṣmīT. 49. 127; **2A** penetrated by, pierced through अनुसृष्टस्तदा (v.l. अनुविद्धस्त्वया) काको जगाम विविधां गतिम् Rāmā. v. 36. 27; (कल्पनासिद्धिः) चित्तोल्लेखादिकाले च विस्पष्टं या प्रवेद्यते। अनुविद्धेव सा शब्दैरपह्नोतुं न शक्यते TattvSaṁ. 1217; HarVi. 28. 15 (comm. कृतच्छिद्राश्च); कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दृष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः SāhiDa. 12. 1; **2B** chased, pursued जलाप्लुतानीक्ष्य महानदीनां सुगात्रि हंसाः पुलिनान्यधृष्टाः। गताः श्रमम् ... ससारसाः क्रौञ्चगणानुविद्धाः HariVaṁ. App. I. 29 (508); **2C** struck, wounded वासांसि ... तनूनि ... धत्ते जनः काममदालसाङ्गः (v.l. कामशरानुविद्धः) ṚtuSaṁ. 6. 13; उद्धूर्णलोष्टलगुडैः परितोऽनुविद्धम् ... अन्यः शशं गुणमनल्पमवाप ŚiśuVa. 5. 25 (*but* Apte chased); क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं निष्पायतः वाल्मीकेर्वदनारविन्दाच्छन्दोमयी ... निःससार सरस्वती RāmāCam. 1. 5 (1) (comm. अनु पश्चाद् विद्धं संप्रहृतम्); **2D** pierced, i.e. clearly determinded प्रज्ञासूच्यानुविद्धः ... धार्यः ... स्वहृदि सहृदयैः तत्त्वमुक्ताकलापः TattvMu. 1. 3 (comm. तत्त्वानां प्रज्ञया ... सम्यङ्निर्धारितत्वम्); **3Ai** strung with, interwoven हस्ते लीलाकमलमलकं बालकुन्दानुविद्धम् MeghDū. 65; मयि परमेश्वरे ... सर्वमिदं जगत् प्रोतम् अनुस्यूतम् अनुगतम् अनुविद्धमित्यर्थः GītāBh. (Śaṅ.) 217. 2 (*on* 7. 7); मधुकानुविद्धबन्धूकधृतनूपुरभूषणेन अन्यासु च तासु तासु ... क्रीडासु ... सुन्दरीजनेन सह रमन्ते कामिनः YaśasCam. i. 106. 4; ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्माधर्मसंस्कारानुविद्धा आत्मनस्तावन्तमेव कालम् PadārthaSaṁ. 48. 18; **3Aii** set, inlaid, studded with अपरः विलासी रत्नानुविद्धाङ्गदकोटिलग्नम्। प्रालम्बमुत्कृष्य यथावकाशं निनाय RaghuVa. 6. 14; 6. 63; 13. 54; **3B** set into motion, roused into activity महदादीनि सप्त ... तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम्। उत्थितम् BhāgP. iii. 26. 51; **4** surrounded by सरसिजमनुविद्धं शैवलेनापि रम्यम् Śāk. 1. 19; VakroJī. 213. 11; SaraKaṇṭhā. 611. 2; VyaktiVi. 131. 24; SāhiDa. 130. 6; व्याप्तिं कुर्यात् ...। अनुविद्धां पदार्थैरन्यैः सत्तास्वरूपकैः PāraS. 15. 816; विद्यां विकल्पपटलीभिरिवानुविद्धाम्! ... परिगतां रजनीचरीभिः नारीम् .... ददर्श RāmC. 19. 42; दशरथः ... सरयूसरितानुविद्धामयोध्याम् ... प्रविवेश RāmāCam. 1. 115 (3); **5** variegated, painted or coloured with महेभकराभमम्भः। संलक्ष्यते विविधरत्नकरानुविद्धमूर्ध्वप्रसारितसुराधिपचापचारु ŚiśuVa. 4. 49; **6** attached to लोकस्य ...। श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः BhāgP. iii. 29. 5.

अनुविद्ध (anuviddha) *m.* **1** a type of playing of drum शुद्धानुविद्धं यद् वाद्यं सर्वातोद्येषु दृश्यते। परस्परानुवेधेन सोऽनुविद्ध इति स्मृतः NāṭyaŚā. 34. 197; AbhinBhā. iv. 446. 16 (*on* 34. 197); **2** name of a people (in the north east of India) एकचरणानुविश्वाः (v.l. एकचरणानुविद्धाः Ed. MB. 1981 A.D.) सुवर्णभूर्वसुवनं दिविष्ठाश्च BṛSaṁ. 14. 31.

अनुविद्धता (anuviddha-tā) *f.* the state of being connected or associated with अनुविद्धता संश्लेषलक्षणार्थेनैव विज्ञानस्य नास्ति NyāyVārPari. 544. 4.

अनुविद्धत्व (anuviddha-tva) *n.* the state of being connected or associated with प्रत्येकमनुविद्धत्वादभेदेन मृषा मतः। भेदो यथा तरङ्गाणां भेदाद्भेदः कलावतः BrahmSi. 72. 15.

अनुविद्धप्रतीति (anuviddha-pratīti) *f.* cognition of (something as being) connected or continued (नित्यमेकमनेकसमवायि सामान्यम्) इति शब्देनानुविद्धप्रतीतिर्वा, एकेन गवादिशब्देनानुवृत्तप्रतीतिर्वा विवक्षिता NyāySīA. 266. 4.

अनुविद्धविपञ्चीघोषा (anuviddha-vipañcīghoṣā) *adj.* (*f.*) whose music of lute is accompanied by आकर्ण्यमानगीतानुविद्धविपञ्चीघोषाम् ... कन्यका ददर्श Kād. 131. 10.

अनुविद्धा (anuviddhā) *f.* name of one of the thirteen daughters of Dakṣa, and wife of Kaśyapa दक्षः प्रजापतिः ....। कश्यपाय ददौ देवि स तु कन्यास्त्रयोदश। ... दितिश्च। अनुविद्धा सिता चैव SkandP. vii (1) 199. 12.

अनुविद्धामोद (anuviddhāmoda) *adj.* who is full of joy अनुविद्धामोदस्य ... मूर्धा ... सिन्धुपतेः ... समालबि (अर्जुनेन) YudhiVi. 7. 122.

[1]**अनुविद्य** (anuvíd-ya) *ger.* **A** having found or discovered तं देवा अनुविद्यानयन् KāṭhS. 25. 7 (ii. 111. 14); KapiKaS. 39. 5 (217. 12); जानुदघ्नं खेयमनुविद्यैवेतान्निवपति KāṭhS. 26. 1 (ii. 120. 4); KapiKaS. 40. 4 (226. 7); देवा अनुविद्य त्वचमेवावच्छायाजहुः ŚatBr. I. i. 4. 1; I. ii. 3. 1; ŚatBr. (K.) II. ii. 1. 15; एतद्वाऽएनं देवा अनुविद्यैभ्यो लेकेभ्योऽखनन् ŚatBr. VI. iii. 1. 36; तमृत्विजं वृण्वीतानुविद्यो (v.l. अनुविद्य) ह वा अन्ये देवयजने यजन्ते एते नु ह्यनुविद्य यजन्ते। VādhūŚS. iv. 18. 22-23; **B** having recovered or got back वरुणात् ... भर्गोऽपचक्राम ... तमनुविद्य तमात्मन्यकुरुत ŚatBr. (K.) VII. iv. 1. 2; **C** having obtained यो दशपुरुषं सोमपीथादव्यवच्छिन्नः स भक्षस्य कर्ता। दशम्यां ह्यन्विन्दन्। तदनुविद्यानिना पर्यैन्यत JaimiBr. 2. 201.

[2]**अनुविद्य** (anuvid-ya) *ger.* **A** having known or realised यदेवास्यात्र शतं यदभिचरितं तदनुविद्योद्वपति KāṭhS. 25. 9 (ii. 116. 5); KapiKaS. 40. 2 (222. 20); जाल्म ते जीवनं भूयाद् यो नो गा अनुविद्य ता न प्रावोचः JaimiBr. 2. 440; 3. 64; सुधियः ... अनुविद्य गताग्रभूमिकाम् अधिविन्देयुः ... श्रियम् Yādavā. 9. 65; **B** having meditated upon य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् ChāndoU. viii. 1. 6 (Śaṅ. आत्मानं शास्त्राचार्योपदेशम् ... स्वात्मसंवेद्यतामापाद्य); स सर्वांश्च लोकानाप्नोति ... यस्तमात्मानमनुविद्य विजानाति ChāndoU. viii. 12. 6; viii. 5. 2; श्रवणमननमनुविद्य ब्रह्मानुभूय ... तेषां कामेषु चरणं भवति Bhām. 211. 1 (*on* i. 3. 14); ध्यानोपकारकत्वात् अनुविद्य विज्ञायेत्यनूद्य प्रज्ञां कुर्वीत विजानातीति ध्यानं विधीयते BrahmSūBh. (Rā.) 8. 21 (*on* i. 1. 0); सत्यकामादीन् गुणान् शास्त्राचार्योपदेशमनुविद्य अनुभूय ये व्रजन्ति परलोकम् PrakaVi. 245. 21; ये उपासका आत्मानं परमेश्वरं दहराख्यम् एतांस्तद्गुणांश्चानुविद्यानुभूय परलोकं व्रजन्ति VedāntKau. 90. 8 (*on* i. 3. 14); **C** having thought or considered पञ्चशिखेन तमणुं दुरधिगमत्वादात्मानम् अहंकारास्पदमनुविद्य अनुचिन्त्य अस्मीत्येवं तावज्ञानीत TattvVai. 41. 30 (*on* 1. 36)

अनुविद्वस् (anu-vidvás) *adj.* [P. vii. 1. 36; vi. 2. 139] who has known subsequently क्रव्याद्यानग्निरन्तिकादनुविद्वान्वितावति AV. xii. 2. 38; xii. 2. 52; अग्ने ... सप्त हौत्रा अनुविद्वान् सप्त योनीरापृणस्वा घृतेन KāṭhS. 7. 14 (i. 77. 13); 8. 3 (i. 86. 10); 18. 4 (i. 269. 8); KapiKaS. 6. 8 (68. 4) (*but* PW. MW. having found); सुप्त तें अग्ने समिधः ... सप्त धाम प्रियाणि। सप्त होत्राः अनुविद्वान् TaiBr. III. xi. 5. 1 (BhaṭṭaBhā. अनुक्रमेण विद्वान्); एष वै देवाननुविद्वान् यदग्निः स एनाननुविद्वाननुष्ठ्या यक्षत् ŚatBr. I. v. 1. 6; ŚatBr. (K.) II. iv. 3. 4.

अनुविध् (anu-vidh-) I. Ā. to make obeisance again, to worship तस्मै नमो भगवतेऽनुविधेम तुभ्यम् BhāgP. iii. 9. 4; cf. **अनुव्यध्**.

अनुविध (anu-vidha) *adj.* [*f.* -ā] **1A** being regular, being in due order एतामेवानुविधां संहितां संधीयमानां मन्यते ŚāṅkhāĀ. 8. 4 (33. 10); **1B** conforming or adhering to वत्सारभूतं सकलं धरित्रीं मोदप्रयेणानुभूतमनुविधम् ... बिभर्ति तस्मै सुरेशाय ... स्वाहा PāramāU. 8. 1 (comm. अनुग्रविद्धम्) (*but* Viśva. *adv.*); **2** following commands, obedient दूतय इव श्वसन्त्यसुभृतो यदि तेऽनुविधा महदहमादयोऽण्डमसृजन् यदनुग्रहतः BhāgP. x. 87. 17 (*but* Apte one who imitates, a devotee)

अनुविधम् (anuvidham) *adj.* in due order, duly एतामनुविधं संहितां संधीयमानां मन्ये AitĀ. III. ii. 3. 13.

अनुविधा (anu-vidhā-) III. U. (IV. Ā. mostly in Epics and Purāṇas) **1A** to arrange accordingly or in order (pass.) to be arranged accordingly or in order **B** to distribute successively (pass.) to be distributed successively **2Ai** to follow after, to imitate (pass.) to be imitated **ii** to do or to effect subsequently **Bi** to abide by, to obey **ii** to practise **C** to follow or to act in accordance with (pass.) **i** to be followed, to be acted in accordance with **ii** to be obeyed **D** (pass.) to be made, to be formed **3A** to follow, i.e. to admit or accept **B** to follow, to go after **4** to command, to control **5A** to establish, i.e. to prescribe or to lay down (pass.) to be prescribed or

laid down **B** (pass.) to be described **C** to ordain again **6A** to follow closely, to be in conformity with, to conform to (pass.) to be followed closely, to be conformed to **B** to bring about, to accomplish **C** to become reconciled **7** (pass.) to be assumed, to be taken up (qualities) **8** to regulate **9** to be present, to exist **10** to determine **11** to perform **12** to treat **13** to depend on **1A** to arrange accordingly or in order दक्षिणा मा ... पातु सव्यतः। पश्चाद् अनव्या(?नृव्य)धात् AV. (P.) vii. 15. 1; **1A** (pass.) to be arranged accordingly or in order यद्देषा विधा। विधीयतेऽर्के एव तदर्क्यमनु विधीयते TaiS. V. iii. 4. 7; MaiS. iii. 2. 10 (iii. 31. 3); द्वादश सीता भवन्ति। द्वादश मासाः संवत्सरः संवत्सरस्य वा एषं विधामनुविधीयते MaiS. iii. 2. 4 (iii. 21. 6); **1B** to distribute successively अक्षरं त्र्यक्षरमुच्छिष्यते तदेवोत्तरं त्रिरात्रमनुविदधाति PañcBr. x. 5. 10; अक्षरमेव त्रियक्षरं परिशिष्यते। तदेवोत्तरं त्रियहमनुविदधाति JaimiBr. 3. 6; तदेवोत्तरं त्र्यहमनुव्यदधात् JaimiBr. 3. 327; 3. 57; (pass.) to be distributed successively अहर्मात्रासमानि सवनानि अभ्युद्ध्रियन्ते। आर्भवच्छन्दांसि अनुविधीयन्ते NidāSū. 44. 7(3. 1); **2Ai** to follow after, to imitate इष्टीनामानुपूर्व्ये हविषां दैवत उच्चैरुपांशुतायां चाध्वर्युमनुविदधीत ŚāṅkhāŚS. xiii. 1. 3; xiii. 1. 6; यज्ञोपवीतप्राचीनावीतयोरध्वर्युमनुविदधीत LāṭyāŚS. v. 2. 1; DrāhyŚS. xiii. 1. 19; जितः स्वर्गस्तव भ्रात्रा भरतेन ...। वनस्थमपि तापस्ये यस्त्वामनुविधीयते Rāmā. iii. 15. 31; व्याप्तो भूभृत् सर्वत एषोऽनुविधत्ते। हर्षोत्फुल्ललोचनसंघस्य मघोनः Kapphiṇā. 6. 57; काचित्कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्त्रेन्दुलक्ष्मीः ŚiśuVa. 15. 96; KāvyPra. 372. 3; VyaktiVi. 61. 10; अपरा परागनिकरेण घनतरहरिद्रिताम्बरा ...। रमणीमनुव्यधित पीतवाससः ŚrīKaC. 9. 4; (pass.) to be imitated महाजनेन हि चरितमेषां दृश्यतेऽनुविधीयते च KāmSū. 288. 12 (5. 5); नीत्या येन (लक्ष्मदेवेन) मनुस्तथानुविदधे नासौ न वैवस्वतः। सर्व्वत्रापि सदाप्यवर्द्धत यथा कीर्तिर्न्नवैव स्वतः EI. ii. 186. 25; **2Aii** to do or to effect subsequently हृदयमनिशसक्तं त्वय्युरुस्नेहवत्त्वादगमनमनुविधत्ते यद्यपि प्रातिकूल्यम् RasSa. 238; **2Bi** to abide by, to observe तं चैव धर्मं पौराणं तिर्यग्योनिगताः प्रजाः। अद्याप्यनुविधीयन्ते कामद्वेषविवर्जिताः MahāBhā. i. 113. 6l; **2Bii** to practise प्रिये ... प्रसादय ... हरम्। अहं च तदाराधनावधानमनुविधास्यामि NalaCam. 2. 30 (51); रितम्भरादयश्च ... उपनिषद्देव्या संगतस्य भगवतः प्रबोधोदयमनुविधास्यन्ति PraboCan. 4. 4 (68. 5); **2C** to follow or to act in accordance with न क्रोधहर्षावनुविदध्यात् CaraS. i. 8. 27 (1941 Ed.); यादृशं च पुत्रमाशासीत तद्रूपवर्णचरितान् जनपदाननुचिन्तयेति स्त्री वाच्या। तज्जनपदाहारविहारोपचारपरिच्छदांश्चानुविदधीत AṣṭāSaṁ. i. 19. 13 (2. 1); यथा च देवी मदिरावती ... अस्मत्पूर्वपुरुषमहिषीणां महिमानमनुविधत्ते तथा विधेहि TilaMañ. 58. 20; प्रकृतिपुरुषकालव्यक्तमुक्ता यदिच्छामनुविदधति ĀtmaSi. 1. 8; कथं चैनमेकं (आत्मानम्) प्रेक्षापूर्वकारिणोऽप्यनुविदध्युः NyāyKuA. i. 24. 8; तथैवानुविधास्येऽहं शिष्यस्त्वं गुरुरप्यहम् AdhyāRā. ii. 2. 26; (pass.) **i** to be followed, to be acted in accordance with इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते। तदस्य हरते बुद्धिम् MahāBhā. iii. 202. 24; vi. 24. 67 =BhagGī. 2. 67; (Rā. अनुविधीयते पुरुषेणानुवर्त्यते) **ii** to be obeyed अनुशास्यश्च गुरुणा न चेदनुविधीयते (शिष्येण गुरुः) NāraSm. 143. 13; **2D** (pass.) to be made, to be formed संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री Kirātā. 9. 10; **3A** to follow, i.e. to admit or accept यस्तु निःश्रेयसं ज्ञात्वा ज्ञानं तत्प्रतिपद्यते। आत्मनो मतमुत्सृज्य लोकोऽनुविधीयते MahāBhā. xii. 94. 28; **3B** to follow, to go after करोति कुर्वतः कर्म छायेवानुविधीयते PadmP. ii.81.50; ii.94.20; **4** to command, to control स्थापनामथ देवानां न कश्चिदतिवर्तते। तिष्ठत्येकस्य च वशे तं चेदनुविधीयते MahāBhā. xii. 59. 137; **5A** to establish, i.e. to prescribe or to lay down एतान् शास्त्रविदः शास्त्रेणानुविदधते MahāBh. i. 9. 1 (*on* i. 1. 0); (pass.) to be prescribed or laid down एवं तर्हि छन्दसः क्सुरिति भाष्यकारस्य दर्शनं छन्दसि च दृष्टमनुविधीयते Pradī. v. 342A. 26 (*on* vi. 4. 110); **5B** (pass.) to be described नास्य कर्मणि जन्मादौ परस्यानुविधीयते BhāgP. ii. 10. 45 (Bhāvārthadīpikā अनुवर्ण्यते); **5C** to ordain again ईक्षत्यधिकरणेऽपि तदेवानुविदधाति ŚatDū. 242. 27; **6A** to follow closely, to be in conformity with, to conform to विकाराश्च प्रकृतीरनुविधीयन्ते NyāyBh. 146. 10 (*on* ii. 2. 44); व्यक्त्यल्पत्वमहत्त्वे च यद्यथानुविधीयते। तथैवानुविधानार्थं ध्वन्यल्पत्वमहत्त्वयोः ŚlokaVār. 7. 214 (784. 6); अस्ति च भावाभावाविपर्ययः। सोऽयं यस्य दोषमनुविधत्ते तदेवात्र करणम् NyāyKuA. ii (1). 241. 2; यत् यस्य अन्वयव्यतिरेकौ अनुविधत्ते तत्तद्धेतुकम् Kiraṇā. 43. 6; योऽलंकारो यदीयौ भावाभावावनुविधत्ते स तदलंकारो व्यवस्थाप्यते Kāvyānu. (He.) 351. 9; यतो यद्यस्यान्वयव्यतिरेकावनुविधत्ते तत्तस्य कार्यम् SyādvāMañ. 11 (26); NyāySu. (Ja.) 275.B.9 (*on* ii. 1. 2); (स्मृतिः) अनुभवयाथार्थ्यायाथार्थ्यमियमनुविधत्ते Upask. 408. 7 (*on* ix. 2. 6); (pass.) to be followed closely, to be conformed to तद्वैलक्षण्यादेव कार्याणां वैलक्षण्यम्। स्यादेतत्। सर्वेषामन्वयव्यतिरेकावनुविधीयेते HeuBiṬ. 94. 26; वाजसनेयके तु तदभावात् प्रसिद्धिप्राचुर्यमेवानुविधीयते ŚrutaPra. ii. 508. 34 (*on* iii. 3. 38); **6B** to bring about, to accomplish यत् यस्य नियममनुविधत्ते अव्यतिरिक्तं तत् तस्य कार्यम् PratyabhiVi. i. 233. 4 (*on* i. 5.8); दूरदूरतरादौ न महत्परिमाणप्रकर्षमनुविदध्यात् Kiraṇā. 52. 1; न ह्यकारणस्य प्रकर्षमकार्यमनुविधत्ते Kiraṇā. 277. 16; न ह्यकारणोत्कर्षमकार्यमनुविधत्ते TattvCin. i. 729. 9; **6C** to become reconciled शेषास्तु महाजनपरिग्रहादयः सर्वे अनुविधीयन्ते TantrVā. 75. 5 (*on* i. 3. 2); **7** (pass.) to be assumed, to be taken up (qualities) यदप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् नानुविधीयते सोऽतद्गुणः KāvyPra. 748. 2 (comm. गृह्यते); **8** to regulate, cf. **अनुविधातुम् 2**; **9** to be present, to exist, cf. **अनुविधान 4**; **10** to determine, cf. **अनुविहित 2**; **11** to perform cf. **अनुविधेय 4**; **12** to treat, cf. **अनुविधातव्य 2**; **13** to depend on, cf. **अनुविधान 3**; [(pass.) to be trained to follow rules, MW; Apte; to be trained to obey, Apte]

अनुविधा (anu-vidhā) *f.* rule or regulation, i.e. assignment प्लक्षद्वीपादिषु ... देशस्यानुविधानेन कालस्यानुविधाः स्मृताः BrahmāṇḍP. i. 19. 25.

अनुविधातव्य (anu-vidhātavya) *adj.* **1** to be done or performed श्रुतं भवद्भिर्वचनं समुद्रस्य महात्मनः। अत्र यत् सं(v.l. यदत्रानु°)विधातव्यं तत्सर्वं संविधीयताम् Rāmā. vi. 280* (11) (*but* PW.; MW. to be performed according to an order); **2** to be treated न च ... महाजनद्वेषिणां वाप्यौषधमनुविधातव्यम् CaraS. iii. 8. 13 (1941 Ed.)

अनुविधातुम् (anu - vidhātum) *inf.* **1** to follow closely, i. e. to conform (स्पर्शः) रूपानुविधायी रूपमनुविधातुमनुगन्तुं शीलमस्य यत्र रूपं तत्र नियमेन तस्य सद्भावात् NyāyKa. 106. 14; **2** to regulate, i. e. to sustain क्व गन्तासि भ्रातः कृतवसतयो यत्र धनिनः किमर्थम् प्राणानां स्थितिमनुविधातुम् ŚāntiŚ. 1. 17.

अनुविधातृ (anu - vidhātṛ) *adj.* who regulates अहो सर्वं सुघटितमनुविधात्रा विधात्रा PratāYaBhū. 136. 1.

अनुविधान (anu - vidhāna) *n.* **1A** act of abiding, obedience **B** following, i.e. conformity **2** assumption, accomplishment **3** dependance **4** presence, existence **5** prescription, reference **1A** act of abiding, obedience भवतोऽनुविधानेन राज्यं नः पश्यतां हृतम्। अहार्यमपि शक्रेण गुप्तं गाण्डीवधन्वना MahāBhā. iii. 34. 6; **1B** following, i.e. conformity निमित्तानुविधाने च द्रव्यधर्मानपेक्षणात्। गुणप्रधानभावेन क्रियायोगो न कल्पते VākyaPa. 3(14). 204; 3 (14). 309; प्रागसत्त्वाभिधायित्वं समासे द्रव्यवाचिता। निमित्तानुविधानं च न सर्वत्र स्वभावतः VākyaPa. 3 (14). 308; क्रियान्वयव्यतिरेकानुविधानात्क्रियालम्बन एवायं प्रत्ययो न संयोगविभागालम्बनः NyāyMañ. i. 122. 10; तदनेन जगत्कारणत्वमस्य दर्शितं, शक्तिज्ञानभावाभावानुविधानात्कारणत्वभावाभावयोः Bhām. 60. 21 (*on* i. 1.1); प्रमातृप्रमेयान्वयव्यतिरेकानुविधानमप्यस्ति प्रमाया अन्वयव्यतिरेकयोः TātpaṬ. (Vā.) 24. 18 (*on* i. 1.1); ननूपादानसहकारिणोरन्वयव्यतिरेकानुविधानस्य कार्यं प्रति तुल्यत्वात्को भेदः TarkBhā. (Mo.) 15. 4; यो हि जानाति शक्नोति च स करोति नेतर इत्यनुविधानात् VedāntKa. 45. 3 (*on* i. 1.1); भाट्टास्तु ... इन्द्रियान्वयव्यतिरेकानुविधानमाश्रयग्रहणोपक्षीणमित्याहुः MaṇiKa. 24. 5; **2** bringing about, accomplishment संसर्गाल्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितपित्तमित्याचक्षते CaraS. ii. 2. 5; यद्यपि सकलसमर्थहेत्वनुविधानमस्ति तथापि स्फुटं तावद्घटस्यानुविधानमिति तदेव तदाकारप्रयोजकमिष्यते KhaṇḍanKhā. 1130. 10; **3** dependance आकाशस्य। तत्त्वं भावेन। ... तदनुविधानादेकपृथक्त्वं चेति VaiśeSū. ii. 1. 31; (कालस्य) तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः। काललिङ्गाविशेषादेकत्वं सिद्धम्। तदनुविधानात्पृथक्त्वम् PadārthaSaṁ. 63. 23 (NyāyKa. एकत्वस्य पृथक्त्वेनानुविधानं साहचर्यनियमः तेनैकत्वादेकपृथक्त्वसिद्धिः); प्लक्षद्वीपादिषु ... देशस्यानुविधानेन कालस्यानुविधाः स्मृताः BrahmāṇḍP. i. 19. 25; न चाग्नीन्धनादिभावे नियतसंनिधेरदृश्यात्मनः कुतश्चित् धूमस्य भावः स्यात् इत्याशङ्कनीयम्। अग्नीन्धनादिभेदानुविधानाद्धूमस्य HetuBiṬ. 45. 25; अन्वयव्यतिरेकानुविधानमेव हेतुमत्ताव्यवहारनिबन्धनमभ्युपेयते सौगतैरपि HetuBiṬ. 76. 17; पुमांसमेव श्लाघते साधु साधुना तेनोपदिष्टमित्यतः पुरुषदोषान्वयानुविधानात्तदभावकृत एव आप्तेषु तूष्णीमासीनेषु विभ्रमानुत्पाद इति न संदिग्धो व्यतिरेकः NyāyMañ. i. 145. 28; असमीचीने ह्यनुभवे स्मृतिरपि तथैव। नन्वेवमनुमानमप्यप्रमाणमापद्येत, मूलप्रत्यक्षानुविधानात् NyāyKuA. ii (2). 7. 5; किं चेदमनुविधानं, किमालोकावरकातपत्राद्यनुविधानं किंवा निवर्तकप्रदीपाद्यनुविधानम् TattvPradī. (C i.) 31. 9; **4** presence, existence या चैषां विषयभेदेन गुणमात्रे गुणिनि च वृत्तिस्वलिङ्गसंख्यानुविधानं च। एतदपि सर्वं स्वाभाविकमेव KāśiVṛ. *on* v. 1. 59; स्वभावत एव गुणिनि वृत्तिः स्वलिङ्गसंख्यानुविधानं चेति। गुणिन्यपि वर्तमानानां

यथोर्लिङ्गसंख्ययोर्यदनुविधानमनुवर्तमानमेतदपि सर्वं स्वाभाविकम् NyāsA. ii. 32. 5 (*on* v. 1. 59); यद्यपि सकलसमर्थहेत्वनुविधानमस्ति तथापि स्फुटत्वाद् घटस्यानुविधानम् KhaṇḍanKhā. 1130. 9; समस्तकारणान्तरानुविधानवद् घटानुविधानस्य प्रामाणिकत्वाविशेषेण किं स्फुटत्वास्फुटत्वाभ्यां स्यात् KhaṇḍanKhā. 1130. 10; **5** prescription, reference (दशाहं शावमाशौचं सपिण्डेषु विधीयते। अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा) निवृत्तचौडकानां त्रिरात्रादिति विरोधेन विकल्पो युक्तः। स्वशब्देन त्रिरात्रस्यानुविधानात् ManuBh. i. 447. 19 (*on* 5. 59); एकत्वस्य पृथक्त्वेनानुविधानं साहचर्यनियमः NyāyKa. 65. 23 [acting conformably to order, obedience, MW.; acting in conformity to (orders etc.), Apte]

अनुविधानदर्शन (anuvidhāna - darśana) *n.* observation of following closely or conformity द्विविधं निदर्शनं साधर्म्येण वैधर्म्येण च। तत्रानुमेयसामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम् PadārthaSaṁ. 246. 15; अन्यथा कार्यात् कारणानुमानं क्वापि न स्यात् तज्जातीयानुविधानदर्शनात्सिद्धिरप्यत्रापि न वार्यते NyāyKuA. i. 70. 3.

अनुविधाननियम (anuvidhāna - niyama) m. rule of following closely or conformity रागद्वेषयोरनुविधाननियमात् प्रवृत्तिनिवृत्तिप्रयत्नयो रागद्वेषकारणकत्वम् NyāyKuA. i. 77. 1.

अनुविधानवत् (anuvidhāna - vat) *adv.* like conformity समस्तकारणान्तरानुविधानवद् घटानुविधानस्य प्रामाणिकत्वाविशेषेण किं स्फुटत्वास्फुटत्वाभ्यां स्यात् KhaṇḍanKhā. 1130. 10.

अनुविधानानुपलम्भ (anuvidhānānupalambha) *m.* non - availability of following closely or conformity कार्यान्नियतः पूर्वभावः। ... अन्यथा कार्यात् कारणानुमानं क्वापि न स्यात्, तेन तस्यानुविधानानुपलम्भात् NyāyKuA. i. 70. 2.

अनुविधानार्थम् (anuvidhānārtham) *adv.* for the sake of following closely or conformity व्यक्त्यल्पत्वमहत्त्वे च यद् यथानुविधीयते। तथैवानुविधानार्थं ध्वन्यल्पत्वमहत्त्वयोः ŚlokaVār. 6. 215 (784.7)

अनुविधानाविशेष (anuvidhānāviśeṣa) *m.* non - difference in dependance अक्षस्यापि तत्र कारणत्वं न स्यात् अनुविधानाविशेषात् KhaṇḍanKhā. 1219. 3.

अनुविधाय (anu - vidhāya) *ger.* **1** having followed or conformed to सर्वलोकमात्मानमनुविधायाहेदमेव पृथिव्या रूपमिदं दिवः AitĀ. III. i. 2. 11; **2A** having made arrangements, having arranged उत्पाद्य पुत्राननृणांश्च कृत्वा वृत्तिं च तेभ्योऽनुविधाय कांचित्। ... अरण्यसंस्थो मुनिवद् बुभूषेत् MahāBhā. v. 37. 35; **2B** having put together accordingly मुद्गपर्णी° ... °विडङ्गशुङ्गवेराणां यथाप्रमाणमनुविधाय दृषदि पेषयित्वा ... रसप्रायान्निर्यूहान्पुनरधिश्रयेत् Hastyāyur. 592. 27 (4.4); **3A** having followed or acted in accordance with व्याहतेऽप्यभिषेके मे परितापो न विद्यते। ... त्वमप्यनुविधाय माम्। प्रतिसंहारय क्षिप्रमाभिषेचनिकीं क्रियाम् Rāmā. ii. 19. 21; **3B** having performed (due rites), i.e. having honoured विधिवदनुविधाय (ऋषिजनाः) तेऽपि तं प्रविविशुराश्रमिणस्तपोवनम् BuddhaC. 7. 58; **4A** having laid down rules, i. e. having administrated justice पुरं विधायानुविधाय दण्डम् ...। राजा यथाप्नोति हि गामपूर्वाम् Saund. 17. 11; **4B** having assigned, having commanded (राजा) गुप्तकर्म समादिश्य चाराननुविधाय च। ... निःशङ्को योधयेदरीन् NītiPra. 6. 41.

अनुविधायिता (anuvidhāyi - tā) *f.* **1** the state of being in accordance with यद्यपि परोक्षार्थप्रतिपत्तौ गु[णभूतमनु]मानं तथापि वक्तुरभिप्रायानुविधायितया शब्दवृत्तेः तच्छब्देन परामृश्यते HetuBiṬ. 3. 10; **2** the state of being what follows closely or conforms to कुतः पूर्वदोषावसरः। स चावश्यमग्न्यादिभावाभावानुविधायितया तत्कार्यस्तद्भावव्यवहारस्यान्यत्रापि तन्निबन्धनत्वम् HetuBiṬ. 8. 10. येऽपि सन्तः कृतकास्तेषामपि मुद्गराद्यन्वयव्यतिरेकानुविधायितया विनाशस्य सहेतुकत्वात् HetuBiṬ. 76. 9.

अनुविधायित्व (anuvidhāyi - tva) *n.* the state of being what follows closely or is in conformity with न हि क्षणिकस्याक्षणिकं फलं युज्यते तदनुविधायित्वात् MaYānaSū. 151. 14 (18. 83); कारणानुविधायित्वादथ कारणपूर्वकाः। गुणास्तत्रोपलभ्यन्ते स्वजातिव्यक्तिहेतवः VākyaPa. 3 (9). 20; 3 (14). 24; निमित्तानुविधायित्वाद् ये धर्मा भेदहेतुषु। त आश्रयेऽपि विद्यन्त इति बुद्धिर्निवर्त्यते VākyaPa. 3 (14). 153; 3 (14). 239; तत्त्वविप्लवभयात्कश्चिद्यस्याश्रयो भूतो वृत्तेर्वृत्तिमाननुसर्तव्यः। स तु प्रदेश एवाप्रदेशस्यान्वयव्यतिरेकानुविधायित्वाप्रसिद्धेः TattvPradī. (A.) 205. 3 (*on* 2. 52); तयोः काव्यस्वरूपेणाभिमतयोः शब्दार्थयो रसोऽस्ति, न वा। नास्ति चेत्, गुणवत्त्वमपि नास्ति गुणानां तदन्वयव्यतिरेकानुविधायित्वात् SāhiDa. 13. 5.

अनुविधायिन् (anu - vidhāyin) *adj.* [*f.* - ī] **1** abiding or obedient सा स्त्री यानुविधायिनी Tantrākhyā. 24. 14; PañcT. 1. 82 (90. 14); Hitopa. 2. 128; Pañcā. 65. 12; SūktiRa. 181. 66; एष ग्रामोस्माभिः ... मातृशर्मणे ... संप्रदत्तस्तदेवमवधृताज्ञैर्भवद्भिर्यस्तदाज्ञारनुविधायिभिः प्रत्यहमुपस्थातव्यम् EI. xxiii. 60. 11; **2A** acting in accordance with पुरुषोत्तम इति भणितव्ये पुरुरवसीति निर्गता वाणी। भवितव्यानुविधायीनीन्द्रियाणि। न खलु तामभिक्रुद्धो गुरुः Vikramo. 3. 0 (7); **2B** imitating, resembling दलितकोमलपाटलकुड्मले निजवधूश्वसितानुविधायिनि। मरुति वाति विलासिभिरुन्मदभ्रमदलौ मदलौल्यमुपाददे ŚiśuVa. 6. 23; गणाश्चैव सुरास्तथा। नृत्यन्ति मावमुक्तास्तु हरस्यानुविधायिनः VāmaP. 69. 72; **3** following closely, conforming to सामान्यद्रव्यवृत्तित्वान्निमित्तानुविधायिनः। अयोगो लिङ्गसंख्याभ्यां स्याद् वा सामान्यधर्मता VākyaPa. 3 (14). 307; अवश्यं च विनाशो दण्डाद्यन्वयव्यतिरेकानुविधायी, दृष्टत्वात् HetuBiṬ. 96. 14; ध्वनीनां स्फोटव्यञ्जकत्वम् उपाधिभेदेन प्रतिभासमाना असत्याकाराश्च तेऽर्थप्रत्ययान्वयव्यतिरेकानुविधायिनो दृश्यन्ते NyāyMañ. i. 340. 17; यदप्यभाणि ... क्षणिकाः पदार्था इति तदपि यत्किंचिद् दण्डादिव्यापारान्वयव्यतिरेकानुविधायिनस्तत्कार्यस्य घटाद्यभावस्य प्रमापितत्वात् NyāyMañ. ii. 30. 15; को नु खल्वयमभिधाव्यापारः शब्दानाम्, न तावत्परिस्पन्दः, तस्य मूर्तानुविधायिनो द्रव्ये विभुनि विभुगुणे वा शब्दे मूर्त्यभावेनासंभवात् TattvBi. 158. 12; न च विभोरमूर्तद्रव्यानुविधायिनी गमनादिक्रिया युक्तिमती TarkBhā. (Mo.) 28. 2; 'न हन्तव्यानि हेतुभिः' इति वचनं तु सुगतागमादिव्यावृत्तिपरम् ... निरपेक्षस्यानुविधेयस्य वेदस्य सापेक्षाणामनुविधायिनामितरागमानां च साम्यानुपपत्तेः ŚrutaPra. ii. 339. 11 (*on* ii. 2. 42)

अनुविधाव् (anu - vidhāv-) I. P. **1** to flow through, to spread over आ तें सिञ्चामि कुक्ष्योरनु गात्रा वि धावतु। गृभाय जिह्वया मधुं ṚV. viii. 17. 5; **2A** to run after, i. e. to follow यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति KāṭhU. 4. 14 (Śaṅ. अनुविधावति। शरीरभेदमेव पृथक् पुनः पुनः प्रतिपद्यत इत्यर्थः) (*but* MW. to flow or run along); यथोदकं गिरौ सृष्टं सन्नुद्रेषु विधावति। एवं धर्मान् पृथक् पश्यंस्तामे(ने)वानुविधावति GuhyKāU. 43; **2B** to run away, to flee नूनं सिंहासनेश्वर्यास्त्वाज्ञां शिरसा वहन्। भयेन पयमानोऽयं सर्वा दिशोऽनुविधावति TripuVePāSt. 86.

अनुविधि (anu - vidhi) *m.* **1** operation in conformity (with what is found) सार्वधातुकार्धधातुकयोर्गुणो भवतीत्युपस्थितमिदं भवति क्ङिति नेति। अथवा छान्दसमेतद्दृष्टानुविधिश्च छन्दसि भवति MahāBh. i. 55. 3 (*on* i. i. 5); i. 121. 21 (*on* i. 1. 50); सुपः आत्मनः क्यच्क्याच्छ्रेति। अथवा छान्दसमेतत्। दृष्टानुविधिश्छन्दसि भवति न चात्र संप्रसारणं दृश्यते MahāBh. ii. 20. 15 (*on* iii. 1. 9); ii. 24. 11 (*on* iii. i. 13); पसिवशी छान्दसी। दृष्टानुविधिश्छन्दसि भवति MahāBh. iii. 11. 14 (*on* vi. 1. 6); iii. 220. 12 (*on* vi. 4. 128); iii. 422. 22 (*on* viii. 2. 108); **2** subsequent arrangement उक्ता लोकाश्च चत्वारो जनस्यानुविधिस्तथा। समासेन मया विप्राः BrahmāṇḍP. iii. 2. 46.

अनुविधित्व (anuvidhi - tva) *n.* the state of being the operation in conformity with दीधीवेव्योश्छन्दोविष[?य]त्वाद् दृष्टानुविधित्वाच्छन्दसोऽदीधेदवीवयुरिति च गुणदर्शनादप्रतिषेधः Vār. 1 *on* P. i. 1. 6.

अनुविधित्सा (anu - vidhitsā) *f.* desire to do or inflict retribution पुरुषः ... । नाप्नोति ... सर्वमायुः केनेह हेतुना। ... क्रोधश्चातिविवित्सा (v.l. °नुविधित्सा) च मित्रद्रोहश्च तानि षट् MahāBhā. v. 37. 9 (JñānDī. परेणाक्रुष्टस्तत्प्रतीक्रियेच्छा)

अनुविधीयमान (anu-vidhīyamāna) *adj.* [*f.* - ā] **1** being conformed to, being in conformity with तेषां पुरुषाणां प्रवृत्तयस्ताः पुरुषभेदमनुविधीयमाना उभयरूपा भवन्ति NyāyVār. 3. 1 (*on* i. 1. 1); पूर्वानुभवप्रसिद्धमनुविधीयमानं प्रत्यक्षमिव प्रत्यक्षम् NyāyVār. 18. 1 (*on* i. 1. 1); इयम् (स्मृतिः) ... तद्यथार्थत्वायथार्थत्वे अनुविधीयमाना ... यथार्थतया व्यवहर्तुं शक्यते NyāyKuA. ii (2). 7. 2; **2** following, acting in accordance with (ईश्वरः) अयं वस्तुस्वभावमनुविधीयमानः ... जगद्वैचित्र्यं विधत्ते TātpaṬ. (Vā.) 596. 9 (*on* iv. 1. 21); **3** being treated बलेनास्य बलमनुविधीयमानं प्रकोपाय कल्पते Hastyāyur. 390. 19 (3. 6); **4** being accomplished or brought about, cf. अनुविधीयमानता.

अनुविधीयमानता (anuvidhīyamāna-ta) *f.* the state of being what is being accomplished or brought about इन्द्रियसंस्कारयोः परस्पराधिपत्यं विश्व- ... (गन्धज्ञानस्य) ... कार्यानुविधीयमानतामात्रेत्रैयत्वात् भेदात् ... NyāyVārPari. 609. 6.

अनुविधीयमानत्व (anuvidhīyamāna-tva) *n.* the state of being what is being closely followed, i.e. being conformed to नानादेहोपाधिभेदमनुविधीयमानत्वाद् विविधाः ... भावाः MuṇḍUBh. 325. 3 (*on* ii. 1. 1)

अनुविधीयमानप्रकर्षता (anuvidhīyamānaprakarṣa-tā) *f.* the state of being the excellence which is being followed closely, i.e. being conformed to अनुविधीयमानप्रकर्षतया कारणैकार्थसमवेततया च त्रितयमिह प्रसक्तम् Kiraṇā. 214. 11.

अनुविधेय (anu-vidheya) *adj.* [*f.* -ā] 1A to be established, to be derived B to be established or prescribed C to be established, i.e. to be proved 2A to be followed, i.e. to be imitated B to be followed closely, i.e. to be conformed to C to be followed, i.e. to be observed 3 to be regulated (in service) 4A to be treated, to be administered Bi to be performed or to be carried out ii to be carried out continuously 5 to be obeyed 6 to be made, i.e. raised 1A to be established, to be derived (शब्दाः) यद्यप्यप्रयुक्ता अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः MahāBh. i. 9. 15 (*on* i. 1. 0); 1B to be established or prescribed, cf. अनुविधेयत्व 2; 1C to be established, i.e. to be proved, cf. अनुविधेयप्रज्ञत्व; 2A to be followed, i.e. to be imitated विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ŚatTrayī. 18; SubhāRaK. 37. 1; SaduktiKa. 301. 21; Subhāṣi. 280; 2B to be followed closely, i.e. to be conformed to गच्छति जीवद्देहे तदनुविधायिनः प्राणा अपि गच्छन्ति ...। स चैषामनुविधेयः सूक्ष्मो देहो भूतेन्द्रियमय इति गम्यते Bhām. 529. 2 (*on* iii. 1. 3); 2C to be followed, i.e. to be observed, cf. अनुविधेयाचारत्वासंभव; 3 to be regulated (in service) एतेषामवश्यमकामयमानापि वेश्यानुविधेया भवति DhūrtaViSaṁ. 22. 15; 4A to be treated, to be administered अथ यदा वातशोणितपित्तानां विकारैः पीड्यमानस्य दन्तिनः क्षीरपानमनुविधेयं भवति तदा जीर्णे कफप्रकोपे वा पयः पीत्वा क्षीरव्यापदमृच्छति Hastyāyur. 117. 4 (1. 16); व्यरत्नीनां स्नेहपानमनुविधेयं भवति Hastyāyur. 582. 3 (4. 4); 4Bi to be performed or to be carried out, cf. अनुविधेयत्व1; 4Bii to be carried out continuously, cf. अनुविधेयानुष्ठान; 5 to be obeyed, cf. अनुविधेयपुरुषाभिप्राय; 6 to be made, i.e. raised, cf. अनुविधेयप्रश्नावसर.

अनुविधेय (anuvidheya) *m.* regulator, i.e. speaker or chairperson अनुविधेयसंवरणं तु सर्वदानपेक्षितमेव विजयफलप्रतिपादनार्थत्वादनुविधेयस्य रागद्वेषरहितास्त्यवरा विषमसंख्याः सभ्याः स्युः NyāyPari. 170. 5; 181. 10; जल्पवितण्डयोर्नैतत् सर्वदा निग्रहस्थानं केवलं सभ्यानुविधेयानामुभयमतिमान्द्यनिरूपणायोपयुक्तम् NyāyPari. 209. 9.

अनुविधेयता (anuvidheya-tā) *f.* the state of being what is to be followed closely, i.e. to be conformed to पञ्चरात्रस्य तन्त्रान्तरैरनुविधेयतया तेभ्यो (आगमेभ्यो) वैलक्षण्यं वेदतुल्यत्वं च सिद्धम् ŚrutaPra. ii. 339. 9 (*on* ii. 2. 42)

अनुविधेयत्व (anuvidheya-tva) *n.* 1 the state of being what is to be performed or carried out लिङादेः ... येनास्यानुविधेयत्वात् फलकल्पकता भवेत्। तस्याप्या(?प्य)नुविधेयत्वे शब्दस्य न तदीयताम् NyāySu. (So.) 27. 4 (*on* i. 2. 7); 2 the state of being what is to be established or prescribed लिङादेः पुरुषार्थोपयिकत्वेनानुविधेयत्वात् प्रवर्तकत्वाव्याहतिः NyāySu. (So.) 30. 28 (*on* i. 2. 7).

अनुविधेयपुरुषाभिप्राय (anuvidheyapuruṣābhiprāya) *m.* intention or desire of the man to be obeyed (श्राविणः) शङ्खादिध्वनेरपि समयवशादनुविधेयपुरुषाभिप्रायविशेषरूपार्थावबोधादेव प्रवर्तन्ते NyāyMa. 182. 1; शङ्खध्वनौ चानुविधेयपुरुषाभिप्रायानुमापके व्यभिचारात् TattvPradī. (Ci.) 272. 13.

अनुविधेयप्रज्ञत्व (anuvidheyaprajña-tva) *n.* the state of having the intelligence which is to be established, i.e. proved किंचिन्मात्रान्यथाभावेऽपि विशिष्टवाक्यार्थसिद्धेरतिवादानुविधेयप्रज्ञत्वं विज्ञायते NyāyKu. 12. 12.

अनुविधेयप्रश्नावसर (anuvidheyapraśnāvasara) *m.* occasion for a question to be made, i.e. raised subsequently संभावितस्यापि वाद्यनुयोगापेक्षयानुद्भावने पञ्चमः पक्षः वादिनोः स्तम्भरूपमनुविधेयप्रश्नावसरमपेक्षमाणेषु षष्ठः TārkiRa. 316. 10.

अनुविधेयवचन (anuvidheya-vacana) *adj.* whose word is to be followed कविरनुविधेयवचनो भवतीति दर्शयति AbhinBhā. i. 34. 3 (*on* 1. 99)

अनुविधेयवर (anuvidheya-vara) *m.* best person who is to be obeyed औरसलक्षणे 'स्वक्षेत्रे' इति स्वग्रहणम्। क्षेत्रं च पुत्रिकापितुरेव। भर्ता हि तस्य चानुविधेयवर इति मातृकुले स्वामी ManuBh. ii. 280. 23 (*on* 9. 132)

अनुविधेयसंवरण (anuvidheya-saṁvaraṇa) *n.* selection of the regulator, i.e. speaker or chairperson अनुविधेयसंवरणं तु सर्वदानपेक्षितमेव NyāyPari. 170. 4; सभ्यानुविधेयसंवरणादिकमकृत्वा प्रयोगे वादारम्भो विपर्यासः NyāyPari. 195. 6.

अनुविधेयाचारत्वासंभव (anuvidheyācāratvāsambhava) *m.* impossibility of the state of being a custom which is to be followed, i.e. to be observed भवत्पक्षप्रवेशितविसंवादैक्याद्यानुविधेयाचारत्वासंभवादिति ŚatDū. 228. 19.

अनुविधेयानुष्ठान (anuvidheyānuṣṭhāna) *adj.* observance or performance of what is to be carried out continuously ज्ञानयोगयोग्यस्यापि अनुविधेयानुष्ठानस्य ... कर्मनिष्ठैव श्रेयस्त्वेनानुशिष्यते ŚatDū. 24. 16.

अनुविध्यत् (anu-vidhyat) *adj.* injuring or shooting (already wounded animal) afterwards नश्यतीषुर्यथाविद्धः खे विद्धमनुविध्यतः। तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ManuSm. 9. 43; अन्येनेष्वासेन विद्धं मृगमनुविध्यतः पूर्वस्य वेधकस्यात्र स्वाम्यम् ManuBh. ii. 253. 12 (*on* 9. 43)

अनुविध्यमाना (anu-vidhyamānā) *adj.* (*f.*) being penetrated, i.e. soaked with जम्बूनदीरोधसोर्या मृत्तिका तीरवर्तिनी। जम्बूरसेनानुविध्यमाना वाय्वर्कयोगतः। विद्याधरामरस्त्रीणां भूषणं विविधं महत् DevīBhāP. viii. 6. 10.

अनुविनद् (anu-vinad-) I. P. (*caus.*) to make resonant or to echo or to resound, MW.; cf. अनुविनादयत्.

अनुविनम् (anu-vinam-) I. P. to bend down afterwards अत्राप्युत्प्रेक्षा भवन्ति। तं यदि ज्वालोर्ध्वमभ्युज्ज्वलेद् देवलोकमभ्यजैषीदित्येनं जानीयात् ... अथ यदीमामनुविनमेदिहैवेत्येनं जानीयात् ĀgniveGS. iii. 6. 4 (153. 10)

अनुव्यवसायवादिन् (anuvyavasāya-vādin) *m.* who upholds the theory of after-cognition or recognition अनुव्यवसायवादिनं प्रत्यप्ययं (सिद्धमिति वचनस्य) प्रयोगो न स्यात् TattvPradī. (Ci.) 7. 3.

अनुव्यवसायविरोध (anuvyavasāya-virodha) *m.* contradiction to after-cognition or recognition विशिष्टधीकारणज्ञानविषयत्वे सति प्रत्याय्यव्यावृत्ति-समानाधिकरणं विशेषणमिति। तन्न। नीलमुत्पलमित्यादावनीलानुल्लेखे ... नीलं जानामीत्यनुव्यवसायविरोधात् TattvCin. i. 828. 5; न च तद्विशेषणज्ञानजन्यत्वं तत्प्रकारकत्वम् ... तद्वैशिष्ट्यस्याभानेऽनुव्यवसायविरोधस्योक्तत्वात् Nyāyāmṛ. 424A. 5.

अनुव्यवसायविशेष (anuvyavasāya-viśeṣa) *m.* particular kind of consciousness of perception of sentiments or relishing of dramatic repersentation उपायसंवेदनालाभात् तदिदमनुकीर्तनमनुव्यवसायविशेषो नाट्यापरपर्यायः AbhinBhā. i. 36. 19 (*on* 1. 107)

अनुव्यवसायविषय (anuvyavasāya-viṣaya) *m.* object of after-cognition or recognition इदंत्वरजतत्ववैशिष्ट्यं पुरोवर्तिनि नानुव्यवसायविषय इति न स्वतःप्रामाण्यग्रहः TattvCin. i. 232. 2.

अनुव्यवसायविषयत्व (anuvyavasāyaviṣaya-tva) *n.* the state of being the object of after-cognition or recognition अस्मदाद्यैन्द्रियकप्रमित्यविषय-त्वविवक्षायाम् - अहम् इन्द्रियं जानामि इत्यनुव्यवसायविषयत्वेन उक्तदोषाविशेषः TarkSaṁ. (Ā.) 34. 18; न च व्यवसायस्य ज्ञानत्वे घटविषयकत्वे च यथानुव्यवसायविषयत्वान्न संशयस्तथा प्रामाण्येऽपि न स्यात् ... इति वाच्यम् TattvCin. i. 223. 1; वह्नित्वस्य अनुव्यवसायविषयत्वे स्वतःप्रामाण्यग्रहापत्तेः TattvCin. i. 269. 6.

अनुव्यवसायविषयत्वानुपपत्ति (anuvyavasāyaviṣayatvānupapatti) *f.* untenability of the state of being the object of after-cognition or recognition न हि (स्मरणे) तत्रानुमानव्यवधानमस्ति, तथा सति स्मरणस्यातीत-त्वेनानुव्यवसायविषयत्वानुपपत्तेः TattvPradī. (Ci.) 231. 8.

अनुव्यवसायवेद्यत्व (anuvyavasāyavedya-tva) *n.* the state of being knowable through the after-cognition or recognition नापि द्वितीयः ... पूर्वत्रावेद्यत्वविरोधः, अनुव्यवसायवेद्यत्वपक्षपातात् ŚatDū. 80. 8.

अनुव्यवसायसाक्षिक (anuvyavasāya-sākṣika) *adj.* having after-cognition or recognition as the witness (उपाधेः) तस्या अविषयत्वेनानुव्यवसाय-साक्षिककार्यगतविशेषीभवनासामर्थ्यात् KhaṇḍanKhā. 1253. 6; इदं रजततया जानामी-त्यनुव्यवसायसाक्षिकमेवान्यस्यान्यथा भानम् TattvCin. i. 529. 3.

अनुव्यवसायसाध्य (anuvyavasāya-sādhya) *adj.* to be accomplished through after-cognition or recognition शिरोमणिस्तु - दुःखध्वंसो दुःखानु-व्यवसायसाध्यः MaṇiKa. 60. 1.

अनुव्यवसायसामग्री (anuvyavasāya-sāmagrī) *f.* totality of causes of after-cognition or recognition अनुव्यवसायसामग्र्या असामर्थ्यस्य ... कल्पनं अभिनिवेशेन स्वबुद्धिविडम्बनामात्रम् JñānBiPra. 12. 31; ज्ञानग्राहिकाया अनुव्यवसायसामग्र्याः प्रामाण्यग्रहणेऽसामर्थ्यं कल्प्यत इति न स्वतस्त्वम् MaṇiKa. 8. 6.

अनुव्यवसायसिद्ध (anuvyavasāya-siddha) *adj.* [*f.* -ā] established through after-cognition or recognition 'घटपटौ भिन्नौ जानामी'ति घटपट-भेदधीः स्वप्रकाशा वा, अनुव्यवसायसिद्धा वा ... न स्वप्रतियोगिकभेदविषया AdvaiSi. 516. 21; अनुमितिः प्रत्यक्षमेवेति चार्वाकाः। तन्न 'अनुमिनोमि' इत्यनुव्यवसायसिद्धस्यानुमितित्वस्य प्रत्यक्षत्वसामानाधिकरण्ये मानाभावात् MaṇiKa. 30. 4.

अनुव्यवसायसिद्धत्व (anuvyavasāyasiddha-tva) *n.* the state of being what is established through after-cognition or recognition स्वप्रतियोगिकसंयोगानुयोगित्वसंबन्धेन घटादिप्रकारताकज्ञानस्थले तादृशसंसर्गताद्यस्य अनुव्यवसायसिद्धत्वात् GuruCandr. i. 235. 21; अनुव्यवसायसिद्धत्वादिपक्षयोर्व्यक्ति-भेदस्य पराभ्युपगतत्वेऽपि न क्षतिः GuruCandr. ii. 239. 7.

अनुव्यवसायस्वीकार (anuvyavasāya-svīkāra) *m.* acceptance of after-cognition or recognition अनुव्यवसायस्वीकारो व्यर्थः व्यवसायस्य

स्वप्रकाशत्वसंभवात् LaCandr. 770. 37.

अनुव्यवसायात्मक (anuvyavasāyātma-ka) *adj.* 1 of the nature of consciousness of perception (of sentiments) or of relishing of dramatic representation अनुव्यवसायात्मकं कीर्तनं रूषितविकल्पसंवेदनं नाट्यम् AbhinBhā. i. 37. 23 (*on* 1. 107); 2 of the nature of after-cognition or recognition निरुक्तं तु ज्ञानाज्ञानमनुव्यवसायात्मकं भिन्नमेवेति स्वीक्रियते SetuBa. 271. 5.

अनुव्यवसायादिक (anuvyavasāyādi-ka) *adj.* after-cognition or recognition etc. अनुव्यवसायादिकम् ... विषयविषयिणोरात्मव्यवसाययो (र्व्यवसायानुव्यवसाययो)रव्यभिचारमेकहेलया दर्शयतीति नापरापेक्षा NyāyKu. 19.6.

अनुव्यवसायादिहेतुत्व (anuvyavasāyādi-hetutva) *n.* causality of the after-cognition or recognition etc. उपलक्षितस्य ज्ञानस्य च हर्षभयानुव्यवसायादिहेतुत्वेऽप्युपलक्षणस्य तस्य हेतुत्वाभावात् ŚatDū. 133. 14.

अनुव्यवसायानङ्गीकार (anuvyavasāyānaṅgīkāra) *m.* non-acceptance of after-cognition or recollection न च - प्रत्यक्षयोग्यार्थानुमापकं दृष्टम् इति युक्तं, सामान्यतोदृष्टस्यापि तथात्वात् ... तदितरत्वविशेषणस्य अनुव्यवसायानङ्गीकारपक्षे - व्यर्थत्वात् TarkSaṁ. (Ā.) 93. 27.

अनुव्यवसायानुपपत्ति (anuvyavasāyānupapatti) *f.* untenability of after-cognition or recognition न च लक्ष्यार्थस्य शाब्दबोधविषयत्वानुपगमे तदुपरागेण शृणोमीत्यनुव्यवसायानुपपत्तिरिति वाच्यम्, इष्टत्वाद्, विधेयोपरागेणैव तथाप्रत्ययात् ŚaktiVā. 24. 18.

अनुव्यवसायानुरोध (anuvyavasāyānurodha) *m.* [Abl.]in accordance with after-cognition or recognition सकलधूमादीनां प्रत्यक्षे भानं किमनुमित्यादिकार्यानुरोधात्, अनुव्यवसायानुरोधाद्वा। ... न च - 'धूमं जानामी'त्यनुव्यवसाये सर्वधूमभानमिति वाच्यम्, 'इमं धूमं जानामि न त्वेतदन्य'मिति व्यवहारस्य सर्वसिद्धत्वेन समाधानस्य तु तुल्यत्वात् LaCandr. 345. 28.

अनुव्यवसायान्तरापेक्षा (anuvyavasāyāntarāpekṣā) *f.* expectancy for another after-cognition or recognition तमेव भान्तमनुभात्येतत्समस्तं जगदित्याचार्यभगवत्पादाः। ... औपनिषदैस्तु अनुव्यवसायेऽपि ... ज्ञानभासनं तु ब्रह्मणैवेति नानुव्यवसायान्तरापेक्षानवस्थाकलुषितेत्यास्थीयते SetuBa. 271. 9.

अनुव्यवसायापत्ति (anuvyavasāyāpatti) *f.* undesired contingency of after-cognition or recognition न्यायमते पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः। असंनिकृष्टपक्षकानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम् VedāntPari. 57. 1.

अनुव्यवसायापेक्षा (anuvyavasāyāpekṣā) *f.* expectancy for after-cognition or recognition घटमहं जानामीत्येव ज्ञानाकारात् ज्ञानाभासनायानुव्यवसायापेक्षायां दीपभासनाय दीपान्तरापेक्षापत्तेः LalitāSaBh. 52. 30 (*on* 87)

अनुव्यवसायाभाव (anuvyavasāyābhāva) *n.* absence of after-cognition or recognition सर्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसायः पश्चान्मनसानुव्यवसायः उपहतेन्द्रियाणामनुव्यवसायाभावात् NyāyBh. 15. 5 (*on* i. 1. 4); ज्ञातुमिच्छामीत्यनुव्यवसायाभावेऽपि स्थाणुरयमित्यर्थ(न्वय)प्रत्ययो भवति NyāyKuA. ii (1). 209. 1; तदभावश्च (=प्रत्यक्षभ्रमप्रयोजकदोषविशेषाभावश्च) तत्र वह्निं पश्यामीति अनुव्यवसायाभावात् वह्निमनुमिनोमि इत्येवानुव्यवसायदर्शनाच्च कल्प्यते Pūrvotta-VāNaMā. 354. 6; न च - तन्मते (तार्किकादिमते) सर्वस्य ज्ञानस्यानुव्यवसायाभावेनोक्तविषयत्वासंभवात् संशयादिविषयत्वे ज्ञानतादात्म्यमेव विरोधित्वेन कल्प्यम् LaCandr. 469. 29.

अनुव्यवसायायोग (anuvyavasāyāyoga) *m.* untenability of after-cognition or recognition नासतः ख्यातिरिति चेन्न रूप्यतादात्म्यस्य रूप्यत्वसंसर्गस्य चेदंशनिष्ठत्वेनाग्रहणे ... इदं रूप्यत्वेन ज्ञातमित्यनुव्यवसायायोगात् पुरोवर्तिनिष्ठाभेदाग्रहे प्रवृत्त्यनुपपत्तेश्च सन्मात्रविषयकत्वे अप्रामाण्यायोगाच्च Nyāyāmṛ. 424A. 2.

अनुव्यवसायाविषयत्व (anuvyavasāyāviṣaya-tva) *n.* the state of not being the object of after-cognition or recognition तदभाववत्त्वस्य भ्रमानुल्लिखितत्वेनानुव्यवसायविषयत्वात् TattvCin. i. 176. 1.

अनुव्यवसायासिद्धि (anuvyavasāyāsiddhi) *f.* non-establishment of after-cognition or recognition विषयज्ञानादनुव्यवसायस्य कर्मक्रियालक्षणवैलक्षण्योपलब्धियोग्यस्य तथानवसायात्स्मरणाभिमानो दुरारोप इति मतम्, तन्न। व्यवसायस्मरणानुमितानुव्यवसायगोचरज्ञाने सति तथा अनुव्यवसाया(ऽनवसाया)-सिद्धेः NyāyKu. 80. 1.

अनुव्यवसायिन् (anu-vyavasāyin) *adj.* which has (or produces) after-cognition or recognition तद्द्वयालम्बना एता मनोऽनुव्यवसायि सत्। करोति मातृव्यापारमयीः कर्मादिकल्पनाः ĪśvaPraSū. ii. 2. 3.

अनुव्यवसायेतर (anuvyavasāyetara) *adj.* other than after-cognition or recognition अनुव्यवसायेतरास्मदादीन्द्रियकबुद्धयगोचरत्वाभिप्रायेणातीन्द्रियत्वविशेषणमिति चेत्। न। प्रमाणान्तरोपनीतविशेषणावगाहिविशिष्टज्ञानवादे सर्वेषाम-पीन्द्रियकत्वसंभावनया पूर्वोक्तदोषानुत्तारात् TattvPradī (Ci.) 133. 6.

अनुव्यवसायोत्पत्तिवेला (anuvyavasāyotpatti-velā) *f.* time of origination of after-cognition or recognition अनुव्यवसायोत्पत्तिवेलायां तथा व्यवसायो न प्रतीयत इति चेन्न, अनुव्यवसायगोचरानुमानगोचरज्ञेयज्ञानाकारस्यैव तत्राप्यारोपात् NyāyKu. 80. 1.

अनुव्यवसीयमान (anu-vyavasīyamāna) *adj.* [*f.* -ā] being referred to by after-cognition or recognition उपलभ्यमानः शब्दो वीणाकार्यः एवंभूतशब्दत्वात् इयमनुव्यवसीयमाना बुद्धिर्द्रव्याश्रिता गुणत्वात् कार्यत्वादिति साध्यसाधनभेदेन वैयधिकरण्येनेत्यर्थः Kiraṇā. 208. 10; अनुमितिज्ञानं ह्यर्थस्य तथात्वं व्यवच्छिन्ददेवोत्पद्यते वह्निमानेवायमिति, तथा च अनुव्यवसायेनानुव्यवसीयमानमिदं स्वस्यार्थावधारणात्मकमेवावसीयते NyāyVārPari. 113. 4; दृष्टो ह्यस्यानुव्यवसीयमानज्ञानविशेषणे घटादौ व्यापारः NyāyVārPari. 632. 8; मनसा ह्यनुव्यवसीयमानज्ञानलक्षणविशिष्यसंनिकृष्टेनासंनिकृष्टो घटादिरवच्छेदकतया प्रतीयते NyāyVārPari. 633. 1; परमाण्वादिबुद्धावनुव्यवस्यमानायां (? व्यवसीयमानायां) परमाणुप्रतीत्यंशेऽपि साक्षात्त्वमनुभूयत इत्यत्र न नः संप्रतिपत्तिः KhaṇḍanKhā. 609. 22.

अनुव्यवसीयमानत्व (anuvyavasīyamāna-tva) *n.* the state of being referred to by after-cognition or recogniton दृष्टो ह्यस्यानुव्यवसीयमानज्ञानविशेषणे घटादौ व्यापार, इन्द्रियव्यापारविगमेऽपि सौदामिनीसम्पातादौ सकृदुपजायमानस्यार्थनिश्चयस्य समन्धकारेऽप्यनुव्यवसीयमानत्वात्, तस्य चानुव्यवसायस्य साक्षात्कारित्वात् NyāyVārPari. 632. 11.

अनुव्यवसो (anu-vyavaso-) IV. P. A to know after, i.e. to determine subsenquently दुष्करं परमज्ञानं तर्केणात्र (v.l. तर्केणानु)व्यवस्यति MahāBhā. viii. 49. 48; (pass.) to be known after, i.e. to be determined subsenquently (ग्रहणस्वरूपस्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः) कथमनालोचितः स विषयविशेष इन्द्रियेण मनसा वा अनुव्यवसीयेतेति YogBh. 171. 3 (*on* 3. 47); B (pass.) to be recognised अथ ब्रूषे- 'यदा कियद्दूरं बुद्धिपरम्परया सा बाधिता भवत्यद्वैतश्रुतिस्तदा ... यापि बुद्धिः शेषं गत्वा नानुव्यवसीयते तत्रापि तद्बाधोऽवगम्यते, यत्र सा बाध्यते तत्तुल्यन्यायत्वादन्तिमबुद्धेरपीति'। मैवम् KhaṇḍanKhā. 161. 7; न ह्यतद्विषयत्तज्ज्ञानविषयत्वेन, न वा तदविषयकं तद्विषयकत्वेनानुव्यवसीयते TattvCin. i. 529. 6; तन्तुपटादिविषया बुद्धिरत्यन्तभिन्नघटपटादिविषयबुद्धितो विलक्षणानुव्यवसीयते। उतार्थविलक्षणा NyāySu. (Ja.) 360A. 6 (*on* ii. 2. 6); धूमत्वेन पुरोवर्तिनं धूमं साक्षात्करोमि न व्यवहितमित्यनुभवाच्च। अन्यथा जगतीगतसकलधूमव्यक्तीरहं साक्षात्करोमीत्यनुव्यवसीयेत AdvaiSi. 345. 4 [to perceive, MW.]

अनुव्यवस्यमान (anu-vyavasyamāna) *adj.* being known after, i.e. being determined subsenquently करोतिरुत्पादनार्थः। उत्पत्तिस्तु कर्मस्था। ... यत्नार्थत्वे तु नैतत् सिध्येत्। ज्ञानेच्छादिवद् यत्नस्य कर्तृस्थत्वात्। एतेन 'अनुव्यवस्यमानेऽर्थे' इति व्याख्यातम् SiddhāKau. 469A. 7 (*on* iii. 1. 87)

अनुव्यहार (anu-vyavahāra) *m.* 1 regular action अभिचारानुव्या (v.l. ॰व्यव)हारयोश्च क्वचित्फलदर्शनात् ... चरेद् धर्मान् KāmSū. 19. 18 (1. 2); 2 regular, successive (in stages) or corresponding process, operation or business, cf. **अनुव्यवहारतस्**.

अनुव्यवहारतस् (anuvyavahāra-tas) *adv.* on account of regular, successive (in stages) or corresponding process, operation or business आलपनसंलपनप्रतिसंमोदनैः ... लौकिकार्थानुव्यवहारतः आहूतस्यागमनगमनतः ... चित्तानुवर्तनता BodhiBhū. 97. 18 [DBHS.]

अनुव्यवहारहेतु (anuvyavahāra-hetu) *m.* cause of regular, successive (in stages) or corresponding process, operation or business दश हेतवः। कतमे। अनुव्यवहारहेतुः। ... विरोधहेतुः। अविरोधहेतुश्च तत्र सर्वधर्माणां यन्नाम नामपूर्विका च संज्ञा संज्ञापूर्वकश्चाभिलापः। अयमुच्यते तेषां धर्माणामनुव्यवहारहेतुः BodhiBhū. 69. 5; यानीमानि विविधानि सस्यानि धान्यसंख्यातानि लोके ... तेषां तावद् यदिदं नाम संज्ञा वाग्व्याहारो विविधः ...। अयमेषामनुव्यवहारहेतुः BodhiBhū. 70. 13 [DBHS.]

अनुव्यवे (anu-vyave-) II. P. to enter in between एते ह त्वेव ते द्विषे देवा ये ते चतुर्धा व्यद्रवंस्तान् विद्रुतानसुररक्षसान्यनुव्यवेयुः ŚatBr. III. iv. 2. 1; ŚatBṛ. (K). IV. iv. 2. 1; य एषां परस्तरामिव भवति स एनाननुव्यैति ŚatBr. III. iv. 2. 3; ŚatBr. (K.) IV. iv. 2. 2, cf. **अनुव्यवगा**.

अनुव्यवेत्य (anu-vyavétya) *ger.* having entered in between ते तान् ह तथा विष्ठितानसुररक्षसान्यनुव्यवेत्य जिघांसांचक्रुः ŚatBr. (K.) IV. iv. 3. 6.

अनुव्यश् (anu-vyaś -) V. Ā. to come up to यावन्मात्रेण युगुपाध्वर्युर्गृह्णाति ... तावद्भ्योऽनुविभवन्त्युग्रे स्तुतशस्त्रेऽनुव्यश्नुते ŚatBr. X. iii. 5. 12.

अनुव्यस् (anu-vyas-) IV. P. to scatter along एतद्ध वै साम प्रजा इमा अनुव्यास JaimiBr. 1. 154.

अनुव्याकृ (anu-vyākṛ-) VIII. P. **1** to explain or analyse after प्रयोजनसद्भावे भाव्यदिशा शिष्या एवानुव्याकरिष्यन्ति NyāySu. (Ja.) 4A. 1 (*on* i. 1. 1); **2A** to prophesy afterwards, cf. **अनुव्याकृत**; **2B** to elucidate, especially a question, DBHS.

अनुव्याकृत (anu-vyākṛta) *adj.* prophesied afterwards अतः प्रभृति ... अनुव्याकृतो बुद्धे भविष्यसि इति। ततः पश्चात् ... भगवतानुव्याकृतम् MaVastuAva. i. 2. 2; अयमेव भगवांछाक्यमुनिरनुव्याकृतः MaVastuAva. i. 2. 7 [DBHS.]

अनुव्याख्या (anu-vyākhyā-) II. P. [P. ii. 4. 54] **1A** to explain after or further यदा वै चन्द्रमाः क्षीयते चाप्यायते च तदनुव्याख्यास्यामः ṢaḍviBr. iv. 6. 1; एतं त्वेव ते भूयोऽनुव्याख्यास्यामि ChāndoU. viii. 10. 4; viii. 9.3; viii. 11.3; ता अनुव्याख्यास्यामः BaudhGS. i. 1. 2; iii. 3. 3; तस्यानुव्याख्यास्यामः BaudhDS. i. 1. 2; iii. 1. 4;ताननुव्याख्यास्यामः ĀgniveGS. iii. 10. 1 (170. 16); तस्य समुदाचारलक्षणं सर्वमनुव्याख्यास्यामः MahāBhā. xii. 184. 10; तथानुव्याख्यास्यामः CaraS. i. 12. 7; i. 27. 5 (1922 Ed.); द्विदोषजानीतराणि तान्यनुव्याख्यामः KāśyaS. 116A. 13; 37A. 27; एतं त्वेव ते भूयोऽनुव्याख्यास्यामि BrahmSūBh. (Śaṅ.) 177. 7 (*on* i. 3. 19); अथ दुर्विरिक्तलक्षणान्यनुव्याख्यास्यामः Hastyāyur. 620. 3 (4. 7); **1B** to explain in order or succession तेषां षण्णां रसानामेकैकस्य यथाद्रव्यगुणकर्माण्यनुव्याख्यास्यामः CaraS. i. 26. 40 (1922 Ed.); **2** to denote, to express, cf. **अनुव्याख्येय**.

अनुव्याख्या (anuvyākhyā) *f.* title of a work, pw.

अनुव्याख्यान (anu-vyā́khyāna) *n.* A name of a certain Brāhmaṇa text which explains difficult Mantra texts अस्य महतो भूतस्य निश्वसितमेतद्यद् ऋग्वेदः ... श्लोकाः सूत्राण्यनुव्याख्यानानि ŚatBr. XIV. v. 4. 10; BṛĀraU. ii. 4. 10; MaiU. 6. 32; MaitrīU. 6. 32; श्लोकाः सूत्राण्यनुव्याख्यानानि ... वाचैव सम्राट् प्रज्ञायन्ते ŚatBr. XIV. vi. 10. 6; BṛĀraU. iv. 1. 2; सूत्राण्यनुव्याख्यानानि ... अस्यैवैतानि सर्वाणि निश्वसितानि ŚatBr. XIV. vii. 3. 11; BṛĀraU. iv. 5. 11; अनुव्याख्यानानि मन्त्रविवरणानि ... वस्तुसंग्रहवाक्यविवरणान्यनुव्याख्यानानि BṛĀraUBh. 309. 8 (*on* ii. 4. 10); अनुव्याख्यानानि संग्रहविवरणानि VedāntKa. 218. 9 (*on* i. 4. 19); **B** name of the commentary (by Ānandatīrtha *on* Brahmasūtrabhāṣya) इति श्रीमदानन्दतीर्थ° ... °विरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने प्रथमाध्यायस्य प्रथमः पादः AnuVyā. 11A. 1 coloph.; चशब्देनानुव्याख्याने प्रयोजनसद्भावं समुच्चिनोति NyāySu. (Ja.) 313. 13 (*on* i. 1. 1); अत एवानुव्याख्याने जिज्ञास्योऽयं विधीयत इति Nyāyāmṛ. 623B. 7; अत्रोक्तप्रथमाध्यायप्रथमपादेऽनुव्याख्याने VaiyāBhū. 76. 24 (*on* 2); तदेतत् तृतीयाध्यायचरणसमाप्तावुक्तमनुव्याख्याने VaiyāBhū. 244. 19 (*on* 65)

अनुव्याख्याननलिन (anuvyākhyāna-nalina) *n.* lotus in the form of Anuvyākhyāna (the commentary by Ānandatīrtha) अनुव्याख्याननलिने चञ्चरीकति मे मनः NyāySu. (Ja.) 1A. 9 (*on* i. 1. 1)

अनुव्याख्यामृताम्भोधि (anuvyākhyāmṛtāmbhodhi) *m.* ocean of nectar in the form of Anuvyākhyāna (the commentary by Ānandatīrtha) अनुव्याख्यामृताम्भोधेः समुत्पन्नातिनिर्मला। इयं न्यायसुधा ... सेव्यतां सदा NyāySu. (Ja.) 657 A. 1 (*on* iv. 4. 8)

अनुव्याख्येय (anu-vyākhyeya) *adj.* to be denoted or expressed subsequently अनेकार्थत्वाद्धातूनामन्यवचनमात्र एवाख्यातेनानुव्याख्येयः ManuBh. ii. 251. 23 (*on* 9. 37)

अनुव्याचक्ष् (anu-vyācakṣ-) II. Ā. to pronounce or explain afterwards चतुर्होतॄन् होतानुव्याचष्टे ब्रह्म वै चतुर्होतारः JaimiBr. 3. 306.

अनुव्याध (anu-vyādha) *m.* **1** piercing weapon, obstructing weapon दक्षिणा मा दक्षिणतो दक्षिणा पातु सव्यतः। पश्चादनव्याधात्? (°दनुव्याधात् JAOS. 40. 163) पातु सर्वस्या भवहेत्याः AV. (P.) vii.15.1 (*better* VIŚVA. अनुव्यध् IV. P.); **2** continuity, permeation नाप्यननुभाविकः प्रत्ययेष्वेकानुव्याधः शक्यानुमानः, नरविषाणवदनुपलब्धिविरोधात् TattvBi. 48. 2; **3** relation, association (रेवत्या) मुखामोदं मदिरया कृतानुव्याधमुद्वमन्। जगाद ŚiśuVa. 2. 20 (comm. कृतसंसर्गम्) [blending, intermixture, MW., APTE]

अनुव्याधवत् (anuvyādha-va(n)t) *adj.* [*f.* -ī] possessing continuity or permeation गकारादयोऽपि ... एकस्यामेव स्मृतौ प्रथमानाः सत्यपि पदमिति व्यपदेशाभेदे नैकानुव्याधवन्तः TattvBi. 52. 7; एकानुव्याधवती हि प्रख्या TattvBi. 52. 9.

अनुव्याधविरहित (anuvyādha-virahita) *adj.* devoid of continuity or permeation अनपेक्षाश्च प्राञ्चः प्रत्ययाः स्तम्भकुम्भाम्भोरुहाद्यवगाहिन इवाभिन्नानुव्याधविरहिताः ... न परस्परं स्वगोचरं संभिन्दन्ति TattvBi. 47. 5.

अनुव्याप् (anu-vyāp-) V. P. to pervade, to permeate one after another अथ ह स्माह तक्षको भागेरथिर्मात्स्यो राजानु चतूरात्रः पृष्ठानि व्याप्नोति JaimiBr. 2. 284.

अनुव्यापिनी (anu-vyāpinī) *adj.* (*f.*) pervading or permeating over सर्वलोकानुव्यापिनीं कीर्तिसंपदं तां च लक्ष्मीम् ... अमृष्यमाणा दैत्यगणाः JātaMā. 74. 7 (11. 2 (1))

अनुव्याप्त (anu-vyāpta) *adj.* [*f.* -ā] pervaded, permeated अथ येन वैतानुगृहीतेत्ये (v. l. एताः सिरा अनुव्याप्ता एव एतानुगृहीतेत्ये)त्येष वाव स व्यानः MaiU. 2. 6; स एष वृक्षः इदानीं जीवेन आत्मना अनुप्रभूतः अनुव्याप्तः ... तिष्ठति ChāndoUBh. 391. 1 (*on* vi. 11. 1); विष्णोः सर्वतोमुखस्य स्नेहो यथा पललपिण्डमोतप्रोतमनुव्याप्तं व्यतिरिक्तं व्याप्नुते TripuTāU. 539. 24; NṛPūTāU. 194. 14 (Adyar Ed.1953)

अनुव्यास्था (anu-vyāsthā-) I. P. (*caus.*) to send away (in different directions) यं दिशोऽनुं व्यास्थापयन्ति TaiBr. I. viii. 3. 1; TaiĀ. v. 4. 7 (606. 5); यद् वा एवमदो दिशोऽनुं व्यास्थापयन्ति TaiBr. I. viii. 8. 5 (*better* अनु *adn.*)

अनुव्याहरण (anu-vyāharaṇa) *n.* repeating after, repeated recitation समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा। सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः Rāmā. i. 2. 39.

अनुव्याहरिष्यत् (anu-vyāhariṣyat) *adj.* cursing, reproaching तं हानुव्याहरिष्यन्त उपनिषेदुः ṢaḍviBr. i. 4. 16; तेऽनुव्याहरिष्यन्त आस्तावमुपसेदुः JaimiBr. 1. 75; अथैनमनुव्याहरिष्यन्भवति, तमनुव्याहरेद् ब्रह्मणा त्वा शपामीति BaudhŚS. i. 293. 12.

अनुव्याहार (anu-vyāhāra) *m.* **1** curse, imprecation, execration एष ह तर्ह्यनुव्याहार आस JaimiBr. 2. 269; अथातोऽनुव्याहाराः AitĀ. III. i. 4. 1; ŚāṅkhāĀ. 7. 9 (28. 1); शाकल्यस्य पृथिव्यग्निः पृथिवी वागनुव्याहारः ŚāṅkhāĀ. 7. 3 (26. 25); अनुव्याहारो ह वा आसन्यो मन्त्रस्तस्मान्मा पाहि BaudhŚS. iii. 281. 4; HirŚS. xxvi. 7. 72 (117. 1); ĀpaDS. i (10). 29. 15; कस्यापि रोषणस्य महर्षेः ... अनुव्याहारात् ... अम्भसां निधौ पतितः AvantiKa. 16. 19; **2** expiatory or propitiatory rite शास्त्रस्यानभिशङ्क्यत्वादभिचारानुव्याहारयोश्च क्वचित्फलदर्शनात् ... चरेद् धर्मान् KāmSū. 19. 8 (1. 2) (JayaMa. अनुव्याहारः शान्तिकपौष्टिकम्)

अनुव्याहारभय (anuvyāhāra-bhaya) *n.* fear of curse or execration अनुव्याहारभयं त्वेतेषु KātyŚS. xxv. 10. 15.

अनुव्याहारशापादिरूप (anuvyāhāraśāpādi-rūpa) *n.* [Inst.] in the form of imprecation and curse etc. दिव्यो नानाविधाकारः समुदेत्यस्त्ररूपवान् (व्यूहः) ...। अनुव्याहारशापादिरूपेणैवावतिष्ठते AhirbuS. 10. 50.

अनुव्याहारिन् (anuvyāhār-ín) *adj.* who utters imprecations or execrates, who curses तस्मादु ह नानुव्याहारीव स्यादुत ह्येवंवित्परो भवति ŚatBr. I. vii. 1. 18; ŚatBr. (K.) II. v. 3. 14; नो हैनमनुव्याहारिण स्तृण्वते ŚatBr. IV. V. 2. 3; यर्ह्ययं ब्राह्मणोऽनुव्याहारी मर्ता, तर्हि यष्टास इति JaimiBr. 2. 269; 2. 277.

अनुव्याहृ (anu-vyāhṛ-) I. U. **1A** to curse, to execrate स य एनं शस्ते तूष्णींशंस उप वा वदेत् अनु वा व्याहरेत् AitBr. 9. 7 (255); 33. 6 (856); य एनमनुव्याहरति स आर्तिमार्छति PañcBr. vi. 4. 10; xvii. 4. 3; तान् ह वरुणो राजानुव्याजहार PañcBr. xxiv. 18. 2; हन्तेममनुव्याहराम ṢaḍviBr. i. 4. 16; स यद्येनं प्रथमायाः सामिधेन्यामनुव्याहरेत् ŚatBr. I. iv. 3. 11; यो हैनं तत्रानुव्याहरेत् ŚatBr. II. i. 4. 19; ŚatBr. (K.) I. i. 4. 19; IV. ii. 1. 5; याज्ञवल्क्यं चरकाध्वर्युरनुव्याजहार ŚatBr. III. viii. 2. 24; ŚatBr. (K.) IV. viii. 2. 18; य एनं तत्रानुव्याहरेत् ŚatBr. IV. v. 2. 13; ŚatBr. (K.) II. v. 3. 12; नोऽयं नृशंसकोऽन्त उद्गायत्येममनुव्याहरिष्याम इति JaimiBr. 1. 75; 1. 138; यद्येनं बहिष्पवमानोऽनुव्याहरेत् JaimiBr. 1. 254; 1. 255; अन्तेवासिनमुद्गापयन् स्वयज्ञेऽनुव्याजहार JaimiBr. 1. 337; तमु ह स्व एवान्तेवास्यनुव्याजहार JaimiBr. 2. 305; स यदेवैनं तंदनुव्याहरेत् Kāṭhakasaṅkalana 52. 1; तेनो ह त्रिष्टोमेन वृद्धद्युम्न आभिप्रतारिण ईजे। तमु ह ब्राह्मणोऽनुव्याजहार ŚāṅkhāŚS. xv. 16. 11; तमनुव्याहरेद् ब्रह्मणा त्वा शपामि इति BaudhŚS. i. 293. 13; स्कन्ने अग्निहोत्रे उप वा मीमांसेतानु वा व्याहरेत् VādhūŚS. iii. 19. 15; दीक्षितमुप वा मीमांसेतानु वा व्याहरेत् VādhūŚS. iv. 28D. 6; काले चेष्टन्तमुप वा मीमांसेतानु वा व्याहरेत् VādhūŚS. iv. 69. 4; iv. 80. 4; अथैनमनुव्याहरन्ति ĀpaŚS. x. 2. 11; प्रतिजानन्ननुव्याहरेत् KauśiSū. 49. 16; **1B** to criticise स य एनांस्तथा चक्रुषोऽनुव्याहरेत् JaimiBr.

1. 335; 2. 373; 2. 436; अनुव्याहार्षीन्मामिति यमिति शङ्केत तस्मा आग्नीध्राय आहुती(?ति)वज्रं प्रहरेत् LāṭyāŚS. ii. 1. 10; DrāhyŚS. iv. 1. 11; **2A** to repeat after, to recite over स सत्यं प्रजापतिस्तपस्तप्त्वानुव्याहरद् भूर्भुवःस्वरिति MaiU. 6. 6; **2B** to utter or speak after यदि लौकिकमनुव्याहरेत् BaudhGS. iii. 4. 36; तामनुव्याहरच्छक्तिमापतन्तीं स राघवः। स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा Rāmā. vi. 88. 33; **2C** to pronounce over, cf. **अनुव्याहतB**; **3** to foretell, to predict सत्त्वप्रज्ञावाक्यशक्तिसंपन्नानां राजभाव्यमनुव्याहरेत् मन्त्रिसंयोगं च ArthŚā. i. 55. 2 (1. 11)

अनुव्याहृत (anu-vyāhṛta) *adj.* **A** recited or repeated after अकुशलानुव्याहृतान् कौषीतकीन् मन्य इति धानञ्जय्यः NidāSū. 111. 6 (6. 12); **B** pronounced over द्विरनुव्याहृते राज्ञः स शापो बलवानभूत् MahāBhā. i. 166. 33; *n.* curse, imprecation, MW.

अनुव्याहृतवत् (anu-vyāhṛtava(n)t) *adj.* who has spoken after स तथैव द्रविणराशिर्जगाम (गोवर ?कुबे)रम्। उपस्थितं तु पद्मं निधिपतिरनुव्याहृत (वान्) AvantiKa. 183. 11.

अनुव्याहृति (anuvyāhṛti) *adv.* after pronouncing of the *vyāhṛti* formulae (*i.e. bhūḥ, bhuvaḥ, svaḥ* etc.) यजुर्मयमनुं दिव्यमभ्यस्यन् पुरुषं नरः। अनुव्याहृत्यभीचारपापेभ्योऽपि प्रमुच्यते LakṣmīT. 29. 25.

अनुव्याहृत्य (anu-vyāhṛtyá) *ger.* having cursed विद्वा॑ꣳसꣳ समनुब्रुवन्तमनुव्याहृत्यार्त्तिं न्येति ŚatBr. I. iv. 3. 22; भृगुः ...। अनुव्याहृत्य विष्णुम् ... अब्रवीत् VāyuP. ii. 35. 143; MatsyaP. 47. 108; BrahmāṇḍP. ii. 72. 144.

अनुव्युक्ष् (anu-vyukṣ-) I. P. to sprinkle after यद्देवंता अनुव्यौ॑क्षत सं उक्षांभवत्तंदुक्ष्णं उक्षत्वंम् MaiS. ii. 5. 7 (ii. 56. 14)

अनुव्युच्चर् (anu-vyuccar-) I. P. to move along in different directions मध्ये ह वाऽएतत्प्राणाः सन्त इति चेति चात्मानमनुव्युच्चरन्ति ŚatBr. IX. iv. 3. 6 (*but* MW. to follow in going forth)

अनुव्यूह् (anu-vyūh-) I. P. **A** to move apart after, to transpose अनुष्टुभं छन्दांसि नानुव्यूहन्ति PañcBr. vi. 1. 11; ते खलु शश्वद् भाल्लविनो भक्षाननुव्यूहन्ति (छन्दांसि) NidāSū. 51. 6 (3. 6) (better **अनु** *adn.*); न वयमनुव्यूहामः NidāSū. 51. 9 (3. 6); **B** to shift asunder, to distribute अथानुव्यूहति। सिꣳहासि सपत्नसाही ŚatBr. III. v. 1. 33; **C** to spread along, to arrange accordingly, to level अङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति ... अनुव्यूहति BaudhŚS. ii. 19. 2; ii. 25. 17; उत्तरवेदिमभिमृश्योत्तरेणोत्तरनाभिं खरौ न्युप्यानुव्यूहति BhārŚS. xi. 14. 6; ĀpaŚS. xv. 14. 5; आयतनेषु संभाराननुव्यूहति ĀpaŚS v. 10. 1, चात्वालस्थानात्पुरीषमाहृत्य पृष्टो दिवीति वैश्वानर्यर्चा चितावनुव्यूहति ĀpaŚS. xvi. 15. 1; xvi. 34. 6; HirŚS. xi. 5. 37 (40. 27); xxviii. 2. 29 (814. 2); सं या वः प्रियास्तनुव इत्यूषान्सिकताश्च संसृज्यानुव्यूहति HirŚS. xi. 5. 28 (39.14); तमालभ्य ... दिवीत्यनुव्यूहति HirŚS. xi. 8. 19 (73. 26); अथानुव्यूहति 'आ प्यायस्व' इति गायत्र्या ब्राह्मणस्य ... यथासुष्ठु यथाशर्करमनुव्यूहति BaudhPiMe. i. 18. 23; ĀgniveGS. iii. 8. 2 (162. 19)

अनुव्यूहम् (anuvyūham) *adv.* in accordance with transposition अनुव्यूहमित्येतत् स्यात् NidāSū. 135. 17 (8. 3)

अनुव्यृ (anu-vyṛ-) I. P. to go into वृत्रं मे॑ जघ्नुषं इन्द्रियं वी॒र्यं॑म्। पृथिवीमनु व्यांरत् TaiS. II. v. 3. 3.

अनुव्यृच्छ् (anu-vyṛcch-) VIII. P. [P. \... 3. 78] to go into इन्द्रंस्य वृत्रं जघ्नुषं इन्द्रियं वीर्यं॑। पृथिवीमनु व्यांर्च्छत् TaiS. II. v. 3. 2 (BhaṭṭaBhā. अर्तेः 'पाघ्रा' इत्यादिना ऋच्छादेशः)

अनुव्ये (anu-vye-) I. P. to come to wards इमे वै लोकाः सह सन्तस्त्रेधा व्यायन्। तांस्ते सान्नाय्यम् अनुव्यैनो उ(?तांस्त्रेधान्नाय्यमनुव्यैत्) JaimiBr. 1. 185.

अनुव्रज् (anu-vraj-) I. P. [rarely Ā.] **1Ai** to go after, to follow (pass.) to be gone after, to be followed **ii** to follow (a departing person as a mark of respect) **iii** to follow (for tending or rearing of cattle) **iv** to go after, i.e. to pervade **Bi** to follow, to accompany **ii** to follow, to cling to **iii** to step out **C** to pursue, to chase **D** to follow in death **2Ai** to go to, to reach **ii** to go into, to be born into **iii** to resort to **B** to attain, to obtain **C** to refer to **D** to know **3A** to observe, to practise **B** to imitate **4** to obey, to pay homage **1Ai** to go after, to follow प्रैतु ब्रह्मणस्पतिरित्यनुव्रजेत् ĀśvaŚS. I. iv. 7. 4; (अध्वर्युषु) व्रजत्स्वनुव्रजेत् ĀśvaŚS. I. iv. 8. 22; ते तत्रैव दीक्षोपसदः कृत्वा ... शम्याप्रासेऽहरहर्यजमाना अनुव्रजेयुः ĀśvaŚS. II. vi. 6. 3; उद्गृह्णन्तोऽनुव्रजन्ति MānŚS. 66. 18; अध्वानँ व्रजन्मन्यते पृष्ठतो मे कश्चिदनुव्रजति MānGS. ii. 14. 13; अर्धर्चेनाग्नीषोमौ प्रणीयमानावनुव्रजति VaitāSū. 15. 16; सहाग्नित्रयेण ... रं शङ्कुं संपातवन्तमुदगृह्य निखनन्ना अनुव्रजति KauśiSū. 51. 1; (शिष्यः) गच्छन्तमनुव्रजेत् (गुरुम्) GautDS. i. 2. 33; कथं व्यतिक्रमन्धूते पार्थौ माद्रीसुतौ तथा। अनुव्रजन्नरव्याघ्रम् (v. l. अनुव्रजेतां राजानम्, अन्वव्रजन्नरव्याघ्राः) MahāBhā. i. 56. 8; (देवयानीम्) ताम् ... अनुवव्राज ... नृपः MahāBhā. i. 78. 24; MatsyaP. 32. 25; वेश्याः पुत्रस्य पन्थानमनुव्रजन्तु MahāBhā. iv. 1066* (8); पश्चाच्छूरं भीरवोऽनुव्रजन्ति MahāBhā. xii. 100. 16; भगीरथः ...। प्रायादग्रे महातेजा गङ्गा तं चाप्यनु(?न्व)व्रजत् Rāmā. i. 919* (8); (पौलस्त्यम्) अङ्गनाशतमात्रं तु तं व्रजन्तमनु(?न्व)व्रजत् Rāmā. v. 16. 10; अन्वव्रजन्नाश्रमिणस्ततस्तम् BuddhaC. 7. 35; युवराजम् ... विशुक्रमनुवव्राज सेना BrahmāṇḍP. iii. 28. 4; शिष्य इव तां व्रजन्तीमनुवव्राज Kād. 132. 23; अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् BhāgP. x. 25. 7; तदाज्ञां प्राप्य ...। दशाननवरस्त्रीणां सहस्राण्यनुवव्रजुः PadmP. (Ra.) 46. 72; शक्रं व्रजन्तमनुवव्रजुः (देवाः) MahāP. 22. 20; उपश्रुतवृत्तान्तश्च मातरं व्रजन्तीं सोऽनुवव्राज KāvyMī. 7. 18; भीमो ह्यनुवव्राज तं नृपम् SkandP. i (2). 65. 43; यः। अनुव्रज्यात् तत्फलं वै प्राप्नोति SkandP. ii. (2). 33. 71; अनुवव्राज तां (सरस्वतीम्) गङ्गा PadmP. v. 18. 179; तं सूर्यवर्मचन्द्राद्या डामराश्चानुवव्रजुः RājTa. (Ka.) 7. 357; विजयम् ... तं सुहृदोऽनुवव्रजुः RāghPāṇ. (Ka.) 13. 29; निःसत्त्वोऽहं कथं दृष्टः प्रभुं नानुव्रजामि तत् PrabhāC. 7. 28; (pass.) to be gone after, to be followed अन्वव्राजि ...। पार्थिवैः ... सः (कुमारपालः) DvyāśraKā. 18. 3; **1Aii** to follow (a departing person as a mark of respect) (अतिथिम्) तं भोजयित्वोपासीत आसीमान्तमनुव्रजेत् VāsiDS. 11. 15; ŚankhaLiDS 133. 13; कृत्वा धुर्यस्य पित्र्यस्य प्रणम्यानुव्रजेत्ततः GobhiSm. 1. 55; अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत् YājñaSm. 1. 113; (पाण्डवाः) तेऽनुव्रजत भद्रं वो विषयान्तं नृपोत्तमान् MahāBhā. ii. 42. 39; अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम्। MahāBhā. xiii. 7. 6; iii. 12* (2); पतिसंमानिता सीता भर्तारमसितेक्षणा। आद्वारमनुवव्राज Rāmā. ii. 14. 17; यमिच्छेत्पुनरायान्तं नैनं दूरमनुव्रजेत् Rāmā. ii. 35. 37; लोक आ वनान्तादोदकान्तात्प्रियं पान्थमनुव्रजेदिति MahāBh. i. 340. 14 (*on* i. 4. 56); कादम्बरीवर्जमशेषकन्यकाजनो गुणगौरवाकृष्टः परवश इव तं व्रजन्तमाबहिस्तोरणादनुवव्राज Kād. 210. 4; सापि तमनुवव्राज प्रस्तुतयात्रं शुचाकुलिता KuṭṭaMa. 449; चचालेश्वरवर्मा च ... अनुवव्राज चोदश्रुः मुन्दरी KathāSaSāg. x. 1. 105; **1Aiii** to follow (for tending or rearing of cattle as an expiation) तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत् ManuSm. 11. 111; (प्रमेही महाधनः) तन्मूत्रशकृद्भक्षः सततमनुव्रजेद् गाः SuśruS. iv. 11. 12; (गोघ्नः प्रायश्चित्तार्थम्) गवां मध्ये वसेद्रात्रौ दिवा गा वै ह्यनुव्रजेत् BṛYamaSm. 4. 15; ParāSm. 8. 31; न दिवा गा अनुव्रजेत् ParāSm. 9. 56; **1Aiv** to go after, i.e. to pervade, cf. **अनुव्रजत्** **1Av**; **1Bi** to follow, to accompany अन्वव्रजत् साथ पतिं पतिव्रता BṛDe. 4. 3; नकुलः सुबलं राजन्सहपुत्रं समन्वयात् अन्वव्रजत् (v. l. अनुव्रजत्) MahāBhā. ii. 42. 43; न मातृपितृबान्धवा न संस्तुतः प्रियो जनः। अनुव्रजन्ति संकटे व्रजन्तमेकपातिनम् MahāBhā. ii. 309. 49; रामम् ... लक्ष्मणः ... अनुवव्राज Rāmā. i. 56* (57e*) (2); राजा कैकेयीमिदमब्रवीत्। अनुव्रजिष्याम्यहमद्य रामम् Rāmā. ii. 32. 22; युवराजम् ... विशुक्रमनुवव्राज सेना BrahmāṇḍP. iii. 28.4; अनुरागवती संध्या प्रयान्तं भानुमालिनम्। अनुवव्राज BrahmāṇḍP. iii. 27. 27; (रामम्) तं पुनः पातालकुञ्जे रन्तुमिवोत्सुका MahāvīC. 4. 41; अनुवव्राज वैदेही सीतालक्ष्मणमात्रकात्परिजनादन्यो न चानुव्रजेत् BṛDharmaP. i. 19. 24; स ... रामम् लक्ष्मणश्च महाबलः। RājTa. (Ka.) मध्यस्थाननुव्रज्याकृतेऽखिलान्। प्रार्थयामास तेनापि सन्नास्तमनुवव्रजुः 7. 761; यातां निशां द्रुतमनुव्रजतीव चन्द्रः Jīvān. 134. 5; विश्वामित्रः श्वा भूत्वा गुढमुर्वशीवशगः। अन्वव्रजत्स्मरार्तः UpadeŚ. 63; **1Bii** to follow, to cling to लोभमोहादयोऽप्येनम् ... अनुवव्रजुः ParamāKā. 45. 50 (? 49); **1Biii** to step out, cf. **अनुव्रजत्** **1Aiv**; **1C** to pursue, to chase ततस्तां कौरवीं सेनाम् ... भीमः शरैस्तीक्ष्णैरनुवव्राज पृष्ठतः MahāBhā. vi. 54. 18; (दैत्यान्) अनुवव्राज तान्विष्णुः ... पातालम् ŚivaP. iii. 22. 44 (321B. 1); (पाशजमृगयायाम्) प्रसार्य वध्रमेकत्र परतोऽनुव्रजेन्नृपः Mānaso. iv. 15. 1712; **1D** to follow in death त्वाम् ...। अनुव्रजामि विधवा न स्थास्ये क्षणमप्युत SkandP. iii (1). 12. 56; **2Ai** to go to, to reach अनुव्रजेत् सर्वपशूनां पत्नीसंयाजानिति धानञ्जय्यः LāṭyāŚS. v. 4. 3; DrāhyŚS. xiii. 3. 19; सहजं च गाढमतिमुक्तमं तम इत्यतः पुरमनुव्रजसि SaṃkṣeŚā. 3. 41 (ii. 172. 2); पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ BhāgP. ii. 3. 22; **2Aii** to go into, to be born into जन्तुर्वै भव एतस्मिन् यां योनिमनुव्रजेत् BhāgP. iii. 30. 4; **2Aiii** to resort to (नागिला भवदेवमुवाच) तदद्यापि निवर्तस्व गुरुपादाननुव्रज PariPar. 1. 373; **2B** to attain, to obtain यजेच्च विद्वान्विधिवत् त्रिवर्गं चाप्यनुव्रजेत् MahāBhā. xii. 28. 42; असंनिविष्टा मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिः CāṇaRāNīŚā. 8. 129;

यो भोगो ह्यङ्गभावमनुव्रजेत् JayāS. 13. 176; अग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत् MārkP. 40. 39; सन्तश्च संतोषमनुव्रजन्ति VāmaP. 2. 3; **2C** to refer to, cf. अनुव्रजत् **2A**; **2D** to know, cf. अनुव्रजत् **2B**; **3A** to observe, to practise पौरस्त्यैः शोधितं मार्गं को वा नानुव्रजेज्जनः MahāP. 1. 31; **3B** to imitate निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्। अनुव्रजाम्यहं नित्यम् BhāgP. xi. 14. 16; **4** to obey, to pay homage, cf. अनुव्रजत् **3** [to visit seriatim, MW.]

अनुव्रज (anu-vraja) *m.* the following after सन्ति कुलपुत्र सत्त्वाः, ये ... अनुव्रजन (v.l. अनुव्रज DBHS.) मात्रेण ... अवैवर्तिका भवन्त्यनुत्तरायां सम्यक्संबोधौ GaṇḍVyū. 427. 6 [DBHS.]

अनुव्रज (anu-vraja) *adj.* pursuer or chaser (सः ... अपश्यत्) तांश्चाकाण्डपरिभ्रष्टान् ... तांस्त्वनुव्रजान्। ... तान् व्याधानेकलान् सुतान् YogVā. iii. 120. 11 (comm. स्वानुगान्)

अनुव्रजत् (anu-vrajat) *adj.* [*f.* -nti] **1Ai** going after, following **ii** following (a departing person as a mark of respect) **iii** walking **iv** stepping out, moving forward **v** going after, i.e. pervading **B** accompanying **2A** referring to **B** knowing, understanding **3** obeying, paying homage **4A** reaching **4B** chasing, persuing **1Ai** going after, following उत्तरमग्निमनुव्रजन्नुत्तराः (प्रव्रूयात्) ĀśvaŚS. I. ii. 17. 6; I. iv. 4.3; I. iv. 10. 2; तं (धर्मम्) ह्रियमाणं यथेतमनुव्रजन् जपेत् LāṭyāŚS. v. 7. 3; DrāhyŚS. xiv. 3. 4; i. 3. 28; तं सीतया सह वीर्यवान्। पृष्ठतोऽनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् Rāmā. iii. 16. 3; तपस्विनं कंचिदनुव्रजन्तं तत्त्वं विजिज्ञासुरिदं बभाषे BuddhaC. 7. 11; तं मातरो देवमनुव्रजन्त्यः ... पद्माकरं चक्रुरिवान्तरीक्षम् KumāSaṁ. 7. 38; सानुव्रजन्ती राजानं राजर्षेर्यजतः पथि BrahmāṇḍP. ii. 56. 44; अन्येऽप्यनुव्रजन्तो यातारं काकवद्विहगाः BṛSaṁ. 95. 48; अनुव्रजन्तं परिवारवर्गं प्रव्याहरन्ती किल नाम किञ्चित् JānaHa. 7. 21; आतपं नष्टतेजसमनुव्रजन्मुहुः। ... तमः JānaHa. 8. 57; निवर्त्य सोऽनुव्रजतः कृतानतीनतीन्द्रियज्ञाननिधिर्नभः सदः। समासदत्सादितदैत्यसंपदः पदं महेन्द्रालयचारुचक्रिणः ŚiśuVa. 1. 11; अहं चण्डसिंहमनुव्रजन्। अन्यत्रैव गतः क्वापि दिङ्मोहमुषितस्मृतिः BṛKathāŚloSaṁ. 20. 229; (राजा) प्रणयादनुव्रजतो मुनीन्त्रिदमवादीत् NalaCam. 6. 31 (4); पुत्रो वदति ... अहं विधाताहं त्वष्टाहं प्रतिष्ठास्मीति। तान्येतान्यनुव्रजन्नाश्रमापातयेत् KaṭhRuU. 1; प्रव्रजन्तं (पुत्रम्) तमालोक्य कृष्णद्वैपायनो मुनिः। अनुव्रजन्नाजुहाव पुत्रविश्लेषकातरः ŚukRaU. 260. 8 (3. 21);ताननुव्रजतस्तस्य सेतुभङ्गात्परिच्युताः। लोष्टद्विजातयो विप्रा वितस्तायां विपेदिरे RājTa. (Ka.) 8. 718; दक्षिणानिल प्रावीण्यं यत्प्रगल्भमिह सहकारलतामनुव्रजन्। अश्रान्तं साभिलाषः स्पृशसि ChandaśCū. ii. 332. 3; आरक्षकजनैः साकं नन्दनैरपि पञ्चभिः। अनुव्रजन् धनः श्रेष्ठी सुतामयममन्यत MalliC. 8. 275; उष्ट्रोऽपि समायातोऽनुव्रजन्महिषीव्रजान् RauhiC. 106; प्रधानैर्भणितो नलः 'चिरसेवकानप्यस्मान् त्वामनुव्रजतः कूबरो निवारयति' KathāK. 148. 18; अनुव्रजन्त्यः कलहंसकारवान्मृगेक्षणास्तत्र मरालबालिकाः Raghunā. 11. 54; गच्छन्पुर- स्तस्य रथो यथेच्छं गङ्गा च पश्चात्तमनुव्रजन्ती Gaṅgāva. 6. 44; **1Aii** following (a departing person as a mark of respect) अभ्यागतं श्रान्तमनुव्रजद्भिर्देवाश्च सर्वे पितरोऽग्नयश्च VṛGautaSm. 535. 10 (6); वनान्तपर्यन्तमुपेत्य ... । न्यवर्ति दृष्टिप्रकरैः पुरौकसामनुव्रजन्बन्धुसमाजबन्धुभिः NaiṣC. 1. 75; **1Aiii** walking श्मशानं च शवं दृष्ट्वा प्रदक्षिणमनुव्रजन् KulaCūT. 4. 7; देहेन जीवभूतेन लोकाल्लोकमनुव्रजन्। भुञ्जान एव कर्माणि करोत्यविरतं पुमान् BhāgP. iii. 31. 43; **1Aiv** stepping out, moving forward बहिः प्रदक्षिणं कुर्यात्पदान्यष्टावनुव्रजन्। बन्धुवर्गेण सहितः पुत्रभार्यासमन्वितः MatsyaP. 17. 60; **1Av** going after, i.e. pervading अनुव्रजद्यित्प्रतिबिम्बशक्तिः विज्ञानसंज्ञः प्रकृतेर्विकारः ViveCū. 187; यो हि नामैतानि सादृश्यास्तित्वेन सामान्यमनुव्रजन्त्यपि ... द्रव्याणि स्वपरावच्छेदेनापरिच्छिन्दन् ... श्रामण्येनात्मानं दमयति स खलु न नाम श्रमणः TattvPradī. (A.) 114. 6 (*on* 1. 91); **1B** accompanying तमेकवसनम् ...। अनुव्रजन्ती बहुला न स्वपामि निशाः सदा MahāBhā. iii. 62. 31; अनुवर्तती (v.l. अनुव्रजन्ती) तु भर्तारं जगाम मृदुगामिनी MahāBhā. iii. 280. 33; त्वया कार्यं नरव्याघ्र मामनुव्रजता कृतम् Rāmā. ii. 41. 7; आसीनश्च शयानश्च गच्छंस्तिष्ठन्ननुव्रजन्। भुञ्जानोऽथ पिबन्वापि रुद्रमेवान्वचिन्तयत् MatsyaP. 180. 7; विदह्यमानौ युगपत्तदानीं पतिप्रियौ स्वालयपावकेन। अनुव्रजन्त्या तनुजीविताभ्यामभव्यया भव्यमिव व्यराजि RāmC. 22. 72; अनुव्रजन्तीं दयितामवस्थाप्य कथंचन। प्रतस्थे पुरतः पार्थः सतूणधृतकार्मुकः PāṇḍaC. 5. 68; नाथप्रिया नाथमनुव्रजन्ती। ... यद्वा सवित्रीति यथार्थमूचे Yādavā. 13. 97; शून्येनानुव्रजन्ती प्रियमतिऋजुना लोचनेनापरेण। बाला KaṁVa. 4. 42; **2A** referring to अखण्डवाक्यार्थमनुव्रजन्ती समन्वयोत्थापितबुद्धिवृत्तिः। ... सद्यः परिम्लायति SaṁkṣeŚā. 2. 96 (ii. 61. 2); **2B** knowing, understanding विशकलितमनुव्रजन्विचित्य स्थपतिरिव त्वमजीघटः षडङ्गम् AmṛUda. 4. 62; **3** obeying, paying homage तं पूर्वनैदाघरविप्रतापमनुव्रजन्सोऽपि न जन्तुहिंसाम्। चक्रे सुपाञ्चालकसर्वपाञ्चालकार्यपाञ्चालकलोक उच्चैः DvyāśraKā. 20. 35; **4A** reaching तस्या दृशो नृपतिबन्धुमनुव्रजन्त्यास्तं बाष्पवारि न चिरादवधीवभूव NaiṣC. 3. 131; **4B** chasing, pursuing विहिते राज्ञा तदष्टाहमहोत्सवे। चक्रमायुधशालातः पूर्वस्यां प्रस्थितं दिशि। तद् नृपोऽनुव्रजन्नब्धौ तीर्थमासाद्य मागधम् PārśvC. 4. 100.

अनुव्रजत्स्त्री (anuvrajat-strī) *f.* woman who is going after or following तस्याः कराग्रात्स तु कन्दुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः। वासः ससूत्रं लघु मारुतोऽहरद्भवस्य देवस्य किलानुपश्यतः BhāgP. viii. 12.23.

अनुव्रजन (anu-vrajana) *n.* **Ai** act of following (a departing person as a mark of respect) (भरतः) कृतानुव्रजनं किञ्चित् सिन्धुदेवीं व्यसर्जयत् MahāP. 32. 83; तस्यानुव्रजनं कार्यं द्वितीयेऽहनि काश्यप NīlaP. 666; मत्स्यपुराणे त्वनुव्रजने ... उक्तम्। बहिः प्रदक्षिणं कुर्यात् पदान्यष्टावनुव्रजेत्। बन्धुवर्गेण सहितः पुत्रभार्यासमन्वितः। अनुव्रज्य निवर्तेत CaturCin. iii (i). 1495. 7; **Aii** act of going after or following अनुगमनं बुद्धिपूर्वमनुव्रजनम् ManuBh. i. 469. 10 (*on* 5. 102); अनुगमनेन अनुव्रजनेन SmṛtiCan. iv. 383. 16; **B** act of accompanying मन्दारकस्य दयितासि मनोहराङ्गि तस्यैव सांप्रतमनुव्रजनं भवत्या: RasSa. 50.

अनुव्रजनपरा (anuvrajana-parā) *adj.* (*f.*) intent on, i.e. engaged in following खरकरानुव्रजनपराम्बरचरचमूरचितारुणमणिविमानप्रभापटलतुलने YaśasCam. ii. 4. 1 (comm. पृष्ठतो गमनतत्परा)

अनुव्रजनप्रदक्षिणीकरणान्त (anuvrajanapradakṣiṇīkaraṇānta) *adj.* ending with following and circumambulation अनुव्रजनप्रदक्षिणीकरणान्तपाश्चात्याङ्गजातसहितं परिसमाप्य ... प्रधानं साङ्गमनुष्ठातव्यम् SmṛtiCan. v. 383.12.

अनुव्रजनमात्र (anuvrajana-mātra) *n.* [Inst.] by merely following सन्त्यनुव्रजनमात्रेण ... अवैवर्तिका भवन्त्यनुत्तरायां सम्यक्संबोधौ GaṇḍVyū. 427. 6 [DBHS.]

अनुव्रजनविनय (anuvrajana-vinaya) *m.* politeness (in the form) of following (as a mark of respect) अहम् ... विसृज्य ... अनुव्रजनविनयेन च गुरून् YaśasCam . ii. 22. 3.

अनुव्रजनीयगुणापेक्षा (anuvrajanīyaguṇāpekṣā) *f.* [Inst.] in proportion to the quality or greatness of a person to be followed (in respect) त्रिविधा सीमा - वास्तुसीमा, ग्रामसीमा, क्षेत्रसीमेति। सा चानुव्रजनीयगुणापेक्षया व्यवस्थापनीया Aparā. 156. 22 (*on* 1. 113)

अनुव्रजनेच्छा (anuvrajanecchā) *f.* desire for following दीर्णद्विपद्विपशिरोविसृतैर्विशुद्धसंबन्धबन्धुभिरनुव्रजनेच्छयेव। आरोहतो नभसि यद्यशसः सितस्य मुक्ताफलैरतिरयादुदफालि लोलैः Kapphiṇā. 1. 33.

अनुव्रजन्मनस् (anuvrajan -manas) *adj.* whose mind is obeying कृष्णादयः ... अनुमेनिरे। अनुव्रजन्मनास्तेषां तदानीं धर्मनन्दनः PāṇḍaC. 7. 135.

अनुव्रजम् (anuvrajam) *adv.* behind the mob or multitude गजेन्द्राणां त्रिलक्षं च ... आययुस्तेऽप्यनुव्रजम् PāñcaRā. (Nā.) i. 4. 60.

अनुव्रजमाना (anu-vrajamānā) *adj.* (*f.*) accompanying अमलद्युतिसन्ध्या। भासते रविमनुव्रजमानात्यस्तगं पतिमतीव सतीव PadyaVe. 559.

अनुव्रजितव्य (anu-vrajitavya) *adj.* (pred.) to be gone after or traversed रामानन्देन कियद्दूरमनुव्रजितव्यम् CaitaCa. 213. 3 (9)

अनुव्रजिता (anu-vrajitā) *adj.* (*f.*) accompanied by or struck with सुतवसनपयःकणापदेशात् सुचिरमनुव्रजिता इवाम्बुभिस्ताः Kapphiṇā. 10. 34.

अनुव्रजितुम् (anu-vrajitum) *inf.* **Ai** to follow न त्वां प्रकृतयः सर्वाः श्रेणीमुख्याश्च भूषिताः। अनुव्रजितुमिच्छन्ति Rāmā. ii. 23. 13; **Aii** to follow (as a mark of respect) सोऽनुव्रजितुमायातान्नातिदूराद् व्यसर्जयत् MahāP. 8. 40; **B** to accompany यामो वयमिति प्रणयादनुव्रजितुमुद्यतं तम् ... गन्तुमारब्धवानस्मि UdaySuKa. 58. 28.

अनुव्रज्य (anuvraj-ya) *ger.* **Ai** having gone after or followed भुक्तवतोऽनुव्रज्य प्रदक्षिणीकृत्य द्वैधं दक्षिणाग्रान् दर्भान् संस्तीर्य तेपूत्तरेरपो दत्त्वा ĀpaGS. viii. 21. 9; आ मा गन्तां पितरं मातरम् ... इत्यनुव्रज्य GautPiMe. ii. 5. 15; AgniP. 117. 31; ततोऽनुव्रज्य गोविन्दं धर्मराजो युधिष्ठिरः ...। उवाचेदं वचस्तदा MahāBhā. v. 81. 33; प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम्। ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह YājñaSm. 1. 249; अम्बा दूरमनुव्रज्य हितं मह्यमुपादिशत् BṛKathāŚloSaṁ. 18. 176; अनुव्रज्य सुचिरस्ताका ... भुः Kapphiṇā. 16. 117; आङ्गिरसोऽपि ... सनत्कुमारम् ... अनुव्रज्य परिष्वज्य गाढम् ... आससाद ... हैरण्यगर्भमायतनम् NīlaVi. 39. 3; **Aii** having followed (a departing person as a mark of respect) ब्राह्मणांश्च स्वाचान्तान् दत्तदक्षिणांश्चानुव्रज्य विसर्जयेत् ViṣṇuSm. 21. 16; ब्राह्मणांश्च विसर्जयेत्। ... अनुव्रज्याभिवाद्य च

VişṇuSm. 73. 32; मात्रे पितामह्यै प्रपितामह्यै च पूर्ववद् ब्राह्मणान् ... अनुव्रज्य विसर्जयेत् VişṇuSm. 74. 1; देशिकेन्द्र (न्द्रं)स्तु ...। अनुव्रज्य महाबुद्धे व्रजन्तं स्वगृहादिकम् PauṣkS. 32. 82; भक्त्योपकल्पयेदेकं महाभागं विसर्जयेत्। विसर्जयेदनुव्रज्य सुतृप्तश्रोत्रियातिथीन् VedavyāSm. 3. 46; अभिवाद्य पुनर्विप्राननुव्रज्य विसर्जयेत् ŚankhaSm. 14. 24; आसीमान्तमनुव्रज्य ... द्विजाः सर्वे विनिर्वृत्ताः SkandP. iii (2). 35. 61; आसीमान्तमनुव्रज्य भुञ्जीत सह बन्धुभिः SkandP. v (1). 60. 59; अनुव्रज्यातिथिं राम गोदानफलमाप्नुयात् VișṇuDhaP. ii. 92. 56; (तारावली) राजानमुत्थितं व्रजन्तमनुव्रज्य गौरवपरिस्खलिता तामेव भगवतीमनुजगाम UdaySuKa. 118. 11; अनुव्रज्य मुनिं तं च संविमेजे स नापितम् KathāSaSāg. vi. 6. 189; ययातिस्तदभिप्रायं ज्ञात्वानुव्रज्य शोभनम्। आश्वास्य तां ययौ गेहं तस्याः परिणयादृतः KalkiP. iii. 17. 10; निजादनुव्रज्य स (भीमः) मण्डलावधेर्नलं निवृत्तौ चटुलापतां गतः NaiṣC. 16. 117; धर्मजस्तमनुव्रज्य पुरं कृच्छ्रान्न्यवर्तत। पृथासूनुकथानिष्णः कृष्णोऽपि स्वपुरीं ययौ PāṇḍaC. 14. 324; बहिः प्रदक्षिणं कुर्यात् पदान्यष्टावनुव्रजेत्। ... अनुव्रज्य निवर्तेत CaturCin. iii (1). 1495. 10; द्विजात्मजम् ... विप्रोऽप्यनुव्रज्य ययौ स्वमन्दिरं ŚankaDigVi. (Mā.) 12. 62; सविता स तु। अदूरं तमनुव्रज्य क्षीरद्रोर्गेहमागमत् RatnaCūKa. 135; विसृष्टान् ब्राह्मणान् गच्छतः प्रदक्षिणां यथा स्यादेवमनुव्रज्यानुगम्य पितृसेवितं श्राद्धावशिष्टान्नं भुञ्जीत VīraMi. 308. 16 (on 1. 249); सामन्तक्षोणिपालान् ... राज्ञानुव्रज्य रङ्क्षितिपतिरनघः प्राहिणोदादवन्तीम् ĀnandRa. 8. 19; प्रदक्षिणीकृत्य गृहसीमान्तमनुव्रज्य ... जुहोमि BālamBha. i. 552. 26 (on1. 249); श्रीराममनुव्रज्य आगतः सुमन्त्रो दशरथं प्रति MahāN. 3. 23 (1); **Aiii** having followed (in death) सीमन्तिन्यः ...। मुक्तयै पतिमनुव्रज्य श्रयन्ति मणिकर्णिकाम् SkandP. iv. 34. 8; **Bi** having gone (around) प्रदक्षिणमनुव्रज्य सशिष्यः प्रणमेदथ VṛHāriSm. 2. 56; **Bii** having reached अन्ते विष्णुमनुव्रज्य सुषुम्नावर्त्मना यतिः।... एति परमं पदम् BṛBrahmaS. iii. 3. 17.

अनुव्रज्य (anu-vrajya) *adj.* (dead person) to be gone after or followed ऊनद्विवर्षं निखनेत् ... आ श्मशानादनुव्रज्य इतरः YājñaSm. 3. 1; यो मृतोऽसौ श्मशानपर्यन्तं ज्ञातिभिः सपिण्डैः समानोदकैश्च ज्येष्ठः पुरःसरैरनुव्रज्योऽनुगन्तव्यः Mitā. 323. 1 (on 3. 1); आस्म(?श्म)शानादनुव्रज्यः अनुगन्तव्यः SmṛtiCan. vi. 21. 16.

अनुव्रज्यमान (anu-vrajyamāna) *adj.* **1** being pursued or chased क्रव्यादवर्गैरनुवाच्य(?व्रज्य)मानाः केचित् VarāngaC. 6. 24; **2A** being followed ततोऽहम् .. कुमारीजनेनानुव्रज्यमानो गत्वान्तः TilaMañ. 386. 7; **2B** being followed (as a mark of respect) एवं संप्रधार्य ... स्वजनैरनुव्रज्यमानः ... नगरान्निःसृतः Pañcā. 3. 23.

अनुव्रज्या (anu-vrajyā) *f.* **Ai** act of following शय्यासमावसथानुव्रज्योपासनानि सदृक्श्रेयसोः समानानि GautDS. i. 5. 34; शुश्रूषानुव्रज्या च यावदध्ययनम् BaudhDS. i. 2. 43; विधीयते। अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ManuSm. 2. 241; जलधिरपि नृपानुव्रज्ययेवोद्यचाल MahāP. 28. 205; अनुव्रज्या गच्छतोऽनुगमनम् ManuBh. i. 252. 28 (on 3. 97); पितृवत्पतृसुहृत्स्वरैरनुव्रज्याद्युनोचिता PrabhāC. 110. 5; **Aii** act of following (a departing person as a mark of respect) अनुव्रज्यामुपासनाम्। उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् ManuSm. 3. 107 (ManvaMu. अनुव्रज्या गच्छतोऽनुगमनम्); शिष्टे च गृहमागते ... अनुव्रज्या DakṣaSm. 3. 6; अभ्युत्थानमिहायातस्सस्नेहं पूर्वभाषणम्। उपासनमनुव्रज्या गृहस्योन्नतिहेतवे SkandP. iv. 40. 73; गच्छतोऽनुव्रज्योक्ता Aparā. 156. 25 (on 1. 113); अभ्युत्थानमनुव्रज्या गतिः स्थाने परिक्रमा BhaktiRaSi. 1. 2. 34; **B** act of accompanying दिङ्नागाश्च करेणुकाशुचमपाकुर्वन्त्यनुव्रज्यया PratāYaBhū. 19. 9; 206. 9 [Kośas give *anuvrajyā* as one of the meanings of: *sādhana*. AmaK. 2573; NānārthaMa. 1044; VIśvaLoK. 209. 146]

अनुव्रज्याकदर्थ (anuvrajyā-kadartha) *m.* useless or futile effort of following अनुव्रज्याकदर्थेन खगेन्द्रालमिति ब्रुवन्। विष्टरादेहमुत्थाय ततः खगवदाप्लुतः YogVā. vi (1). 27. 13.

अनुव्रज्याकृते (anuvrajyākṛte) *adv.* for the sake of following (for safety) स मध्यस्थाननुव्रज्याकृतेऽखिलान्। प्रार्थयामास तेनापि सञ्जास्तमनुवव्रजुः RājTa. (Ka.) 7. 761.

अनुव्रज्यादिरूपा (anuvrajyādi-rūpā) *adj.* (*f.*) of the form of going after or following etc. अनुव्रज्यादिरूपा गुरोः शुश्रूषा ... कार्या ManvaMu. 82. 27 (on 2. 241)

अनुव्रज्यापरायणा (anuvrajyā-parāyaṇā) *adj.* (*f.*) wholely devoted to or engaged in accompanying निर्गतो दयितां कश्चिदनुव्रज्यापरायणाम्। अयि मुग्धे निवर्तस्व व्रजामि सुखमित्यवाक् PadmP. (Ra.) 73. 164.

अनुव्रज्यामात्र (anuvrajyā-mātra) *n.* mere following (for tending as an expiation) गवामनुगमनं नानुव्रज्यामात्रम् किं तर्हि, परिचर्या ManuBh. ii. 451. 3 (on 11. 256)

अनुव्रणम् (anuvraṇam) *adv.* according to (the size of) the wound व्रणसौक्ष्म्याद् बहुत्वाद्वा कोष्ठमन्त्रमनाविशत्। तत्प्रमाणेन जठरं पाटयित्वा प्रवेशयेत्। यथास्थानस्थिते सम्यगन्त्रे सीव्येदनुव्रणम् AṣṭāSam. ii. 299. 23 (6. 31)

